किरातार्जुनीयम्।

महाकवि-श्रीभारविप्रणीतम्

मल्लि[illegible]य-कोलाचलमल्लिनाथसूरिविरचितया घण्टापथसमाख्यया व्याख्यया

समुद्भासितम्

अन्वय-वाच्यपरिवर्त्तन-वङ्गभाषानुवाद-हिन्दिभाषानुवादैः

श्लोकसूची-विस्तृतभूमिकाप्रभृतिभिः

समुल्लसितम्

—०—

अध्यापक श्रीगुरुनाथविद्यानिधि-भट्टाचार्य्येण

सम्पादितम्

कलिकाता—निवेदितालेन-स्थित संस्कृतविद्यालयात्

श्रीजानकीनाथ काव्यतीर्थ भट्टाचार्येण

प्रकाशितम्।

१३१२ वङ्गाब्दे द्वितीयावृत्तिः

मूल्यम् मुद्रात्रयम्—३)

मिलनेका पत्ता
छात्र-पुस्तकालय
निवेदितालेन
वाग्‌बाजार, कलकत्ता।

১৯ - ৪১ ১১৯ - ৮১
২৮ - ৫৯ ×২৫৯ - ৫৪
৩৮ - ৬০ ×১৩৯ - ৭৯
৪৮ - ৬৮ ৭৪৮ - ১৪
২০৩ + ২৭১ = ৪৭৪

PRINTED BY—
HRISHI KESH GHOSE
AT THE
RUDRA PRINTING WORKS
7, Gour Mohan Mukherjee Street,
Calcutta.

समालोचना ।

दुर्भाग्यवशात् विगतहर्षात् भारतवर्षात् आर्षज्ञानविभाकरे चिराय अस्तं गतेऽपि, तमःसमावृतमानसा भारतवर्षीया आर्य्यवर्य्याः कथमिदानीमपि तिरोहितानन्दसन्दोहं सुखस्मृतिमात्रसर्व्वस्वं स्वजीवनं सार्थकमिव मन्यन्ते, मन्यन्ते च केषाञ्चित् सरसवस्तूनां सञ्जीवनमदिरामहिम्ना, इति चेदनुसन्धीयते केनचिदनुसन्धित्सुना, तर्हि तन्मनसि एतदेव प्रतिभासते यत् अस्यां विजयवैजयन्तोल्लाञ्छितभूम्यां साम्प्रतमपि विभासन्ते एवविधाः केषाञ्चित् निखिललोकचेतःसमाकर्षणचतुराणां पदार्थानां गौरवप्रभाः, याभिः सुरञ्जितहृदयाः सन्तः अद्यापि सर्व्वे अस्मिन्नेव भगवच्चरणरेणुपवित्रीकृते भारतवर्षे जन्मग्रहणेन आत्मानं सफलीकर्त्तुं कामयन्ते। महादेशस्यास्य नैसर्गिकशोभागौरवेण, सनातनधर्म्ममहिम्ना संस्कृतभाषागरिम्ना च, अधुनापि आर्य्यवर्य्याणां भारतवर्षीयानामासनं सर्व्वोपरि वरीवर्त्ति ।

यशःशुधाधवलितदिङ्मण्डलानां वाणीचरणकमलमधुपानां व्यासवाल्मीकिकालिदासभवभूतिप्रभृतीनां भारतीयकविमुख्यानां कवित्ववीणानिक्वणो यद्यपि अस्माकं भाग्यवैगुण्यात् चिराय विलुप्ततामधिगतवान्, तथापि पीयूषवर्षिणो तदनुरणनधारा समीरणसम्पर्कं आत्मानमर्पयन्तोव, स्मारयन्तोव कतिविधा अतीतकथाः, जनयन्तीव विस्मयं वैदेशिकसुधीसमूहानां, मज्जयन्ति विपुलविपुले आनन्दसन्दोहसागरे सहृदयरसिकान् ।

इह खलु जगति कति कति जनाः समुत्पद्यन्ते विलीयन्ते च कालसागरे जलबुद्बुदवत् ; किन्तु "कीर्त्तिर्यस्य स जीवति" इत्यादि सुभाषितं प्रमाणीकर्त्तुमेव अद्यापि भारविकवीनां अर्थगौरवपूर्णवचनरचनपटीयसां प्रसन्नगम्भीरपदायाः (विविक्तवर्णाभरणायाः सरस्वत्याः शान्तमूर्त्तेः शान्तिधारां वितरति प्रशान्तमानसेभ्यः सुमनोभ्यः । यद्यपि अयं कविकुलकरीन्द्रो भारविः कदा कतमं जनपदं जन्मना पवित्रीचकार कमन्वयं वा अलमकार्षीत्, तत् सम्यक् निर्णेतुं शक्तिविरहिता वयं, धारावाहिकेतिहासाभावात् अस्माकमसामर्थ्यं निबन्धनाच्च ; तथापि अस्य सन्धाननैपुण्यवतां प्रज्ञतत्त्वविदां वदनारविन्दसङ्कोचशङ्कया अस्य कवेर्यतुरविर्भावकालादिनिरूपणार्थं कथञ्चिदयत्नाश्रयणं न दोषमावहेत् ।

दृश्यते मुम्बयीमुद्रितकाव्यमाला-ग्रन्थगर्भे प्राचीनलेखमालाशीर्षैक-

उरिच्छेदे त्रयोदशप्राचीनलेखे,—"किरातार्जुनीय पञ्चदश सर्गादिकौ-कारो दुर्विनीत नामधेय" इति अस्मदालोचनोयेन महाकविना विरचितस्य किरातार्जुनीयस्य महाकाव्यस्य नाम।

तथा तत्रैव षोड़शप्राचीनलेखे—"येनायोजि नवेऽश्म स्थिरमर्थ-विधौ विवेकिना जिनवेश्म। स विजयतां रविकीर्त्तिः कविताश्रित-कालिदासभारविकीर्त्तिः" इति षट्पञ्चाशदधिकपञ्चशततमे शकसं वत्सरे (५५६) राज्ञा पुलकेशिना प्रदत्ते ताम्रशासने उत्कीर्णं वचनम्। अत्र कालिदासेन सह भारवेर्नामोल्लेखः समुपलभ्यते। पूर्व्वोक्तत्रयोदशलेखस्तु अष्टनवत्युत्तरषट्शततमे शकाब्दे उत्कीर्णो बभूव। अत एतदेवानुमीयते यत् खिस्ताब्दीय-सप्तम-शतकारम्भेऽपि कालिदासस्येव भारवेः कीर्त्तिर्दिगन्तव्यापिनी आसीत्, न हि अल्पेन समयेन केषाञ्चित् कीर्त्तिकौमुदीधारा समस्तानां दिग्वधूनां मुखमा-वृणोतीति।

खिस्ताब्दीयषष्ठशतकात् पूर्व्वतनो भारविरिति निर्व्विकल्पमनेने-वानुमानेन ज्याकविप्रभृतयः ग्राभ्मणदेशीयाः पाश्चात्यपण्डिताः भारवे-राविर्भावकालं खिस्तीयषष्ठशताब्दोमध्यभागात् पूर्व्वं निर्द्धारयन्ति। मत-मिदमस्मभ्यमपि रोचते।

ये केचित् प्रत्नतत्त्वविदो भारविमाघयोः समकालवर्त्तित्वमुद्घोष-यन्ति न तेषां साधीयान् पक्षः, ("तावद्भा भारवेर्भाति यावन्माघस्य नोदयः।") इत्याद्यरसिकवचनस्य एकान्ततो मूले एव भ्रमापातस्य अयुक्तत्वात्, श्लोकोऽयं अवश्यं कवितात्प्रकर्षानुधावनासमर्थेन नैषधादि-गुणपक्षपातदोषदूषितेन विरचितः। वयन्तु ब्रूमः—माघकविर्न अर्व्वाचीनः, किन्तु भारविस्ततोऽपि प्राचीन इति। माघकविर्भा-रविकृतं काव्यमनुकृत्य स्वोयकाव्यं रचितवान् इत्यत्रापि नास्ति मन्दे-लेशावसरः। शिशुपालवधस्य प्रायेण प्रतिस्थानमेव भारवेरनुकारः संदृश्यते; तथाच प्रथमे सर्गे नारदमुखेन प्रतिनायकस्य कृष्णविपक्षस्य शिशुपालस्य अवस्थावर्णनं तच्छ्रवणेन अनुस्मृतमहावैरस्य बलदेवस्य महदौद्धत्यं, तदुपशान्तये च उद्धवस्य शान्तभावेन नीतिगर्भवचनप्रपञ्चेन तत्सान्त्वनं; भारवावपि प्रथमतो वर्णिवेशधारिणः किरातस्य मुखेन प्रतिपक्षस्य दुर्य्योधनस्य अवस्थावर्णनं, तदनन्तरं अनुस्मृतवैरस्य भीमादेः समुत्तेजनपूर्णवाक्प्रपञ्चः, तत्सान्त्वनाय च शान्तभावेन युधिष्ठिरप्रयुक्तं सान्त्वनं, इत्यादिकमारभ्य पर्य्यालोच्यमाने षपर्य्यन्ते उभयत्रैव सम्यक् परस्परसादृश्यमुपलभ्यते, अतएव यत् परकालोनः कविः माघः पूर्व्वकालीनस्य भारवेरनुकरणं चकारेति सुव्यवस्थितं,

एवं यथा विषयाणां साम्यं तथा श्लोकगतानां भावानामपि मिथस्तथा, यथा केवलमेकस्य श्लोकस्य अपरः श्लोकः अनुवादकतामिवात्मनः प्रत्याययति, तत्र आलोचनाविधौ केषाञ्चिदपि चेतसि अप्रतिभातं अतो न तद्विषये विस्तरः क्रियते ।

इदानीं कवेर्जन्मभूमिमधिकृत्य किञ्चिदालोचयामः । महाराष्ट्रदेश्य-वास्तव्येन राजारामरामकृष्णभागवतपण्डितेन "मर्हाट्टां चासंवधाने चार उद्गार" इति नामधेये महाराष्ट्रभाषाग्रथितप्रबन्धे उट्टङ्कितं—भारविः स्वाविर्भावेन महाराष्ट्रप्रदेशं द्राविड़देशं वा भूषितवान् । 'उरसि शुलभृतः प्रहिता मुहुः, प्रतिहतिं ययुरज्जुनमुष्टयः । भृशरया इव सह्यमहोभृतः, पृथुनि रोधसि सिन्धुमहोर्मयः" । इति किरातार्जुनीयस्य अष्टादशसर्गस्थपञ्चमश्लोकसमालोचनेन स्थिरीक्रियते यत्—सह्यपर्व्वतमाला महाराष्ट्रदेशे विराजते, तत्रैव कवेर्जन्मभूमिरिति । मतमिदं सुनिपुणं विचार्य्य कृतः कटाक्षपातः श्रीमता महामहोपाध्यायेन दुर्गाप्रसादेन, यथा सह्याद्रिनामोल्लेखमात्रेण यदि तत्सन्निहितं किमपि स्थानं कवेर्जन्मभूमितया निर्दिश्येत, तदा दक्षिणदिक्प्रसिद्धानां मलयसह्यसुवेलादिपर्व्वतानां कावेरीगोदावरीताम्रपर्णीभीमावेनादिनदीनाञ्च वर्णयिता हरविजयकाव्यप्रणेता काश्मीररत्नाकरोऽपि किमिति न दक्षिणापथवासीति निश्चीयताम् ? अपिच विन्ध्यारण्यवर्णननिपुणः कविर्वाणोऽपि विन्ध्यवासी कश्चित् भिल्लो भवितुमर्हति । नहि कवयः स्वर्गपातालाद्यनधिगतलोकवर्णनचतुराः तत्तद्देशवासिनो भवन्ति, अपि तु मर्त्या एव । अतएव केवलं तामेव युक्तिमवलम्ब्य नास्य कवेः महाराष्ट्रीयता शक्यते व्यवस्थापयितुमिति ।

केचित्तु दक्षिणादिगेव प्रायेण पण्डितान् प्रसूते, अतः सुपण्डितो भारविस्तस्या एव दिशः प्रसव इति व्याचक्षते, तन्न समीचीनं, तथाभूतानामपि पण्डितप्रकर्षवतां कालिदासकल्हनादीनां दक्षिणदिग्जातत्वाभावात् पाण्डित्यरूपस्य च हेतोर्व्यभिचारात् । अतो नेयमपि युक्तिस्तन्निश्चयमनुकूलयति ।

अपरे ये च केचिद् विद्वांसः किरातार्जुनीये प्रभूतहिमवद्विभूतिवर्णनमवलोक्य हिमगिरिसन्निहितं कमपि जनपदं श्रीमतः कविवरस्यास्य निवासस्थानमिति समामनन्ति, विलसति अस्मिन्नेवानुमाने कथञ्चित् अस्माकमास्था, यतः अद्यापि विद्यते "सिकिम्" इत्यभिधेयस्य जनपदस्य उत्तरदिगुपान्ते इन्द्रकीलनामको हिमवदंशविशेषः, स्थानमिदं महाकविः स्वग्रन्थे सविस्तरं वर्णितवान् । तद् उपत्यकायां अधित्यकायाञ्च अनार्य्याः किरातजातीयाः निवसन्ति, एतेषामेव पूर्व्वपुरुषाः स्वीकृतकिरातवेशस्य विरूपाक्षस्य पक्षाश्रिताः सन्तः पार्थेन सह

अहं न्ने स्म—इत्येतत् सर्व्वं समालोच्य वयन्तु ब्रूमः, यत्—कविशिरोमणिरयं उत्तरदिग्वास्तव्य एव, अपरिज्ञात-महिम्ना दूरस्थेन न केनापि तथा हिमवदैश्वर्य्यवर्णनचातुर्य्यं प्रकाशयितुं शक्यते। निम्नस्था किंवदन्तिकापि मतमेतत् सप्रमाणीकरोति,—

यथा अध्ययनसमये गुरुगृहमधिवसतो गोचारणच्छलेन हिमालयोत्सङ्गदेशं परिभ्रमतस्तत्रत्यनैसर्गिकसौन्दर्य्यसन्दर्शनेन भारवेर्भारतीलीलाप्रकटनचातुरी स्फुरिताभूत्। ततश्च स महाभारतीय-वनपर्व्वस्थषड्विंशाध्यायादेकचत्वारिंशदध्यायपर्य्यन्तां घटनावलीमवलम्ब्य विरचय्य च प्रतिदिनमेकैकं श्लोकं भूर्ज्जपत्रे लिलेख। ततः समयेन तानेव श्लोकनिवहान् एकत्र संगृह्य किरातार्ज्जुनीयमिति नाम्ना प्रकाश्य जनसमाजे परां प्रतिष्ठामलभत। परञ्चैतस्य ग्रन्थस्य भारविरित्यपरमभिधानमपि "कवेर्व्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा" इत्यादि शास्त्रप्रमाणतः प्रचरतितराम्।

किरातार्ज्जुनीयं विना अस्य महाकवेर्नान्यत् किमपि काव्यादिकमस्माकं लोचनपथे मनोमार्गं वा पान्थायते. अयमेकमिदमेव काव्यं किरातार्ज्जुनीयं निर्म्माय महाकविसंज्ञया सुधीसमाजे प्रख्यातो जातः।

(रामायणमहाभारतादिनिबद्धं वस्तुजातमवलम्ब्य ये कवयः काव्यं निर्म्मितवन्तः तेषु कालिदासभवभूतिभारविमाघश्रीहर्षभट्टनारायणादय एव उल्लेखयोग्याः, अपरेषां कवितावली सामाजिकानां मानसं तथा न समाकर्षुं शक्नोति।

यद्यपि कविर्भारविः कविकुलशिरोमणिकालिदासभवभूतिवत् वाग्देवतायाः पवित्रचरणाम्बुजं निषेव्य तादृशममरत्वमधिगन्तुं न शशाक, तथापि कठोरसाधनासन्तोषितायाः सर्व्वलोकसमाराध्यायास्तस्याः शुभाशीर्व्वादबलेन सुधीसमितौ कवित्वशक्तेः परां काष्ठां प्रदर्श्य सुमहतीमनन्यसुलभसम्माननामर्ज्जितवानिति यत् तत्र नास्ति केषाञ्चिद् वैमत्यम्। (संसारेऽस्मिन् प्रत्येकमेव पदार्थस्य विशेषत्वं परिलक्ष्यते; नहि जायते पिकस्वरे शुकवाक्यभ्रान्तिः आनन्दाधायकत्वात् प्रत्येकं स्वरामृतमेव रसपिपासूनां ग्राह्यम्, कालिदासगुणमुग्धानां भवभूतिभारतीलग्नचेतसां वा चेतांसि नूनं भारविकविता समाकर्षुं शक्यते। ऋतूनां षण्णामेव समागमेन वत्सरस्य परिपूर्त्तिर्भवति, यथा तेषु ऋतुषु ऋतुराजो वसन्तः तथा कविमुख्येषु कालिदासः कविकुलशिरोमणिरिति मतं सर्व्वथा वितर्करहितं, किन्तु तथात्वेऽपि भारविभनितिर्न उपेक्षणीया। दरश्रोभालोलुपानामपि नीलाम्बुनिधिलावण्यपरिचायिनाम् श्यामलतरुवल्लीशोभासन्तानसमासक्तचित्तानामपि नावहेलनीयतां गन्तुमर्हति शारदेन्दुसौन्दर्य्यमनन्यसाधारणं वस्तु, प्रत्येकमेव कवीनां

काव्येषु भवति कापि विलक्षणता, यया तस्य कवेः स्वभावः सूक्ष्मं सूक्ष्मं तत्र तत्र उपगम्यते, यया च प्रत्येकमेव अनुरागातिरेकः सम एव सम्पद्यते काव्यरसरसिकानाम्, तत्तदत्र सुतरामनुसमिति प्रस्तुतम्। अस्य भारविकवेः पापं प्रति अपकृष्टं कार्य्यं प्रति वीतस्पृहता आसीत् कर्त्तव्यं प्रति सत्कार्य्यं प्रति अनुच्छृङ्खलतां प्रति तस्य अनुरागः आसीत्। भारविरधिगतवान्—यत् तरलभाषया नृत्यमयच्छन्दसा वा गुरुगम्भीराणां विषयाणां उपदेशदानं नैव युज्यते, गम्भीरस्य समुद्रस्य वक्षसि यथा उत्तुङ्गतरङ्गावलो परात्परं विच्छिन्नभावेन समुत्थाय सिन्धोर्गाम्भीरतां आधिक्येन वर्द्धयति, भारविकविर्गम्भीरा भारती भावनिवहस्य तथैव विच्छिन्नभावेन जिगीषावशेनेव काव्यस्य गाम्भीर्य्यं ततोऽपि वर्द्धितमकरोत्। अनुकरणप्रियता भारविरति निकृष्टामन्यत, स हि व्यासमन्तरेण नान्यस्य कस्यापि साहाय्यमादत्ते स्वीयकाव्यनिर्म्माणे, वाग्देवता तस्मै यावतीं शक्तिं प्रादात् तावतीमेव सम्बलतया गृहीत्वा काव्यं विनिर्म्माय गन्तव्यपथमियाय, परकीयं गौरवं आत्मोयतया मत्वा न श्लाघते स्म। तपस्यायामेकाग्रताव्यतिरेकतो न भवति कस्यापि कार्य्यस्य निःशेषतः सिद्धिरिति भारविः समक् जानाति स्म, तदेव तस्य काव्यस्य जीवितरूपम्। तस्य काव्यमालोच्य समाजः, समुन्नतः संयमो दृढ़प्रतिज्ञः कर्त्तव्यपरायणश्च भवतु, अवसन्ने च चेतसि जागर्त्तु भूयानुत्साहः इत्येतावतोव तस्य वासना समवर्त्तत। अलङ्कारगौरवं भारविः न तथा श्लाघाकरमन्यत, अलङ्कारसौन्दर्य्येण कवित्वस्य सौन्दर्य्ये क्रियमाणे बहुष्वेव स्थलेषु कविता भावमाधुर्य्यादिपरिशून्येव व्यवतिष्ठते, प्राणहीनेव व्यवतिष्ठते, किन्तु वर्णनाप्रसङ्गे यदि कदाचित् सुसमञ्जसा अलङ्काराः उन्मेषं गताः, तत्र स कथमपि न बाधको जातः। तदीये काव्ये अलङ्काराणां गहनत्वविरहेऽपि तावद्भिरेव तस्य निपुणालङ्कारिकता प्रतीयते। अस्य च कृतेः किरातार्ज्जुनीयस्य नायकोऽर्ज्जुनः, स च नारायणानुगृहीत इति प्रतिहन्दिशून्यः, तस्य उत्कर्षं साधयितुमेव भगवान् मूलभावनः प्रतिपक्षतया व्यवस्थापितः कविना, तथाचात्र मल्लिनाथस्य संग्रहश्लोको यथा—"नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजः तस्योत्कर्षकृतेऽनुवर्णचरितो दिव्यः किरातः पुनः। शृङ्गारादिरसोऽयमत्र विजयी वीरप्रधानो रसः, शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्"। यद्यपि शृङ्गारादयः केचिदङ्गरसाः बहुशोऽत्र प्रतिपादिताः तथापि तेषां प्रकृतस्य वीररसस्य अनपकर्षकतया नार्थकमाहात्म्यसमुद्भावकतया च न ते दोषमावहन्ति। सुख्यतया शान्तिप्रवणाः भारतीयाः समाजिकाः शान्तिमयान् विषयानेव बहु समाद्रियन्ते। शान्तभावस्य सुशीतलच्छायामाश्रित्य यदि चिरं अवस्थानस्य

सम्भावना स्यात्. तदा तामुल्लङ्घ्य न कदापि ते रसान्तरमनुभवितुमीहन्ते। कालिदासः सुगृहीतमानवमानसतत्त्वो निखिलमेवेदमात्मना परिजग्राह, तदुचितञ्च शृङ्गारादिरससम्बलितं वस्तुजातं निर्म्माय भारतवासिनां उपाजहार, परितृप्तिञ्च सुमहतीमेव तैस्तैः कालिदासवस्तुभिः समधिजगाम भारतवर्षं। भवभूतिरपि प्रायेण तेनैव कालिदासभावेनानुप्राणितप्राणः करुणरसं बहुधा परिचाय्य स्वकं काव्यजातं विनिर्म्ममे, येन "किमन्यथा रोदिति राघवो" इत्यपि जल्पनं तत्काव्यसम्बन्धे प्रतिभाति। यत्र यत्र प्रयोजनं अवश्यमेव रसान्तराणामजायत तत्र तत्र अतिसंक्षेपतो निपुणभावेनैव तत्तद्रसान्तरं प्रतिपादयितुं प्रवृत्ते नतु निर्व्याधं। भारविस्तु एताभ्यामनाविद्धे पथि सञ्चरणपरायणः काव्यमन्यथैव सज्जयामास। स हि मुख्यभावेन वीररसमेव समुत्तेजनबहुलं काव्यस्य जीवनतया व्यवस्थाप्य काव्यं निर्म्ममे, रसान्तराणिच तत्प्रभावेण तिरोहितानीव विदधे, यतः सर्व्वत्रैव समुपलभ्यते रसान्तरवर्णनाद्यवसरेषु स्वल्पतया आधिक्येन वा वीररसस्य सप्रकाश आभासः। (कालिदासस्य कविता शारदी चन्द्रिकेव, कुसुमसम्भारसम्भृता नवोना वल्लरीव, निष्कलङ्कालङ्कारान् आदधाना रूपसम्पदा सम्पादिताभिमाना तरुणीव, स्वसौन्दर्य्येणैव स्वयमुन्मनस्का विह्वला समापतितैव मनोहारिणी च। भवभूतिकविता तु वर्षोदयसीव महिषी, अभयप्रदायिनी कात्यायणीव स्नेहसुधाप्रस्रवणभूता, करुणामयी जननीव शान्तिसम्पर्कमधुरा स्निग्धा च। भारविकविता तु सुगम्भीरसागरप्रतिमा, निराभरणा धूसरकान्तिः अच्छसूत्रमात्रसम्भृतकरा सन्न्यासिनीव, तमस्विनी निशीथिनीव गाम्भीर्य्यवती।

(भारविकविताशरीरे शारदचन्द्रिकायाः स्निग्धविलेपनं नास्ति, नास्ति च सौदामिन्याः सुचिरचञ्चला कान्तिः, किन्तु धवलवसना संयमिनी ब्रह्मचारिणीव सा अलौकिकतेजोगौरवेण सुप्रशस्ता। कालिदासो हि स्वाभाविकेषु भावेषु एव यान् भावान् मधुरतया चमत्कारकारितया उपलक्षयामास, येषां निबन्धेन लोकानां शान्तिप्रवणता वा वर्णनीयविषयस्य सौन्दर्य्यं वा स्वाभाविकता वा चिरमक्षुण्णपथमेवाश्रयति, तान् तानेव भावान् संगृह्य संगृह्य स्वीयकाव्ये निबबन्ध, न तु किञ्चिदस्वाभाविकं अरम्यं वस्तु।

भवभूतिस्तु घटनामेव स्वेच्छया आत्मना वर्णनीयस्य विषयस्य अनुकूलां विधाय तत्र सौन्दर्य्यधारां जनयामास, प्रकृतं वृत्तं यथा तथा वा अस्तु तदेव वृत्तं आत्मकल्पनानैपुण्येन विपरिवर्त्त्य तथा तथा काव्यकलां विकाशयामास।

किन्तु भारविः वर्णनीयस्य विषयस्य लौकिकतां अलौकिकतां वा न

विचारयति स्म, नापि शान्तिप्रवणानामेव मनोमोहनं भावमात्मनः काव्ये सन्निवेशयति स्म, येन दुर्व्वलाः सवलायन्ते, रोगोपहतचित्तोत्साहस्य चिरादिव सुमहानुत्साहः पुनरावर्त्तते, मृतस्यापि अभिभूतस्यापि उच्छृङ्खलस्यापि चेतसि कोऽपि महानुत्साहः समभ्यर्च्चनीयो भावमहिमा च समुदेति, तथा तथैव आत्मनः काव्यकल्पनां असाधारणीं प्रवर्त्तयामास समुद्दीप्तेन भावकदम्बकेन सर्व्वथा अनुप्राणितः सः समुत्तेजनापूर्णमेव काव्यं करणीयतया सुष्ठु मेने। अतएव स्वीय काव्ये समुद्धतं भीमं समुद्धतभावप्रवक्तृतया द्रौपदीञ्च चत्रनन्दिनीं तदुचितौजस्विवाक्प्रयोगचातुर्य्येण समुपन्यस्य प्रस्तुतवानात्मकृत्यं, सपूर्णताञ्च कृतवान् मनोरथस्य कविकुललालामो महाकविः भारविः। प्रथिता च कीर्त्तिकला दिगन्तेष्वस्य। भीमस्य। उक्तिजातं प्रशस्तां राजनीतिमेवावलम्बते प्रतिपाद्यत्वेन, तया हि नाम उक्तिपरम्परया विलीनतां व्रजति प्रायेण सर्व्वेषां हृदये सिद्धा भीमस्य स्वाभाविकोद्धतभावमात्रप्रवणता, तथाहि क इव सुतरां समुद्धतभावमात्रसमालम्बनः पुरुषः प्रतिपादयितुमर्हति "द्विषतामुदयः सुमेधसा, गुरुरस्वन्तरः सुमर्षणः। न महानपि भूतिमिच्छता फलसम्यत्प्रवणः परिच्चयः" इत्यादि, "अचिरेण महानपि भूतिमिच्छता फलसम्यत्प्रवणः परिच्चयः" इत्यादि, अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः। चयप्रक्रियामुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा" इत्यादि—यः स्वयं तथानीतिपूर्णतामात्मनो न लभते। अपिच नैपुण्यमिदमेव काव्यकलाकुशलस्य भारविकवेः यत् भीमस्य नीतिपूर्णापि वाक्यपरम्परा ईषत्प्रकाशेन समुद्धतभावनिवहेन अनुप्राणिता एव समुपतिष्ठते तत्काव्यमनुशीलयतां चेतसि, अतः प्रशंसनीयास्य निपुणता। अन्यत्रापि कविस्तमेव भावमुपजीव्य वाचमारचयामास यथा—'इति दर्शितविक्रियं सुतं, मरुतः कोपपरीतमानसं उपसान्त्वयितुं महीपतिर्दरं दुष्टमिवोपचक्रमे" इत्यादि, अत्र भीमसेने दुष्टद्विरदसाम्यवर्णनया तथा भावः समभ्युपगम्यते। परत एव शान्तभावप्रवणो युधिष्ठिरः तद्वाचमुत्तरयितुं यथा यथा "सहसा विधेयं न क्रियाम्, अविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः" इत्यादि नीतिबहुलां सान्त्वनावाचं प्रयुयुजे, तत्रापि कविकल्पना गरीयसी। कविर्नामयोग्यतामतिक्रम्य वक्तृमुखेन वाचं प्रवर्त्तयन् स्वाभाविकतावोधसम्पादनतः प्रवक्तॄणां विपश्चिताम् शिक्षाकामुकानाञ्च अनवद्येयवचनो भवति। कविरयं न तथा, जातश्च तेनैव प्रकर्षेण बालादारभ्य वृद्धपण्डितपर्य्यन्तैरस्य कवेः सुगभीरनीतिबहुलानां "सहसे" त्यादिकवितानां कर्त्तव्यावसरे स्मरणीयतया सुप्रशस्तः। एतादृशमेव वस्तु भारवि-

कवेः अनन्यकविसाधारणं, एतस्मादेव कारणादसौ "भारवेरर्थगौरव" मित्यादि वाचा 'नारिकेलफलसम्मित' वचो भारवेः सपदि तद्विभुज्यताम्' इत्यादि वाचा च प्रशस्यते काव्यानुशीलनपरायणैरणुमात्रमपि भावादि दोषमनुपेक्षमाणैः समालोचनायां सुगृहीतसम्मानैः। एतदेव चास्य काव्यमेकमेव निर्म्मितवतोऽपि महाकविसंज्ञालाभहेतुरिति।

भारविकृतस्य किरातार्ज्जुनीयस्य शरदर्णनात्मकं चतुर्थं सर्गं मनुकृत्य भट्टिकाव्यस्य द्वितीयः सर्गः किरातार्ज्जुनीयस्य द्वितीयं तृतीयञ्च सर्गमधिकृत्य भट्टिकाव्यस्य द्वादशः सर्गो निर्म्मितस्तत्कविना इति नातिनिपुणवीक्षणादेव प्रतिभाति, किरातस्य चतुर्थे सर्गे "समत्यरावलितपोवरस्तनोः इत्यादि स्मारयति भट्टिकाव्यस्य 'विवृत्तपार्श्वं रुचिराङ्गहारं" इत्यादि श्लोकं; किरातस्य "नुनोद तस्य स्खलपद्मिनीगत" इत्यादि श्लोकः "सितारविन्दप्रचयेषु लीना" इत्यादि भट्टिकाव्यश्लोकञ्च एकमेवानुभवं प्रमाणीकृत्य लिखितौ कविभ्यां, किरातस्य चतुर्थसर्गे निबद्धं "कृतावधानं जितबर्हिणध्वनौ" इत्यादि श्लोकमनुकृत्य भाषया च यत् "दत्तावधानं मधुलेहिगीतौ" इत्यादि निबन्धः, तत्र प्रायेण सर्व्वेषामेव ऐकमत्यम्। किराते द्वितीयस्य 'सहसा विदधीत न क्रियां' इत्यादि भट्टौ "प्रज्ञा तु मन्त्रेऽधिकृता न शौर्य्यम्" सहसा कथञ्चित् समम्।

किराते "मतिमान् विनयप्रमाथिनः" इत्यादि भट्टिकाव्ये उपेक्षणीयैव परस्य वृद्धि" रित्यादि। किराते "समवृत्तिरुपैति माईवं समये यस्य तनोति तिग्मतां" इत्यादि तदीयमेवानुभवमालम्ब्य भट्टिकारः "यदा विगृह्णन् न च सन्दधानः, वृद्धिं क्षयं चानुगुणं प्रपश्येत्" इत्यादि प्राह।

तत्रैव निबद्धः प्रहस्तप्रमुखानां राक्षसानां दशास्यं प्रति वाक्प्रपञ्चः स्मारयति सुतरां भीमसेनस्य स्खलविशेषे द्रौपद्याश्च युधिष्ठिरं प्रति उक्तिजातम् उत्तेजनापूर्णं। विभीषणस्य तदनन्तरमेव रावणप्रबोधाय प्रयुक्तं वचनजातं स्मारयति आपातत एव समुद्यतं भीमं प्रति तेजस्विनीं द्रौपदीञ्च प्रति शान्तभावपूर्णस्य युधिष्ठिरस्य वाग्जातम्।

भारविनिर्म्मितकिरातार्ज्जुनीयस्य अश्वघोषकृतबुद्धचरितग्रन्थस्य अष्टमसर्गीयैः कतिपयैः श्लोकैः कुत्रचित् साम्यमुपलभ्यते, अलं वा तदालोच्य? दृश्यते तावदस्य महाभारतीयवनपर्व्वस्थ-सप्तविंश सर्गादिवस्तूनि समग्राण्येव प्रायेण भवतो भाषातश्च निबद्धानि कविना, केवलं नवीनमिदमेव यत् प्रथमतो वर्णिवेशधारिणः किरातस्य युधिष्ठिरेण हस्तिनापुरं प्रति प्रस्थापितस्य आगत्य दुर्य्योधनस्य राज्यवृत्तान्तवर्णनं अन्यत् सर्व्वमेव वस्तु प्रायेण अक्षुण्णं परिरक्ष्य कुत्रचित् वर्द्धितं कुत्रचिच्च संक्षेपः सम्पादितः कविमुख्येन; अतो नास्य घटनानिर्म्माणपटुत्वं

तथा कविजनोचितं स्खोकर्तुं प्रवर्त्तामहे, परं भाषाया गाम्भीर्य्यादि-कमेव अनन्यकविसुलभं तस्य ; येन प्रत्यक्षतो दृश्यमानेऽपि महाभारत-वस्तुनिवहानां निःशेषानुकरणे प्रकृष्टमहाकविवादेन तस्य पूजामार-चयन्ति काव्यरसरसिकाः महान्तः । अहो कवेरस्य गभीरा तत्त्वपूर्णा च वाक् "समुन्नयन् भूतिमनार्य्यसङ्गमाद् वरं विरोधोऽपि समं महा-त्मभिः" इति ।

दुर्य्योधनः निकृष्टैः सह शकुनिप्रभृतिभिर्मैत्रीं विधाय यथा लाभ-वान् जातः, तदपेक्षया महात्मना युधिष्ठिरेण सह वैरमारचयन्नेव परम-लाभवान् जातः यतस्तस्य विजयसाधनाय प्रयोजनीयो जातः सुमहत्सु प्रशंसाकरेषु कर्म्मजातेषु पक्षपातः ।

भारविकवेः किरातार्ज्जुनीयस्य नायिका राजनन्दिनी द्रौपदी, न कालिदासस्य कोमलतायाः एकः समाश्रयः शकुन्तला, वा भवभूतेः कारुण्यरसैकसमाश्रयभूता सीतादेवी, भारताधीश्वर्याः यथा यथा हृदयभावाः यथा यथा च व्यवहाराः उपयुज्यन्ते, तथा तथैव कविना कल्पितो द्रौपद्या अन्तःकरणमहिमा, तथा तथैव च समारचितस्तस्या उक्तेजनपूर्णो वाक्प्रपञ्चः । तस्य नायिका सम्पत्काले कुसुमपरिपेलवा, विपत्काले च समुक्तेजनपूर्णभाववहुला, विपक्षविताड़नाय स्वामिमन्यु-व्यवसायदीपकवाक्प्रयोगपटीयसी ।

न खलु द्रौपदी दुर्य्योधनस्य राजकार्य्यं सुशृङ्खलां मृन्वतो विपक्षो-न्नतिमसहमाना असूयापरवशा सती युधिष्ठिरस्य मन्युकरं वाक्प्रपञ्चं आरचितवती, किन्तु विपत्काले आत्मीयजनानां पुनरभ्युदयाय यथैव हितकारिण्याः विपदतिक्रमेण पुनरात्मीयजनानां अभ्युदयमवेक्षितुमे-कान्ततो रतिमत्याः रमण्याः वाचो युज्यन्ते, तथैव क्षतवती, एषैव वाणी इन्धनीभूता ज्वलयामास शत्रुनिकार-सम्भूतं पाण्डूनां अनु-तापाग्निं, प्ररोचयामास तदुच्छित्तये राजानं तदनुगतांश्च भ्रातॄन्, तस्यैव परिणामः कृष्णद्वैपायनरूपसहकारिलाभतः क्रमेण अर्ज्जुनस्य दिव्यास्त्रलाभः तेनाचास्त्रेण शत्रुपराभवः ।

एवं क्रमेण काव्यरत्नेनानेन विजयते श्रीमान् कविकुलमुख्यो भारविः, यस्य वाग्विन्यासमतुलनीयमालोचयन्तो वयमद्य धन्याः, काव्यरसिकाः धन्याः, संस्कृतभारती च धन्या । काव्यरसिकाः दृष्टिं पातयन्तु भवन्तः सुमहदुद्देश्यं प्रति प्रकृतकाव्यस्य, अनुशीलयन्तश्च चिन्तां कतिचित् सदुपदेशान्, शोधयन्तु च भूयः स्वर्गीयमाहात्म्येन क्षणभङ्गुरस्य दोषप्रधानस्य संसारस्य निखिलं भावजातमिति ।

* * * * *

तृतीयसंस्करणविज्ञप्तिः ।

अद्य सुदुर्मिक्षेऽपि मुद्रणोपयोगिनां समस्तवस्तूनां, भगवतः करुणया यत्किरातार्ज्जुनीयं तृतीये वारे संस्कर्त्तुमवाधं पारितं तदवश्यमस्माकं सौभाग्यमेव । अस्मिन् संस्करणे सत्यपि सुतरां अर्थव्यये केषाञ्चिदनुरोधात् भूमिकां वृहतीं नवीनाञ्च विरचय्य बहुविधज्ञातव्यविषयसन्निवेशेन वर्द्धनमेव सम्पादितमस्य । एवं वर्त्तमाने बहुविधेऽपि बहुमूल्यवृद्धिकारणे केवलं पादोनरूप्यकत्रयस्थाने रूप्यकत्रयमेव निर्द्धारितं मूल्यमस्य । आशास्महे—वर्त्तमानदशां पर्य्यालोचयन्तः संस्करणस्यास्य उपकारातिशयसम्पादकताञ्च विवेचयन्तः परमानुग्राहकाः ग्राहका अस्माकं नैव मानसानुरागमत्र वर्ज्जयिष्यन्ति परमनुरक्तिमतिमात्रां गमिष्यन्ति इति ।

गुरुधाम
१८४७ शकाब्दीय—
षड़शीतिसंक्रान्तिः ।

आश्रव—प्रकाशकः ।

किरातार्ज्जुनीयस्यविषयाणां सङ्क्षेपतो विवरणम् ।

प्रथम-सर्गे—द्वैतवने युधिष्ठिरसन्निधौ दौत्यनियुक्तस्य वनेचरस्य समागमः, वनेचरेण दुर्य्योधनस्य राजनीतिनैपुण्यवर्णनम्, तस्य प्रस्थानम्, युधिष्ठिरं प्रति द्रौपद्या ओजस्विनी युद्धोद्दीपनी वाणी च ।

द्वितीय-सर्गे—युधिष्ठिरं प्रति भीमस्य ऊर्জ্জस्वलं समरपक्षपाति वाक्यं, भीमं प्रति युधिष्ठिरस्य शान्तिपूर्णं वचनजातं, पाण्डवसमीपे भगवतो व्यासस्य समागमः, पाण्डवकृतो व्याससत्कारश्च ।

तृतीय सर्गे—व्यासस्वरूपवर्णनम्, व्यासं प्रति युधिष्ठिरस्य सभक्तिवाक्यम्, युधिष्ठिरं प्रति व्यासस्य नीतिगर्भमाश्वासपूर्णवाक्यं, व्यासस्यार्জ্জুनाय विद्यादानपूर्वकं तपस्यार्थमुपदेशः, मुनेः प्रस्थानम्, अर्জ্জুनसमीपे यक्षसमागमः, अर्জ্জুनस्य प्रस्थानोपक्रमः, भाव्यर्জ্জুनविरहेण पाण्डवानां वैमनस्यम्, अर्জ্জুनकृतद्रौपदीदर्शनम्, द्रौपद्या उद्दीपनोक्तिः, व्यासाज्ञप्तेन यक्षेण सहार्জ্জুनस्य हिमालयपादविशेषमिन्द्रकीलं प्रति प्रस्थानञ्च ।

चतुर्थ-सर्गे—शरत्-शोभावर्णनम्, अर्জ্জুनस्य हिमाद्रिदर्शनञ्च ।

पञ्चम-सर्गे—हिमवतो वर्णनम्, अर्জ্জুनस्य हिमाद्रिमूलप्राप्तिः, यक्षस्य प्रतिप्रस्थानञ्च ।

षष्ठ सर्गे—इन्द्रकीले अर्জ্জুनस्यारोहणादिवर्णनम्, तत्रार्জ্জুनस्य तपश्चरणं, वनरक्षकमुखादिन्द्रस्य धनञ्जयकृततपस्याश्रवणम्, अर्জ্জুनस्य तपोभङ्गाय गन्तव्यमित्यप्सरसां गणं प्रति शक्रनिदेशश्च ।

सप्तम-सर्गं—गन्धर्वैः सहाप्सरसामिन्द्रकीले सविलासगमनादि-कथनं, तत्रागतानां तेषां शिविरसन्निवेशादिवर्णनञ्च।

अष्टमे—गन्धर्वाणामप्सरसाञ्च कुसुमचयनादिविविधक्रीड़ावर्णनम्।

नवम सर्गे—सायंसमयवर्णनं, चन्द्रोदयवर्णनं, सुरतक्रीड़ा-वर्णनं, पानगोष्ठीवर्णनं, पुनरपि संक्षेपतः सुरतवर्णनं प्रभातवर्णनञ्च।

दशम-सर्गे—पार्थप्रलोभनार्थमप्सरसामनेकविधा विलासाः, अर्जुनस्य तात्कालिकी अवस्था, वर्षादि ऋतुवर्णनम्, अर्जुनतपोविघ्नार्थमप्सरसां प्रयासः, तासां प्रयासवैफल्यञ्च।

एकादश-सर्गे—अर्जुनाश्रमे विप्ररूपधारिणो वासवस्य समागमः, इन्द्रार्जुनयोः कथा, प्रत्यक्षमूर्त्तेरिन्द्रस्य पार्थं प्रति शिवाराधनोपदेशश्च।

द्वादशसर्गे—अर्जुनकृतस्य शिवाराधनम्, अर्जुनतपसातितप्तानां सिद्धतापसानां शिवसमीपे गमनं तत्तपोवर्णनञ्च, शिवकृतं तापस-सान्त्वनमर्जुनस्य स्वरूपकथनञ्च, वराहमायया मूकदानवस्य धनञ्जय-वधार्थं प्रयाणम्, सगणसैन्यस्य किरातवेशिनः शिवस्य मृगयाव्याजेनार्जुनाश्रमसमागमः।

त्रयोदशसर्गे—मूकदानवार्जुनयोरन्योन्यमवलोकनं, तद्दर्शनेनार्जुनस्य मनसि नानावितर्कः, शूकरशरीरिणं मूकं प्रति पार्थस्य शरक्षेपः, मूकदानववधः, पार्थसमीपे शिवदूतागमः, तदुक्तपार्थाधिक्षेपश्च।

चतुर्दशसर्गे—शिवदूतं प्रत्यर्जुनस्य जिगीषावचनं, तच्छ्रुत्वागतस्य शिवचरस्य वचनमाकर्ण्य गृहीतकिरातपतिवेशस्य शिवस्य सदेवगण-सैन्यमर्जुनविजयार्थमागमनम्, शिवार्जुनयोर्युद्धवर्णनम्।

पञ्चदशसर्गे—चित्रयुद्धवर्णनम्।

षोड़शसर्गे—किरातवेशस्य शिवस्यानन्यसाधारणसमरकौशलसन्दर्शनेनार्जुनस्य मनसि वितर्कः, शिवेन सहार्जुनस्यास्त्रयुद्धवर्णनम्।

सप्तदशसर्गे—प्रथमतः शिवसेनया ततो भगवता सहार्जुनस्य युद्धम्।

अष्टादशसर्गे—अर्जुनस्य सत्त्वातिशयदर्शनेन शिवस्य प्रसादः, तत्रेन्द्रादिदेवानां समागमः, अर्जुनकृता भगवत्स्तुतिः, अर्जुनकृतं वरयाचनम्, पाशुपतास्त्रप्राप्तिः, इन्द्रादिदेवानामपि भगवदादेशेन वरदानपुरःसरं स्वस्वास्त्रप्रदानम्, कृतकार्य्यस्यार्जुनस्य युधिष्ठिरसमीपे समागमः, ग्रन्थसमाप्तिश्च।

———

किरातार्জ্জুनीय-सम्बन्धिनी पौराणिकी वार्त्ता ।

"त्रिःसप्तकृत्वो जगतीपतीनां" इत्यादौ—

अथैकदा हैहयपतिः कार्त्तवीर्य्यस्तपोवीर्य्यार्জ্জितदेहसत्र द्वितीय-दहनमूर्त्तेर्জमदग्नेराश्रमपदमाससाद । मुनिरेकामीत् कामधेनुः । अति-थेयः स निःस्वो मुनीश्वरस्तदा तत्कामधेनुप्रभावेन प्रभूतबलवाहनसत्र भूपतेर्यथायथमातिथ्यं कारयामास । ततस्तत्कामधेनुमाहात्म्यमवलोक्य लोभाकृष्टः कार्त्तवीर्य्यो जमदग्निसन्निधौ तां धेनुं प्रार्थयामास । किन्तु धेनुधनो मुनिर्न तावत् क्षत्रियाय तद्दानमङ्गीचकार । तेन क्रोधान्धः क्षत्रबन्धुः स हैहयराजो जमदग्निं निहत्य धेनुमाजह्रे, परन्तु तत्पत्नी-मपि त्रिःसप्तकृत्वः प्रहृत्य आश्रमतः प्रस्थितः । अथान्तरे विदितवृत्तान्तः क्रोधेन कृतान्तोपमः परशुरामः पुष्करतः स्वगृहमागत्यः दुर्मतेः कार्त्त-वीर्य्यस्य कृतकार्य्यमालोक्य 'पृथिवीं निःक्षत्रां करोमी"ति प्रतिज्ञाय जननीप्रहारसंख्यया धरित्रीं त्रिःसप्तकृत्वो निःक्षत्रामकरोत् । परन्तु स्यमन्तपर्य्यन्तके देशे तेन निहतक्षत्रियशोणितेन पञ्च सरांसि परिपूर्य्य तत्र पितरं तर्पयामास ।

'वीर्य्यावधूतः स तदा विवेद" इत्यादौ—

पुराकिल काशीपतिरम्बाम्बिकाम्बालिकानामात्मजानामुद्वाहार्थं स्वयं स्वयंवर-सभामाह्वयामास । तत्र सर्वधनुष्मतामग्रणीर्भीष्मो निखिलनृपतीन् पराजित्य तिस्रः कन्या जग्राह । अथ स स्वपुरमागत्य यदा विचित्रवीर्य्येण सह ता विवाहयितुमुद्यतस्तदा शाल्वराजानमह-मात्मनाहूयेव "मित्यम्बामुखादयोषीत्, एवं च तां विनयेन शाल्वराजानं प्रति विससर्ज्ज । धर्म्मदर्शी शाल्वोऽपि तामवीर्य्यशुल्कतया प्रत्याख्यात-वान् । अथ विधिविड़म्बितायाअम्बायाः प्रार्थनया भीष्मगुरुः परशुराम-स्तदग्रहणाय भीष्मं बहुशः कथयामास । ततः शिष्योऽपि भीष्मो यदा गुरुवाक्यं नाङ्गीचकार, तदा जामदग्न्यस्तेन सह युयुधे किन्तु समरे-ऽस्मिन् 'शिष्यादिच्छेत् पराजय' मिति वचनं जगति प्रचारयितुमेव परशुरामः शिष्यतः पराभवमवाप ।

'निपुणमिति मूकदानव" इत्यादौ—

पुरा किलेन्द्रकीलपर्वते तपस्यन्तमर्জुनमवलोक्य मूको नाम दानव स्तत् तपः सुरकार्य्यसिद्ध्यर्थमिति मत्वा वराहरूपमास्थाय तं व्यापादयि-तुमूद्यतः । अर्জुनोऽपि तं वीक्षत्सं वराहं लक्ष्यीकृत्य शरं मुमोच । इत्यन्तरे वराहमनुसरन् कोऽपि किरातः शरेण तं विव्याध । अथैकं लक्ष्यं प्रति द्वयोः शरनिक्षेपस्य मृगयाधर्म्मविरुद्धतया किरातार्জुनयोः परस्परयुद्धमभवत । ततोऽर्জुनसमरकौशलेन समन्तोषः किरातरूपी हरस्तस्मै पाशुपतास्त्रं ददाविति दिक् ।

इति पौराणिकी कथा ।

किरातार्जुनीयावलम्बितो महाभारतीयकथानुक्रमः ।

पुरासन् हस्तिनापुरे सामवाग्योया नृपतयः । तेषामन्यतमतः कुरोः कौरववंशः प्रसिद्धिं गतः । सर्वथैव कुरुरेकः प्रशस्यतरो नरपतिराविरासीत् । तदन्वये शान्तदान्तगुणोपेतः शान्तनुर्नाम परमपूतचेता नरपतिः प्रादुर्बभूव—त्रिलोकपावनी गङ्गापि यमर्द्धाङ्गभाक्त्वे नाङ्गीचकार । शान्तनोरन्याप्येकासीत् सहधर्म्मिणी—सत्यवती नाम । तयोर्यथाक्रमं भागेरथ्या भीष्मः सत्यवतीतो विचित्रवीर्य्यश्चित्राङ्गदश्च जज्ञिरे । तेषामस्खलितप्रतिज्ञो भीष्मः सत्यपालनार्थं चिरकौमारः सन् राज्यं न जग्राह, अल्पायुष्कतयापूर्णयौवन एव चित्राङ्गदः शमनसदनमगात्, तेन हि कनीयानपि विचित्रवीर्य्यो राज्याधिकारमवाप । स काशीराजात्मजाम्बिकाम्बालिकाश्च परिणयन्नपि अपुत्रकः परेतपुरं प्रविवेश । ततस्तत्क्षेत्रयोर्महर्षिर्व्यासो यथाक्रमं धृतराष्ट्रपाण्डुनामानौ द्वौ पुत्रावुत्पादयामास, तयोर्ज्येष्ठो धृतराष्ट्रः कनिष्ठः पाण्डुरिति । व्यासवीर्य्येण तदा दासीतो विदुरः समजनीति शास्त्रीया कथा श्रूयते । यातु तावद् ज्येष्ठोऽपि धृतराष्ट्रो जन्मान्धतया राज्यं न प्राप, कनिष्ठः पाण्डुरेव पृथ्वीपतिः अभूत् । पाण्डोर्द्वे पत्न्यौ—कुन्ती, माद्री च । तयोः कुन्तीतो युधिष्ठिरभीमार्জुनाः माद्रीतो नकुलसहदेवौ—एते पाण्डोः पञ्चपुत्राः सञ्जाताः, ते हि पाण्डोरपत्यतया पाण्डवसंज्ञया प्रख्यातवन्तः । कुन्तीतः कन्यकावस्थायां सूर्य्यसम्पर्केण कर्णो नामाप्यपरः पुत्रो जज्ञे स कानीन इति शास्त्रप्रसिद्धिः । धृतराष्ट्रस्य पत्नी गान्धारी,तस्याः दुर्य्योधन-दुःशासनप्रभृतयः शतपुत्राः सञ्जज्ञिरे ते च धार्त्तराष्ट्राः पूर्वपुरुषस्य कुरोर्नामानुसारतः कौरवसंज्ञामभजन्त ।

अथ शापवशादकाले कालनिलयं गतवति पाण्डौ धृतराष्ट्रः पाण्डवानपत्यनिर्विशेषं पालयामास । एते कौरवाः पाण्डवाश्च सर्व एव प्रभूतबलशालिनस्तथापि तेषामन्तिके कुन्तीतनयं युधिष्ठिरमेकमनन्यसाधारणं धर्म्मशीलं ज्ञात्वा धृतराष्ट्रस्तमेव राज्येऽभिषेक्तुमभिललाष, किन्तु हिंसापरतन्त्रः क्रूरमतिदुर्य्योधनो जनकाभिप्रायमवज्ञाय स्वमातुलशकुनिमन्त्रणया वारणावतनगर्यां जतुगृहं निर्म्माय कौशलेन पाण्डवान् तत्र प्रेरयामास । अथ धर्म्ममात्रसहायाः पाण्डवास्तदा विदुरमुखतस्तादृशीं दुर्मन्त्रणां विदित्वा स्वयमेवानलेन तज्जतुनिलयं दग्ध्वा ततः प्रस्थिताः पाण्डवाः प्रेतपुरं गता इति मनसि निर्द्धार्य्य दुर्य्योधनो निःशङ्कमना बभूव । पाण्डवा अपि पुनर्दुर्य्योधनाक्रमणशङ्कया कृष्णवेष्मिनो यत्र तत्र परिभ्रमन्तः क्रमेण द्रौपदीस्वयंवरसभामासेदुः, तत्र अर्জुनः पञ्चालपतेरङ्गीकृतं मत्स्यलक्ष्यं भित्त्वा द्रौपदीं लभते स्म ततो मातुराज्ञया पाण्डवाः सर्वएव भ्रातरस्तामेकां द्रौपदीं पत्नीत्वे नाङ्गीचक्रुः । ततो

विवाहान्ते स्वपुरगच्छतां पाण्डवानां प्रार्थनया धृतराष्ट्रः स्वराज्यं द्विधा विभज्य आत्मजाय हस्तिनापुरम् युधिष्ठिराय च इन्द्रप्रस्थं नाम नगरं ददौ।

अथानन्तरमपि पापमतिर्दुर्योधनः स्वराज्यमनिष्कण्टकं मन्यमानः शकुनिकुमन्त्रणया पाशकक्रीड़ार्थं युधिष्ठिरमाह्वयामास, धर्ममूर्त्तिरपि युधिष्ठिरो दैवविड़म्बित इव व्यसनदोषमनालोचयन् सह कौरवैश्चिक्रीड़ क्रमेणानया कपटक्रीड़या पराभवमवाप, परन्तु पाशकपणानुसारेण त्रयोदशवर्षं वनवासमङ्गीचकार च। एषु द्वादशवर्षं यथेच्छदेशावस्थितिरेकमज्ञातवनवास इति। अथ सत्यप्रतिज्ञेन राज्ञा भ्रातृपत्नीमात्रसहायेन स्वराष्ट्रं परित्यज्य प्रथमं दीनवेशेन द्वैतवनमासादितम्। इत एव कविवर्णनारम्भः, यत्—युधिष्ठिरं द्वैतवने वनेचर" इति।

कविवर्णितस्थानानां संक्षिप्तः परिचयः।

द्वैतवनम्—वनमिदं शोकमोहविरहितम्, अपि तु सरस्वतीतीरवर्त्ति कुरुक्षेत्रसन्निहितं कतमदपि स्थानमिति देशकोविदा वदन्ति। अस्य खलु द्वैतकाननस्य कामाख्यवनमित्यपरमभिधानं दृश्यते, तन्नामान्तरकारणानुसन्धाने मनसि समापतति यत्—कुरुक्षेत्रसन्निहितः प्रदेशस्तावत् प्रायशः काञ्चनमयः तत्काननमयप्रदेशस्य एकांशः काम्यकमपरो द्वैतमिति। बहुगवेषणयापि न तावदलमस्यवर्त्तमानं नाम समवधारयितुमित्युदासीना वयन्तत्र।

खाण्डववनम्।—वनमिदमासीदिन्द्रप्रस्थसन्निधाविति महाभारते महर्षिणा व्यासेन बाहुल्यं वर्णितम्। अस्य साम्प्रतिकं नाम मध्यप्रदेशान्तर्गतनिमार इति। यदा कृष्णसहायः पार्थः पावकप्रार्थनया वनमिदं ददाह, तदा खाण्डवरक्षार्थमाखण्डलः सहाज्र्जुनेन युयुधे किन्तु पावकात् प्राप्तगाण्डीवः प्रभूतभुजवीर्योर्जुनः सुरराजं पराजित्य जातवेदसः सुमहतीं तृप्तिमापादयामास तेन हि पावकः पार्थायाग्नेयास्त्रमक्षयतूणीरादिकमपि ददाविति दिक्।

हिमालयः।—यः खलु पृथिव्या मानदण्डरूपेण विराजते, तस्यासोमहिम्नो हिमालयस्य सीमानिर्देशविधौ महाकवेः कालिदासस्य श्लोक एव बहुलतया प्रामाण्येन प्रतिभाति। यदुक्तं कविना—अस्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः। पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥" इति।

इन्द्रकीलपर्वतः।—स तु हिमेवदंशविशेषः। अस्याधुनिकं नाम "सिकिम" इत्यस्माभिरसकृदुक्तं ग्रन्थभूमिकायाम्।

———

किरातार्जुनीयश्लोकानामकारादिवर्णक्रमेण

सूचीपत्रम् ।

श्लोकः ।	सर्गः श्लोकाङ्कः	श्लोकः ।	सर्गः श्लोकाङ्कः
अकृत्रिमप्रेम्णरसाभिरामं	३ ३७	अथ शशधरमौलेः	१८ ४६
अखण्डमाखण्डलतुल्यधामभि	१ २८	अथ स्फुरन्मौनविधूतपङ्कजा	८ २७
अखिलमिदममुष्य गौरीगुरो	५ २१	अथ स्वमायाकृतमन्दिरोज्ज्वलं	८ १
अगूढहासस्फुटदन्तकेसरं	८ ३६	अथ हिमरुचिभस्म भूषितं	१८ १५
अयसानुषु नितान्तपिशङ्गै	९ ७	अथाये हसता साचि	१५ ७
अचकमत सपल्लवां धरित्रीं	१० ४९	अथापदामुद्धरणक्षमेषु	१७ १
अचिन्तताद्यामपि नाम युक्तां	१७ ४७	अथाभिपश्यन्निव विदिशः पुरः	१ ५६
अचिरेण परस्य भूयसीं	२ ९	अथामर्षान्निसर्गाच्च	११ १
अजन्मा पुरुषस्तावत्	११ ७०	अथोच्चकैरासनतः पराद्धीं	२ ५७
अजिह्मसोजिष्ठमसोचमक्रमं	१४ ५७	अथो शरस्तेन मदर्थमुज्झितः	१४ १७
अणीयसि विश्वविधारिणे नमः	१८ ४१	अथोषभासेव सुमेरुकुक्षान्	३ ३२
अणुरपुग्रहन्ति विग्रहः	२ ५१	अदीपितं वैद्युतजातवेदसा	४ २९
अतिपातितकालसाधना	२ ४२	अद्य क्रिया कामदुघाः	३ ६
अतिशयितवनान्तरद्युतीनां	१० ८	अधरीचकार च विवेक	६ २१
अतीत संख्या विहिता समाग्निना	१४ ७०	अधिगम्य गुह्यकगणादिति	९ ३८
अत्यर्थं दुरुपसदादुपेत्य	७ ९	अधिरुह्य पुष्पभरनम्रशिखैः	६ १७
अथ कृतकविलोभनं विधित्सौ	१० १७	अनादरोपात्तधृतेक	१४ ३९
अथ क्षमामेव निरस्तविक्रम	१ ४४	अनाप्तपुण्योपचयैर्दुरापा	३ ५
अथ क्षेदवधिः प्रतीच्यते	२ १९	अनाम्नश्नः क्वचिदेव	१७ २३
अथ जयाय नु मेरुमहीभृतो	५ १	अनायुधे सत्वजिघांसिते	१४ १९
अथ दीपितवारिवाहवर्त्मा	१९ २०	अनारतं तेन पदेषु लक्षिता	१ १५
अथ दीर्घतरं तमः प्रवेक्ष्यन्	१३ ३०	अनारतं यौ मणिपीठशायिना	१ ४०
अथ परिमलजामवाप्य	१० १	अनिर्जयेन द्विषतां	११ ७१
अथ भूतभव्यभवदीश	१२ १९	अनुकूलपातिनमवक्ष	६ २५
अथ भूतानि वार्वघ्न	१५ १	अनुकूलमस्य च विचिन्त्य	१२ ४९
अथ वासवस्य वचनेन	१२ १	अनुचरेण धनाधिपतेरथो	५ १६
अथ विहितविधेयै	१६ ६२	अनुजगुरथ दिव्यं दुन्दुभि	३ ६०
अथवेष कृतज्ञयेन पूर्वं	१३ ५	अनुजानुमध्यमवसक्त	१२ २२

श्लोकाः ।	सर्गः	श्लोकाङ्कः
अनुद्धताकारतया	१	१
अनुपालयतामुदेष्यती	२	१०
अनुभाववता गुरु स्थिरत्वा	१३	१५
अनुशासतमित्यनाकुलं	२	५४
अनुसानु पुष्पितलतां	६	१८
अनुहिमवप्रमरुद्भिः समतां	६	८
अनेकराजन्यरथाश्वसङ्कुलं	१	१६
अनेन योगेन विहृततेजाः	१	२८
अन्तकः पर्यवस्थाता जन्मिनः	११	१३
अन्तिकान्तिकगतेन्दु	९	२१
अन्यदोषविशिखे	१९	४६
अन्यदोषमिव स स्वकं	१९	४८
अन्योन्यरक्तमनसा	९	७४
अपनेयमुदेतुमिच्छता	२	३६
अपयन्त्यनुषः शिवान्तिक	१३	२१
अपरागसमीरणेरिता	२	५०
अपवर्जितविप्लवे शुचौ	२	२६
अपवादाद्भीतस्य	११	५६
अपश्यद्विरिवेशानं	१५	२
अपहस्तेऽथवा सद्भिः	११	६८
अप्राकृतस्याहवदुर्मदस्य	१६	२४
अभितस्तं पृथासूनुः स्नेहेन	११	८
अभिद्रोहेण भूतानामर्जयन्	११	२१
अभिनवमनसः	१०	४२
अभिभवति मनः कदम्ब	१०	२१
अभिभवोदितमन्यु	१८	७
अभिमानधनस्य गत्वरै	२	१९
अभिमानवतो मनस्विनः	२	१३
अभिमुनिं सहसा	१०	४५
अभियोग इमान् महीभुजो	२	४६
अभिरश्मिनालि विमलस्य	१२	२
अभिलषत उपायं	१७	३४

श्लोकाः ।	सर्गः	श्लोकाङ्कः
अभिवर्षति योऽनुपालयन्	२	३१
अभूतमासज्य विरुद्धमीहितं	१४	१९
अभ्यघानि मुनिचापलात्	१३	६३
अभ्यायतः संततधूमधूसरं	१३	६
अमर्षिणा क्लृप्तमिव	१४	६९
अमी पृथुस्तम्बभृतः	४	२६
अमी समुद्भूतसरोज	४	७५
अयथार्थक्रियारम्भैः पतिभिः	११	५२
अयमच्युतश्च वचनेन	१२	३५
अयमसौ भगवानुत	१८	९
अयमेव मृगव्यसच	१९	१९
अयं वः क्लैव्यमापन्नान्	१५	१९
अलकाधिपभृत्यदर्शितं	१	५९
अलंकृतानामसुजा	१७	२९
अलङ्घ्यं तत्तदुद्दीप्ता	११	६०
अलङ्घ्यत्वाज्जनैरन्यैः	११	४०
अलमेष विलोकितः	५	१७
अलसपदमनोरमं	१०	६०
अवचयपरिभोगवन्ति	१०	५
अवद्यन् पविणः शम्भोः	१५	३७
अवधूतपङ्कजपराग	६	३
अवधूयारिभिर्नीता	११	५८
अवन्यकोपस्य	१	२९
अवरुग्णतुङ्गसुरदारु	६	५
अवलीढसनाभिरन्वसेनः	१३	११
अवहितहृदयो विधाय	२	५८
अविगृह्यास्याप्यतुलेन हेतुना	१८	११
अविज्ञातप्रबन्धस्य	११	४९
अविदग्धतया तथापि मे	२	२८
अविभावितनिष्क्रम	१९	२७
अविसृष्यमेतदभिलषति	६	४४
अविरतोज्झितधारि	५	६
अविरलफलिनीर्व्वनप्रसूनः	१०	२८

श्लोकाः ।	सर्गः	श्लोकाङ्कः
अविरलमलसेषु	१०	४१
अविलङ्घ्यविकर्षणं	३	५७
अविवेकहतात्मनाविवार्थं	१३	२९
असकलनयनेचितानि	१०	५९
असक्तमारःधयतो	१	११
असमापितकृत्य	२	४८
असावनास्थापरया	४	३४
असिः शरो वर्म धनुश्च	१४	२०
असङ्गदीनामुपचीय	१६	१०
असंविदानस्य समेश	१८	४२
असंशयं त्वत्तमुपान्त	८	३८
असंशयालोचितकार्य	३	२३
असंहार्योत्साहं	१८	४७
अस्त्रवेदमधिगम्य	१३	६२
अस्त्रवेदविदयं महीपतिः	१३	६७
अस्त्रैः समानामति	१७	३४
अस्खिन्नरंहत्यत	५	३१
अस्खिन्यशः पौरुष	१६	९
अंशुपाणिभिरतीव	९	३
अंससंस्थले:	१६	३०
अंसावतष्टम्भनतौ	१६	२१
आकारमाशंसितभूरि	३	२७
आकीर्णं बलरजसा	७	३६
आकीर्णा मुखनलिनै	७	१८
आकुमारमुपदेष्टुमिच्छवः	१३	४१
आकुलस्थलपतत्रि	९	८
आच्छिन्नचापावरणेषु	१७	५९
आच्छिन्नसंपातमपेत	१६	४१
आच्छिद्यमाणं	३	५०
आघट्टयामास	१७	३८
आघ्राय चषमतितृषा	७	६४
आतपे धृतिमता	९	६०
आतिथेयीमथामात्य	११	९
आत्मनीनमुपतिष्ठते	१३	६९
आत्मलाभपरिणाम	१८	३४
आहता नखपदैः परिरभ्या	९	४९
आशाधामरणभया	१८	३९
आसक्तभ्रमरकुला	७	१०
आमोदवासितचला	९	७७
अयस्तः सुरसरिदोघ	७	३२
आरोढुः समवनतस्य	७	३३
आर्शसितापचिति चारु	६	४६
आर्य कालमभिसारित	९	६८
आसक्ताभरनीकाशै	११	५
आसक्ता धूरियं रूढा	११	७७
आसन्नदिपपदवीमदा	७	२४
आसादिता तत्प्रथमं	१६	२
आसुरे लोकविचास	१५	२८
आसेदुषां गोवभिदो	१८	१८
आस्तिक्यगुहमवतः	१८	४३
आस्थामालम्ब्य	१५	४
आस्थितस्थगित	९	९
आहिते तु मधुना	९	६९
इक्षतां सह वधूभिः	९	११
इतरेतरानभिभवेन	६	३४
इति कथयति तव	४	३७
इति गां विधाय	१२	६२
इति चालयन्नचलसानु	१२	५९
इति तानुदारमनुनीय	१२	४०
इति तेन विचिन्त्य	१३	१४
इति दर्शितविक्रियं	२	२५
इति निगदितवन्तं	१८	४४
इति ब्रुवाणेन	३	३०
इति विविधमुदासि	१६	६३

श्लोकाः ।	सर्गः	श्लोकाङ्कः
इति विषन्निवचक्षुषा	१०	५६
इति शासति सेनान्यां	१५	२९
इतीरयित्वा गिरमात्तसत्क्रिये	१	२६
इतीरिताकूतमनील	१४	२५
इत्थं विहस्य वनिताभि	८	५५
इत्युक्तवन्तं परिरभ्य दोर्भ्यां	११	८०
इत्युक्तवन्तं व्रज साधयेति	३	२४
इत्युक्तवानुल्लिविशेष	३	१०
इत्युक्ता सपदि हितं	५	५१
इदमीदृग्गुणोपेतं लब्धा	११	४१
इमान्यमूनीत्यपवर्जितेति	८	२०
इमामहं वेद न तावकीं	१	३७
इयमिष्टगुणाय रोचतां	२	५
इयच्च दुर्वारमहारथा	१६	१७
इयं शिवाया नियते	४	२७
इह दुरधिगमैः	५	१९
इह वीतभया	१३	४
इह सनियमयोः	५	४०
ईशार्थमभ्यसि चिराय	५	२९
उच्यतां स वचनीय	९	३९
उज्झती शुचमिवाशु	९	१८
उज्झत्सु संहार	१६	१६
उत्फुल्लस्थलनलिनी	५	३९
उत्सङ्गे समविषमे	७	२१
उत्सृष्टध्वजकुथकङ्कटा	७	३०
उदस्य धैर्यं	८	५०
उदारकीर्तेरुदयं	१	१८
उदाहरणमाशोः	११	६५
उदितोपलस्खलन	६	४
उदीरितां तामिति	३	५५
उद्भटवचःस्थगितैक	१४	३१
उद्भतेन्दुमविभिन्नतमिस्रां	९	२४
उन्मज्जन्मकर	१७	६२
उपकार इवासति	१३	३३
उपकारकमायते	२	४१
उपजापसहान्विल	२	४७
उपपत्तिरुदाहृता बलात्	२	२८
उपलभ्य चलत्तरङ्ग	६	१४
उपलाहतोद्धततरङ्ग	६	१०
उपाधत्त सपत्नेषु	११	५०
उपारताः पश्चिमरात्रि	४	१०
उपेयुषीणां हरितो	८	१२
उपेयुषीं विभ्रतमन्तक	१४	३८
उपैति शस्त्रं	४	२२
उपैत्यनन्तद्युतिरप्य	१६	६१
उपोढकल्याणफलो	१७	५४
उमापतिं पाण्डुसुतप्रपन्ना	१७	१२
उरसि शूलभृतः	१८	५
उरु सत्त्वमाह	६	३५
ऊर्ध्वं तिरश्चीनमधश्च	१६	५०
ऋषिर्वंशजः स	६	३६
एकतामिव गतस्य	९	१२
एवं प्रतिहन्तिषु	१७	१८
ओजसापि खलु	९	३३
औष्ठपल्लवविदंश	९	५७
औषसातपभयादप	९	११
ककुदं वृषस्य	१२	२०
कच्छान्ते सुरसरितो	१२	५४
कतिपयसहकारपुष्प	१०	३०
कथमिव तव सम्मति	१०	३६
कथं वा दीयतामर्घो	११	७६
कथाप्रसङ्गेन जनै	१	२४
कपोलसंश्लेषि	४	९
करुणमङ्गलनिःसृतयोः	१८	११

श्लोकाः ।	सर्गः	श्लोकाङ्कः ।
करिष्यसि यत्र सुदुष	१	२९
करुणमभिहितं	१०	५८
करोति योऽग्रेषजनाति	३	५१
करौ धुनाना नवपल्लवाकृती [पद्यस्यगाधे	८	४८
करौ धुनाना नवपल्लवाकृती [हथा कृथा	८	७
कलत्रभारेण विलोल	८	१७
कवचं स बिभदुपवीत	१२	९
कषणकम्पनिरस्तमहाद्रिभिः	५	४७
कान्तदूत्य इव कुङ्कुम	९	६
कान्तवेश्म बहु सन्दिश	९	३७
कान्तसंगमपराजित	९	५२
कान्ताजनं सुरतखेद	९	१६
कान्तानां क्रतपुलकः	७	५
किं गतेन न हि युक्त	९	४०
किं त्यक्तापास्तदैवत्व	१५	२७
किमपेक्ष्य फलं प्रयोधरान्	२	२१
किमसामयिकं वित	२	४०
किमुपेक्षसे कथय नाद्य	१२	६१
किरातसैन्यादुरुचाप	१४	४५
कुप्यताद्य भवतानत	९	५३
कुररीगणक्रतरवस्तरवः	५	२५
कुरु तन्न्यतिमेव केवल	२	२२
कुरु तात तपांस्यमागेदाथी	१३	१३
कुसुमनगवनानुपेतु	१०	६१
कुसुमितमवलम्ब्य	१०	५३
क्रतधृतिपरिवन्दिते	१८	२१
क्रतप्रणामस्य महीं	१	२
क्रतं पुरुषशब्देन	११	७२
क्रतवानन्यदेहेषु कर्त्ता	११	२६
क्रतानतिर्व्याहृतसान्व	३	२१

श्लोकाः	सर्गः	श्लोकाङ्कः
क्रतान्तदुर्वृत्त	१६	२९
क्रतारिषड्वर्गजयेन	१	९
क्रतावधानं जितबर्हिण	४	३३
क्रतोर्मिरेखं शिथिलत्व	४	६
क्रयाइ पायणादेशात्	११	४६
को न्विमं हरितुरङ्ग	१३	५०
कोऽपवादः स्तुतिपदे	११	२५
क्रान्तानां गहचरितान्	७	१२
क्रामद्भिर्नपदवीमनेक	५	३४
क्रियासु युक्तैर्नृप	१	४
क्रोधान्धकारान्तरितो	१७	९
क्लान्तोऽपि विदशवधू	७	२९
क्व चिराय प्रियग्रहः	२	३९
क्षत्रियस्तनयः पाण्डोरहं	११	४५
क्षयमुक्तमपि स्वभावजं	२	११
क्षितिनभःसुरलोक	५	३
क्षिपति योऽनुवनं	५	४५
क्षीणयावकरसोऽप्यति	९	६२
क्षुभितामिनिःसृत	१२	४५
क्षोभेण तेनाथ गणाधिपानां	१७	२२
खण्डिताशंसया	१५	३
गणाधिपानामविधाय	१४	५४
गतवति नखलेखा	९	७८
गतान् पयूनां सहजन्म	४	१३
गतैः परेषामविभाव	१४	५२
गतैः सहाहैः कलहंस	८	२९
गन्धसुद्धतरजःकण	९	३१
गभीररन्ध्रेषु भृशं	१४	४६
गम्यतामुपगते	९	४
गुणसम्पदा समधिगम्य	५	२४
गुणानुरक्तामनुरक्त	१	३१
गुणापवादेन तदन्य	१४	१२

श्लोकाः ।	सर्गः	श्लोकाङ्कः
गुरुक्रियारम्भफलैरलंकृतं	१४	४२
गुरुस्थिराख्युत्तम	१६	२८
गुरून् कुर्वन्ति ते	११	६४
गूढोऽपि वपुषा राजन्	११	६
ग्रसमानमिवौजांसि	११	७३
ग्रहविमानगणानमितौ	५	१४
घनपीवरविदीर्णशाल	१३	१
घनं विदार्य्यार्जुन	१५	५०
घनानि कामं कुसुमानि	८	४
चञ्चलं वसु नितान्त	१३	५३
चतसृष्वपि ते विवेकिनी	२	६
चमरीगणैर्गणवल्लभस्य	१२	४७
चयानिवाद्रीनिव	१६	५२
चलनेऽवनिश्चलति तस्य	१२	२८
चारुचक्षुश्चिरान्वेषी	१५	३८
चिचीषतां जन्मवता	३	११
चित्तनिर्वृतिविधायि	९	७१
चित्तवानसि कल्याणी	११	१४
चिचीयमाणानति	१७	३१
चिरनियमकृशोऽपि	१०	१४
चिरमपि	१०	४८
च्युते स तस्मिन्निषुधी	१७	३७
छायां विनिर्धूय तमोमयीं	१६	३२
जगतोश्वरणे युक्तो	१५	४५
जगत्प्रसूतिर्जगदेक	४	३२
जटानां कौर्णया	११	६
जनेरुपयाममनिन्द्य	४	१९
जन्मवेषतपसां विरोधिनीं	१६	६४
जन्मिनोऽस्य स्थितिं विद्वान्	११	३०
जपतः सदा जपसुपांशु	१२	१८
जयमवभवान्नून	११	१८
जयारवच्चेष्टितनाद	१४	२९

श्लोकाः ।	सर्गः	श्लोकाङ्कः
जयेन कस्तिद्विरमेदयं	१४	६२
जरतीमपि बिभ्राण	११	७
जलदजालघनैरसिता	५	४८
जलौघसम्मूर्छनमूर्छित	१६	५९
जहातु नैनं कथमर्थसिद्धिः	३	१४
जहार चाम्भादचिरेण	१७	४४
जह्हि कठिनता	११	५१
जह्हीहि कोपं दयितो	८	८
जिह्वाशतान्यूल्लस	१६	३७
जीयन्तां दुर्जया	११	३२
जेतुमेव भवता	१३	५४
ज्वलतस्तव जातवेदसः	२	२४
ज्वलतोऽनलादनुनि	१२	७
ज्वलितं न हिरण्यरेतसं	२	२०
तत उदग्र इव द्विरदै	१८	१
ततः किरातस्य वचोभि	१४	१
ततः किराताधिपते	१६	१
ततः प्रजज्ञे समसेव	१५	४४
ततः प्रयात्यस्तमदा	१७	१७
ततः शरच्चन्द्रकराभिराम	३	१
ततः स कूजत्कलहंस	४	१
ततः सदर्पं प्रतनुं	१५	३५
ततः स संप्रेक्ष्य	४	२०
तत्रः सुपर्णव्रजपत्र	१६	४४
ततस्तपोवीर्य्यसमुद्भवस्य	१७	३५
ततोऽयभूमिं व्यवसाय	१७	५५
ततो धरित्रीधरतुल्य	१६	५५
ततोऽनुपूर्वायतदत्त	१७	५०
ततोऽपवादेन	१४	२७
तत्तदोषविशिखा	१३	५७
तत्तितिचितमिदं	१३	६८
तव कार्मुकभृतं	१३	२५

श्लोकाः ।	सर्गः	श्लोकाङ्कः
तथा न पूर्वं कृतभूषणा	८	४१
तथापि जिह्मः स भवज्जीगीषया	१	८
तथापि निघ्नं	३	१२
तदनघतनुरस्तु	१०	५०
तदभूरिवासरकृतं	६	२९
तदलं प्रतिपक्षमुन्नते	२	१५
तदा रम्याण्यरम्याणि	११	२८
तदाशु कर्तुं त्वयि जिह्म	१	२५
तदाशु कुर्वन् वचनं	३	५४
तदुपेत्य विघ्नयत	६	४३
तद्गणा दद्युर्भीमं	१५	३५
तनुमवजितलोक	१०	१५
तनुवा रभसो भाखान	१५	२३
तनूरलक्तारुणपाणि	८	५
तपनमण्डलदीपितमेक	५	२
तपसा क्लृप्तं वपुरुवाह	१२	६
तपसा तथा न मुदमस्य	१८	१४
तपसा निपीडितक्लशस्य	१२	३९
तपोबलैर्नैष विधाय	१४	६०
तप्तानामुपदधिरे विषाण	७	१३
तमतनुवनराजिश्यामितो	४	३८
तमनतिशयनीयं	५	५२
तमनिन्द्यवन्दिन	६	२
तमाशु चक्षुःश्रवसां	१६	४२
तमुदीरितारुणजटांशु	१२	१४
तरसा भुवनानि यो	१८	३७
तरसैव कोऽपि भुवनैक	१२	२६
तवोत्तरीयं करिचर्मसाङ्गजं	१८	३२
तस्मै हि भारोद्वरणे	१७	१४
तस्यातियत्नादति	१७	३२
तस्याहवायाससविल्लोल	१७	८
तं शम्भुराचिक्षमहेषु	१७	५३

श्लोकाः ।	सर्गः	श्लोकाङ्कः
तानभूरिधाम्नश्चतुरोऽपि	३	३५
तापसोऽपि विभुता	१३	३९
तामैच्छन्न चणं सभा	११	५१
तावदाश्रीयते लक्ष्मा	११	६१
तिरोहितश्चभनिकृत्त	१४	३३
तिरोहितान्यानि नितान्त	८	४७
तिरोहितेन्दोरथ शम्भु	१६	३१
तिष्ठतां तपसि पुण्य	१३	४४
तिष्ठद्भिः कथमपि	७	४
तीरान्तराणि मिथुनानि	८	५६
तुतोष पश्यन् कलमस्य	४	४
तुल्यरूपमसितोत्पलमच्छो:	९	६१
तुषारलेखाकुलितो	३	३९
तेजः समाश्रित्य	१७	३
तेन व्यातेनिरे भौमा	१५	५२
तेन सूरिरुपकारिता	१३	९०
तेनानिमित्तेन तथा	१७	४०
तेनानुजसहायेन	११	४८
तयौस्तनूनामनिला	१४	४८
त्रासज्जिह्मं यतश्चैता	१५	६
त्रिःसप्तकृत्वो जगती	३	१८
त्वमन्तकः स्थावरजङ्गमानां	१८	३५
त्वया साधु समारब्धि	११	१०
त्विषां ततिः पाटलिता	१६	३१
दक्षिणां प्रणतदक्षिण	१८	२७
दद्दशेऽथ सविस्मयं	१३	१७
दधत इव विलासशालि	५	३२
दधतमाकरिभिः करिभिः	५	७
दधति चतैः परिणत	६	७
दनुजः खिदयं चपा	१३	८
दरीमुखैरासवराग	१६	४६
दिङ्नागहस्ताकृतिमुद्वहद्भि	१६	३८

श्लोका: ।	सर्ग:	श्लोकाङ्क:
दिव: पृथिव्या: ककुभां	१४	५३
दिव्यस्त्रीणां सचरण	५	२३
दिश: समूहन्निव	१४	५०
दीपयन्नथ नभ:	९	२१
दीपितस्त्वमनुभाव	१३	३८
दुरक्षान् दीव्यता राज्ञा	११	४७
दुरासदवनज्यायान्	११	६३
दुरासदानरीनुग्रा	११	२३
दुर्वचं तदथ मा स्म	१३	४९
दु:शासनामर्षरजो	३	४७
दूनास्तेऽरिबलादूना	१४	३१
दृग्यतामयमनीकहा	१३	७०
दृष्टावदानाद्यतेऽरि	१७	१६
दृष्ट्वा दृशान्याचरणीयानि	१८	२५
देवाकानिनिकावादै	१५	२५
द्यां निरुन्धदतिनील	९	२०
द्युसिं वहन्तो वनिता	८	२९
द्युविद्गामिनीतार	१५	४३
द्यौरुन्नतामेव दिश:	१६	३५
द्रुतपदमभियातुमिच्छतीनां	१०	२
द्वारि चक्षुरधिपाणि	९	४३
द्विरदानिव दिग्विभावि	२	२३
द्विषत: परासिसिषु	१२	३४
द्विषतामुदय:	२	८
द्विषता विहितं	२	१७
द्विषन्निमित्ता यदियं	१	५१
द्विषां विघाताय	१	३
द्विषां चतुर्थ्या: प्रथमे	१४	५५
धनु: प्रवल्भ्वनितं रुषेव	१६	२०
धर्मात्मजो धर्मनिबन्धि	३	४
धार्तराष्ट्रै: सह प्रीति	११	५५
धार्ष्टद्युम्नलक्षितयथोचित	९	७२

श्लोका: ।	सर्ग:	श्लोकाङ्क:
धृतानामभिमुखपातिभि:	७	३
धृतबिसवलयावलि	१०	२४
धृतबिसवलये निधाय	१०	४९
धृतहेतिरप्यधृतजिह्म	६	२४
धृतोत्पलापीड इव	१६	१५
धैर्यावसादेन हृतप्रसादा	३	३८
धैर्येण विश्वासयता	३	३४
ध्रुवं प्रणाश: प्रहितस्य	१४	९
ध्वनिरगविवरेषु	१०	४
ध्वंसेत हृदयं सद्य:	११	५७
न ज्ञातं तात यत्रस्य	११	४२
न तेन सख्यं क्वचिदु	१	२१
न ददाह भूरुहवनानि	१२	१९
न दलति निचये	१०	३९
ननु ह्री मथना राधो	१५	२०
न नोननुन्नो नुन्नोनो	१५	१४
न पपात सन्निहित	१२	४
न प्रसादम चितं	९	२५
न मृग: खलु कोऽप्यय	१३	९
नयनादिव शूलिन:	१३	२२
न रागि चेत: परमा	१८	३१
नवपल्लवाञ्जलिभृत:	९	२९
न वर्म कर्म्म चिदपि	१४	१४
नवविनिद्रजपाकुसुम	५	८
नवातपालोहितमाहितं	४	८
न विरोधिनो रुषमियाय	१२	४९
न विसिस्मिये न विषसाद	१२	५
न समयपरिरक्षणं क्षमन्ते	१	४५
न सुखं प्रार्थये नार्थ	११	९९
न स्रजो रुरुचिरे	९	९५
नानारत्नज्योतिषां	५	३९
नान्तरज्ञा: स्त्रियो जातु	११	२४

श्लोकाः	सर्गः	श्लोकाङ्कः
नाभियोक्तुमनृतं त्वमिष्यसे	१२	५८
नासुरोऽयं न वा नागो	१५	१२
निचयिनि लवली	१०	२८
निजग्निरे तस्य हरेषुजालैः	१७	२६
निजेन नीतं विजितान्य	१४	३८
निद्राविनोदितनितान्त	९	७५
निपतितेऽधिगिरेध	१८	६
निपीयमानस्तबका	८	६
निबद्धनिःश्वासविकम्पिता	४	१५
निमीलदाकैकरलोल	८	५३
निरस्ते साचिविलो	८	५२
निरत्ययं साम न दानवर्जितं	१	१२
निरास्पदं प्रश्नकुतूहलि	१	९
निरीक्ष्यमाणा इव	४	३
निरीक्ष्य संरम्भनिरस्त	३	२१
निर्ययाय विद्याय दिनादि	३	२५
निहत्तत्तलोरुपयोधर	८	३
निशम्य सिद्धिं द्विषता	१	२७
निशातरौद्रेषु विकासतां	१४	३०
निशितासिरतोऽभीको	१५	२२
निःशेषं प्रसमितरेणु	७	३८
निःशेषं शकलितवल्कलाङ्गसारैः	१७	६२
निःश्वासधूमैः स्थगितां	१६	३८
निषण्णमापत्प्रतिकार	१४	३७
निशादिसन्नाहमथि	१६	१२
निसर्गदुर्बोधमबोधविक्लवा	१	६
निह्नते विडम्बित	१२	३८
निहितसरसयावके	१०	३
नीतोच्छ्रायं सुदुरशिशिर	५	३१
नीरन्ध्रं पथिषु रजो रथाङ्ग	७	२५
नीरन्ध्रं परिगमिते	१७	६८
नीलनीरजनिभे हिमं	६	१९

श्लोकाः	सर्गः	श्लोकाङ्कः
नुनोद तस्य स्खलपक्ष्मिनी	४	५
नूनमत्रभवतः शरीरकृतिं	१९	४५
नृपतिसुनिपरिग्रहेण	१०	६
नृपसुतमभितः समस्थयायाः	१०	४४
न्यायनिर्णीतसारत्वा	११	३९
पतत्सु शस्त्रेषु वितत्य	१४	४८
पतन्ति नाक्षिन् विशदाः	४	२३
पतितैरपेतजलदान्	६	२७
पतिं नगानामिव	१७	५
पथश्युतायां समितौ	९	१५
पपात पूर्वां जहतौ	४	१८
परमास्त्रपरिग्रहोद्धतेजः	१७	२६
परवानथसंसिद्धौ	११	३३
परस्य भूयान् विवरे	१६	२३
पराहतध्वस्तशिखे	१६	५६
परिकीर्णमुद्यतभुजस्य	१२	११
परिक्षते वक्षसि दन्ति	१६	११
परिणामसुखे गरीयसि	२	४
परिणाहिना तुहिनराशि	१२	२३
परिभ्रमन्मूर्धजषट्पदा	४	१४
परिभ्रमंल्लोहितचन्दनोचितः	१	२४
परिमोह्यमाणेन	१५	२६
परिवीतमंशुभिरुदस्त	१२	१८
पारसरविषयेषु लौढ़	५	३८
परिसुरपतिसुतधाम	१०	२०
परिस्फुरन्नानविधद्विती	८	४५
परीतमुच्चावजये	४	११
परोऽवजानाति यदङ्गता	१४	२३
पश्चात्क्रिया तूष्णयुगस्य	१७	४९
पाणिपल्लवविधूनन	९	५०
पातिलोत्तुङ्गमाङ्गल्यो	१५	११
पातुमाहितरतीश्रमि	९	५१

श्लोका:	सर्ग:	श्लोकाङ्क:
पार्थवाणा: पशुपते	१५	४०
पुर:सरा धामवतां	१	४३
पुराधिरूढ: शयनं	१	६८
पुरोपनीतं नृप रामणीयकं	१	३९
पुंस: पदं मध्यमसुत्त	१६	१९
पृथग्विधान्यस्त्रविराम	१६	३४
पृथ्व कदम्बकदम्बकराजित	५	९
पृथ्वधाम्नि तव परिवोधि	६	४५
पृथूरुपर्यस्तहङ्गता	१४	६४
प्रकृतमनुससार नाभि	१०	४१
प्रचलिते चलितं स्थित	१८	१०
प्रणतिप्रवणान् विहाय	२	४४
प्रणतिमथ विधाय	६	४७
प्रणिधाय चित्तमथ	६	३९
प्रणिधाय तव विधि	६	१८
प्रतप्तचामीकरभासुरेण	१६	४०
प्रतिक्रियायै विधुर:	१७	४१
प्रतिघ्नतीभि: क्रत	१६	४३
प्रतिदिशमभिगच्छता	१०	२१
प्रतिदिशं प्रवगाधिप	१४	६४
प्रतिबोधजृम्भणविभिन्न	६	१२
प्रत्यार्द्रीकृततिलकास्तुषार	७	१५
प्रत्याहतौजा: क्रत	१७	१५
प्रनृत्तशश्वद्विवस्त	१५	२६
प्रपिस्रो: किञ्च ते सूक्ति	११	१६
प्रभभूव नालमवलोकयितुं	६	६
प्रभवति न तदा परो	१०	६५
प्रभव: खलु कोष	२	१२
प्रमाष्टुं मयश:पङ्क	११	६७
प्रयच्छतीर्च: कुसुमानि	८	१४
प्रयुज्य सामाचरित	१४	७
प्रलीनभूपालमपि	१	२२
प्रवक्ष्यतेऽथ महाहव	१८	८
प्रवालभङ्गारुणपाणि	८	२१
प्रविकर्ष निनादभिन्न	१३	१६
प्रविततशरजालच्छन्न	१४	६५
प्रविवेश गामिव	१२	१०
प्रहृत्तनक्तन्दिवसन्धिदोषै:	१६	४७
प्रहृङ्गसिन्धूर्मिचय	१६	६०
प्रशान्तधर्माभिभव:	८	२८
प्रश्रीतन्मदसुरभीणि निम्न	७	३५
प्रसक्तटावानल	१६	२६
प्रसह्य यीऽस्मासु परै:	६	४४
प्रसादरम्यमीजस्वि	११	६८
प्रसादलक्ष्मीं दधत	३	१
प्रसेदिवांसं न तमाप	१७	२३
प्रस्थानश्रमजनितां	७	३१
प्रस्थिताभिरधिनाथ	९	३६
प्रहीयते काव्यवशागतेषु	१६	२२
प्राञ्जलावपि जने	९	१०
प्राप्तोऽभिमानन्यमना	३	४५
प्राप्यते गुणवतापि	९	५८
प्राप्यते यदिह दूर	१८	२५
प्रियेऽपरा यच्छति	८	१५
प्रियेण संगम्य विपच	८	३७
प्रियेण सिक्ता चरमं	८	५४
प्रियेषु यै: पार्थ विनोप	६	५२
प्रियै: सलिलं करवारि	८	४९
प्रीते पिनाकिनि मया	११	८१
प्रेरित: शशधरेण करौघ:	९	२८
प्लु तमालतीसितकपाल	१२	२४
बदरीतपोवननिवास	१२	६३
बद्धकोपविकृतीरपि	९	६४
बभार यून्याकृतिरज्जुं नस्तो	१७	३९

श्लोकः	सर्गः	श्लोकाङ्कः
बलवदपि बलं मिथो	१०	३७
बलवानपि कोपजन्मनः	२	३७
बलशालितया यथा तथा	१३	१२
बहुधा गतां जगति	६	४२
बर्हि चन्द्रकनिभं	६	११
बहुशः कृतसत्कृतेर्विधातुं	१३	१०
बाणच्छिदस्ते विशिखाः	१७	३०
बिभरांबभूवुरपह्नुत्त	१२	४९
बृहदुद्वहन् ज्वलदनादि	१२	४२
भयङ्करः प्राणभृतां	११	१७
भयादिवाश्रित्य ऋषाङ्कते	८	४६
भर्तृभिः प्रणयसंभ्रम	९	५४
भर्तृषूपसखि निचिप	९	६६
भवतः स्मरतां सदा	१८	३८
भवन्निरभुनारातिं	१५	१७
भवन्मनेतर्हि मनस्वि	१	३२
भवन्ति ते सभ्यतमा	१४	४
भवभीतये हृतहृत्तम	६	४१
भवाद्दशेषु प्रमदा	१	२८
भव्यो भवन्नपि सुने	५	४९
भित्त्वेव भाभिः सवितुः	१६	५१
भुजगराजसितेन	५	४
भूभर्तुः समधिकमादधे	७	२७
भूयः समाधानविरुद्ध	१७	७
भूरिप्रभावेण रणाभि	१७	२
भूरेणुना रासभधूसरेण	१६	७
भृशकुसुमशरेषु पातमोहा	१०	६१
भ्रूविलाससुभगाननं	९	५९
मग्नां द्विषच्छ्रमनि	३	३९
मनिमयूखचयांशुक	५	५
मतिभेदतमस्तिरो	२	३३
मतिमान् विनयप्रमाथि	२	५२
मथितास्रसो रयविकीर्ण	१२	५१
मदमानसमुद्धतं	२	४९
मदसिक्तमुखैर्मृगाधिप	२	१८
मदस्रुतिश्यामित	१६	२
मधुरं रवशानि	२	५५
मध्यमोपलनिभे खसदंशा	९	२
मनसा जपैः प्रणतिभिः	६	२२
मनःशिलाभङ्गनिभेन	१६	४५
मनोरमं प्रापितमन्तरं	४	७
मन्दमस्त्रिषुलतां	१५	१३
मया मृगान् हन्तुरनेन	१४	२५
मरुतः शिवा नवतृणा	६	३१
मरुतां पतिः स्विद	१२	१५
महता सयूखनिचयेन	१२	१३
महते फलाय तदवैद्य	६	२८
महत्त्वयोगाय महा	७	२३
महर्षभस्कन्धमनून	१४	४०
महानलि भिन्नसिताभ्र	१६	५७
महारथानां प्रतिदन्त्य	१६	१४
महास्त्रदुर्गे शिथिल	१६	३६
महिषचतागुरुतमाल	१२	५०
महीभृता पक्षवतेव	१६	१३
महीभृतां सच्चरितै	१	२०
महीयुजलधौ शचो	१५	३२
महीजसो मानधना	१	१९
मा गभस्त्यदविमूढ	९	७०
मागाश्चिरायैकचरः	३	५३
मानिनीजनविलोचन	९	२६
मा भूवन्नपथहृतस्त्वे	५	५०
माया स्विदेषा मति	१६	१८
मार्गणैरथ तव प्रयोजनं	१३	५९

श्लोका:	सर्ग:	श्लोकाङ्क:
ना विश्वासिष्ट समरं	१५	८
माहेन्द्रं नगमभित:	७	२०
मित्रमिष्टमुपकारि	१३	५१
मुकुलितमतिशय्य	१०	२७
मुक्तमूललघुरुन्नमित	९	५
मुखैरसौ विद्रुमभङ्ग	४	३१
मुखतीक्ष्णे शरान् निक्षो	१५	६४
मुदितमधुलिहो वितानो	१८	२०
मुनयस्तेऽभिमुख	१२	२५
मुनिदनुतनयान् विलोभ्य	१०	१६
मुनिमभिमुखतां	१०	४०
मुनिरस्मि निरागस:	१३	७
मुनिरूपोऽनुरूपेण	११	२
मुनिपुदहनातप्तां	१५	३०
मुनेर्विचित्रै रिपुभि:	१७	१९
मुने: शरीरेण तदुप	१४	५९
मुहुरनुपतता विधूय	१०	३३
मृदुयलत्पल्लवसोहिनी	१९	५३
मृगं दीक्षस्य हिंसादि	११	२०
मृगान् विनिघ्नन्मृगयु:	१४	१५
मृणालिनीनामसुरक्षित	४	२७
मृदितकिसलय: सुराङ्गना	१०	९
यच्छति प्रतिमुखं	९	१४
यथा निजे वर्त्मनि	१७	५७
यथाप्रतिष्टं विषतां	११	७४
यथायथं ता: सहिता	८	२
यथास्वमाशंसित	१	४३
यदवोचत वीच्य	२	२
यदात्थ कार्यं भवता	१४	१८
यदा विगृह्णाति हृतं	१४	२४
यदि प्रमाणीकृतमार्य	१४	११
यदि मनसि शम: किमङ्ग	१०	५५

श्लोका:	सर्ग:	श्लोकाङ्क:
यमनियमकृशीकृत	१०	१०
यया समासादित	३	२२
यशसेव तिरोदधच्छ्रुत	३	५८
यशोऽधिगन्तुं सुखलिप्सया वा	३	४०
यष्टुमिच्छसि प्रितृन	१३	६५
यस्मिन्नने स्वयंकृतस्यलोक:	३	१९
य: करोति वधोदकां	११	१९
य: सर्वेषामावरिता	१८	४०
या गम्या: सङ्गहायानां	११	२२
यातस्य यथितरङ्ग	७	१६
युक्त: प्रमाद्यसि हिता	११	२९
युक्ता: स्वशक्त्या सुनय:	१८	२९
युयुत्सुनेव कवचं	११	१५
येनापविद्धसलिल:	५	३०
योगश्च तं योग्यतमाय	३	२६
योषित: पुलकरोधि	९	४१
योषिदुद्भतमनोभव	९	६८
रक्षोभि: सुरमनुजै:	१८	३६
रजनीषु राजतनयस्य	१२	१९
रक्षिता नु विविधा	९	१५
रणाय जैत्र: प्रदिशन्निव	१४	२८
रथाङ्गसंक्रीडितमस्य	१९	८
रम्या नवद्य तिरयैति	५	३७
रयेण सा संनिदधे	१७	५२
रहितरत्नचयान्न शिलो	५	१०
रागकान्तनयनेषु नितान्तं	९	६१
राजाह्न: पथि मरुता	७	९
राचिरागमलिनानि	९	१६
रामाणामजितमाख्य	७	७
रिक्तेऽविसस्मभमया	१७	२६
रुचिकरमपि नार्थं	१०	६२
रुचिरपल्लवपुष्पलता	५	१९

श्लोकाः ।	सर्गः	श्लोकाङ्कः
रुचिराकृतिः कनकसानु	१	१
रुजञ्जिहीर्षून् बहुधा	१५	५१
रुन्धती नयनवाक्यविकासं	९	६७
लघुवृत्तितया भिदां	२	५३
लभ्यमेकसुकृतेन	१९	५२
लभ्या धरित्री तव	३	१७
लिखितेव चयकालरौद्रे	१६	५४
लीलया विमलविद्रुम	९	२२
लोकं विधाता विहितस्य	३	४१
लोचनाधरकृता	९	६०
लोलदृष्टि वदनं	९	४७
वदनेन पुष्पितलताल	१२	४१
वनान्तशय्याकठिनी	१	२६
नाश्रयाः कस्य न्यगाः	१४	१३
वनेऽवने वनसदां मार्गं	१५	१०
वपुरिन्द्रियोपतपनेषु	१२	३
बंधुषा परमेण भूधरा	१९	१
वयं च वर्णाश्रमरक्षणो	१४	२९
वरं कृतघ्नस्य गुणा	१५	१५
वरोरुभिर्वारणहस्त	८	५२
वसूनि वाञ्छन्न वशी	१	१३
वंशलक्ष्मीमनुद्वृत्य	११	६६
वंशोचितत्वाद्भिमान	१७	११
वाजिभूमिरिभराज	१३	५५
वाससां शिथिलतामुप	९	६५
विकचवारिरुहं दधतं	५	१३
विकसितकुसुमाधरं	१०	३२
विकार्मुकः कर्मसु शोच	१७	५३
विकाशमीयुर्जगतीश	१५	५२
विकोशनिर्धौततनो	१७	४५
विगण्य कारणमनेक	६	३७
विगाढमावे रमणीभि	८	३१
विचकर्ष स संहितेषु	१३	१८
विचिक्यया चिक्यतेव	१६	९
विच्छिन्नाभविलायं	११	७९
विजहीहि रणोत्साहं	११	३१
तिजिगीषते यदि जगन्ति	१२	३०
विजित्य यः प्राज्य	१	३५
वितनुशीकररागिभि	५	१५
वितन्वतस्तस्य शरान्धकारं	१७	२०
विदिताः प्रविश्य विदिता	६	३०
विदूरपातेन भिदामुपेयु	८	१०
विधाय रक्षान् परितः	१	१४
विधाय विघ्वंसनात्म	१	१६
विधिसमयनियोगा	१	४७
विधुं किमतः परं	२	६
विधूतकेशाः परि	८	३३
विधूनयन्ती गहनानि	१४	४७
विनम्रशालिप्रसवौघ	४	२
विनयं गुणा इव विवेक	१२	१७
विनियंतीनां गुरुखेद	८	२६
विपक्षचित्तोन्मथना	८	३४
विपत्रलेखा निरलक्तका	८	४०
विपदेति तावदवसाद	१८	२१
विपदोऽभिभवन्त्यविक्रमं	२	१४
विपाण्डु भिर्म्लानतया	४	२४
विपाण्डु संव्यानमिवा	४	२८
विफलीकृतयत्नस्य	१५	४६
विबोधितस्य ध्वनिना	१७	४६
विभिन्नपर्यन्तगमीन	८	३०
विभिन्नपातिताश्चीय	१५	३४
विभेदमन्तः पदवी	१७	२७
विमुक्तमाशंसितशत्रुनिर्ज्यं	१४	५१
विमुच्यमाने रपि तस्य	४	१९

श्लोकाः ।	सर्गः	श्लोकाङ्कः
वियति वेगपरिश्रु त	१८	१२
विरचय्य काननविभाग	१२	४४
विरोधि सिद्धे रिति	१४	८
विलङ्घ्य पत्रिणां पङ्क्ति	१५	४४
विलम्बमानाकुलकेश	८	१८
विवरेऽपि नैनमनिगूढ़	१२	३७
विवस्वदंशुसंश्लेष	१५	९
विविक्तवर्णाभरणा	१४	३
विविक्तेऽस्मिन्नगे भूयः	११	३६
विशङ्कमानौ भवतः	१	७
विशदभ्रयुगच्छन्न	११	४
विषमोऽपि विगाह्यते	२	३
विसारिकाक्षीमणि	८	२३
विस्फार्यमानस्य ततो	१७	२४
विस्मयः क इव वा	१३	४०
विस्मित: सपदि तेन	१८	१३
विहस्य पाणौ विधृते	८	५१
विहाय बाल्क्षासुदिते	४	२५
विहाय शान्तिं नृप	१	४२
विहारभूमिरभिघोष	४	३१
विहितां प्रियया मनःप्रिया	२	१
वीक्ष्य रत्नरसके	९	५९
वीक्ष्य रन्तुमनसः	९	१
वीतजम्भजरसं परं	५	२२
वीतप्रभावतनुरु	१९	६४
वीतौजसः सन्निधि	३	४९
वीर्यावदानेषु लता	३	४३
वेतशाककुलजे शैले	१५	१८
व्यक्तोदितस्मितमयूख	२	५९
व्यथितमपि शमं मनो	१०	२२
व्यथितस्मृ मनोरथैः	५	११
व्यधत्त यस्मिन् पुरमुच	५	१५

श्लोकाः	सर्गः	श्लोकाङ्कः
व्यपोहितुं लोचनतो	८	१९
व्यानशे शशधरेण	९	१७
व्याहृत्य मरुतां पत्या	११	३७
व्रज जयरिपुलोकं	१८	४८
व्रजति शुचि पदं त्वयि	१८	२६
व्रजतोऽस्य हरित्पतङ्ग	१३	२१
व्रजन्ति ते मूढधियः	१	३०
व्रजाजिरेष्वम्बुदनाद	४	१६
व्रणमुखच्युतशोणित	१८	४
व्रीडानतैराननजोप	३	४२
शक्तिरर्थपतिषु स्वयं	१३	६१
शक्तिवैकल्यनसस्य	११	५९
शङ्किताय कृतबाष्प	९	४६
शतशो विशिखानवद्यते	१५	४८
शमयन् धृतेन्द्रियशमैक	६	२०
शम्भोर्धनुर्मण्डलतः	१५	४९
शरणं भवन्तमति	१८	२२
शरदम्बुधरच्छाया	११	१२
शरदृष्टिं विधूयोर्वीं	१५	४१
शरानवद्यानवद्य	१७	४६
शशधर इव लोचनाभि	१०	११
शाखावसक्तकमनीय	७	४०
शान्तता विनययोगि	१३	३७
शरतां गमितया शशि	९	२९
शिरसा हरिन्मणिनिभः	६	९३
शिलाघनैर्नाकसदा	८	३२
शिवध्वजिन्यः प्रतियोध	१४	५८
शिवप्रणुन्नेन शिलीमुखेन	१७	५८
शिवभुजाहृतिभिन्न	१८	३
शिवमौपयिकं गरीयसीं	२	३५
शीधुपानविधुरासु	९	४२
शीधुपानविधुरेषु	९	७१

श्लोकाः।	सर्गः	श्लोकाङ्कः
यूथैर्मयूखनिचयैः	५	४२
यूथि भूषयति स्रुतं	२	३२
यूथिरस्रं विद्र मलता	६	१३
यूथिवल्लवीततनुरन्य	६	२८
यूथानना: सान्द्रकरेषु	८	४२
यून्यमाकीर्णतामेति	११	२७
योतन्मयूखेऽपि हिम	६	८
यद्वेया विप्रलब्धार:	११	३४
श्रिय: कुरुणामधिपस्य	१	१
श्रियं विकर्षत्यपहृत्य	६	७
श्रिया हसद्भि: कमलानि	८	४४
श्रीमद्भिर्नियमितकन्धरा	७	३७
श्रीमद्भि: सरथगजै:	७	१
श्रीमल्लतामवनमोषधय:	५	२८
श्रुतमप्यधिगम्य ये रिपून्	२	४१
श्रुतिसुखमुपवीक्षितं	१०	३८
श्रेयसीं तव सम्प्राप्ता	११	११
श्रेयसोऽप्यस्य ते तात	११	४४
श्लिष्यत: प्रियवधूरुप	९	३७
श्वसनचलित पल्लवा	१०	३४
श्वस्त्रया सुखसंवित्ति:	११	३४
स किंसखा साधु न शास्ति	१	५
सक्तिं जवादपनयत्य	५	४९
स चक्रियस्त्राणसह:	३	४८
स खण्डनं प्राप्य पराद	१७	५०
सखा स युक्त: कथित:	१४	२१
सखि दयितमिहानयेति	१०	४७
सखीजनं प्रेम गुरुक्रता	८	११
सखीनिव प्रीतयुजो	१	१०
स गत: क्षितिमुष्ण	१३	३१
संक्रान्तचन्दनरसा	८	५७
सचकितमिव विस्मया	१०	७
स जगाम विजयमुदीच्या	६	१५
सजलजलधरं नभो	१०	१९
सज्जनोऽसि विजहीहि	१३	६६
सज्यं धनुर्वहति यो	१३	७१
स ततार सैकतवतीरभित:	६	१६
स तद्दोजसा विजित	१२	२९
स तमालनिभे रिपौ	१३	२४
स समाससाद घननील	१२	५३

श्लोकाः।	सर्गः	श्लोकाङ्कः
सङ्कल्पसंतनुमाकृते:	१०	१३
सङ्गनां विरचनाहित	९	३४
सङ्गादितेवाभिनिविष्ट	१७	११
स धनुर्महेषुधि विभर्त्ति	१२	२७
सध्वानं निपतितनिर्झरासु	७	२२
सनाकवनितं नितम्ब	५	२७
सन्तत निशमयन्त उत्सुका:	१३	४७
सन्निबद्धसपक्षपङ्क्ति	१८	३०
सपदि प्रियरूपपर्वरेखा:	१३	२५
सपदि हरिसखैर्वधू	१०	१८
स पिङ्गाच: श्रीमान्	१८	४५
स पिशङ्गजटावलि:	१५	४७
स पुमानर्थवज्जन्मा	११	६२
सप्रश्नन्यास्वदनादिचापं	१७	१०
स प्रयुज्य तनये	१३	२६
स बभार रणापेतां	१५	३३
स बिभर्ति भीषण	६	१२
स भवस्य भवच्चैक	१३	१९
स भोगिसङ्ग: शम	१६	४८
समदशिखिरुतानि	१०	२५
स मन्यरावस्थित	४	१७
समवस्तिरुपैति	२	१८
समस्य सम्पादयता	१४	९
समानकान्तीनि तुषार	८	२५
समुच्छ्वसत्पङ्कजकोष	८	२४
समुज्झिता यावदराति	३४	५६
समुन्नतै: काशदुकूल	८	६
समुल्लसत्प्रासमहोर्मि	१६	४
सम्प्रति लब्धजन्म	५	४३
सम्पद्यतामिति	१५	५३
सम्भीयमाणोऽनुबभूव	१७	१३
सम्भिन्नकामविरलपातिभि	७	२१
सम्भिन्नैरिभतुरगावगाढ	७	११
सम्भोगचमगहनामथो	७	२९
संभूर्ज्जतां रजतभित्ति	५	४१
स यौवराज्ये नवयौवनोद्धतं	१	२२
सरजसमपहाय	१०	२९
सरभसमवलम्ब्य	१०	५४
सरोजपत्रे नु विलीन	८	६५
सललितचलित	१०	५२

श्लोकः।	सर्गः	श्लोकाङ्कः
सलीलमासक्तलता	८	१६
सलीलमुल्लिखितशाववे	१४	२
स वंशस्य वदातस्य	११	७५
सविनयमपराभिसृत्य	१०	५७
स हृषध्वजसायकावभिन्नं	१३	२८
सव्यलीकमवधीरित	९	४५
सव्यापसव्यध्वनितो	१७	२५
सव्रीडमन्दैरिव	३	४६
ससस्वरतिदे नित्यं	१५	२७
स समुद्धरता विचिन्त्य	१६	६४
स समग्रधार्यैवमगर्ह्यं	१६	२५
स सायकान् साध्वस	१७	२१
स सामिः सासुसः	१५	५
समूरचापमनेकमणि	५	१
सहशरधि निजं तथा	१८	१६
सहसा विदधीत न क्रियां	२	३०
सहसोपगतः स	२	५६
संरम्भवेगोज्झित	१७	४९
संवाता सुहृदनिलेन	७	१४
संविधातुमभिषेक	९	३२
संसिद्धाविति करणीय	७	१७
संसेवन्ते दानशीला	१८	२४
संस्कारवत्त्वाद्गमयतसु	१७	६
साचि लोचनयुगं	९	४४
सादृश्यं गतमपनिद्र	५	२९
सादृश्यं दधति गभीर	७	३९
साफल्यमस्त्रे रिपु	१६	४९
सामोदाः कुसुमतरु	७	२८
साम्यं गतेनाग्निना	१७	५९
सावलेपमपलिप्सिते	१६	५६
सितच्छदानामिव	४	६०
सितवाजिनि निजग	६	९
सिन्दूरैः कृतरुचयः	७	८
सिषिचुरवनिमम्बुवाहाः	१८	१७
सुकुमारमेकमणुमर्म्म	६	४०
सुखेन लभ्या दधतः	१	१७
सुगेषु दुर्गेषु च तुल्य	१४	३२

श्लोकः।	सर्गः	श्लोकाङ्कः
सुता न यूयं किसु	२	१३
सुरक्षत्यमेतदवगम्य	१२	३६
सुरसरिति परं तपो	१०	१२
सुलभैः सदा नयवता	५	२०
सुहृदःसहजास्थेतरे	२	४५
सृजन्तमाजाविषु	३	२०
सेतुत्वं दधति पयोमुचां	७	१९
सोढवान्नो दुरन्यां	११	५३
सोढावगीतप्रथमा	१७	२८
सोत्कण्ठैरमरगणै	७	२
स्तुवन्ति गुणैर्नभिधेय	१४	५
स्थितसुव्रते तुहिन	१२	२१
स्थितं विशङ्के नभसीव	१७	४८
स्थित्यतिक्रान्तिभीरुत्वं	११	५४
स्पर्धितनवलतातरु	५	४४
स्पृहणीयगुणैर्महा	२	३४
स्फुटता न पदैरपाकृता	२	२७
स्फुटपौरुषमापपात	१३	१२
स्फुटवङ्कसटोन्नतिः	१३	२
स्फरत्पिशङ्गभौर्वीकं	१५	१९
स्मर्यते तनुभृतां सनातनं	१३	४२
स्यन्दना नो च तुरगाः	१५	१६
स्वकेतुभिः पाण्डुर	१९	५८
स्वगोचरे सत्यपि चित्त	८	१३
स्वधर्म्ममनुरुध्यन्ते	११	७८
स्वयं संराध्यैवं शतमख	१०	६३
स्वादितः स्वयमर्थधित	९	५५
हताहतेत्यु द्धतभीम	१९	५
हरपृथासुतयोर्ध्वनि	१८	२
हरसैनिकाः प्रतिभये	१२	४८
हरिच्छविश्यामसुदय	१४	४१
हंसा इहन्तः सुरसद्म	१८	१९
हता गुणैरस्य भयेन	१४	६१
हतोत्तमाङ्गा प्रसभं	११	४९
हृदाशसि व्यसवधू	८	४१
क्रीतया गलितनीवि	९	४८
क्रेपयन्नहिमतेजसं लिषा	१३	४१

इति किरातार्जुनीयस्य-श्लोकानां सूचीपत्रं समाप्तम्।



चिरं सारस्वतं योगमाधाय हृदयान्तरे ॥
सम्प्राप्तां सिद्धिमालेभे गुरुनाथः सुधीरसौ ॥

किरातार्जुनीयम्।

प्रथमः सर्गः।

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥ १॥

अन्वयः—(युधिष्ठिरः) कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुम् यम् (वनेचरम्) अयुङ्क्त, वर्णिलिङ्गी स वनेचरः विदितः (सन्) द्वैतवने युधिष्ठिरं समाययौ। वाच्यपरिवर्त्तनम्—यः अयुज्यत, वर्णिलिङ्गिना तेन वनेचरेण युधिष्ठिरः समायते। अन्यत् सर्वं पदं तुल्यमेव, एवं सर्वत्र ज्ञेयम्। १

अथ तत्रभवान् भारविनामा कविः "काव्यं यशसेऽर्थकृते, व्यवहारविदे शिवेतरक्षतये। सद्यःपरनिर्वृतये, कान्तासम्मिततयोपदेशयुजे॥" इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्य अनेकश्रेयःसाधनताम्, 'काव्यालापांश्च वर्ज्जयेत्" इति निषेधशास्त्रस्य असत्काव्यविषयताञ्च पश्यन् किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन् कथामुपक्षिपति—श्रिय इति। आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिः अत्र उपयुज्यते। तदुक्तम्—"देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा" इति। कुरूणां निवासाः कुरवो जनपदाः। "तस्य निवासः" इत्यण्प्रत्ययः। "जनपदे लुप्" । तेषामधिपस्य दुर्य्योधनस्य सम्बन्धिनीम्। शेषे षष्ठी। श्रियो राज्यलक्ष्म्याः। "कर्त्तृकर्म्मणोः कृति" इति कर्म्मणि षष्ठी। पाल्यतेऽनयेति पालनी, तां प्रतिष्ठापिकामित्यर्थः। प्रजारागमूलत्वात् सम्पद इति भावः। "करणाधिकरणयोश्च" इति सूत्रेण अत्र करणे ल्युट्। "ढिड्ढाणञ्" इत्यादिना ङीप्। प्रजासु जनेषु विषये। "प्रजा स्यात् सन्ततौ जने" इत्यमरः। वृत्तिं व्यवहारं वेदितुं यं वनेचरम् अयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी। तदुक्तम्—"स्मरणं कीर्त्तनं

केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥" एतदष्टविधमैथुनाभावः प्रशस्तिः। "वर्णादब्रह्मचारिणि" इतीनिप्रत्ययः। तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी ब्रह्मचारिवेश वानित्यर्थः। स नियुक्तः, वने चरतीति वनेचरः किरातः। "भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः" इत्यमरः। "चरेष्टः" इति टप्रत्ययः। "तत्पुरुषे कृति बहुलम्" इत्यलुक्। विदितं वेदनमस्यास्तीति विदितः, परवृत्तान्तज्ञानवान् इत्यर्थः। "अर्श आदिभ्योऽच्" इत्यच्प्रत्ययः। अथवा कर्त्तरि कर्मधर्मोपचारात् विदितवृत्तान्तो विदित इत्युच्यते। उभयत्रापि "पोता गावः" "भुक्ता ब्राह्मणाः" "विभक्ता भ्रातरः" इत्यादिवत् साधुत्वं, न तु कर्त्तरि क्तः। सकर्मकेभ्यस्तस्य विधानाभावात्। अतएव भाष्यकारः—"अकारो मत्वर्थीयः। विभक्तमेषामस्तीति विभक्ताः, पोतमेषामस्तीति पोताः, भुक्तमेषामस्तीति भुक्ताः, इति सर्वत्र। अथवा उत्तरपदलोपोऽत्र द्रष्टव्यः। विभक्तधना विभक्ताः पोतोदकाः पोताः भुक्तान्ना भुक्ता इति।" अत्र लोपशब्दार्थमाह कैयटः—"गतार्थप्रयोग एव लोपोऽभिमतः। "विभक्ता भ्रातरः" इत्यत्र च धनस्य यद्विभक्तत्वं तद्भ्रातृष्वपचर्य्यते। "पोता गावः" इत्यत्राप्युदकस्य पोतत्वं गोषु आरोप्यते। "भुक्ता ब्राह्मणाः" इत्यत्र "अन्नस्य भुक्तत्वं ब्राह्मणेषु उपचर्य्यते" इति। तद्वदत्रापि वृत्तान्तगतं विदितत्वं वेदितरि वनेचरे उपचर्य्यते। एतेन "वनायपीतप्रतिबद्धवत्साम्" इति "पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या" एवमादयो व्याख्याताः। अथवा विदितो विदितवान् सकर्मकादप्यविवक्षिते कर्मणि कर्त्तरि क्तः। "आश्रितः कर्त्ता" इत्यादौ यथाहुः—"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥" इति। प्रतीहारादिना ज्ञापित इति वा। द्वैतवने द्वैताख्ये तपोवने। यद्वा द्वे इते गते यस्मात्तद्द्वीतं द्वीतमेव द्वैतम्। तच्च तद्वनञ्च तस्मिन्। शोकमोहादिरहिते इत्यर्थः, युधि रणे स्थिरं युधिष्ठिरं धर्म्मराजम्। "हलन्तात् सप्तम्याः संज्ञायाम्" इत्यलुक्। "गवियुधिभ्यां स्थिरः" इति षत्वम्। समाययौ सम्प्राप्तः। अत्र "वने वनेचरः" इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकधैव आवृत्त्या वृत्त्यनुप्रासो नामालङ्कारः। अस्मिन् सर्गे प्रायो वंशस्थं वृत्तम्, तस्य लक्षणम्—"जतौ तु वंशस्थमुदीरितं जरौ" इति॥ १॥

१। যাহা রাজ্যলক্ষ্মী-রক্ষার প্রধান কারণ, প্রজাবর্গের প্রতি কুরুরাজ দুর্য্যোধনের সেই ব্যবহার অবগতির নিমিত্ত (ধর্ম্মনন্দন যুধিষ্ঠির) যে বনেচরকে নিযুক্ত করিয়াছিলেন, ব্রহ্মচারি-বেশধারী সেই বনেচর নিখিল তত্ত্ব অবগত হইয়া দ্বৈতবনে যুধিষ্ঠিরসমীপে প্রত্যাগমন করিল।

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥ २॥
द्विषां विघाताय विधातुमिच्छतो-
रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्य्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे॥ ३॥

अन्वयः। कृतप्रणामस्य सपत्नेन जितां महीं महीभुजे निवेदयिष्यतः तस्य मनो न विव्यथे, हि हितैषिणः मृषा प्रियं प्रवक्तुं न इच्छन्ति। वाच्य।—मनसा विव्यथे। हितैषिभिः इष्यते। २

अन्वयः। सः रहसि द्विषां विघाताय विधातुमिच्छतः भूभृतः अनुज्ञाम् अधिगम्य सौष्ठवौदार्य्यविशेषशालिनीं विनिश्चितार्थां इति वाचम् आददे। वाच्य—तेन...शालिनी विनिश्चितार्था वाक् आददे। ३

सम्प्रति तत्कालोचितत्वमादेश्यस्तस्य तद्गुणसम्पन्नत्वमादर्शयन्नाह—कृतप्रणामस्येति। कृतप्रणामस्य तत्कालोचितत्वात् कृतनमस्कारस्य सपत्नेन रिपुणा दुर्य्योधनेन। "रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः" इत्यमरः। जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय, क्रियाग्रहणात् सम्प्रदानत्वम्। निवेदयिष्यतः ज्ञापयिष्यतः। "लटः सद्वा" इति शतृप्रत्ययः। तस्य वनेचरस्य मनो न विव्यथे। कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः। "व्यथ भयचलनयोः" इति व्यथधातोर्लिट्। उक्तमर्थमर्थान्तरोपन्यासेन समर्थयते—न हीति। हि यस्मात्, हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति। अन्यथा कार्य्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः। "अमोघ्यममान्यमसृषाभाषित्व[illegible]ऽनुग्रहकत्वं चेति चारगुणाः" इति नीतिवाक्यामृते॥ २॥

तथापि प्रियार्हं राज्ञि कटुनिष्ठुरोक्तिं युक्तेत्याशङ्क्य स्वाम्यनुज्ञायां न दुष्यतीत्याशयेनाह—द्विषामिति। रहसि एकान्ते सः वनेचरः द्विषां शत्रूणाम्, कर्म्मणि षष्ठी। विघाताय द्विषो विहन्तुमित्यर्थः। "तुमर्थाच्च भाववचनात्" इति चतुर्थी। "भाववचनाच्च" इति तुमर्थे घञ्प्रत्ययः।

२। वसुधापति युधिष्ठिरের নিকট 'শত্রু দুর্য্যোধনকর্তৃক ভূমণ্ডল আয়ত্তীকৃত হইয়াছে' এই অপ্রিয় বাণী নিবেদন করিতে প্রণত বনেচরের হৃদয় ব্যথিত হইল না। কেন না, প্রভুর প্রিয়কারীরা কদাচ প্রিয়মিথ্যা কথা কহিতে অভিলাষ করেন না।

क्रियासु युक्तैर्नৃপ चारचक्षुषः
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः॥ ४॥

অন্বয়ঃ। (হে) নৃপ! ক্রিয়াসু যুক্তৈঃ অনুজীবিভিঃ চারচক্ষুষঃ প্রভবঃ বঞ্চনীয়াঃ ন ভবন্তি। অতঃ সাধু, অসাধু বা (মদুক্তম্) ক্ষন্তুম্ অর্হসি। হিতং মনোহারি চ বচঃ দুর্লভম্। বাচ্য—যুক্তা অনুজীবিনঃ প্রভূন্ ন বঞ্চয়েয়ুঃ। অর্হ্যতে হিতেন মনোহারিণা চ বচসা দুর্লভেন ভূয়তে। ৪

अत्र तादर्थ्ये चतुर्थ्यामपि न दोषः। तथापि प्रयोगवैचित्र्यविशेषस्याप्यलङ्कारत्वादेवं व्याचक्षते। विधातुं व्यापारं कर्त्तुमिच्छतः। "समानकर्त्तृकेषु तुमुन्"। द्विषो विहन्तुमुद्युक्तमानम[ज्ञान]स्येत्यर्थः। अतएव भूभृतो युधिष्ठिरस्य अनुज्ञामधिगम्य। सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम्। सुष्ठुशब्दाद्व्ययादुन्नात्रादित्वादङ्प्रत्ययः। उदारस्य भाव औदार्य्यमर्थसम्पत्तिः तयोर्द्वन्द्वः सौष्ठवौदार्य्यं। अत्र औदार्य्यशब्दस्याजाद्यदन्तत्वेऽपि "लक्षणहेत्वोः क्रियायाः" इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमकुर्वता सूत्रकृतैव पूर्वनिपातशास्त्रस्य अनित्यत्वज्ञापनान्न पूर्वनिपातः। जक्तश्च काशिकायाम्—"अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्" इति। ते एव विशेषः, तयोर्वा विशेषः। तेन शालते शोभत इति सौष्ठवौदार्य्यविशेषशालिनी तां, ताच्छील्ये णिनिः। विनिश्चितार्थां विशेषतः प्रमाणतो निर्नीतार्थामिति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान् उवाच इत्यर्थः॥ ३॥

प्रथमं तावदप्रियनिवेदकमात्मानं प्रति अक्षोभं याचते—क्रियास्विति। हे नृप! क्रियासु क्रत्यवस्तुषु युक्तैर्नियुक्तैः अनुजीविभिर्भृत्यैः चारादिभिरित्यर्थः, चरन्तीति चराः पचाद्यच्। त एव चाराः, चरेः पचाद्यजन्तात् प्रज्ञादित्वादणप्रत्ययः। त एव चक्षुर्येषां ते चारचक्षुषः। "स्वपरमण्डलकार्य्याकार्य्यविलोकने चाराश्चक्षूंषि क्षितिपतीनाम्" इति नीतिवाक्यामृते। तदुक्तम्—"गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति पण्डिताः। चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः॥" इति। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीयाः प्रतारणीयाः, सत्यमेव वक्तव्या इत्यर्थः। चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति

৩। তথাপি প্রিয়পাত্রের প্রতি কটু নিষ্ঠুর ভাষণ সুষ্ঠু নহে; ইহা মনে করিয়া বনেচর শত্রু-বিনাশে অভিলাষী রাজা যুধিষ্ঠিরের অনুজ্ঞাগ্রহণপূর্ব্বক যাহা সৌষ্ঠব ও বিশেষতঃ ঔদার্য্যযুক্ত এবং প্রমাণ দ্বারা যাহার অর্থ নির্ণীত হইয়াছে, নির্জ্জনে এইরূপ বাক্য বলিতে লাগিল।

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ॥ ५ ॥

अन्वयः । यः अधिपं साधु न शास्ति, सः किंसखा । यः हितात् न संशृणुते सः किम्प्रभुः । हि नृपेषु अमात्येषु च सदा अनुकूलेषु (सत्सु) सर्वसम्पदः रतिं कुर्वते । वाच्य—येन अधिपः न शिष्यते । तेन किंसख्या (भूयते) येन न संश्रूयते, तेन किम्प्रभुणा भूयते । सर्वसम्पद्भिः रतिः क्रियते । ५

भावः । अतोऽप्रतार्थित्वाद्धेतोः असाधु अप्रियमं, साधु प्रियं वा मदुक्तमिति शेषः, वाशब्दोऽप्यर्थे । क्षन्तुं सोढुमर्हसि, कुतः, हितं पथ्यं मनोहारि प्रियञ्च वचो दुर्लभम् । अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥ ४

तर्हि तूष्णीम्भाव एव वरमित्याशङ्क्याह—स इति । यः सखा अमात्यादिः अधिपं स्वामिनं साधु हितं न शास्ति न उपदिशति । "ब्रुविशासिः" इत्यादिना शासेर्दुहादिपाठाद्द्विकर्मकत्वम् । स हितानुपदेष्टा, कुत्सितः सखा किंसखा दुर्मन्त्रीत्यर्थः । "किमः क्षेपे" इति समासान्तप्रतिषेधः । तथा यः प्रभुः निग्रहानुग्रहसमर्थः स्वामी हितात् आप्तजनात् हितोपदेष्टुः सकाशात् । "आख्यातोपयोगे" इत्यपादानत्वात् पञ्चमी । न संशृणुते न शृणोति हितमिति शेषः । "समो गम्यृच्छि" इत्यादिना सम्पूर्वाच्छ्रुणोतेरकर्मकत्वादात्मनेपदमकर्मकत्वं वैवक्षिकम् । स हितस्याश्रोता ['हितमश्रोता' इति च पाठो दृश्यते] प्रभुः किम्प्रभुः कुत्सितस्वामी । पूर्ववत् समासः । सर्वथा सचिवेन वक्तव्यं श्रोतव्यं च स्वामिना । एवञ्च राजमन्त्रिणोः ऐकमत्यं स्यादित्यर्थः । ऐकमत्यस्य फलमाह—सदेति । हि यस्मात् नृपेषु स्वामिषु अमा सह भवा अमात्यास्तेषु च । "अव्ययात्त्यप्" । अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसम्पदः सदा रतिमनुरागं कुर्वते कुर्वन्ति, न जातु जहतीत्यर्थः । अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः । अत्रैवं राजमन्त्रिणोर्हितानुपदेश-तदश्रवणनिन्दासामर्थ्यमिङ्गैरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसम्पत्सिद्धिरूपकार्य्येण समर्थनात् कार्य्येण कारणसमर्थनरूपोऽर्था-

৪। বনেচর বলিল,—মহারাজ! চরই যাঁহাদের চক্ষু, সেইরূপ প্রভুগণকে বঞ্চিত করা কার্য্যে নিযুক্ত ভৃত্যদিগের কদাচ উচিত নহে। অতএব আমি প্রিয় বা অপ্রিয় যাহাই বলি না কেন, আমাকে ক্ষমা করিবেন; কেন না, হিতকর অথচ শ্রুতিমধুর বাক্য দুর্লভ।

৫। যে সচিব স্বামীর প্রতি সাধু উপদেশ করেন না, তিনি দুঃসচিব; আবার যে প্রভু

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥
विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

अन्वयः । निसर्गदुर्बोधम् भूपतीनां चरितं क्व, अबोधविक्लवाः जन्तवः क्व । (तथापि) निगूढतत्त्वं विद्विषां नयवर्त्म मया यत् अवेदि अयं तव अनुभावः । वाच्य—निसर्गदुर्बोधेन चरितेन, अबोधविक्लवैः जन्तुभिः (भूयते) । अहं अवेदिषम्, अनेन अनुभावेन (भूयते) । ६

अन्वयः । (सः) सुयोधनः नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः

न्तरन्यासोऽलङ्कारः । तदुक्तम्—"सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः" इति ॥ ५ ॥

सम्प्रति स्वाहङ्कारं परिहरति—निसर्गेति । निसर्गदुर्बोधं स्वभावदुर्ग्रहम् । "द्विषद्भ्यः" इत्यादिना खल्प्रत्ययः । भूपतीनां चरितं क्व ? अबोधविक्लवा अज्ञानोपहता जन्तवः मादृशाः पामरजना इत्यर्थः, क्व, नोभयं सङ्घटत इत्यर्थः । तथापि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः, "सन्धिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम् ॥" इत्यादिरूपो यत् मया अवेदि ज्ञातमिति यावत् । विदेः कर्मणि लुङ् । अयम् इदं वेदनमित्यर्थः, विधेयप्राधान्यात् पुंलिङ्गनिर्देशः । तव अनुभावः सामर्थ्यम् । अनुगतो भावोऽनुभाव इति घञन्तेन प्रादिसमासः । न तूपसृष्टात् घञ्प्रत्ययः । "श्नीभुवोऽनुपसर्गे इत्यनुपसर्गाच्च वर्तेर्धातोर्घञ् विधानात् । अतएव काशिकायाम्—"कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमास" इति । दोषपरिहारो सम्यग् ज्ञात्वैव विज्ञापयामि, न तु वृथा कर्णकठोरं प्रलपामि इत्याशयः ॥ ६ ॥

हितकारी मन्त्रीर वाक्य ग्रहण करेन ना, तिनिओ कुत्सित प्रभु । नृप ओ अमात्यवर्ग परस्पर अनुरक्त हइलेइ अखिल समृद्धि अनुरागसहकारे वृद्धिप्राप्त हइया थाके ।

७ । कोथाय सेई स्वाभाविक-दुर्ज्ञेय भूपतिचरित आर कोथाय एই अज्ञानावृत मादृश पामर प्राणी । तथापि आमि ये शत्रुगणेर निगूढ़ तत्त्व नीति-रीति जानिते पारियाछि, इहा आपनारই महिमा ।

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्य्यसङ्गमाद्-
वरं विरोधोऽपि समं महात्मभिः॥ ८॥

दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते। वाच्य— सुयोधनेन नृपासनस्थेन अपि विशङ्कमानेन दुरोदरच्छद्मजिता जगती समीप्स्यते। ७

अन्वयः। तथापि जिह्मः स भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति। भूतिं समुन्नयन् महात्मभिः समं विरोधः अपि अनार्य्यसङ्गमात् वरम्। वाच्य—जिह्मेन तेन यशः तन्यते। समुन्नयता विरोधेन वरेण (भूयते)। ८

सम्प्रति यद्वक्तव्यं तदाह—विशङ्कमान इति। सुखेन युध्यते स सुयोधनः। "भाषायां शासियुधिदृशिदृषिमृषिभ्यो युज्वाचः"। इति युधेर्युच्। नृपासनस्थः सिंहासनस्थोऽपि वनमधिवसतीति वनाधिवासिनो वनस्थात् राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणः सन्, दुष्टमुदरमस्येति दुरोदरं द्यूतम्, पृषोदरादित्वात् साधु। "दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्" इत्यमरः। तस्य छद्मना मिषेण जितां लब्धां दुर्नयार्जितां जगतीं महीम्। "जगती विष्टपे मह्यां वासुच्छन्दोविशेषयोः" इति वैजयन्ती। नयेन नीत्या जेतुं वशीकर्त्तुं समीहते व्याप्रियते, न तूदास्त इत्यर्थः। बलवत्स्वामिकम् अविशङ्कागमं च धनं भुञ्जानस्य कुतो मनःसमाधिरिति भावः। अत्र "दुरोदरच्छद्मजिताम्" इति विशेषणद्वारेण पदार्थं प्रति हेतुत्वेनोपन्यासाद्द्वितीयकाव्यलिङ्गमलङ्कारः। तदुक्तम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति॥ ७॥

"नयेन जेतुं जगतीं समीहते" इत्युक्तम्, तत्प्रकारमाह—तथापीति। तथापि साशङ्कोऽपि जिह्मो वक्रः वञ्चक इति यावत्। सः दुर्य्योधनः भवज्जिगीषया गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः। "हेतौ" इति तृतीया। गुणसम्पदा दानदाक्षिण्यादिगुणगरिम्णा करणेन शुभ्रं यशस्तनोति। स खलो गुणलोभनीयां त्वत्सम्पदमात्मसात् कर्त्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः। नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महान् दोष इत्याशङ्क्य सोऽपि सत्सङ्गलाभे नीचसङ्गाद्वरमुत्कर्षावहत्वादित्याह—समिति। तथाहि—भूतिं समुन्नयन् उत्कर्षमा-

৭। মহারাজ! আপনি রাজ্যভ্রষ্ট বনবাসী, আর দুর্য্যোধন সিংহাসনে সমাসীন, তথাপি তিনি আপনার নিকট পরাভব আশঙ্কা করিয়া কপট পাশক-ক্রীড়ায় জিত ভূমণ্ডলীকে নীতিমার্গে আয়ত্ত করিতে চেষ্টা করিতেছেন।

कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ६ ॥

अन्वयः । कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं पदवीं प्रपित्सुना अस्ततन्द्रिणा तेन (दुर्योधनेन) नक्तन्दिवं विभज्य नयेन पौरुषं वितन्यते । वाच्य—कृतारिषड्वर्गजयः मानवीं पदवीं प्रपित्सुः अस्ततन्द्रिः सः तनोति । ६

-पादयन् । "लटः शतृशानचौ" इत्यादिना शतृप्रत्ययः । पुनर्लङ्ग्रहण-सामर्थ्यात् प्रथमासामानाधिकरण्यम् । महात्मभिः समं सहेत्यर्थः, "साकं सत्रा समं सह" इत्यमरः । अनार्यसङ्गमात् दुर्जनसंसर्गात् "पञ्चमी विभक्तेः" इति पञ्चमी । विरोधोऽपि वरं मनाक्प्रियः । "देवादृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक् प्रिये" इत्यमरः । अत्र मैत्रापेक्षया मनाक्प्रियत्वं विरोधस्य "भूतिं समुच्चयन्" इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात् समाप्तपुनरात्ताख्यानदोषापत्तिः । तदुक्तं काव्यप्रकाशे—"समाप्तपुनरादानात् समाप्तपुनरात्तकम्" इति । न च वाक्यान्तरमेतत् येनोक्तदोषपरिहारः स्यात् । अर्थान्तरन्यासोऽलङ्कारः । स च भूतिसमुच्चयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥ ८ ॥

ननु "कार्त्स्न्यं केवला नीतिः" इत्याशङ्क्य नीतियुक्तं पौरुषमस्येत्याह —कृतेति । षण्णां वर्गः षड्वर्गः । अरीणामन्तःप्रकृतीनां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः, शिवभागवतवत् समासः । तस्य जयः कृतो येन तथोक्तेन विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमिति भावः । अगम्यरूपां पुरुषमात्रदुष्प्राप्याम् मनोरिमां मानवीं मनूपदिष्टसदाचारवत्त्वासामित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रतिपत्तुमिच्छुना प्रपद्यते मनन्तादप्रत्ययः । "सनि मीमा" इत्यादिनेसादेशः । "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः । अस्ता तन्द्रिः आलस्यं यस्य तेन अस्ततन्द्रिणा अनलसेनेत्यर्थः । तदिः सौत्रो धातुः । तस्मात् "वङ्कादयश्च" इत्यौणादिकः किन्प्रत्ययः । "क्तादिकाराद्क्तिनः" इति वा ङीष् । "वन्दीघटीतरीतन्द्रीति ङीषन्तोऽपि" इति क्षीरस्वामी । तथा रामायणप्रयोगः—"निस्तन्द्रिरप्रमत्तश्च स्वदोषे परदोषवत्" इति । तेन दुर्योधनेन पुरुषस्य

६। आपना हइते विपक्षमान हइलेओ सेइ बन्धुक दुर्योधन गुणसम्पदे आपनाके अतिक्रम करिते अभिलाष करिया दयादानदाक्षिण्यादिगुणगौरवे निर्मल यश विस्तार करितेछेन। कारण दुर्जन-संसर्ग अपेक्षा महात्मादिगेर सहित गौरववर्द्धक विरोधओ वरञ्च भाल।

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान् सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥

अन्वयः। गतस्मयः सः सन्ततम् अनुजीविनः प्रीतियुजः सखीनिव सुहृदः बन्धुभिः समानमानान् बन्धुतां च कृताधिपत्यामिव साधु दर्शयते। वाच्य—गतस्मयेन तेन सखाय इव समानमानाः बन्धुता कृताधिपत्या इव दर्श्यन्ते। १०

कर्म्म पौरुषं पुरुषकारः, उद्योग इति यावत्। युवादित्वादण्प्रत्ययः। "पौरुषं पुरुषस्योक्ते भावे कर्मणि तेजसि" इति विश्वः। नक्तं च दिवा च नक्तन्दिवम् अहोरात्रयोरित्यर्थः। "अचतुर" इत्यादिना सप्तम्यर्थे-ट्तस्योरव्ययीभावश्च" इति निपातेऽच समासान्तः। विभज्य अस्यां वेलायामिदं कर्म्मेति [कार्य्यमिदमकार्य्यमिदमिति] विभागं कृत्वा नयेन नीत्वा वितन्यते विस्तार्य्यते ॥९॥

सम्प्रति भृत्यानुरागमाह—सखीनिति। गतस्मयो निरहङ्कारोऽत एव स दुर्य्योधनः सन्ततम् अनारतं साधु सम्यक् अकपटम् इत्यर्थः। अनुजीविनो भृत्यान् प्रीतियुजः स्निग्धान् सखीनिव मित्राणि इव दर्शयते लोकस्येति शेषः। "हेतुमति च" इति णिच्। "णिचश्च" इति आत्मनेपदम्। शोभनं हृदयं येषां तान् सुहृदो मित्राणि च। "सुहृददुर्हृदौ मित्रामित्रयोः" इति निपातः। बन्धुभिः भ्रात्रादिभिः समानमानान् तुल्यसत्कारान् दर्शयते। बन्धूनां समूहो बन्धुता ताम्। "ग्रामजनबन्धु-सहायेभ्यस्तल्।" कृतम् आधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते, बन्धून् अधिपतीनिव दर्शयते इत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य, तथा तान् सम्भावयतीत्यर्थः। अनुजीव्यादीनाम् "कर्त्तुरीप्सिततमं कर्म्म" इति कर्म्मत्वम्। पूर्वं त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति—स राजा अनुजीव्यादीन् सख्यादीनिव दर्शयते। सख्यादय इव ते तु तं पश्यन्ति। सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते, स्वयमेव छन्दानुवर्त्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः। अत्रापि स्वस्थे (अर्थात्तस्थे)ऽपि तकर्म्मत्वम्, अपि कर्त्तुरनुजीव्यादेः "अभिवादिदृशोरात्मनेपदमुपसंख्यानम्" इति पाक्षिकं कर्म्मत्वम्। एवं चात्राप्यन्तकर्म्मणो राज्ञोऽप्यन्ते कर्त्तृत्वेऽपि "आरोहयते हस्ती स्वय-

১। কামক্রোধাদি ষড়্রিপুজয়ী দুর্য্যোধন অনন্তশয়ন মনুপদিষ্ট প্রজাপালন-পদ্ধতি শ্রাদ্ধ হইবার জন্য অনলস হইয়া অহোরাত্র কর্ত্তব্য কর্ম্মের বিভাগপূর্ব্বক নীতিদ্বারা বীর্য্য পৌরুষ বিস্তার করিতেছেন।

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

अन्वयः । यथायथं विभज्य समपक्षपातया भक्त्या असक्तम् आराधयतः अस्य त्रिगणः गुणानुरागात् सख्यम् ईयिवान् इव परस्परं न बाधते । वाचा—त्रिगणेन ईयुषा न बाध्यते । ११

मेव" इत्यादिवत् अश्रूयमाणकर्म्मान्तरत्वाभावात् नायं णेरणादिसूत्रस्य विषय इति मत्वा "णिचश्च" इत्यात्मनेपदं प्रतिपेदिरे। भाष्ये तु णेरणादिसूत्रविषयत्वमपि अस्योक्तम्। यथाह – "पश्यन्ति भृत्या राजानम्, दर्शयते भृत्यान् राजा, दर्शयते भृत्यै राजा" अत्र आत्मनेपदं सिद्धं भवति इति। अत्राह कैयटः—"ननु कर्म्मान्तरसङ्गावादत्रात्मनेपदेन सम्भाव्यम्। उच्यते—अस्मादेवोदाहरणाङ्गाध्यकारस्यायमेवाभिप्राय ऊह्यते। अण्यन्तावस्थायां ये कर्त्तृकर्म्मणो तदव्यतिरिक्तकर्म्मान्तरसङ्गावात् आत्मनेपदं न भवति। यथा "स्थलमारोहयति मनुष्यान्" इति, इह तु अण्यन्तावस्थायां कर्त्तृणां भृत्यानां णौ कर्म्मत्वमिति भवत्येवात्मनेपदम्' इति ॥ १० ॥

न चायं त्रिवर्गात् प्रमाद्यतीत्याह —असक्तमिति। यथायथं यथास्वं विभज्य सङ्कीर्णरूपं विविच्येत्यर्थः। "यथास्वे तु यथायथम्" इति निपातनादद्विर्भावो नपुंसकत्वञ्च। "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति ह्रस्वत्वम्। पक्षे पातः पक्षपातः आसक्तिविशेषः, समः तुल्यो यस्यां सा तथा, तया समपक्षपातया भक्त्या अनुरागविशेषेण, पूज्येषु अनुरागो भक्तिरित्युपदेशः, पूज्यश्च अयं त्रिवर्ग इति भावः। असक्तमनासक्तम् अव्यसनितयेति यावत्, आराधयतः सेवमानस्य अस्य दुर्य्योधनस्य त्रयाणां धर्म्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः। "त्रिवर्गो धर्म्मकामार्थैस्त्रयतुर्वर्गः समोक्षकैः" इत्यमरः। गुणानुरागात् तदीयगुणेषु अनुरागात् गुणवदाश्रयलोभादित्यर्थः। सख्यं मैत्रीम्, "सखुर्यः" इति यप्रत्ययः। ईयिवान् उपगतवानिव इति उत्प्रेक्षा। "उपेयिवाननाश्वाननूचानश्च" इति क्वसुप्रत्ययान्तो निपातः, "नात्रोपसर्गस्तन्त्रम्" इति काशिकाकार आह स्म। परस्परं न बाधते, समवर्त्तित्वादस्य धर्म्मार्थकामाः परस्परानुपमर्दैन वर्त्तन्ते इत्यर्थः। उक्तञ्च—"धर्म्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः" इति ॥ ११ ॥

১১। তিনি অহঙ্কার পরিহারপূর্ব্বক লোকসমক্ষে ভৃত্যগণকে অকপটভাবে স্নিগ্ধ মিত্রের ন্যায় প্রদর্শন করান, সুহৃদ্‌গণকে সোদরাদি বন্ধুর সমান সম্মান প্রদান করেন এবং স্বীয় আধিপত্য যেন গজবগণের প্রতিই ন্যস্ত করিয়াছেন, এরূপ ব্যবহার করেন।

निरत्ययं साम न दानवर्जितं
न भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्त्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥
वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म्म इत्येव निवृत्तकारणः।

अन्वयः। तस्य निरत्ययं साम दानवर्জ্জितं न, सत्क्रियां विरहय्य भूरि दानं न, विशेषशालिनी सत्क्रिया गुणानुरोधेन विना न प्रवर्त्तते ॥ वाच्य—निरत्ययेन साम्ना दानवर्জ্জितेन, भूरिना दानेन, विशेषशालिन्या सत्क्रियया प्रवर्त्यते। १२

अथ श्लोकत्रयेण उपायकौशलं दर्शयन् आदौ सामदाने दर्शयति—निरत्ययमिति। तस्य दुर्य्योधनस्य निरत्ययं निर्बाधम्, अमायिकमित्यर्थः। अन्यथा जनानां दुर्ग्रहत्वादिति भावः। साम सान्त्वम्। "साम सान्त्वमुभे समे" इत्यमरः। दानवर्জितं न प्रवर्त्तते, अन्यथा [लुब्धप्रवर्त्तनस्य] लुब्धाद्यावर्জ্জनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः। उक्तञ्च—"लुब्धमर्थेन गृह्णीयात् साधुमञ्जलिकर्म्मणा मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम्" इति। तथा भूरि प्रभूतं, न तु कदाचित् स्वल्पमित्यर्थः। दानं धनत्यागः, सदित्यादरार्थेऽव्ययम्; "आदरानादरयोः सदसती" इति निपातसंज्ञास्मरणात्। तस्य क्रियां सत्क्रियां विरहय्य विहाय। "स्थपि लघुपूर्वात्" इत्यादेशः। न प्रवर्त्तते, अनादरे दानवैफल्यादिति भावः। न चैवं सर्वत्र येनाविवेकित्वं कौशूहानिश्च स्यादित्याह—प्रवर्त्तते इति। विशेषशालिनी अतिशययोगिनी सत्क्रिया आदरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्त्तते। "पृथग्विना—" इत्यादिना तृतीया। गुणेष्वेवादरो भूरि दानञ्च इति न उक्तदोषावकाश इत्यर्थः। अत्र उत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनात् एकावल्यलङ्कारः। तदुक्तं काव्यप्रकाशे—"स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम्। विशेषणतया वस्तु यत्र सैकावली द्विधा" इति ॥ १२ ॥

১১। তিনি অনাসক্ত হইয়া অপক্ষপাত দৃষ্টিতে তুল্য অনুরাগসহকারে যথাযথ বিবেচনাপূর্ব্বক যে ধর্ম্মার্থকামের সেবা করিতেছেন, সেই ত্রিবর্গ যেন তদীয় গুণানুরাগভরেই মিত্রতা প্রাপ্ত হইয়া পরস্পর কেহ কাহাকেও বাধা দিতেছে না।

১২। তাঁহার কাপট্যবিহীন সন্ধিপ্রয়োগ দানবর্জ্জিত নহে। তিনি সমাদর না করিয়া প্রভূত দান করেন না। তাঁহার সেই সবিশেষ সমাদরক্রিয়াও গুণাগুণবিবেচনাপূর্ব্বকই অনুষ্ঠিত হইয়া থাকে

गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्म्मविप्लवम् ॥ १३ ॥
विधाय रक्षान् परितः परेतरान्
अशङ्कितोऽकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः ॥ १४ ॥

अन्वयः । वशी स वसूनि वाञ्छन् न, मन्युना न, स्वधर्म्म इत्येव निहत्तकारणः (सन्) रिपौ सुतेऽपि वा गुरूपदिष्टेन दण्डेन धर्म्मविप्लवं निहन्ति ॥ वाच्य—वशिना तेन वसूनि वाञ्छता न निहत्तकारणेन, धर्म्मविप्लवः निहन्यते । १३

अन्वयः । शङ्कितः सन् परेतरान् परितो रक्षान् विधाय अशङ्कितोऽकारम् उपैति । क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञताम् वदन्ति ॥ वाच्य—शङ्कितेन सता अशङ्कितोऽकार उपेयते । अनुजीविसात्कृताभिः सम्पद्भिः कृतज्ञता उद्यते । १४

अथ दण्डप्रकारमाह—वसूनीति। वशी स दुर्य्योधनो वसूनि धनानि वाञ्छन् न, लोभात् न इत्यर्थः। "वसु तोये धने मणौ" इति वैजयन्ती। निहन्तीति शेषः। तथा मनुन्या कोपेन न च। "मनुर्दैन्ये क्रतौ क्रुधि" इत्यमरः। "धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्जितः" इति स्मरणादित्यर्थः। किन्तु निहत्तकारणः निहत्तलोभादिनिमित्तः सन् स्वधर्म्म इत्येव स्वस्य राज्ञः सतो 'मम अयं धर्म्मो ममेदं कर्त्तव्यं मित्यस्मादेव हेतोरित्यर्थः। "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकञ्चैव गच्छति ॥" इति स्मरणादिति भावः। गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन। "धर्म्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः। समाहितमतिः पश्येत् व्यवहाराननुक्रमात्" इति नारदस्मरणात्। दण्डेन दमेन शिक्षयेत्यर्थः, रिपौ सुतेऽपि वा स्थितमिति शेषः। एतेन अस्य समदर्शित्वम् उक्तम्। धर्म्मविप्लवं धर्म्मव्यतिक्रमम्, अधर्म्ममिति यावत्। निहन्ति निवारयति। दुष्ट एव अस्य शत्रुः, शिष्ट एव बन्धुः ; न तु सम्बन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ॥१३

सम्प्रति भेदकौशलं दर्शयति—विधायेति। शङ्का सञ्जाता अस्य शङ्कितोऽविस्रस्तः सन् परितः सर्वत्र स्वपरमण्डले परेतरान् आत्मीयान्,

१৩। জিতেন্দ্রিয় দুর্য্যোধন, ধনলোভহীন এবং ক্রোধবিবর্জ্জিত হইয়া "ইহা আমার স্বধর্ম্ম" এইরূপ জ্ঞান করতই শত্রুরই হউক অথবা পুত্রেরই হউক গুরূপদিষ্ট দণ্ডদ্বারা ধর্ম্মবিপ্লব দমন করেন।

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीः
उपेत्य सङ्घर्षमिवार्थसम्पदः ॥ १५ ॥

अन्वयः । तेन पदेषु सम्यक् विभज्य विनियोगसत्क्रियाः लम्भिताः उपायाः सङ्घर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति ॥ वाच्या—विनियोगसत्क्रियैः लम्भिताः उपायैः परिबृंहितायत्यः अर्थसम्पदः फल्यन्ते । १५

अवश्यकान् इति यावत् । यद्वा परान् इतरयन्ति भेदेन आत्मसात्-कुर्वन्तीति परेतरान्, तत्करोतीति ख्यन्तात् कर्म्मणि अण्प्रत्ययः । रक्ष-न्तीति रक्षान् रक्षकान् मन्त्रगुप्तिसमर्थान् इत्यर्थः । "नन्द्यादिभ्यः" इत्यादिना पचाद्यच् । विधाय कृत्वा नियुज्य इत्यर्थः । अथङ्किताकारम् उपैति, स्वयम् अविश्वस्तोऽपि विश्वस्तवत् एव व्यवहरन् परमुखेनैव परान् भिनत्ति इत्यर्थः । न च तान् रक्षान् उपेक्षते येन तेऽपि विकु-र्वीरन् इत्याह—क्रियेति । क्रियापवर्गेषु कर्म्मसमाप्तिषु अनुजीविसात्-कृता भृत्याधीनाः कृताः अपरावर्त्तितया दत्ता इत्यर्थः । "देये त्रा च" इति सातिप्रत्ययः । सम्यदोऽस्य राज्ञः कृतज्ञताम् उपकारित्वं वदन्ति, प्रीतिदानेरेव अस्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेणैव इत्यर्थः । कृतज्ञे राजनि अनुजीविनोऽनुरज्यन्ते अनुरक्ताश्च तं रक्षन्तीति भावः ॥१४

अथ उपायप्रयोगस्य फलवत्तां दर्शयति—अनारतमिति । तेन राज्ञा दुर्य्योधनेन पदेषु उपा[दे]यवस्तुषु । "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रि-वस्तुषु" इत्यमरः । सम्यक् असङ्कीर्णम् अव्यस्तं च विभज्य विविच्य विनियोग एव सत्क्रिया अनुग्रहः सत्कार इति यावत्, यासां ता लम्भिताः स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः । उपायविशेषणं वा, उपायाः सामादयः, सङ्घर्षं परस्परस्पर्द्धामुपेत्य इव इति उत्प्रेक्षा । परि-बृंहितायतीः प्रचितोत्तरकालाः, स्थिरा इत्यर्थः । अर्थसम्पदोऽनारतम् अजस्रं फलन्ति प्रसवन्ते इत्यर्थः ॥ १५ ॥

১৪। কি স্বরাষ্ট্র, কি পররাষ্ট্র, দুর্য্যোধন সর্ব্বত্রই আত্মীয়গণকে রক্ষাকার্য্যে নিযুক্ত করিয়া তাহাদের প্রতি অবিশ্বস্ত হইয়াও বিশ্বস্তের ন্যায় ব্যবহার করেন। নিখিল কার্য্যনির্ব্বাহের পর কর্ম্মচারিগণকে প্রদত্ত সম্পদই তাঁহার কৃতজ্ঞতা প্রকাশ করিয়া থাকে।

১৫। দুর্য্যোধন সম্যক্ বিবেচনাপূর্ব্বক যথাযোগ্য পাত্রে অনুগ্রহসৎকারাদির নিয়োগ করেন, এজন্য তাঁহার সামাদি উপায় যেন পরস্পর স্পর্দ্ধাসহকারে অজস্র পরিণামবৃদ্ধিযোগ্য বিভব-রাশি প্রসব করিতেছে।

अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपौपायनदन्तिनां मदः ॥ १६ ॥
सुखेन लभ्या दधतः कृषीबलैः
अकृष्टपच्या इव शस्यसम्पदः ।
वितन्वति क्षेममदेवमातृका-
स्थिराय तस्मिन् कुरवश्चकासति * ॥ १७ ॥

अन्वयः । अयुग्मच्छदगन्धिः नृपौपायनदन्तिनां मदः अनेकराजन्यरथाश्वसङ्कुलं तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति ॥ वाच्या—अयुग्मच्छदगन्धिना मदेन आर्द्रता नीयते । १६

अन्वयः । तस्मिन् चिराय क्षेमं वितन्वति (सति) अदेवमातृकाः कुरवः अकृष्टपच्याः इव कृषीबलैः सुखेन लभ्याः शस्यसम्पदः दधतः (सन्तः) चकासति ॥ वाच्या—अदेवमातृकैः कुरुभिः दधद्भिः चकास्यते । १७

अर्थसम्पदमेवाह—अनेकेति । अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्य असौ अयुग्मच्छदगन्धिः । "सप्तम्युपमान—" इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च । "उपमानाच्च" इति समासान्त इकारः । नृपाणाम् उपहारभूता ये दन्तिनः तेषां मदः । "उपायनमुपग्राह्यमुपहारस्तथोपदा" इत्यमरः । राज्ञाम् अपत्यानि पुमांसो राजन्याः क्षत्रियाः । "राजश्वशुराद्यत्" इति यत्प्रत्ययः । राज्ञोऽपत्ये जातिग्रहणात् अण्, रथाश्च अश्वाश्च रथाश्वं, सेनाङ्गत्वादेकवद्भावः । अनेकेषां राजन्यानां रथाश्वेन सङ्कुलं व्याप्तं तदीयम् आस्थाननिकेतनाजिरं सभामण्डपप्राङ्गणम् । "अङ्गणं चत्वराजिरे" इत्यमरः । भृशम् अत्यर्थम् आर्द्रतां पङ्किलत्वं नयति । एतेन महासमृद्धिः अस्य उक्ता । अत एव उदात्तालङ्कारः । तथा चालङ्कारसूत्रम् :—"समृद्धिमद्वस्तुवर्णनमुदात्तः" इति ॥ १६ ॥

सम्प्रति जनपदक्षेमकरत्वमाह—सुखेनेति । चिराय तस्मिन् दुर्योधने क्षेमं वितन्वति क्षेमङ्करे सति देवः पर्जन्य एव माता येषां ते देवमातृका वृष्टाम्बुजीविनो देशाः, ते न भवन्ति इति अदेवमातृकाः,

१६ । राजन्यवर्गेर रथ ও অশ্বসমূহে দুর্য্যোধনের সভামণ্ডপপ্রাঙ্গণ সমাকীর্ণ হইয়াছে, তাঁহারা দুর্য্যোধনকে যে সকল হস্তী উপঢৌকন প্রদান করিয়াছেন, তাহাদের গণ্ডদেশ হইতে ক্ষরিত সপ্তপর্ণ পুষ্পের ন্যায় গন্ধযুক্ত মদবারি দ্বারা তদীয় সভামণ্ডপতল সাতিশয় আর্দ্র হইয়াছে।

* 'चकासते' इति च पाठः ।

उदारकीर्त्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्तृता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

अन्वयः। उदारकीर्त्तेः दयावतः प्रशान्तबाधं अभिरक्षया उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्तृता मेदिनी वसूनि स्वयं प्रदुग्धे ॥ वाचा—परिवर्त्तनं न भवति। १८

नदीमातृका इत्यर्थः। "देशो नद्यम्बुवृष्टयम्बुसम्पन्नव्रीहिपालितः। स्यात् नदीमातृको देवमातृकश्च यथाक्रमम् ॥" इत्यमरः। एतेन अस्य कुल्यादिपूर्त्तप्रवर्त्तकत्वमुक्तम्। कुरूणां निवासाः कुरवो जनपदविशेषाः। क्रष्टेन पच्यन्त इति क्रष्टपच्याः। "राजसूय—" इत्यादिना कर्म्मकर्त्तरि क्यप् प्रत्ययान्तो निपातः। तद्विपरीता अक्रष्टपच्या इव, क्रषिः एषाम् अस्तीति क्रषीवलैः कर्षकैरित्यर्थः। "रजःक्रषि" इत्यादिना वलच् प्रत्ययः, "वले" इति दीर्घः। सुखेन अक्लेशेन लभ्या लब्धुं शक्याः शस्यसम्पदो दधतः धारयन्तः। "नाभ्यस्ताच्छतुः" इति नुमागमप्रतिषेधः। चकासति सर्वोत्कर्षेण वर्त्तन्ते इत्यर्थः। "अदभ्यस्तात्" इति झेरदादेशः। "जक्षित्यादयः षट्" इति अभ्यस्तसंज्ञा। सम्पन्नजनपदत्वात् असन्तापकरत्वाच्च दुःसाध्योऽयमिति भावः ॥ १७ ॥

ननु एवं जनपदानुवर्त्तिनः कथम् अर्थलाभ इत्यत आह—उदारेति। उदारकीर्त्तेः महायशसः। "उदारो दातृमहतोः" इत्यमरः। दयावतः परदुःखप्रहरणेच्छोः। अत एव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात् तथेति क्रियाविशेषणम्, उदयविशेषणं वा। "वा दान्तशान्त" इत्यादिना शमिधातोर्ण्यन्ताच्छिष्टान्तो निपातः। अभिरक्षया सर्वतस्त्राणेन उदयं वृद्धिं दिशतः सम्पादयतः वसूपमानस्य कुवेरोपमस्य। "वसुर्मयूखाग्निधनाधिपेषु" इति विश्वः। अस्य दुर्य्योधनस्य गुणैर्दयादाक्षिण्यादिभिः उपस्तृता द्राविता मेदिनो वसूनि धनानि। "वसु तोये धने मणौ" इति वैजयन्ती। स्वयं प्रदुग्धे अक्लेशेन दुहते इत्यर्थः। दुहेः कर्म्मकर्त्तरि लट्। "न दुहस्नुनमां यक्चिणौ" इति यक्प्रतिषेधः। यथा केनचिद्विदग्धेन नवप्रसूता रक्षिता च गौः स्वयं

১৭। তাঁহার রাষ্ট্র দেবমাতৃক নহে, তিনি কুল্যাদি জলাশয় প্রতিষ্ঠা করিয়া পূর্ত্তের প্রচুর প্রবর্ত্তন করিয়াছেন। রাষ্ট্রবাসী কৃষিজীবিগণের অল্পায়াসেই শস্যসম্পৎ লব্ধ হইতেছে, এমন কি কর্ষণাদিব্যতীতই যেন সমগ্রভূভাগ শস্যসমৃদ্ধি ধারণ করিয়াছে। দুর্য্যোধনের অবিরত মঙ্গলকর অনুষ্ঠানে কুরুজনপদ অতীব উৎকর্ষলাভ করিয়াছে।

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्त्तयः ।
नसंहतास्तस्य नभिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १९ ॥

अन्वयः । महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्त्तयः नसंहता नभिन्नवृत्तयः धनुर्भृतः असुभिः तस्य प्रियाणि समीहितुं वाञ्छन्ति ॥ वाच्या—महौजोभिः मानधनैः धनार्चितैः लब्धकीर्त्तिभिः नसंहतैः नभिन्नवृत्तिभिः धनुर्भृद्भिः प्रियाणि वाञ्छ्यन्ते । १९

प्रदुग्धे तद्वत् इति भावः । अलङ्कारस्तु—"विशेषणमात्रसाम्यात् अप्रस्तुतस्य गम्यत्वे समासोक्तिः" इति सर्वस्वकारः । अत्र प्रतीयमानया सवा सह प्रकृताङ्गया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशाद्दोहत्वे नोक्तिरिति संक्षेपः ॥ १८ ॥

वीरभटानुकूलमाह—महौजस इति । महौजसो महाबलाः अन्यथा दुर्ब्बलानाम् अनुपकारित्वादिति भावः । मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः, अन्यथा कदाचिद्बलदर्पाद्विकुर्वीरन् इति भावः । धनार्चिताः धनैरर्चिताः सत्कृताः । अन्यथा दारिद्र्यात् एनं जह्युरिति भावः । संयति संग्रामे लब्धकीर्त्तयः बहुयशस इत्यर्थः । अन्यथा कदाचित् सुहृद्युरिति भावः । संहता मिथः सङ्गताः स्वार्थनिष्ठा न भवन्तीति नसंहताः, नञर्थस्य नञ्शब्दस्य सुप्सुपेति समासः । भिन्नवृत्तयो विरोधात् स्वामिकार्य्यविघातकरा न भवन्तीति नभिन्नवृत्तयः पूर्ववत्समासः, अन्यथा स्वामिकार्य्यविघातकतया स्वामिद्रोहिणः स्युः इति उभयत्रापि तात्पर्य्यार्थः । धनुर्भृतो धानुष्काः । आयुधोपमात्रोपलक्षणमेतत् । प्राधान्यात् धनुर्ग्रहणम् । यस्य दुर्य्योधनस्य असुभिः प्राणैः प्रियाणि समीहितुं कर्त्तुं वाञ्छन्ति आनृण्यार्थं प्राणान् दातुमिच्छन्ति, अन्यथा दोषस्मरणादिति भावः । अत्र महौजस्त्वादिपदार्थानां प्राणदानकर्त्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात् काव्यलिङ्गम् अलङ्कारः । लक्षणन्तु उक्तम् । तथा साभिप्रायविशेषणत्वात् परिकरालङ्कार इति द्वयोस्तिलतण्डुलवत् विभक्ततया स्फुरणात् संसृष्टिः ॥ १९ ॥

১৮। উদারকীর্ত্তি দয়াবান্ রাজা দুর্য্যোধন, সকল দিক্ সংরক্ষণ করিয়া অবাধে উন্নতি সম্পাদন করিতেছেন। বসুমতী কুবেরোপম কুরুরাজের দয়াদিগুণে আকৃষ্টা হইয়া স্বয়ংই তাঁহার জন্য ধনদোহন করিতেছেন।

১৯। মহাবলশালী, কুলশীলাদিবিষয়ে অভিমানী, ধনদ্বারা পূজিত, যুদ্ধক্ষেত্রে লব্ধকীর্ত্তি, পরস্পর স্বার্থপরতাশূন্য, ঐকমত্যসম্পন্ন, ধানুষ্ক, বীরবর্গ প্রাণবিসর্জ্জন করিয়াও দুর্য্যোধনের অভীষ্ট সম্পাদনে অভিলাষী।

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥
न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥ २१ ॥

अन्वयः। अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद। धातुरिव तस्य ईहितं महोदयैः हितानुबन्धिभिः फलैः प्रतीयते ॥ वाच्य—अशेषक्रियेण तेन विद्यन्ते। महोदयाः प्रतीयन्ति, प्रत्ययन्ति वा। २०

अन्वयः। तेन क्वचित् सज्यं धनुः न उद्यतम्; आननं वा कोपविजिह्मं न कृतम्। नराधिपैः गुणानुरागेण अस्य शासनं माल्यमिव शिरोभिः उह्यते वाच्य—सः उद्यतवान्। नराधिपाः वहन्ति। २१

सम्प्रति स्वराष्ट्रवत् परराष्ट्रवृत्तान्तमपि वेत्तीत्याह—महीभृतामिति। अशेषितक्रियः समापितकृत्यः, आकृतोदयकर्मत्यर्थः। सः दुर्य्योधनः, सच्चरितैः शुद्धचरितैः, अवञ्चकैरित्यर्थः। चरन्तीति चराः तैः चरैः प्रणिधिभिः, पचाद्यच्। महीभृतां क्रियाः प्रारम्भान् निःशेषं वेद वेत्ति। "विदो लटो वा" इति लटादेशः। स्वरहस्यं तु न कश्चिद्वेद इत्याह—महोदयैरिति। धातुरिव तस्य दुर्य्योधनस्य हितम् उद्योगो महोदयैः महाभ्युदयैः, हितानुबन्धिभिः हितम् अनुबध्नन्ति अनुरुन्धन्ति इति हितानुबन्धिनः तैः स्वन्तैः इत्यर्थः। फलैः कार्य्यसिद्धिभिः प्रतीयते ज्ञायते। फलानुमेयाः तस्य प्रारम्भा इत्यर्थः ॥ २० ॥

मित्रबलमाह—नेति। तेन राज्ञा क्वचित् कुत्रापि सह ज्यया मौर्व्या सज्यम्। "मौर्वी ज्या गुणिनी गुणः" इत्यमरः। 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। धनुः न उद्यतं न ऊर्द्धीकृतम्, आननं वा कोपविजिह्मं कोपेन कुटिलं न कृतं, यस्य कोप एव न उदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः। कथं तर्हि आज्ञां कारयति राज्ञ इत्यत्राह—गुणेति। गुणेषु दयादाक्षिण्यादिषु अनुरागेण प्रेम्णा, माल्यपक्षे सूत्रानुषङ्गेण, यद्वा

२०। आकृतोदयकर्मा दुर्य्योधन गूढचरित्र चर द्वारा महीपालगणের কার্য্যকলাপ অশেষরূপে অবগত হইয়া থাকেন; কিন্তু বিধাতার ন্যায় দুর্য্যোধনের আরব্ধ কার্য্য, প্রভূত শ্রেয়স্কর পরিণাম-শোভন ফলদর্শনেই অস্ত রাজন্যবর্গ অবগত হইতেছেন।

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥२२॥
प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

अन्वयः। इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः (सन्) मखेषु हव्येन हिरण्यरेतसं धिनोति ॥ वाच्य—इद्धशासनेन तेन अनुमतेन अखिन्नेन हिरण्यरेताः धिन्व्यते। २२

सौरभ्यगुणलोभेन, नराधिपैः अन्यभूपालैः अस्य शासनम् आज्ञा, माला इव माल्यं, तदिव। "चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्" इति क्षीरस्वामी। शिरोभिः उह्यते धार्य्यते। "वचिस्वपियजादीनां किति" इति यकि सम्प्रसारणम्। अत्र उपमा स्फुटा इव ॥ २१ ॥

सम्प्रति अस्य धार्म्मिकत्वमाह—स इति। इद्धशासनोऽप्रतिहताज्ञः स दुर्य्योधनो नवयौवनोद्धतं प्रगल्भं धुरन्धरम् इत्यर्थः। दुःखेन शास्यते इति दुःशासनः तम्। "भाषायां शासियुधि" इत्यादिना खलर्थे युच्-प्रत्ययः। यौवराज्ये युवराजकर्म्मणि, ब्राह्मणादित्वात् ष्यञ्। निधाय नियुज्य इत्यर्थः। पुरोधसा पुरोहितेन अनुमतोऽनुज्ञातः तस्मिन् याजके सति इत्यर्थः, तदुल्लङ्घने दोषस्मरणादिति भावः। "निष्ठा" इति भूतार्थे क्तः, नतु "मतिबुद्धि" इत्यादिना वर्त्तमानार्थे; अन्यथा "पुरोधसा" इत्यत्र "क्तस्य च वर्त्तमाने" इति षष्ठी स्यात्। अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा। हिरण्यं रेतो यस्य तं हिरण्यरेतसम् अनलं धिनोति प्रीणयति। धिन्वेः प्रीणनार्थात् "धिन्विकृण्व्योर च" इत्यप्रत्ययः। अकारस्यान्तादेशः ॥ २२ ॥

২১। রাজা দুর্য্যোধন কদাচ যুদ্ধে জ্যাযুক্ত ধনু উদ্যত কিংবা কাহারও প্রতি কোপ করিয়া কখন মুখ কুটিল করেন না; নৃপতিগণ তাঁহার সদ্‌গুণে অনুরাগহেতু তদীয় শাসন মাল্যবৎ মস্তকে ধারণ করিয়া থাকেন।

২২। অপ্রতিহতশাসন রাজা দুর্য্যোধন নবযৌবনোদ্ধত অনুজ দুঃশাসনকে যৌবরাজ্যে নিয়োগ করতঃ পুরোহিতের অনুমতি লইয়া অনলস ভাবে হব্যদ্বারা পাবকদেবের প্রীতিসাধন করিতেছেন।

कथाप्रसङ्गेन जनैरुदाहृतात्
अनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद्व्यथते नताननः
स दुःसहात् मन्त्रपदादिवोरगः ॥२४॥

अन्वयः । सः प्रलीनभूपालम् स्थिरायति भुवो मण्डलं आवारिधि प्रशासत् अपि त्वदेषातोः भियः चिन्तयति एव । अहो ! बलवद्विरोधिता दुरन्ता ॥ वाच्य—तेन प्रशासता त्वदेषात्यः भियः चिन्त्यते । बलवद्विरोधितया दुरन्तया (भूयते) । २३

अन्वयः । सः कथाप्रसङ्गेन जनैः उदाहृतात् तवाभिधानात् अनुस्मृताखण्डलसूनुविक्रमः नताननः (सन्) दुःसहात् मन्त्रपदात् उरग इव व्यथते ॥ वाच्य—तेन विक्रमेण नताननेन उरगेण इव व्यथते । २४

स चेत् तादृग उद्योगो तर्हि अस्माभिर्न निरुद्योगैर्भाव्यमित्याशङ्क्य उद्योगाशां दर्शयति—प्रलीनेति । स दुर्योधनः प्रलीनभूपालं निःसपत्नम् इत्यर्थः । स्थिरायति चिरस्थायि इत्यर्थः । भुवो मण्डलम् आ वारिधिभ्यः आवारिधि "आङ् मर्य्यादाभिविध्योः" इति अव्ययीभावः । प्रशासत् आज्ञापयन्नपि । "जक्षित्यादयः षट्" इति अभ्यस्तसंज्ञा । "नाभ्यस्ताच्छतुः" इति नुमागमप्रतिषेधः । त्वत् त्वत्त एष्यतोः आगमिष्यतोः आगामिनोरिति यावत् । धातूनामनेकार्थत्वादुक्तार्थसिद्धिः, अथवा आङ्पूर्वः पाठः । "एत्येधत्यूठ्सु" इति वृद्धिः, "लटः सद्वा" इति शतृप्रत्ययः । "उगितश्च" इति ङीप् । "आच्छीनद्योर्नुम्" इति विकल्पान्नुमभावः । भियो भयहेतून् विपद इत्यर्थः । चिन्तयति आलोचयति एव । स एवाह—अहो ! बलवद्विरोधिता दुरन्ता दुष्टावसाना । सार्वभौमस्यापि प्रबलैः सपत्नैः सह वैरम् [वैरायमाणत्वं] अनर्थपर्य्यवसायि एवेति तात्पर्य्यम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ २३ ॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत्राह—कथेति । कथाप्रसङ्गेन गोष्ठीवचनेन जनैः तत्तत्यैः इत्यर्थः । अन्यत्र कथाप्रसङ्गेन विषवैद्येन । "कथाप्रसङ्गो वार्त्तायां विषवैद्येऽपि वाच्यवत्" इति विश्वः । एकवचनस्य अतन्त्रत्वात् जनविशेषणम् । यद्वा कथाप्रसङ्गे इनाश्च ते जनाश्च इतीकं पदम् । उदाहृतात् उच्चारितात् तवाभिधानात् नामधेयस्मरणाद्धेतोः । "हेतौ" इति पञ्चमी । "आख्याह्वे अभिधानञ्च नाम-

२३ । तिनि निःसपत्न सागरान्त भूमण्डले स्थायिभावे शासन-परिचालन करिलेओ आपना हइते भीति उपस्थित हइते पारे, अवश्यई एरूप चिन्ता करिया थाकेन । ओः ! प्रबल व्यक्तिर सहित विरोध कि दुरन्त !

तदाशु कर्त्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः ॥२५॥

अन्वयः । तत् त्वयि जिह्मं कर्त्तुम् उद्यते तत्र विधेयम् उत्तरं आशु विधीयताम् । परप्रणीतानि वचांसि चिन्वताम् मादृशां गिरः प्रवृत्तिसाराः खलु ॥ वाच्या—विधेहि । प्रवृत्तिसाराभिः गीर्भिः (भूयते)। २५

धेयश्च नाम च" इत्यमरः । अन्यत्र तवाभिधानात्,"नामैकदेशग्रहणे नामग्रहणम्" इति न्यायात्—तश्च वश्च तवौ तावर्थौ वासुकी, तयोः अभिधानं यस्मिन् पदे तस्मात् अनुस्मृताखण्डलसूनुविक्रमः स्मृताऽनपराक्रमः सन् दुःसहात् अतिदुःसहात् मन्त्रगदात् मन्त्रशब्दात् स्मारकाद्धेतोः । आखण्डलसूनुः इन्द्रानुजः उपेन्द्रो विष्णुरिति यावत् । "सूनुः पुत्रेऽनुजे रवौ" इति विश्वः । तस्य विः पक्षी गरुड इत्यर्थः । तस्य क्रमः पादविक्षेपः सोऽनुस्मृतो येन स तथोक्तः । स्मृतगरुडमहिमा उरग इव नतानन इति । "उरगः पन्नगो भोगी" । इत्यमरः व्यथते, दुःखायते, "पीडा बाधा व्यथा दुःखम्" इत्यमरः । अतुत्कटभयदोषादिविकारा दुर्वारा इति भावः । "सर्वतो जयमन्विच्छेत् पुत्रादिच्छेत् पराजयम्" इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम् ॥२४॥

निगमयति—तदिति । तत् तस्मात् कारणात् त्वयि जिह्मं कपटं कर्त्तुम् उद्यते त्वां जिह्मांशौ इत्यर्थः, तत्र तस्मिन् दुर्योधने विधेयं कर्त्तव्यम् उत्तरं प्रतिक्रिया आशु विधीयतां क्रियताम् । ननु कर्त्तव्यमपि त्वयैव उच्यतामिति चेत् तत्राह—परेति । परप्रणीतानि परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशां वार्त्ताहारिणामित्यर्थः । गिरः प्रवृत्तिसाराः वार्त्तामात्रसाराः खलु । "वार्त्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः वार्त्तामात्रवाहिनो वयं न तु कर्त्तव्यशौपदेशमर्थाः । अतस्त्वयैव निर्धार्य्यं कार्य्यमिति भावः । सामान्येन विशेषसमर्थनादर्थान्तरन्यासोऽलङ्कारः ॥२५

२४ । सर्প যখন বিষেরন্য মুখ্যেচ্ছা রত বৈনতেয় ও বাসুকির নাম-সম্বলিত দুঃসহ মন্ত্র শ্রবণে বিষ্ণুবাহন খগপতির পদবিক্ষেপ স্মরণপূর্ব্বক নতানন হইয়া ব্যথিত হয়, তদ্রূপ তত্রত্য মানবগণ কথাপ্রসঙ্গে আপনার নাম উচ্চারণ করিলে রাজা দুর্য্যোধন, দেবরাজ-তনয় অর্জ্জুনের বিক্রম স্মরণ করিয়া অবনতবদনে বেদনা অনুভব করেন ।

২৫ । অতএব আপনি সত্বর সেই কপটাচারী দিগ্বাসস্ দুর্য্যোধনের প্রতি যথাযোগ্য প্রতিক্রিয়া প্রয়োগ করুন । আমরা বার্ত্তাহারী, পরবার্ত্তা সংগ্রহই আমাদের বাক্য দ্বারা হইয়া থাকে ।

इतीरयित्वा गिरमाप्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः ॥ २६ ॥
निशम्य सिद्धिं द्विषतामपाकृतौ-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

अन्वयः । अथ वनसन्निवासिनाम् पत्यौ इति गिरम् ईरयित्वा आप्तसत्क्रिये गते (सति) महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधौ तत् वचः आचचक्षे । वाच्या—महीभुक् । २६

अन्वयः । अथ द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततः ततस्त्याः अपाकृतौ विनियन्तुम् अक्षमा (सती) नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार । वाच्या—द्रुपदात्मजया अक्षमया मन्युव्यवसायदीप्त्याः उदाजह्रिरे । २७

इतीति । वनसन्निवासिनां पत्यौ वनेचराधिपे इति गिरम् ईरयित्वा उक्त्वा आप्तसत्क्रिये गृहीतपारितोषिके गते सति । "तुष्टिदानमेव चाराणां हि वेतनम् । ते हि तल्लोभात् स्वामिकार्य्येषु अतीव त्वरयन्ते" इति नीतिवाक्यामृते । अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्य अनुजसन्निधौ तद्वनेचरोक्तं वचो वाक्यम् आचचक्षे आख्यातम् । अथवा कृष्णेति पदच्छेदः । सदनं प्रविश्य अनुजसन्निधौ तद्वचः कृष्णा आचचक्षे आख्यात् । चक्षिङः दृङादेर्हि कर्म्मकत्वादप्रधानकर्म्मणि लिट् ॥ २६ ॥

निशम्येति । अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ततस्तदनन्तरं, ततो द्विषद्भ्य आगतास्तत्रस्थाः । "अव्ययात् त्यप्" इति त्यप् । अपाकृतोर्विकारान् विनियन्तुं निरोद्धुम् अक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्द्धिनीर्गिरो वाक्यानि उदाजहार जगाद इत्यर्थः ॥ २७ ॥

২৬। অনন্তর বনেচররূপতি মহীপতির নিকট পুরস্কার লাভ করতঃ চলিয়া গেলে মহীপতিও দ্রৌপদীভবনে প্রবেশপূর্ব্বক অনুজগণের সন্নিধানে বনেচরোক্ত বাক্য ব্যক্ত করিলেন।

২৭। অনন্তর দ্রুপদনন্দিনী শত্রুগণের সমৃদ্ধিরূপা সিদ্ধি শ্রবণ করিয়া তাহাদের কৃত অপকার স্মরণে হৃদয়ের আবেগ নিরোধ করিতে না পারিয়া নৃপতির ক্রোধ ও উদ্যমের উদ্দীপক বক্ষ্যমাণ বাক্য বলিতে লাগিলেন।

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥ २८ ॥
अखण्डमाखण्डलतुल्यधामभिः
चिरं धृता भूपतिभिः स्वयंशजैः ।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥ २९ ॥

अन्वयः । भवादृशेषु प्रमदाजनोदितं अनुशासनम् अधिक्षेप इव भवति । तथापि निरस्तनारीसमया दुराधयः मां वक्तुं व्यवसाययन्ति ॥ वाच्य—प्रमदाजनोदितेन अनुशासनेन अधिक्षेपेणेव भूयते । निरस्तनारीसमयैः दुराधिभिः अहं व्यवसाये । २८

अन्वयः । आखण्डलतुल्यधामभिः स्वयंशजैः भूपतिभिः चिरम् अखण्डं धृता मही त्वया मदच्युता मतङ्गजेन स्रगिव अपवर्जिता ॥ वाच्य—धृतां महीं मदच्युतं मतङ्गजः स्रजमिव त्वम् अपवर्जितवान् । २९

भवादृशेष्विति । भवादृशा भवद्विधाः परिडता इत्यर्थः । तेषु विषये । "त्यदादिषु" इत्यादिना कञ् । "आ सर्वनाम्नः" इत्याकारादेशः । प्रमदाजनोदितं स्त्रीजनोक्तम् । वदेः क्तः "वचिस्वपि" इत्यादिना सम्प्रसारणम् । अनुशासनं नियोगवचनम् अधिक्षेपः तिरस्कार इव भवति । अतो न युक्तं वक्तुमित्यर्थः । तथापि वक्तुमनुचितलेऽपि निरस्तनारीसमयाः त्यजितग्राम्यजनोचितस्त्रीसमाचाराः । "समयाः शपथाचारकालसिद्धान्तसंविद" इत्यमरः । दुराधयः समयोल्लङ्घनहेतुत्वात् दुष्टा मनोव्यथाः । "पुंस्याधिर्मानसो व्यथा" इत्यमरः । मां वक्तुं व्यवसाययन्ति प्रेरयन्ति । न किञ्चिदयुक्तं दुःखिनामिति भावः ॥ २८ ॥

अखण्डमिति । आखण्डलतुल्यधामभिः इन्द्रतुल्यप्रभावैः । "धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः" इति हेमः । स्वयंशजैः भूपतिभिः भरतादिभिः चिरम् अखण्डम् अविच्छिन्नं धृता मही त्वया, मदं च्योततीति मदच्युत्, क्विप् तेन मदस्राविणा मतङ्गजेन स्रगिव आत्महस्तेन स्वकरेण स्वचापल्येन इत्यर्थः । अपवर्जिता परिहृता त्यक्ता । स्वदोषादेव अयम् अनर्थागम इत्यर्थः ॥ २९ ॥

२८ । ভবাদৃশ জ্ঞানিগণের প্রতি রমণীজনোক্ত অনুশাসন তিরস্কার বলিয়া প্রতিভাত হইয়া থাকে ; তথাপি আমার এই নিদারুণ মনোবেদনা স্ত্রীজনোচিরপদ্ধতিকে লঙ্ঘন করাইয়া এ বিষয়ে কথা কহিতে আমাকে উদ্যত করিতেছে ।

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान्निशिता इवेषवः॥ ३०॥
गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेत्
मनोरमामात्मवधूमिव श्रियम्॥ ३१॥

अन्वयः। ते मूढधियः पराभवं व्रजन्ति, ये मायाविषु मायिनः न भवन्ति। शठाः तथाविधान् असंवृताङ्गान् निशिता इषव इव प्रविश्य घ्नन्ति हि॥ वाच्या—तैः मूढधीभिः पराभवः व्रज्यते, यैः मायिभिः न भूयते। शठैः तथाविधा असंवृताङ्गाः निशितैः इषुभिः इव हन्यन्ते॥ ३०

अन्वयः। अनुरक्तसाधनः कुलाभिमानी त्वदन्यः कः इव नराधिपः गुणानुरक्तां कुलजां मनोरमां श्रियम् आत्मवधूमिव परैः अपहारयेत्॥ वाच्या—अनुरक्तसाधनेन गुणाभिमानिना त्वदन्येन केन इव नराधिपेन मनोरमा गुणानुरक्ता कुलजा आत्मवधूरिव श्रीः अपहार्य्यते।

स्वदोषादेवायमनर्थागम इत्युक्तम्। स च दोषः कुटिलेषु अकौटिल्यमेव इत्याह—व्रजन्तीति। मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति। ये मायाविषु मायावत्सु विषये। "अस्मायामेधा" इत्यादिना विनिप्रत्ययः। मायिनो मायावन्तः, व्रीह्यादित्वात् इनिप्रत्ययः। न भवन्ति। अत्रैव अर्थान्तरं न्यस्यति—प्रविश्येति। शठाः अपकारिणो धूर्त्ताः तथाविधान् अकुटिलान् असंवृताङ्गान् अवर्मितशरीरान् निशिता इषव इव प्रविश्य प्रवेशं कृत्वा आत्मीया भूत्वा घ्नन्ति हि। "आर्जवं हि कुटिलेषु नीतिः" इति भावः॥ ३०॥

न च लक्ष्मोचाञ्चल्यादयमनर्थागमः, किन्तु स्वोपेक्षादोषमूलत्वादित्याशयेनाह—गुणेति। अनुरक्तसाधनोऽनुकूलसहायवान्, उक्तञ्च कामन्दकीये—"उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य

२९। ইন্দ্রতুল্যপ্রভাবসম্পন্ন ভবদীয় বংশোদ্ভব ভরতাদি ভূপতিগণকর্ত্তৃক অবিচ্ছিন্নভাবে চিরশাসিত মহীকে আপনি কিনা মদস্রাবী মত্ত মাতঙ্গজ কর্ত্তৃক মালা পরিত্যাগের ন্যায় হেলায় স্বহস্তে পরিত্যাগ করিলেন!

৩০। দেখুন! যাহারা মায়াবীদিগের প্রতি মায়া বিস্তার না করে, সেই সকল অবিবেকী মানব পরাভবই প্রাপ্ত হইয়া থাকে। শানিত শর যেমন বর্ম্মদ্বারা অনাবৃতদেহ ব্যক্তিগণের বিনাশ সাধন করে, সেইরূপ ধূর্ত্তগণ সেই সমস্ত অকুটিল ব্যক্তিদিগের হৃদয়ে প্রবেশপূর্ব্বক তাহাদিগকে বিনষ্ট করিয়া থাকে।

भवन्तमेतर्हि मनस्विगर्हिते
विवर्त्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥३२॥
अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।

अन्वयः । हे नरदेव ! एतर्हि मनस्विगर्हिते वर्त्मनि विवर्त्तमानं भवन्तम् उदीरितः मन्युः शुष्कं शमीतरुम् उच्छिखः अग्निरिव कथं न ज्वलयति ॥ वाच्य—विवर्त्तमानः भवान् उदीरितेन मन्युना शुष्काः शमीतरुः उच्छिखेन अग्निना इव ज्वल्यते । ३२

[नित्यं श्रीः सहचारिणी ॥" इति । कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च, त्वदन्यस्त्वत्तोऽन्यः । "अन्यारात्" इत्यादिना षष्ठ्यसौ । क इव नराधिपो गुणैः सन्ध्यादिभिः सौन्दर्य्यादिभिश्च अनुरक्ताम् अनुरागिणीं कुलजां कुलक्रमादागतां कुलीनाञ्च मनोरमां स्त्रियम् आत्मबधूमिव स्वभार्य्यामिव । "बधूर्जाया स्नुषा स्त्री च" इत्यमरः । परैः शत्रुभिः अन्यैश्च अपहारयेत् स्वयमेव अपहारं कारयेदित्यर्थः । कलत्रापहारवत् लक्ष्म्यपहारोऽपि राज्ञा मानहानिकरत्वात् अनुपेक्षणीय इति भावः ॥ ३१ ॥

अथ दशभिः कोपोद्दीपनं करोति—भवन्तमिति । हे नरदेव ! नरेन्द्र ! एतर्हि इदानीम् अस्मिन् आपत्कालेऽपीत्यर्थः । "एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा" इत्यमरः । "इदमो हिंल्" इति हिंल्प्रत्ययः । "एतेतौ रथोः" इत्येतादेशः । आपदमेवाह—मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्त्तमानं यत्नवतां दुर्दशामनुभवन्तमित्यर्थः । भवन्तं त्वाम् उदीरितः उद्दीपितो मन्युः क्रोधः शुष्कं नीरसम् । "शुषेः कः" इति निष्ठातकारस्य ककारः । शमी चासौ तरुश्चेति विग्रहे षष्ठीसमासः, तम् । शमीग्रहणं शीघ्रज्वलनस्वभावात् कृतम् । उच्छिख उद्गतज्वालः । "धृष्णिज्वाले अपि शिखे" इत्यमरः । वह्निरिव कथं न ज्वलयति, ज्वलयितुमुचितमित्यर्थः । "मितां ह्रस्वः" इति ह्रस्वः ॥३२॥

৩১। আপনি ভিন্ন অন্য কোন্ কুলাভিমানী অনুকূলসহায়সম্পন্ন নরপতি, গুণানুরক্তা কুলজা মনোরমা নিজভার্য্যার ন্যায় রাজ্যলক্ষ্মীকে অরিদ্বারা অপহরণ করায় !

৩২। আপনি এই বিপৎকালেও বীরবিগর্হিত পথে অবস্থিত থাকিয়া শত্রুকৃত দুর্দ্দশা ভোগ করিতেছেন ; হে নরাধিপ ! লেলিহান হুতাশনতুল্য ক্রোধ উদ্দীপিত হইয়া শুষ্ক শমীতরুর ন্যায় কেন আপনাকে উদ্দীপিত করিতেছে না ?

अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥ ३३ ॥
परिभ्रमल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः।
महारथः सत्यधनस्य मानसं
दुनोति नो कञ्चिदयं द्रकोदरः ? ॥ ३४ ॥

अन्वयः। देहिनः स्वयम् एव अवश्याकोपस्य आपदां विहन्तुः वश्याः भवन्ति। अमर्षशून्येन जन्तुना विद्विषा (सता) न, जातहार्देन (सता च) न जनस्य आदरो (भवति) ॥ वाच्य—देहिभिः वश्यैः भूयते। आदरेण (भूयते)। ३३

अन्वयः। (प्राक्) लोहितचन्दनोचितः महारथः (इदानीं) रेणुरूषितः पदातिः अन्तर्गिरि परिभ्रमन् अयं द्रकोदरः सत्यधनस्य (तव) मानसं नो दुनोति कञ्चित् ? ॥ वाच्य—लोहितचन्दनोचितेन महारथेन रेणुरूषितेन अन्तर्गिरि पदातिना अनेन द्रकोदरेण दूयते। ३४

ननु अन्तःशत्रुत्वादयं क्रोधः त्याज्य एव इत्याशङ्क्याह—अवश्येति। अवश्यः कोपो यस्य तस्य अवश्यकोपस्य अतएव आपदां विहन्तुः निग्रहानुग्रहसमर्थस्य इत्यर्थः, पुंस इति शेषः। देहिनो जन्तवः स्वयमेव वश्या वशङ्गता भवन्ति। "वशङ्गत" इति यत्प्रत्ययः। अतस्त्वया कोपिना भवितव्यमित्यर्थः। व्यतिरेके तु अनिष्टमाचष्टे—अमर्षशून्येन निष्कोपेन जन्तुना, 'कन्यया शोक' इतिवत् "हेतौ" इति तृतीया। हृदयस्य कर्म हार्दं स्नेहः। "प्रेमा ना प्रियता हार्दं प्रेम स्नेहः" इत्यमरः। युवादित्वादण्। "हृदयस्य हृल्लेखयदण्लासेषु" इति हृदादेशः। जातहार्देन जातस्नेहेन सता जनस्य आदरो न, विद्विषा द्विषता च सतादरो न। अमर्षहीनस्य रागद्वेषौ अकिञ्चित्करत्वादगण्यौ इत्यर्थः। अथवा विद्विषा सता दरो भयं न। "दरोऽस्त्रियां भये खञ्जे" इत्यमरः। एतस्मिन्नेव प्रयोगे सन्धिवशाद् द्विधा पदच्छेदः। पुंवाक्येषु न दोषः। अतः स्थाने कोपः कार्य्यस्त्राज्यस्तु अस्थाने कोप इति भावः ॥ ३३ ॥

परिभ्रमन्निति। लोहितचन्दनोचितः उपचितलोहितचन्दनः। "वाहिताग्न्यादिषु" इति साधुः। अभ्यस्तरक्तचन्दन इत्यर्थः। "अभ्यस्ते त्युचितं न्याय्यम्" इति यादवः। महारथो रथचारी। उभयत्रापि

৩৩। যাঁহার কোপ নিষ্ফল নহে, যিনি আপদ্‌বিনাশে সমর্থ, শরীরিগণ স্বয়ংই তাদৃশ পুরুষের বশ হয়। কিন্তু যে ব্যক্তি কোপপরিশূন্য,—তাদৃশ পুরুষ মিত্র হইলেও তাহাকে কেহ আদর করে না, কিংবা শত্রু হইলেও তাহাকে কেহ ভয় করে না।

৩৪। বলুন দেখি—পূর্ব্বে যিনি রক্তচন্দনচর্চ্চিত হইয়া রথারোহণে বিচরণ করিতেন, সেই

विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन्
करोति मन्युं न कथं धनञ्जयः ॥ ३५ ॥ ?

अन्वयः । वासवोपमः यः उत्तरान् कुरून् विजित्य प्राज्यम् अकुप्यम् वसु अयच्छत, सः धनञ्जयः अधुना तव वल्कवासांसि आहरन् कथं न मन्यु ं करोति ? ॥ वाच्य—येन वासवोपमेन वसु अदायि । तेन धनञ्जयेन आहरता मन्यु : न क्रियते ? । ३५

प्रागिति शेषः । अद्य तु रेणुरूषितो धूलिच्छुरितः । पादाभ्यामतति गच्छतीति पंदातिः पादचारी । "अज्यतिभ्यां च" इत्यनुवृत्तौ "पादे च" इति औणादिक इन्प्रत्ययः । "पादस्य पदाज्यातिगोपहतेषु" इति पदादेशः । अन्तर्गिरि गिरिषु अन्तः । विभक्त्यर्थेऽव्ययीभावः । "गिरेश्च सेनकस्य" इति विकल्पात् समासान्ताभावः । परिभ्रमन् अयं वृकोदरो भीमः । सत्यधनस्य इति सोद्गुण्ठनवचनम् । अद्यापि त्वया सत्यमेव रक्ष्यते, न तु भ्रातर इति भावः । तवेति शेषः । मानसं नो दुनोति ? "स्वान्तं हृत् मानसं मनः" इत्यमरः । कच्चित् न परितापयति ? "कच्चित् कामप्रवेदने" इत्यमरः । स्वाभिप्रायाविष्करणं कामप्रवेदनम् ॥ ३४ ॥

विजित्येति । वासवः इन्द्रः उपमानं यस्य स वासवोपमः इन्द्रतुल्यो यो धनञ्जयः । उत्तरान् कुरून् मेरोरुत्तरान् मानुषान् देशविशेषान् विजित्य प्राज्यं प्रभूतं । "प्रभूतं प्रचुरं प्राज्यम्" इत्यमरः । कुप्यात् अन्यत् अकुप्यं हेमरूप्यात्मकम् । "स्यात् कोशश्च हिरण्यं च हेमरूपेऽ कृताकृते । ताभ्यां यत् अन्यत् तत्कुप्यम्" इत्यमरः । वसु धनम् अयच्छत् दत्तवान् । "पाघ्रा" इत्यादिना दाणो यच्छादेशः । स धनं जयतीति धनञ्जयोऽर्जुनः । "संज्ञायां भृत्वृजि" इत्यादिना खच्प्रत्ययः । "अरुर्द्विषत्" इत्यादिना मुमागमः । अधुना अस्मिन् काले । "अधुना" इति निपातनात् साधुः । तव वल्कवासांसि आहरन् कथं तव मन्युं क्रोधं दुःखं वा न करोति ? ॥ ३५ ॥

वृकोदर এখন ধূলিধূসরিত হইয়া পাদচারে পর্ব্বতে পর্ব্বতে পরিভ্রমণ করিতেছেন, ইনিও কি সত্যধন মহারাজের হৃদয় সন্তপ্ত করিতেছেন না ?

৩৫ । ইন্দ্রতুল্য যে ধনঞ্জয় উত্তর কুরুদেশ জয় করিয়া আপনাকে প্রভূত স্বর্ণরূপ্যময় ধন আনিয়া দিয়াছিলেন, তিনি যে সম্প্রতি আপনার বল্কলবসন আহরণ করিতেছেন, ইহাতেও কি আপনার ক্রোধের [দুঃখের] উদ্রেক হইতেছে না ?

वनान्तशय्याकठिनीकृताकृतौ
कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥
इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥

अन्वयः। वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अगजौ गजौ इव एतौ यमौ विलोकयन् त्वं कथं धृतिसंयमौ बाधितुं न उत्सहसे ॥ वाच्य—विलोकयता त्वया कथं उत्सह्यते। ३६

अन्वयः। अहम् इमां तावकीं धियं न वेद। चित्तवृत्तयः विचित्ररूपाः खलु। परां भवदापदं विचिन्तयन्त्या मम आधयः चेतः प्रसभं रुजन्ति ॥ वाच्य—एषा तावकी धीः मया न विद्यते। विचित्ररूपाभिः चित्तवृत्तिभिः (सूयते) आधिभिः चेतः रुज्यते। ३७

वनान्तेति। वनान्तो वनभूमिरेव शय्या तया कठिनीकृताकृती कठिनीकृतदेहौ। "आकारो देह आकृतिः" इति वैजयन्तो। विष्वक् समन्तात्। "समन्ततस्तु परितः सर्वतो विष्वगित्यपि" इत्यमरः। कचाचितौ कचव्याप्तौ विशीर्णकेशौ इत्यर्थः। अतएव अगजौ गिरिसम्भवौ गजौ इव स्थितौ एतौ यमौ युग्मजातौ माद्रीपुत्रौ इत्यर्थः। "यमौ दण्डधरे श्वाङ्के संयमे यमजेऽपि च" इति विश्वः। विलोकयन् त्वं कथं धृतिसंयमौ सन्तोषनियमौ। "धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु" इति विश्वः। बाधितुं न उत्सहसे न प्रवर्त्तसे। "शकधृष" इत्यादिना तुमुन्। अहो ते महत् धैर्यमिति भावः ॥ ३६ ॥

अथ राज्ञो दुःखं दर्शयितुमुपोद्घातमाह—प्रक्रान्तार्थं वर्णयितुम् अर्थान्तरवर्णनम् उपोद्घातः। इमामिति। इमां वर्त्तमानाम्, तव इमां तावकीं त्वदीयाम्। "तस्येदम्" इति अण्प्रत्ययः। "तवकममकावेकवचने" इति तवकादेशः। धियं त्वदापद्विषयां चित्तवृत्तिम् अहं न वेद, कौटस्थ्यात् न वेद्मि। परवुद्धेरप्रत्यक्षत्वादिति भावः। "विदो लटो वा" इति णलादेशः।

३६। ओः! आपनार कि प्रवल धैर्य! एই যমজ মাদ্রীনন্দন নকুল ও সহদেব বনশয্যায় শয়ন করিয়া কঠিনদেহ হইয়াছেন; ইঁহাদের কেশ ইতস্ততঃ বিকীর্ণ হওয়ায় ইহারা যেন গিরিজাত গজের ন্যায় দৃষ্ট হইতেছেন, ইহা দেখিয়াও আপনার সন্তোষ এবং প্রতিশ্রুতি ভঙ্গ করিতে উৎসাহ হইতেছে না?

৩৭। আপনার এই যে বিরূপ বুদ্ধি, তাহা আমি বুঝিতে পারিতেছি না! চিত্তবৃত্তিগুলির

पुराधिरूढ़ः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः ॥ ३८ ॥

अन्वयः । यः त्वम् पुरा महाधनं शयनम् अधिरूढः स्तुतिगीतिमङ्गलैः विबोध्यसे । सः (त्वं) अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां जहासि ॥ वाच्य—यं (त्वां) अधिरूढं विबोधयन्ति । तेन (त्वया) निद्रा हीयते । ३८

न चात्मदृष्टान्ते नापन्नत्वाद् दुःखित्वमनुमातुं शक्यते, धीरादिष्वनैकान्तिकत्वादित्याशयेनाह—चित्तवृत्तयो विचित्ररूपा धीराधीराद्यनेकप्रकाराः खलु, किन्तु पराम् उत्कृष्टां भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतः चित्तम्, आधयो मनोव्यथाः । "उपसर्गे धोः किः" इति किप्रत्ययः । प्रसभं प्रसह्य रुजन्ति भञ्जन्ति । "रुजो भङ्गे" इति धातोर्लट् । पश्यतामपि दुःसहा दुःखजननो त्वद्विपत्तिः अनुभवितारं त्वां न विकरोतीति महच्चित्रमित्यर्थः । चेत इति "रुजार्थानां भाववचनानामज्वरेः" इति षष्ठो न भवति । तत्र शेषाधिकाराच्छेषत्वस्य विवक्षितत्वादिति ॥ ३७ ॥

तदापदमेव श्लोकत्रयेणाह—पुरेति । यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम् । "महाधनं महामूल्ये" इति विश्वः । शयनं शय्यामधिरूढः सन् स्तुतयो गीतयश्च ता एव मङ्गलानि तैः करणभूतैः, पुरा विबोध्यसे वैतालिकैरिति शेषः, पूर्वं बोधित इत्यर्थः । "पुरि लुङ् चास्मै" इति भूतार्थे लट् । स त्वमदभ्रदर्भां बहुकुशाम् । "अस्त्री कुशं कुथो दर्भः" इति । "अदभ्रं बहुलं बहु" इति उभयत्राप्यमरः । स्थलीम् अकृत्रिमभूमिम् । "जानपद" इत्यादिना कृत्रिमार्थे ङीष् । एतेन दुःसहस्पर्शत्वमुक्तम् । अधिशीङ्स्थासां कर्म इति कर्मत्वम् । अधिशय्य शयित्वा । "अयङ्यिक्ङिति" इत्ययङादेशः । अशिवैः अमङ्गलैः शिवारुतैः । "शिवा हरीतकी क्रोष्टा शमी नद्यामलक्यु भे" इति वैजयन्तो । निद्रां जहासि, अत्येति शेषः ॥ ३८ ॥

ভাব অতি বিচিত্র ! কিন্তু আপনার ঘোরতর আপদ্ চিন্তা করিলে অসহ্য দুঃখ আসিয়া আমার হৃদয় বিদীর্ণ করে।

৩৮। যে আপনি পূর্ব্বে বহুমূল্য শয্যায় শয়ন করিতেন, বৈতালিকগণ মঙ্গল স্তুতিগীতিদ্বারা আপনার নিদ্রাভঙ্গ করিত ; সেই আপনি আজ কুশবহুল শয্যায় শয়ন করিতেছেন, আর শিবাগণের অশুভ রবে জাগরিত হইতেছেন।

पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं
उपैति कार्श्यं यशसा समं वपुः ॥ ३९ ॥
अनारतं यौ मणिपीठशायिना-
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥

अन्वयः । हे नृप ! यत् एतत् वपुः पुरा द्विजातिशेषेण अन्धसा रामणीयकं उपनीतम्, तत् अद्य वन्यफलाशिनः ते यशसा समं कार्श्यम् उपैति ॥ वाच्य—द्विजातिशेषम् अन्धः उपनीतवत् । तेन उपेयते । ३९

अन्वयः । अनारतम् मणिपीठशायिनौ यौ चरणौ राजशिरःस्रजां रजः अरञ्जयत् । तौ ते चरणौ मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः ॥ वाच्य—रजसा अरञ्जयताम्, ताभ्यां चरणाभ्यां निषद्यते । ४०

पुरेति । हे नृप ! यदेतत् पुरोवर्त्ति वपुः पुरा द्विजातिशेषेण द्विज-भुक्तावशिष्टेन अन्धसा अन्नेन । "भिक्षा स्त्री भक्तमन्धोऽन्नम्" इत्यमरः । द्वे जाती येषां ते द्विजातयः । तदुक्तम्—"जन्मना जायते शूद्रः संस्कारै-र्द्विज उच्यते" इति । "दन्तविप्राण्डजा द्विजाः" इत्यमरः । रमणीयस्य भावो रामणीयकं मनोज्ञरत्वम् उपनीतं प्रापितम् । नयतेर्द्विकर्म्मकत्वात् प्रधाने कर्म्मणि क्तः । "प्रधानकर्म्मण्याख्येये लादीनाहुर्द्विकर्म्मणाम्" इति वचनात् । अद्य वन्यफलाशिनस्ते तव तत् वपुः यशसा समं परम् अति-मात्रं कार्श्यं उपैति प्राप्नोति । उभयमपि क्षीयते इत्यर्थः । अत्र सहोक्ति-रलङ्कारः । तदुक्तं काव्यप्रकाशे—"सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्" इति ॥ ३९ ॥

अनारतमिति । अनारतम् अजस्रं मणिपीठशायिनौ मनिमयपीठ-स्थितौ यौ चरणौ राजशिरःस्रजां नमद्भूपालमौलिस्रजां रजः परागोऽ-रञ्जयत्, तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिः आलूनशिखेषु छिन्नाग्रेषु बर्हिषां कुशानाम् । "बर्हिः कुशहुताशयोः" इति विश्वः । वनेषु निषीदतः तिष्ठतः ॥ ४० ॥

৩৯ । হে নৃপ ! পূর্ব্বে দ্বিজাতিবর্গের ভুক্তাবশিষ্ট অন্ন দ্বারা আপনার যে এই দেহের রমণীয়তা সম্পাদিত হইয়াছিল ; আজ কি না বন্য ফল ভক্ষণে সেই শরীর আপনার যশের সহিত কৃশতা প্রাপ্ত হইতেছে ।

৪০ । আপনার যে পদযুগল নিরন্তর মণিময় পীঠে প্রতিষ্ঠিত থাকিত এবং প্রণত রাজগণের

द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्य्यासितवीर्य्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम् ॥ ४१॥
विहाय शान्तिं नृप ! धाम तत् पुनः
प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

अन्वयः । यत् इयं दशा द्विषन्निमित्ता ततः मे मनः समूलम् उन्मूलयतीव । परैरपर्य्यासित-वीर्य्यसम्पदां मानिनां पराभवोऽपि उत्सव एव ॥ वाच्य—अनया दशया द्विषन्निमित्तया (भूयते) उन्मूल्यते । पराभवेणापि उत्सवेन (भूयते) ॥ ४१

अन्वयः । हे नृप ! शान्तिं विहाय विद्विषां वधाय तत् धाम पुनः सन्धेहि । निस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति, भूभृतः न ॥ वाच्य—सन्धीयताम् । निस्पृहैः मुनिभिः सिद्धिः व्रज्यते । भूभृद्भिः । ४२

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवना ? इत्यत्राह---द्विषदिति । यत् यतः कारणात् इयं दशा अवस्था । "दशा वर्त्तावस्थायाम्" इति विश्वः । द्विषन्तो निमित्तं यस्याः सा । "द्विषोऽमित्रे" इति शतृप्रत्ययः । अतो मे मनः समूलं निःशेषम् उन्मूलयति इव उत्पाटयति इव । दैविको तु आपत् न दुःखायेत्याह—परैरिति । परैः शत्रुभिः अपर्य्यासिता अपर्य्यावर्त्तिता वीर्य्यसम्पद् येषां तेषां मानिनां पराभवो विपदपि उत्सव एवेति वैधर्म्येण अर्थान्तरन्यासः । मानहानिर्दुःसहा नतु आपत् इति भावः ॥ ४१ ॥

विहायेति । हे नृप ! शान्तिं शमं विहाय तत् प्रसिद्धं धाम तेजः विद्विषां वधाय पुनः सन्धेहि अङ्गीकुरु, प्रसीद, प्रार्थनायां लोट् । ननु शमेन कार्य्यसिद्धौ किं क्रोधेन ? इत्यत्राह—व्रजन्तीति । निस्पृहा मुनयः शत्रून् कामादीन् अवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं मोक्षाख्यां व्रजन्ति, भूभृतस्तु न । कैवल्यकार्य्यवद्राजकार्य्यं न शान्ति-साध्यमित्यर्थः ॥ ४२ ॥

शिरःस्थित मालोर रजोद्वारा रञ्जित हइत, आज किना आपनार सेई चरणद्वय अरण्यप्रदेशे मृग ओ द्विजगणकर्त्तृक छिन्नाग्र कुशेर उपर न्यस्त रहियाछे ।

४१ । ये हेतु शत्रुगण हइतेई आपनार एই दीन दशा घटियाछे, एই जन्य इहा आमार हृदय-क्षेत्रके समूले उन्मूलित करितेछे । आहा ! शत्रुगण याँहादेर वीर्य्य सम्पत् अतिक्रम करिते पारे ना, तादृश मानिगणेर पराभवओ उत्सव बलियाई विवेचित हय ।

४२ । हे नृप ! प्रसन्न हउन, शान्ति परित्याग करिया शत्रुगणेर निधनजन्य पुनराय सेई तेज

पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम्।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त हता मनस्विता ॥ ४३ ॥
अथ क्षमामेव निरस्तविक्रमः
चिराय पर्य्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सन् जुहुधीह पावकम् ॥ ४४ ॥

अन्वयः। धामवतां पुरःसरा यशोधनाः भवादृशाः सुदुःसहम् ईदृशं निकारं प्राप्य चेत् रतिम् अधिकुर्वते। तर्हि हन्त मनस्विता निराश्रया (सती) हता। वाच्य—पुरःसरैः यशोधनैः भवादृशैः रतिः अधिक्रियते। मनस्वितया निराश्रयया हतया (भूयते)। ४३

अन्वयः। अथ निरस्तविक्रमः चिराय क्षमाम् एव सुखस्य साधनं पर्य्येषि। (तर्हि त्वं) लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः सन् इह पावकं जुहुधि ॥ वाच्य—निरस्तविक्रमेण (त्वया) क्षमा...परीयते, (तर्हि) जटाधरेण सता पावकः हूयताम्। ४४

पुर इति। किं च धामवतां तेजस्विनाम्। परापकारासहिष्णूनामित्यर्थः। पुरः सरन्तीति पुरःसरा अग्रेसराः। "पुरोऽव्ययोऽग्रेषु सर्त्तेः" इति टप्रत्ययः। यशोधना भवादृशाः सुदुःसहम् अतिदुःसहम् ईदृशम् उक्तप्रकारं निकारं पराभवं प्राप्य रतिं सन्तोषं अधिकुर्वते स्वीकुर्वते चेत् तर्हि हन्त इति खेदे। मनस्विता अभिमानिता निराश्रया सती हता, तेजस्विजनैकशरणत्वात् मनस्विताया इत्यर्थः। अतः पराक्रमितव्यमितिभावः। यद्यपि अत्र प्रसहनस्य असङ्कल्पः अधिपूर्वात् करोतेः "अधेः प्रसहने" इत्यात्मनेपदं न भवति। "प्रसहनं परिभवः" इति काशिका। तथापि अस्याः कर्त्तृभिप्रायविवक्षायामेव प्रयोजकत्वात् कर्त्तृभिप्राये "स्वरितञितः" इति आत्मनेपदं प्रसिद्धम् ॥ ४३ ॥

अथेति। अथ पक्षान्तरे निरस्तविक्रमः सन् चिराय चिरकालेनापि क्षमां क्षान्तिमेव। "क्षितिक्षान्त्योः क्षमा" इत्यमरः। सुखस्य साधनं

ग्रहण करुन, निश्चय ही मुनिगणही कामक्रोधादि रिपु जय करिया शान्तिद्वारा सिद्धिलाभ करेन, राजगण नहे।

४३। यशोधन तेजस्विप्रधान भवादृश व्यक्तिराई यदि एईरूप दुःसह पराभव प्राप्त हईया प्रीत थाकेन, आहो! तबे ये, अभिमानिता निराश्रय हईया हत हय।

४४। अथवा यदि विक्रम परित्याग करिया क्षमाकेई चिर सुखेर साधन बलिया बुझिया थाकेन,

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि ॥ ४५ ॥
विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।

अन्वयः । परेषु निकृतिपरेषु (सत्सु) भूरिधाम्नः ते समयपरिरक्षणं क्षमं न । हि विजयार्थिनः क्षितीशा अरिषु सोपधि सन्धिदूषणानि विदधति ॥ वाच्य—समयपरिरक्षणेन क्षमेण (भूयते), विजयार्थिभिः क्षितीशैः...दूषणानि विधीयन्ते । ४५

पर्य्येषि अवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय । धरतीति धरः, पचाद्यच् । जटानां धरो जटाधरः सन् इह वने पावकं जुहुधि पावके होमं कुरु इत्यर्थः । अधिकरणे कर्म्मत्वोपचारः । विरक्तस्य किं धनुषा इत्यर्थः । हुझल्भ्यो हेर्धिः ॥ ४४ ॥

अथ समयोल्लङ्घनादबिभेषि, तदपि न किञ्चित् इत्याह—नेति । परेषु शत्रुषु निकृतिः शाठ्यं परं प्रधानं येषु तेषु तथोक्तेषु अपकारतत्परेषु सत्सु भूरिधाम्नो महोजसः प्रतीकारक्षमस्य ते तव समयः त्रयोदशसंवत्सरान् वने वत्स्यामि इत्येवंरूपा संवित् । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तम् । "युक्ते क्षमं शक्ते हिते त्रिषु" इत्यमरः । हि यस्माद् विजयार्थिनो विजिगीषवः क्षितीशा अरिषु विषये सोपधि सकपटं यथा तथा । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे" इत्यमरः सन्धिदूषणानि विदधति । केनचित् व्याजेन दोषमापाद्य सन्धिं दूषयन्ति विघटयन्ति इत्यर्थः, शत्रूणां हि विजिगीषोः सर्वथा कार्य्यसाधनं प्रधानम्, अन्यत् समयरक्षणादिकम् अशत्रूणां इति भावः । अर्थान्तरन्यासोऽलङ्कारः । पुष्पिताग्रा वृत्तम् ॥ ४५ ॥

তবে এই রাজচিহ্ন কার্মুক পরিত্যাগপূর্ব্বক জটাধারী হইয়া এই বনে হুতাশনে হোম করুন।

৪৫। মহারাজ আপনি অসীম তেজঃসম্পন্ন বিশেষতঃ প্রতীকারক্ষম, শাঠ্যপরায়ণ শত্রুগণের সহিত আপনি যে ত্রয়োদশ বৎসর বনে বাস করিব এইরূপ প্রতিজ্ঞা করিয়াছেন, সেই প্রতিশ্রুতি প্রতীক্ষা করা আপনার পক্ষে যুক্তিযুক্ত নহে; কেন না বিজয়ার্থী রাজগণ শত্রু জয়ের জন্য ছল অবলম্বনে তাহাদের কোন না কোন ত্রুটি প্রতিপাদন করিয়া সন্ধিসর্ত্ত বিচ্ছিন্ন করিয়া থাকেন।

रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥

इति श्रीभारविकृतौ किरातार्जुनीये
महाकाव्ये प्रथमः सर्गः ॥ १ ॥

अन्वयः। विधिसमयनियोगात् अगाधे आपत्पयोधौ मग्नं दीप्तिसंहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतमिव लक्ष्मीः भूयः समभ्येतु ॥ वाच्य—... जिह्मः शिथिलवसुः मग्नः दिनकृत् इव उदीयमानः त्वं लक्ष्म्या समभीयस्व ॥ ४६

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति—विधोति। विधिर्दैवम्। "विधिर्विधाने दैवे च" इत्यमरः। समयः कालः तयोः नियोगात् नियमाद्धेतोः तयोर्दुरतिक्रमत्वादिति भावः। अगाधे दुस्तरे आपत्पयोधिरिवेत्युपमितसमासः। दिनकृतमिवेति वक्ष्यमाणानुसारात् तस्मिन् आपत्पयोधौ मग्नम्। सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जति इत्यागमः। दीप्तिः प्रताप आतपश्च तस्याः संहारेण जिह्मम् अप्रसन्नं शिथिलवसुं शिथिलधनम् अन्यत्र शिथिलरश्मिम्। "वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ" इति वैजयन्ती। "शिथिलबलम्" इति पाठे तु उभयत्रापि शिथिलशक्तिकमित्यर्थः। रिपुस्तिमिरमिवेति रिपुतिमिरम् उदस्य निरस्य उदीयमानम् उद्यन्तम्। "इङ्गतौ" इति धातोर्दैवादिकात् कर्तरि शानच्। त्वां दिनादौ दिनकृतमिव लक्ष्मीः भूयः समभ्येतु भजतु। "आशिषि लिङ्लोटौ" इति लोट्। चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः। यथाह भगवान् भाष्यकारः—"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते धीरपुरुषाणि आयुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्ति" इति। पूर्णोपमेयम्। मालिनीवृत्तम्। सर्गान्तत्वाद्वृत्तभेदः। यथाह दण्डी—"सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्" इति ॥ ४६ ॥

अथ कविः काव्यवर्णनीयमाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति—इतीति। इतिशब्दः सर्गपरिसमाप्तौ। भारविकृतौ इति कविनामकथनम्। महाकाव्य इति महच्छब्देन लक्षणसम्पत्तिः सूचिता। किरातार्जुनीय इति काव्यवर्णनीययोः कथनम्। प्रथमः सर्गः समाप्त इति शेषः।

द्वितीयः सर्गः ।

—०—

विहितां प्रियया मनःप्रियाम्
अथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥ १ ॥

अन्वयः । अथ वृकोदरः प्रियया विहितां मनःप्रियां गिरं गरीयसीं निश्चित्य नृपम् उपपत्तिमत् ऊर्जिताश्रयं वचनम् ऊचे ॥ वाच्य—वृकोदरेण नृपः (ऊचे) ॥ १

एवमुत्तरत्रापि द्रष्टव्यम् । किरातार्जुनौ अधिकृत्य कृतोऽयं ग्रन्थः किरातार्जुनीयम् । "शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ" इति द्वन्द्वाच्छप्रत्ययः राघवपाण्डवीयशब्दवत् । तथाहि—अर्जुन एव अत्र नायकः किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः । यथाह दण्डी—"वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि । तज्जयान्नायकोत्कर्षवर्णनञ्च धिनोति नः ॥"

अथ अयं संग्रहश्लोकः—

नेता मध्यमपाण्डवो भगवतो नारायणस्यांशज-
स्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो दिव्यः किरातः पुनः ।
शृङ्गारादिरसोऽङ्गमत्र विजयो वीरप्रधानो रसः
शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ॥ इति ।

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां
प्रथमः सर्गः समाप्तः ॥ १ ॥

४७ । महाराज ! विधि ও সময়ের নিয়মানুসারে সূর্য্য যেমন রজনীযোগে অগাধ সাগরে মগ্ন হয়েন, প্রতাপ ও কিরণ বিহীন হইয়া থাকেন, পুনরায় প্রভাতে তিমির-রাশি সমুচ্ছেদ করিয়া উদীয়মান হইলে দিনশ্রী আসিয়া তাঁহাকে আলিঙ্গন করে, আপনি তদ্রূপ ঘোরতর বিপদে পতিত হইয়া নিষ্প্রতাপ ও নির্দ্ধন হইয়াছেন, এখন রিপুকুল উন্মূলিত করিয়া উন্নত হউন, রাজ্যলক্ষ্মী আসিয়া পুনর্ব্বার আপনাকে আশ্রয় করিবে ।

विहितामिति । अथ वृकोदरो भीमः, प्रियया द्रौपद्या । प्रियाग्रहणम् अस्या हितोपदेशतात्पर्य्यसूचनार्थम् । विहिताम् अभिहिताम् इत्यर्थः, विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्य्यवसानात् । मनःप्रियाम् अभिमतार्थयोगात् मनोहरां, विशेषणद्वयेनापि गिरो ग्राह्यत्वम् उक्तम् । गिरं गरीयसीं सारवत्तरां निश्चित्य, नृपं धर्मराजम् उपपत्तिमत्

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥ २ ॥
विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

अन्वयः। मानिनी स्नेहमयेन चक्षुषा परितो वीक्ष्य यत् अवोचत, वागधिपस्य अपि दुर्वचं तद्वचनं विस्मयं विदधीत ॥ वाच्य—मानिन्या अवाचि। दुर्वचेन तेन वचनेन विस्मयो विधीयेत ॥

अन्वयः। विषमोऽपि नयः कृततीर्थः सन् पयसाम् आशय इव विगाह्यते (जनैः)। तु तत्र यः कृत्यवर्त्म सदुपन्यस्यति स विशेषदुर्लभः। वाच्य—विषममपि नयं कृततीर्थं आशयमिव विगाहन्ते (जनाः)। येन उपन्यस्यते, तेन विशेषदुर्लभेन (भूयते) ॥ ३

युक्तियुक्तम् ऊर्जिताश्रयम् उदारार्थं वचनम् ऊचे उक्तवान्। कर्त्तरि लिट्। ब्रुवो वचिरादेशः। "ब्रुविशासि" इत्यादिना द्विकर्मकत्वम्। "अकथितञ्च" इति नृपस्य कर्मत्वम् ॥ १ ॥

किं तद्वचनं तदाह—यदिति। मानिनो क्षत्रियकुलाभिमानवतो द्रौपदी, स्नेहमयेन स्नेहप्रचुरेण। "तत्प्रकृतवचने मयट्।" चक्षुषा ज्ञानचक्षुषा। एतेन आप्तत्वम् उक्तम्। परितो वीक्ष्य समन्तादविविच्य यत् वचनम् अवोचत। ब्रुवोर्वचेर्वा लुङ्। "वच उम्" इति उमागमः। वागधिपस्य बृहस्पतेः अपि दुर्वचं वक्तुम् अशक्यम्। शेषे षष्ठी इयम्, न कृद्योगलक्षणा। अतो "न लोक" इत्यादिना षष्ठीनिषेधो नास्ति। तत् वचनं विस्मयं विदधीत सर्वस्य अपीति शेषः। अथवा वागधिपस्य अपि विस्मयं विदधीत इति सम्बन्धः। दुर्वचं न केन अपि वक्तुं शक्यम् इति शेषः। यतः स्त्रीणामपि ग्राह्यम् अनुरुणद्धि हितं च अनुबध्नाति अतो विस्मयकरं ग्राह्यं च एतद्वचनम् इति तात्पर्यार्थः ॥ २ ॥

१। अनन्तर वृकोदर, प्रियतमा द्रौपदीर कथित हितोपदेशपूर्ण मनोहर वाक्यर अत्यन्त सारवत्ता उपलब्धि करिया धर्मराज युधिष्ठिरके उदारार्थसम्बलित युक्तियुक्त वाक्य बलिते लागिलेन।

२। क्षत्रियकुलाभिमानिनी द्रौपदी स्नेहपूर्ण ज्ञाननयनद्वारा सकल दिक् दर्शन करिया याहा बलियाछेन, वाक्पतिओ ताहा बलिते समर्थ नहेन। ताँहार एই उपदेशवाणी (सकलेरই) विस्मय उत्पादन करे।

परिणामसुखे गरीयसि व्यथके ऽस्मिन् वचसि क्षतौजसाम्।
अतिवीर्य्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥४॥

অন্বয়ঃ। পরিণামসুখে গরীয়সি ক্ষতৌজসাং ব্যথকে অল্পীয়সি অস্মিন্ বচসি অতিবীর্য্যবতি ভেষজে ইব বহুঃ গুণঃ দৃশ্যতে ॥ বাচা—বহুং গুণং পশ্যতি ॥ ৪

বিস্ময়করত্বে হেতুমাহ—বিষম ইতি। বিষমোঽপি দুর্বোধোঽপি অন্যত্র দুষ্প্রবেশোঽপি নয়ো নীতিশাস্ত্রং পয়সাম্ আশ্রয়ো হ্রদ ইব কৃততীর্থঃ কৃতাভ্যাসাদ্যুপায়ঃ সন্। "তীর্থং শাস্ত্রেঽধ্বরে ঘেত্রোপায়োপাধ্যায়মন্ত্রিষু। যোনৌ জলাবতারেষু মন্ত্রাদ্যষ্টাদশস্বপি" ইতি বিশ্বঃ। অন্যত্র কৃতজলাবতারঃ সন্। "তীর্থং যোনৌ জলাবতারে চ" ইতি হলায়ুধঃ। বিগাহ্যতে বিগচ্ছ্যতে প্রবিশ্যতে চ। কিন্তু তত্র নয়ে জলাশয়ে চ স তাদৃশঃ পুরুষো বিশেষদুর্লভঃ অত্যন্তদুর্লভঃ যঃ কৃত্যং সন্ধিবিগ্রহাদিকার্য্যং স্নানাদিকং চ তস্য বর্ত্ম সৎ সাধু দেশকালাদ্যবিরুদ্ধং যথা তথা যথার্থম্ ইত্যর্থঃ, অন্যত্র চ গর্ত্তগ্রাহপাষাণাদিরহিতম্ যথা তথা উপন্যস্যতি উদাহরতি। "উপন্যাসস্তু বাঙ্মুখম্ উপোদ্ঘাত উদাহারঃ" ইত্যমরঃ। যথা কেচিৎ কৃততীর্থং পয়সি গম্ভীরেঽপি প্রবেষ্টারঃ সন্তি, তীর্থকরস্তু বিরলঃ। তদ্বৎ নীতৌ অপি নিগূঢ়মপি তত্ত্বং সতি বক্তরি বোদ্ধারঃ সন্তি বক্তা তু ন সুলভঃ। অপঠিত্বাপি ইয়ঞ্চ সাধু বক্তীতি যুজ্যতে বিস্ময় ইতি তাৎপর্য্যার্থঃ ॥ ৩ ॥

অথ গ্রাহ্যত্বে হেতুমাহ—পরিণামেতি। পরিণামঃ ফলকালঃ পরিপাকাবস্থা চ, তত্র সুখে হিতে। "অস্ত্রং চাথ ত্রিষু দ্রব্যে পাপপুণ্যং সুখাদি চ" ইত্যমরঃ। সুখশব্দস্য বিশেষ্যলিঙ্গত্বম্। গরীয়সি গুর্ব্বর্থপ্রতিপাদকে অর্থভূয়িষ্ঠে শ্রেষ্ঠে চ ক্ষতৌজসাম্ উভয়ত্র অপি ক্ষীণশক্তীনাং ব্যথকে যুদ্ধোপোদ্বলকত্বাদ্ ভয়ঙ্করে অন্যত্র আদৌ সন্তাপাদিদুঃখজনকে অল্পীয়সি অল্পাক্ষরে অল্পমাত্রে চ। উক্তঞ্চ—"স্বল্পা চ মাত্রা বহুলো গুণশ্চ" ইতি। অস্মিন্ বচসি দ্রৌপদীবাক্যে অতিবীর্য্যবতি অত্যন্তসামর্থ্যবতি ভেষজে ঔষধে ইব। "ভেষজৌষধভৈষজ্যানি" ইত্যমরঃ। বহুরধিকো গুণঃ মানত্রাণরাজ্যলাভাদিঃ আরোগ্যবলপোষাদিশ্চ দৃশ্যতে। অতো গ্রাহ্যমস্যা বচনমিতি ভাবঃ ॥ ৪ ॥

৩। (জনগণ) যেমন অবতরণোপায় সোপানাদি নির্ম্মিত থাকিলে দুর্গম জলাশয়ে অবগাহন করিতে পারে, তদ্রূপ অভ্যাসাদি উপায় প্রদর্শিত হইলে দুরভিগম্য নীতিপথেও প্রবেশ করিতে সমর্থ হয়। কিন্তু যিনি স্নানার্থীকে গর্ত্ত, পাষাণ ও কুম্ভীরাদি বিঘ্নবিরহিত জলাশয় বলিয়া দেন, তাদৃশ পুরুষের ন্যায় নীতিপথে গমনেচ্ছু মানবকে সন্ধিবিগ্রহাদির দেশকালোচিত সাধু উপদেশ প্রদান করেন, এরূপ ব্যক্তি বিশেষ দুর্লভ।

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती।
ननु वक्तृविशेषनिष्पृहा गुणगृह्या वचने विपश्चितः ॥५॥
चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥ ६ ॥

अन्वयः। रुचिरार्था इयं भारती इष्टगुणाय भवते अपि रोचताम्। गुणगृह्याः विपश्चितः वचने वक्तृविशेषनिष्पृहाः ननु ॥ वाच्य—रुचिरार्थया अनया भारत्या रुच्यताम्। विपश्चिद्भिः वक्तृविशेषनिष्पृहैः भूयते ॥ ५

अन्वयः। नृप! चतसृषु अपि विद्यासु निरूढिम् आगता, विवेकिनी ते मतिः कथं करिणी पङ्कमिव विपर्ययम् एत्य अवसीदति? वाच्य—आगतया विवेकिन्या मत्या करिण्या इव अवसद्यते? ॥ ६

सत्यमेवं तथापि मह्यं न रोचते किं करोमि इति अत्राह—इयमिति। रुचिरार्था हितार्थसम्पन्ना इति रुचिहेतूक्तिः। इयं भारती द्रौपदीवाक्यम् इष्टगुणाय अभिमतगुणाय गुणग्राहिणे इत्यर्थः, भवते तुभ्यम् अपि। "रुच्यर्थानां प्रीयमाणः" इति सम्प्रदानत्वात् चतुर्थी। रोचतां स्वदताम्। विध्यर्थे लोट्। हितवचने बलादपि इच्छां कुर्यात् औषधवत् इति भावः। तथापि स्त्रैणे वचसि का श्रद्धा तत्राह—ननु इति—गुणानां ग्रहात् गुणग्राह्याः गुणपक्षपातिन इत्यर्थः। "पदात्खैरिबाह्यपत्तेषु च" इति ग्रहेः क्यप्। विपश्चितो विद्वांसः। "विद्वान् विपश्चिद् दोषज्ञः" इत्यमरः। वचने विषये वक्तृविशेषे स्त्रीपुंसादिलक्षणे निष्पृहाः ननु निरास्थाः खलु। "बालादपि सुभाषितं ग्राह्यम्" इति न्यायादिति भावः ॥ ५ ॥

सम्प्रति स्वयम् उपालभते—चतसृष्विति। हे नृप! चतसृषु अपि विद्यासु आन्वीक्षिक्यादिषु। "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती। विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः" इति कामन्दकः। निरूढिमागता प्रसिद्धिं गता अत एव विवेकिनी सदसद्विवेकवती, यथाह मनुः—"आन्वीक्षिक्यां तु विद्यायां धर्माधर्मौ त्रयीस्थितौ। अर्थानर्थौ च वार्त्तायां दण्डनीत्यां नयानयौ" इति। ते मतिः कथं करिणी पङ्कमिव

৪। পরিণাম-হিতকর সন্তাপাদিদুঃখজনক অতিবীর্য্যশালি অল্পমাত্র ঔষধে যেরূপ ক্ষীণবল রুগ্ন ব্যক্তিগণের আরোগ্য, বল-পোষণাদি বহু গুণ দৃষ্ট হয়, তদ্রূপ দ্রৌপদীর এই পরিণামসুখকর অর্থভূয়িষ্ঠ আপাতভয়ঙ্কর বাক্যে শক্তিহীন ভূপতিগণের মান-ত্রাণ-রাজ্যলাভাদি প্রভৃতি গুণ পরিদৃষ্ট হইতেছে।

৫। আপনি গুণগ্রাহী, দ্রৌপদীর এই হিতার্থযুক্ত বাক্য আপনারও রুচিকর হইবে। (নারী-বাক্য বলিয়া অশ্রদ্ধেয় নহে) কেননা; গুণপক্ষপাতী পণ্ডিতগণ বাক্যের গুণ বিচার করিয়া থাকেন, কিন্তু বক্তা স্ত্রী কি পুরুষ, সে বিষয়ে তাঁহারা উদাসীন।

विधुरं किमतःपरं परै-रवगीतां गमिते दशामिमाम् ।
अवसीदति यत् सुरैरपि त्वयि सम्भावितवृत्ति पौरुषम् ॥७॥
द्विषतामुदयः सुमेधसा गुरुरस्खन्तरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ॥८॥

अन्वयः । त्वयि परैः इमाम् अवगीतां दशां गमिते (सति) सुरैः अपि सम्भावितवृत्ति पौरुषम् अवसीदति इति यत् अतःपरं किं विधुरम् (भवति) ? ॥ वाच्या—सम्भावितवृत्तिना पौरुषेण अवसद्यते । विधुरेण (भूयते) ॥ ७

अन्वयः । भूतिम् इच्छता सुमेधसा गुरुः अस्खलन्तरः द्विषताम् उदयः सुमर्षणः महानपि फलसम्पत्प्रवणः परिक्षयः न सुमर्षणः ॥ वाच्या—गुरुणा अस्खलन्तरेण उदयेन सुमर्षणेन (भूयते) । महता फल...प्रवणेन परिक्षयेण न सुमर्षणेन (भूयते) ॥ ८

विपर्ययं वैपरीत्यम् अविवेकरूपम् एत्य अवसीदति नश्यति । तत् न युक्तमिति भावः ॥ ६ ॥

किं नः छिन्नम् इदानीं येन इत्थम् उपालभ्ये महीति तत्राह—विधुरमिति । त्वयि परैः शत्रुभिः इमाम् ईदृशीम् अवगीतां गर्हिताम् । "अवगीतश्च निर्वादे सुहृद्दुष्टे च गर्हिते" इति विश्वः । दशां गमिते प्रापिते सति । सुरैरपि सम्भावितवृत्ति बहुकृतप्रसारम् । अथवा निश्चितसद्भावम् पौरुषं पुरुषकारः । युवादित्वादण्प्रत्ययः । अवसीदति नश्यति इति यत् अतःपरम् अतोऽन्यत् अधिकं किं विधुरं किं कष्टं, न किञ्चिदित्यर्थः । "विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि" इति वैजयन्ती । अस्तीति शेषः । "अस्तिर्भवन्ति परः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" इति भाष्यकारः भवन्तीति लटः पूर्वाचार्याणां संज्ञा । यत् पुरुषाधिकारस्य दुर्दशा सा च शत्रुकृता तदुपरि महत्कष्टं तच्च त्वदुपेक्षया इति उपालभ्यसे इत्यर्थः ॥ ७ ॥

अथ उपेक्षाकालत्वात् इयम् उपेक्षा इत्याशङ्क्य न अयम् उपेक्षाकाल इति वक्तुं तदेव तावत् श्लोकद्वयेन विविनक्ति—द्विषतामिति । भूतिम् उदयम् इच्छता, शोभना मेधा यस्य तेन सुमेधसा सुधिया । "नित्यमसिच्

৬। হে নৃপ! আপনার যে বুদ্ধি আন্বীক্ষিকী প্রভৃতি বিদ্যাচতুষ্টয়ে প্রসিদ্ধি লাভ করিয়া বিবেকশালিনী হইয়াছে, সেই বুদ্ধি এখন অবিবেকরূপ বিপর্য্যয় প্রাপ্ত হইয়া পঙ্কমগ্ন করিণীর ন্যায় অবসন্না হইল কেন?

৭। সুরগণও আপনার যে পুরুষকারের সাফল্য সম্ভাবনা করেন, আপনি শত্রুগণকৃত দুরবস্থা প্রাপ্ত হওয়ায় সেই পুরুষকার বিনষ্ট হইল, ইহা অপেক্ষা দুঃখ আর কি হইতে পারে?

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥
अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥ १० ॥

अन्वयः। कृती परस्य क्षययुक्तिम् अचिरेण भूयसीं आत्मनः (क्षययुक्तिं) विपरीतां विगणय्य उपेक्षते, अन्यथा तत्प्रतिकारं कुरुते ॥ वाच्य—कृतिना उपेक्ष्यते। प्रतिकारः क्रियते ॥ ९

अन्वयः। उदेष्यतीं द्विषतां प्रभुशक्तिम् अनीहया अनुपालयतां महीभुजां श्रियः जननिर्वाद-भयात् इव अचिरात् अपयान्ति ॥ वाच्य—श्रीभिः अपयायते ॥ १०

प्रजामेधयोः" इति असिच् प्रत्ययः। गुरुः महान् अपि अखन्ततरः अत्यन्तदुरन्तः क्षयोन्मुख इत्यर्थः, द्विषताम् उदयः वृद्धिः सुखेन मृष्यत इति सुमर्षणः सुसहः उपेक्ष्य इत्यर्थः। सन्तश्चेत् दुर्मर्षण इति भावः। "भाषायां शासि" इत्यादिना खलर्थे युच्। महानपि फलसम्पत्प्रवणः फलसम्पदुन्मुखः। "प्रनिरन्तर्" इत्यादिना णत्वम्। परिक्षयो न सुमर्षणः न उपेक्ष्य इत्यर्थः। अन्यथा तु उपेक्ष्य इति भावः। न हि उदय एव प्रतिकार्यः, न च क्षय एव उपेक्ष्यः, किन्तु खन्तत्वाखन्तत्वाभ्याम् उभौ अपि प्रतिकार्यौ उपेक्ष्यौ च भवत इत्यर्थः ॥ ८ ॥

अथ उभयोरपि मध्ये एकतरस्य उदयक्षययोः गतिमुक्त्वा इदानीं युगपत्परिक्षयागमे गतिमाह—अचिरेणेति। कृतम् अनेन इति कृती कुशल इत्यर्थः। "इष्टादिभ्यश्च" इति इनिप्रत्ययः। परस्य शत्रोः क्षययुक्तिं क्षययोगम् अचिरेण आशुभाविनीं भूयसीं दुरन्तां च तथा आत्मनः क्षययुक्तिं विपरीतां चिरभाविनीम् अल्पीयसीं खल्पाञ्च विगणय्य विचार्य। "ल्यपि लघुपूर्वात्" इत्ययादेशः। उपेक्षते अन्यथा उक्तविपरीते परस्य क्षययुक्तौ अल्पीयस्यां स्वस्य च भूयस्याम् सत्यां इत्यर्थः, तत्प्रतीकारं तस्याः क्षययुक्तेः प्रतीकारम् अचिरेण आशु कुरुते। एवं सति यदा शत्रोः अभ्युदयः स्वस्य च अतिपरिक्षयो यथा अस्माकं तदा किं वक्तव्यमित्यर्थः। सद्यःप्रतिकारं कुरुते इत्यर्थात् सिद्धम् अनुसन्धेयम् ॥ ८

८। अभ্যুদয়কামী সুধী ব্যক্তি, শত্রুগণের মহান্ অভ্যুদয়ও পরিণামে অস্থায়ী বিবেচনা করিলে অনায়াসে ক্ষমা করিবেন, আর অত্যন্ত ক্ষয়ও ফলোন্মুখ হইলে, তাঁহার উপেক্ষণীয় নহে।

৯। কৃতী ব্যক্তি শত্রুর ক্ষয়যোগ আশু সম্ভাবিত ও দুরন্ত এবং স্বীয় ক্ষয়যোগ দূরসম্ভাবিত ও স্বল্প বিবেচনা করিলে উপেক্ষা করিবেন, আর ইহার বিপরীত হইলে সত্বর প্রতিকার্য্য।

क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥११॥
प्रभवः खलु कोषदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः ।

अन्वयः । क्षययुक्तम् अपि स्वभावजं शिवं धाम दधतं समृद्धये उत्थितम् अनपायं नृपं प्रजाः प्रतिपच्चन्द्रम् इव प्रणमन्ति ॥ वाच्या—प्रजाभिः दधत् उत्थितः अनपायः नृपः चन्द्र इव प्रणम्यते । ११

तथापि उपेक्षायाम् अनिष्टम् आचष्टे—अनुपालयतामिति । उदेष्यतीं वर्द्धिष्यमाणाम् । "आच्छीनद्योर्नुम्" इति विकल्पान्नुमभावः । द्विषतां प्रभुशक्तिं कोषदण्डजं तेजः । "सः प्रभावः प्रतापश्च यत् तेजः कोषदण्डजम्" इत्यमरः । अनीहया अनुत्साहेन अनुपालयताम् उपेक्षमाणानां महीभुजां श्रियः सम्पदो जननिर्वादभयात् निकृष्टपुरुषानुरागात् इवेति हेतूत्प्रेक्षा । अचिरात् अपयान्ति अपसरन्ति । यथाह कामन्दकः—"लोभिः षण्ढ इव श्रीभिरलसः परिभूयते" इति । अतः पराक्रमितव्यमिति भावः ॥ १० ॥

ननु परिक्षीणाः कथं प्रबलेन अभियुज्यते इत्यत्राह—क्षयेति । क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं शिवं सर्वलोकाह्लादकं धाम क्षात्रं तेजः प्रकाशञ्च दधतं समृद्धये वृद्ध्यर्थम् उत्थितम् उद्युक्तम् उत्सहमानम् इति यावत् । अन्यत्र उत्थितम् उदितम् अत एव अनपायम् अविनाशिनं वर्द्धिष्यमाणम् इत्यर्थः । नृपं प्रजाः प्रतिपच्चन्द्रं द्वितीयाचन्द्रम् इवेत्यर्थः । प्रतिपच्छब्देन द्वितीयाग्रहणम् प्रतिपदि तस्य अदृश्यत्वादिति भावः । प्रणमन्ति प्रह्वीभावेन वर्त्तन्ते इति भावः । चन्द्रं तु नमस्कुर्वन्ति । क्षीणस्य अपि उत्साहः कार्यसिद्धेः निदानमित्यर्थः । "जयं हि सततोत्साही दुर्बलोऽपि समश्नुते" इति कामन्दकः ॥ ११ ॥

१०। যে সকল মহীপাল উৎসাহহীনতাবশতঃ শত্রুর উত্তরোত্তর উপচীয়মানা প্রভুশক্তি অর্থাৎ কোষদণ্ডজ তেজ উপেক্ষা করেন, লোকাপবাদ ভয়েই যেন তাঁহাদের রাজ্যলক্ষ্মী অচিরে অপসৃত হয়েন।

১১। ক্ষয়প্রাপ্ত হইলেও পুনরায় সর্ব্বলোকাহ্লাদজনক স্বাভাবিক দ্যুতি ধারণপূর্ব্বক সমুদিত উত্তরোত্তর বর্দ্ধিষ্যমাণ দ্বিতীয়াচন্দ্রকে যেমন লোকে নমস্কার করিয়া থাকে, তেমনি ক্ষীণশক্তি রাজাও যখন স্বাভাবিক ক্ষাত্রতেজ ধারণ করিয়া স্বীয় সমৃদ্ধি-লাভের জন্য সমুৎসাহিত হইয়া উঠে, তখন প্রজাগণ তাঁহার নিকট অবনত হয়।

स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥१२॥
अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः।
विनिपातनिवर्त्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥१३॥

अन्वयः। कृतपञ्चाङ्गविनिर्णयः नयः कोषदण्डयोः खलु प्रभवः। स (नयः) विधेयपदेषु दक्षतां लोकः नियतिम् इव अनुरुध्यते ॥ वाच्य—कृतपञ्चाङ्गविनिर्णयेन नयेन प्रभवैष (भूयते) तेन दक्षता लोकेन नियतिः इव ॥ १२

अन्वयः। अभिमानवतः प्रियम् उच्चैः पदम् आरुरुक्षतः मनस्विनः आत्मपौरुषं विनिपातनिवर्त्तनक्षमम् आलम्बनं मतम् (सहकारि मतम्) ॥ वाच्य—पौरुषेण + क्षमेण आलम्बनेन मतेन (भूयते) ॥ १३

ननु प्रभुशक्तिशून्यस्य उत्साहः कुत्र उपयुज्यते इत्यत्र आह—प्रभव इति। कर्म्मणाम् आरम्भोपायः, पुरुषद्रव्यसम्पद्, देशकालविभागः, विनिपातप्रतीकारः, कार्य्यसिद्धिश्च इति पञ्चाङ्गानि। यथाह कामन्दकः—"सहायाः साधनोपाया विभागो देशकालयोः। विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते" इति। पञ्चानाम् अङ्गानां विनिर्णयः पञ्चाङ्गविनिर्णयः। "तद्धितार्थ" इत्यादिना उत्तरपदसमासः। कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः। नयो नीतिशास्त्रम् मन्त्र इति यावत्। कोषोऽर्थराशिः। "कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः। दण्डश्चतुरङ्गसैन्यम्। "दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे। यात्राज्ञायां सैन्यभेदे" इति वैजयन्ती। तयोः कोषदण्डयोः प्रभुशक्तेरित्यर्थः। प्रभवति अस्मादिति प्रभवः कारणम्। "ऋदोरप्"। स नयः नीतिशास्त्रं विधेयपदेषु कार्य्यवस्तुषु। "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः। दक्षतां क्षिप्रकारित्वम् उत्साहमित्यर्थः। लोकः क्षत्रादिप्रवृत्तो जनः नियतिं दैवमिव। "नियतिर्नियमे दैवे" इति विश्वः। अनुरुध्यते अनुसरति। रुधेर्दैवादिकात् कर्त्तरि लट्। मन्त्रस्य अपि मूलम् उत्साहः तन्मूलायाः प्रभुशक्तेः मूलमिति किमु वक्तव्यम्। अतः स एव आश्रयणीयः यतो नक्तन्दिवं मन्त्रयतः तस्यापि प्रभोः निरुत्साहस्य न किञ्चित् सिध्यति इति ॥ १२ ॥

ननु सोत्साहस्य असहायस्य कथम् अर्थसिद्धिः इत्यत्राह—अभिमानवत इति। अभिमानवतः मानधनस्य प्रियमिष्टमुच्चैः उन्नतं पदं स्थानं राज्यादिकमारुरुक्षतः आरोढ़ुमिच्छतः प्राप्तुकामस्य मनस्विनो धीरस्य आत्मपौरुषं स्वपुरुषकार एव विनिपातनिवर्त्तनक्षमम् अनर्थ-

१२। যাহা দ্বারা সহায় সাধনোপায় প্রভৃতি পঞ্চাঙ্গের বিনির্ণয় হয়, যাহা ধনরাশি ও চতুরঙ্গিণী সেনার কারণ, সেই নীতিও কৃষিপ্রবৃত্ত লোকের দৈবানুসরণের ন্যায় কর্ত্তব্যবিষয়ে উৎসাহের অনুসরণ করিয়া থাকে ॥

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान् न पदं नृपश्रियः ॥१४
तदलं प्रतिपत्तिमुन्नतेरवलम्ब्य व्यवसायबन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥१५

अन्वयः । अविक्रमं विपदः अभिभवन्ति, आपदुपेतम् आयतिः रहयति, निरायतेः लघुता नियता । अगरीयान् नृपश्रियः पदं न (भवति) ॥ वाच्य—विपद्भिः अविक्रमः अभिभूयते । आयत्या आपदुपेतः रह्यते, लघुतया नियतया (भूयते), अगरीयसा पदेन (भूयते) ॥ १४

अन्वयः । तत् (तस्मात्) उन्नतेः प्रतिपत्तिं व्यवसायबन्ध्यतां अवलम्ब्य अलम् । तथाहि—पराक्रमाश्रयः समृद्धयः विषादेन समं न निवसन्ति ॥ वाच्य—पराक्रमाश्रयाभिः समृद्धिभिः स्युषते ॥१५

प्रतीकारसमर्थम् आलम्बनं सहकारि मतम् इष्टम् । यथा कस्यचित् तुरङ्गमारोहतः किञ्चित्पतनप्रतिबन्धकमनुचरहस्तादिकमालम्बनं तद्वदिति ध्वनिः । किं पौरुषादन्यैः सहायैः शूराणाम् इति भावः ॥ १३ ॥

पौरुषानङ्गीकारे दोषमाह—विपद इति । अविक्रमं पौरुषहीनं विपदोऽभिभवन्ति तिरस्कुर्वन्ति । आपदुपेतं विपन्नम् आयतिः उत्तरकालः । "उत्तरः काल आयतिः" इत्यमरः । रहयति त्यजति । निरायतेः आसन्नक्षयस्य इत्यर्थः, लघुता अगौरवं नियता अवश्यम्भाविनी, न कश्चिदेनमाद्रियते इत्यर्थः । अगरीयान् लघीयान् नृपश्रियः पदं राजलक्ष्म्याः आस्पदं न भवति । यद्वा नृपेति पदच्छेदः । तस्मात् पौरुषं कर्त्तव्यमेव इत्यर्थः । अत्र पूर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरं विपदादिकं प्रति कारणत्वात् कारणमालाख्योऽलङ्कारः । तथाच सूत्रम्—"पूर्वपूर्वस्य उत्तरोत्तरहेतुत्वे कारणमाला" इति ॥ १४ ॥

फलितमाह—तदिति । तत्तस्मात् उपेक्षायां दोषसम्भवात् इत्यर्थः । उन्नतेः अभ्युदयस्य प्रतिपत्तिम् अन्तरायं व्यवसायबन्ध्यताम् उद्योगशून्यताम् अवलम्ब्य अलम् उद्योगशून्यतालम्बनेन अलम् इत्यर्थः । "अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः । तस्य ल्यबादेशः । तथाहि—पराक्रमः आश्रयः कारणं यासां ताः तथोक्ताः समृद्धयः सम्पदो

१३। राज्यादि अभीष्ट उन्नतपदलाभेच्छु अभिमानी धीर व्यक्तिर अनर्थनिवारणसमर्थ धीर पुरुषकारई प्रकृष्ट सहाय ॥

१४। विपत्‌समूह पुरुषकारहीनके अभिभूत करे, उत्तरकाल विपन्नके परित्याग करे ; आसन्नविनाश व्यक्तिर अगौरव अवश्यम्भावी ; लघीयान् व्यक्ति राज्यलक्ष्मीर आस्पद हय ना ॥

अथ चेदवधिः प्रतीच्यते कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसम्पदः ॥१६॥
द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् ।
जननाथ तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥१७॥

अन्वयः । अथ अवधिः प्रतीच्यते चेत्—आविष्कृतजिह्मवृत्तिना धृतराष्ट्रसुतेन नरेन्द्रसम्पदः चिरम् आस्वाद्य कथं सुत्यजाः (भविष्यन्ति) ॥ वाच्य—अवधिं प्रतीक्षते (भवान्) आविष्कृतजिह्मवृत्तिः धृतराष्ट्रसुतः कथं सुत्यजेत् ॥ १६

अन्वयः । अथवा द्विषता विहितम् आत्मनः पदं त्वया यदि पुनः लब्धा (तर्हि) हे जननाथ ! तव अनुजन्मनाम् आविष्कृतपौरुषैः भुजैः कृतम् ॥ वाच्य—भवान् (लब्धा) ॥१७

विषादेन समम् अनुत्साहेन सह न निवसन्ति । पौरुषसाध्याः सम्पदो न अनुत्साहसाध्याः, उभयोः सहावस्थानविरोधादित्यर्थः । वैधर्म्येण कार्य्यं कारणरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ १५ ॥

ननु समयः प्रतीच्यते, किं वेगेन इति अत्र आह—अथेति । अथ अवधिः कालः प्रतीच्यते चेत् । "अवधिस्त्ववधाने स्यात् सीम्नि काले विलेऽपि च" इति विश्वः । आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्य्योधनेन नरेन्द्रसम्पदो राज्यसम्पदः । नरेन्द्रेति वा पदच्छेदः । चिरं चतुर्दशवर्षाणि आस्वाद्य अनुभूय कथं सुत्यजाः । आस्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यन्ते एव इति अवधिप्रतीक्षणं व्यर्थमित्यर्थः ॥१६॥

अथ यदि दैवात् स्वयमेव दुर्य्योधनः सम्पदो दास्यति चेत् तथापि तत् कथं रोचयेमहि इत्याह—द्विषतेति । अथवा द्विषता दुर्य्योधनेन विहितं समर्पितमित्यर्थः । आत्मनः पदं राज्यं पुनरपि त्वया लब्धा प्राप्स्यते यदि । लभेः कर्मणि लुट् । हे जननाथ ! तव अनुजन्मनाम् अनुजानाम् आविष्कृतपौरुषैः प्रकटितपराक्रमैः भुजैः कृतम् अलं व्यर्थमिति यावत् । अस्मद्भुजैर्न किञ्चित् साध्यमित्यर्थः । राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्ये अस्मद्भुजनैष्फल्यात् "क्षत्रियस्य विजेतव्यम्" इति शास्त्रात् क्षत्रेणैव राज्यं ग्राह्यमिति भावः । कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते । "कृतमिति निवारणनिषेधयोः" इति गणव्याख्याने । भुजैरिति गम्यमानसाधनक्रियापेक्षया करणत्वात्

१६। अतएव उन्नतির অন্তরায় উৎসাহহীনতা অবলম্বনে প্রয়োজন নাই ; কেননা পরাক্রমই যে সম্পদের আশ্রয়, সে সম্পদ্ অনুৎসাহের সহিত একত্র বাস করিতে পারে না ॥

১৬। ইহার পরও যদি আপনি সময়ের প্রতীক্ষা করেন, তবে কপটব্যবহার-প্রকটনপটু ধৃতরাষ্ট্রতনয় দুর্য্যোধন চতুর্দ্দশবর্ষ ভোগের পর সহজে এই রাজ্যসম্পদ্ পরিত্যাগ করিবে কি ?

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्त्तयते स्वयं हतैः ।
लघयन् खलु तेजसा जगत् न महानिच्छति भूतिमन्यतः॥१८
अभिमानधनस्य गत्वरैरसुभिः स्यास्तु यशश्चिरोषतः ।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥१९

अन्वयः । मृगाधिपः स्वयं हतैः मदसिक्तमुखैः करिभिः वर्त्तयते (तथाहि)—महान् तेजसा जगत् लघयन् अन्यतः भूतिं न इच्छति खलु ॥ वाच्य—मृगाधिपेन वर्त्यते । लघयता महता भूतिः न इष्यते ॥ १८

अन्वयः । अभिमानधनस्य गत्वरैः असुभिः स्यात्तु यशश्चिरोषतः अचिरांशुविलासचञ्चला लक्ष्मीः आनुषङ्गिकं फलं ननु ॥ वाच्य—चञ्चलया लक्ष्म्या आनुषङ्गिकेण फलेन (भूयते) ॥१९

टतीया । उक्तञ्च न्यासोद्योते—"न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्यापि तु गम्यमानापि" इति ॥१७॥

ननु सान्नैव कार्य्यसिद्धौ किं क्षात्रेण ? यथाह मनुः—"साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन् न युद्धेन कदाचन" इति । तत् किम् आग्रहेण इति आशङ्क्याह—मदेति । मृगाधिपः सिंहो मदसिक्तमुखैः मदवर्षिभिरित्यर्थः । स्वयं स्वेनैव हतैः करिभिर्वर्त्तयते वृत्तिं करोति तैरेव जीवतीत्यर्थः । चौरादिकाद् वृतेर्लट् । भौवादिकस्य तु "अणावकर्मकाच्चित्तवत्कर्त्तृकात्" इति परस्मैपदनियमादिति । तथाहि तेजसा प्रभावेण । "तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि" इति वैजयन्तो । जगत् लघयन् लघूकुर्वन् महान् तेजस्वी अन्यतोऽन्यस्मात् पुरुषात् भूतिं वृद्धिं न इच्छति खलु । नहि तेजस्विनः परायत्तवृत्तित्वं युक्तम् । मनुवचनं तु अशूरविषयम् इति भावः । विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ १८ ॥

ननु युद्धात् पाक्षिको लक्ष्मीलाभः उपायान्तरैस्तु न तथा इत्याशङ्क्याह—अभिमानेति । अभिमानधनस्य वैरनिर्य्यातनमात्रनिष्ठस्य अतएव गत्वरैः गमनशीलैः अस्थिरैः । "गत्वरश्च" इति क्वरबन्तो निपातः । असुभिः प्राणैः करणैः । "पुंसि भूम्नासवः प्राणाः" इत्यमरः । स्यात्तु स्थिरम् । "ग्लाजिस्थश्नुः" इति स्नुप्रत्ययः । यशश्चिरोषतः चेतुं संग्रहीतु-

१७ । अथवा यदि शत्रु दुर्योधन आपनाके राज्य पुनः प्रत्यर्पण करे,—आपनिও তাহা লাভ করেন, তবে হে জননাথ! এইরূপ রাজ্যসম্পদ্ প্রাপ্তিতে আপনার অনুজগণের পৌরুষপ্রকাশক ভুজবীর্য্য ব্যর্থ হইবে ; অর্থাৎ আমাদের ভুজবীর্য্যের কোনই কার্য্য থাকিবে না।

১৮ । পশুরাজ সিংহ স্বয়ং মদস্রাবী মাতঙ্গ নিহত করিয়া তদ্দ্বারা জীবিকা নির্ব্বাহ করে। ফলতঃ যিনি স্বীয় তেজোদ্বারা জগৎকে পরাভূত করিতে পারেন, সেই মহান্ ব্যক্তি অন্য পুরুষের নিকট সমৃদ্ধি কামনা করেন না।

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः॥२०
किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया॥२१

अन्वयः। जनः भस्मनां चयम् आस्कन्दति, ज्वलितं हिरण्यरेतसं न। अतः मानिनः अभिभूतिभयात् असून् सुखम् उज्झन्ति, (किन्तु) धाम न (उज्झन्ति)॥ वाच्या—जनेन चयः आस्कन्यते। ज्वलितः हिरण्यरेताः न। मानिभिः असवः उज्झ्यन्ते, न धाम उज्झ्यते॥२०

अन्वयः। मृगाधिपः किं फलम् अपेक्ष्य ध्वनतः पयोधरान् प्रार्थयते। (तथाहि)—

मिच्छतः। चिनोतेः सन्नन्तात् शतृप्रत्ययः। अचिरम् अंशवो यस्याः सा अचिरांशुर्विद्युत् तस्या विलासः स्फुरणं तद्वत् चञ्चला क्षणिका इत्यर्थः। लक्ष्मीः सम्पत् अनुषङ्गादागतम् आनुषङ्गिकम् अन्वाचयशिष्टमल्पं फलं, मानत्राणाय यश एव मुख्यं फलम् अभ्युदयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः। अत्र अस्थिरप्राणत्यागेन स्थिरयशःस्वीकाराभिधानात् न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः। उक्तञ्च काव्यप्रकाशे—"परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः" इति॥१९

ननु अल्पस्य मानस्य हेतोः कथं प्राणत्यागः शक्यते कर्त्तुं यतो "जीवन्नरो भद्रशतानि पश्येत्" इत्याशङ्क्याह—ज्वलितमिति। जनो भस्मनां चयं पुञ्जम् आस्कन्दति पादादिना आक्रामति अदाहकत्वादिति भावः। ज्वलितं ज्वलन्तम्। कर्त्तरि क्तः। "मतिबुद्धि" इत्यादिसूत्रे चकाराद्वर्त्तमानार्थत्वम्। हिरण्यं रेतो यस्य तं हिरण्यरेतसम् अग्निं न आस्कन्दति दाहकत्वादिति भावः। अतो हेतोर्मानिनः अभिभूतिभयात् प्राणलोभेन तेजस्त्यागे परिभवो भविष्यतीति भयादसूनेव सुखम् अक्लिष्टम् उज्झन्ति त्यजन्ति। धाम तेजस्तु न उज्झन्ति मानहानिकरात् जीवनात् स्वतेजसा मरणमेव वरम् इत्यर्थः। पूर्वतरश्लोकवत् अर्थान्तरन्यासोऽलङ्कारः॥ २०॥

১৯। যিনি বৈরিনির্য্যাতনরত, ক্ষণভঙ্গুর জীবনের বিনিময় দ্বারা যশের স্থিরতা তাঁহার অভীষ্ট; অতএব যশ অর্জ্জনে ইচ্ছুক ব্যক্তির বিদ্যুদ্‌বিলাসবৎ চঞ্চলা লক্ষ্মী আনুষঙ্গিক ফল—যশই মুখ্য।

২০। দাহিকা শক্তি নাই বলিয়া লোক পদাদি দ্বারা ভস্মরাশি অতিক্রম করে, কিন্তু সেই দাহিকাশক্তি বিদ্যমান থাকায় কেহ প্রজ্বলিত পাবক আক্রমণ করিতে পারে না; অতএব মানিগণ অভিভূতিভয়ে জীবনও অক্লেশে পরিত্যাগ করিতে পারেন, কিন্তু তেজ পরিত্যাগ করেন না।

कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥२२॥
हिरदानिव दिग्विभावितान् चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः ॥२३॥

महीयसः सा प्रकृतिः खलु यया प्रकृत्या अन्यसमुन्नतिं न सहते ॥ वाच्या—मृगाधिपेन ध्वनन्तः पयोधराः प्रार्थ्यन्ते, तया प्रकृत्या समुन्नतिः न सह्यते ॥ २१

अन्वयः । हे नृप ! तत् प्रमादजं तमः निर्धूय विक्रमे मतिं कुरु । विद्विषां विपत्तयः त्वदनुत्साहहता एतद्ध्रुवम् अवेहि ॥ वाच्या—मतिः क्रियताम्, विपत्तिभिः...हताभिः (भूयते) अवेयताम् ॥ २२

अथवा किमत्र प्रयोजनं चिन्तया किन्तु तेजस्विनामेव अयं स्वभाव एव यज्जिगीषुत्वम् इत्याशयेनाह—किमिति । मृगाधिपः सिंहः किं फलं प्रयोजनम् अपेक्ष्य ध्वनतो गर्जतः । धरन्तीति धरा पचाद्यच् । पयसां धराः तान् पयोधरान् प्रार्थयतेऽभियाति । "याच्ञायामभिधाने च प्रार्थना कथ्यते बुधैः" इति केशवः । अथवा अवरुणद्धि इत्यर्थः । प्रार्थयते 'प्रा अर्थयते—"प्रा स्याद् याच्ञावरोधयोः" इत्यभिधानात् प्रा अवरोधने । प्रा इति लुप्तोयान्तम् । आकारान्तस्य प्राशब्दस्य योगविभागात् 'आतो धातोः' इत्यालोपः । "अभियाच्ञावरोधयोः" इत्यभिधानात् । तथाहि महीयसा महत्तरस्य सा प्रकृतिः खलु स्वभावो यया प्रकृत्या अन्यसमुन्नतिं परवृद्धिं न सहते । महतः परभञ्जनमेव पुरुषार्थ इत्यर्थः । पूर्ववत् अलङ्कारः ॥ २१ ॥

उक्तं प्रयोजनं निगमयति*—कुरु तदिति । हे नृप ! तत् तस्मात् उक्तरीत्या पराक्रमावसरत्वाद्धेतोः । "यत्तद्यतस्ततो हेतौ" इत्यमरः । प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुषे एव मतिं कुरु । विक्रममेव अङ्गीकुरु, न तु उपायान्तरमित्यर्थः । न च विक्रमवैफल्यमित्याह—ध्रुवमिति । विद्विषां विपत्तयः त्वदनुत्साहहताः तव अनुत्साहेन अव्यवसायेन हताः प्रतिबद्धाः । अन्यथा प्रागेव विपद्येरन्निति भावः । इतरतत् ध्रुवं निश्चितम् अवेहि विद्धि । "ध्रुवं नित्ये निश्चिते च" इति शाश्वतः ॥ २२ ॥

२१ । (तेजोदिगेव जिगीषुताई स्वभाव, केननना) मृगाधिप सिंह कोन् प्रयोजनने गर्जित मेघवृन्द आक्रमण करे ? महत्तर व्यक्तिर एईरूपई स्वभाव, एई स्वभावेर वशवर्त्ती हईयाई तादृश व्यक्ति शत्रुर वृद्धि सहिते पारेन ना ।

२२ । अतएव हे नृप ! प्रमादज मोह दूर करिया पुरुषकारे बुद्धि नियोग करुन । आपनि इहा निश्चय जानिबेन—आपनार अनुत्साहे शत्रुगणेर विपत्तिसमूह प्रतिबद्ध हईया रहियाछे ।

* उक्तार्थोपसंहरणं निगम उच्यते—इति क्वचित् पाठः ।

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥२४॥
इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम्।
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥२५॥

अन्वयः। दिग्विभावितान् आयतः चतुरः द्विरदान् (चतुरः) तोयनिधीन् इव तव (चतुरः) शतमन्युतेजसः अनुजान् रणे द्विषतां कः प्रसहेत ॥ वाच्य—दिग्विभाविताः आयन्ताः चत्वारः द्विरदाः तोयनिधय इव अनुजाः केन सह्यैरन् ॥ २३

अन्वयः। तव चेतसि सततं ज्वलतः वैरिकृतस्य जातवेदसः शिवेतरा रिपुनारीनयनाम्बुसन्ततिः शमं विदधातु ॥ वाच्य—शिवेतरया'''सन्तत्या शमः विधीयताम् ॥ २४

अन्वयः। इति दर्शितविक्रियं कोपपरीतमानसं मरुतः सुतं महीपतिः दुष्टं द्विरदमिव उपसान्त्वयितुम् उपचक्रमे ॥ वाच्य—महीपतिना ॥ २५

न च नः पराजयशङ्का कार्य्येत्याह—द्विरदानिति। दिग्विभावितान् दिक्षु प्रसिद्धान् तान् आयत आगच्छतः। आङ्पूर्वादिण् धातोः शतृप्रत्ययः। चतुरः द्विरदान् दिग्गजानिव तयोक्तविशेषणान् चतुरः तोयनिधीन् इव रणे दिग्विभावितान् शतमन्युतेजस इन्द्रविक्रमान् चतुरः तव अनुजान् द्विषतां मध्ये कः प्रसहेत सोढुं शक्नुयादित्यर्थः। "शकि लिङ् च" इति शक्यर्थे लिङ्। अतो निःशङ्कं प्रवर्त्तस्वेति भावः ॥ २३ ॥

आशीर्वादव्याजेन फलितमाह—ज्वलत इति। तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदसः क्रोधाग्नेः शिवेतरा अशिवा अमङ्गला। वैधव्यदुःखजनकत्वादिति भावः। रिपुनारीनयनाम्बुसन्ततिः वैरिवनिताश्रुप्रवाहः शमं विदधातु। वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शान्त्यसम्भवादवश्यं तद्वधस्त्वया कर्त्तव्य इत्यर्थः। क्रोधस्य विषयस्य निगरणेन विषयिणो जातवेदस एव उपनिबन्धनात् अतिशयोक्तिरलङ्कारः। तदुक्तम्—"विषयस्यानुपादानादिषय्युपनिबध्यते। यत्र सातिशयोक्तिः स्यात् कवेः प्रौढ़ोक्तिजीविता" इति। तत्रापि क्रोधस्य जातवेदसो भेदेऽपि अभेदाध्यवसायाद् भेदेऽभेदरूपा तत एव अम्बु निर्वाप्यत्वोक्तिश्च घटते। तथाच यथा अम्बुसेकेन अग्निः सम्यक् शाम्यति तथा शत्रुवधेन क्रोध इति औपम्यं गम्यते ॥ २४ ॥

२३। सर्व्वदेशप्रसिद्ध दिग्गज चतुष्टय तथा जलधि चतुष्टयের ন্যায়, ইন্দ্রতুল্য পরাক্রমশালী আপনার অনুজচতুষ্টয়কে রণে সমাগত দেখিয়া শত্রুগণের মধ্যে কে তাহাদিগকে সহ্য করিতে সমর্থ হয়?

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥२६॥

अन्वयः । अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे तव गिरां विस्तरे मतिः आदर्श इव विमला अभिदृश्यते ॥ वाचा—मतिं विमलाम् अभिपश्यन्ति (जनाः) ॥ २६

इतीति । इति उक्तरीत्या दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तम् । इदं विशेषणद्वयं द्विरदेऽपि योज्यम् । मरुतः सुतं भीमं महीपतिः युधिष्ठिरो दुष्टं द्विरदमिव । एतेन अस्य शौर्यमेव न बुद्धिः अस्तीति गम्यते । उपसान्त्वयितुम् अनुनेतुम् उपचक्रमे प्रवृत्तः "प्रोपाभ्यां समर्थाभ्याम्" इति आत्मनेपदम् । राज्ञा भाव्युपकारविशेषापेक्षया कथञ्चित् अवश्यो जनः शनैः शनैः द्विरदवत् वशीकरणीयः, न तु त्याज्य इति भावः ॥ २५ ॥

प्रथमं तावत् स्तुत्यादिभिः प्रसादयति—अपवर्जितेति । विप्लवः प्रमाणबाधः, अन्यत्र बाह्यमलसंक्रमः, सोऽपवर्जितो यस्य तस्मिन् अपवर्जितविप्लवे । शुचौ शुचित्वं शब्दसौष्ठवं लोहशुद्धिश्च तद्वति । अतएव हृदयग्राहिणि मनोरमे मङ्गलास्पदे एकत्र हितार्थप्रतिपादकत्वात् अन्यत्र मङ्गलवस्तुत्वात् च श्रेयस्करे । "रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् । गुरुमग्निं तथा सूर्यं प्रातः पश्येत् सदा बुधः ॥" इति पुराणवचनात् । तव गिरां विस्तरे वाक्यप्रपञ्चे । "प्रथने वावशब्दे" इति घञ्प्रतिषेधात् "ऋदोरप्" इत्यप् । अतएव "विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः" इत्यमरः । मतिस्त्वद्गिरादर्शे दर्पणे इव । "दर्पणे मुकुरादर्शौ" इत्यमरः । विमला विशदा अभिदृश्यते वाग्वैशद्यादेव मतिवैशद्यमनुमीयते । तत्पूर्वकत्वात्तस्येतार्थः ॥ २६ ॥

২৪ । আপনার হৃদয়ে যে বৈরিকৃত ক্রোধবহ্নি সতত প্রজ্বলিত, রিপুনারীগণের বৈধব্যসূচক অশিব নয়নবারিপ্রবাহ সেই অনলের শান্তি করুক ।

২৫। মহীপতি যুধিষ্ঠির এইরূপ বিকারোদ্দীপক কোপাক্রান্তহৃদয় বায়ুতনয় ভীমকে দুষ্ট দ্বিরদের ন্যায় শান্ত করিতে প্রবৃত্ত হইলেন।

২৬। (বলিলেন)—বাহ্যমলবিবর্জ্জিত মঙ্গলাস্পদ বিশুদ্ধ দর্পণে যেরূপ বিশদ দর্শন সম্পাদিত হয়, তদ্রূপ এই প্রমাণবাধবিরহিত শব্দসৌষ্ঠবযুক্ত হৃদয়গ্রাহী শ্রেয়স্কর বিশুদ্ধ বাক্‌প্রপঞ্চে তোমার বিমল মতি পরিলক্ষিত হইতেছে ।

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥२७
उपपत्तिरुदाहृता बलात् अनुमानेन न चागमः क्षतः।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः॥ २८॥

अन्वयः। पदैः स्फुटता न अपाकृता, अर्थगौरवं न स्वीकृतम् न च। गिरां पृथगर्थता रचिता (तथा गिरां) सामर्थ्यं न च क्वचित् अपोहितम्। बलात् उपपत्तिः उदाहृता (तथा) अनुमानेन आगमः न च क्षतः। अनीदृगाशयः कः ईदृक् इदं वचनं प्रसभं वक्तुमुपक्रमेत॥ वाच्य—(त्वं) स्फुटतां न अपाकृतवान्, स्वीकृतवान्, पृथगर्थतां रचितवान्, न अपोहितवान्। उपपत्तिम् उदाहृतवान्। अनीदृगाशयेन केन उपक्रम्येत॥ २७—२८

अथ युग्मेनाह—स्फुटतेति, उपपत्तिरिति च। पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता न अपाकृता न त्यक्ता। अर्थगौरवम् अर्थभूयस्त्वं वा न च न स्वीकृतम्। स्वीकृतमेवेत्यर्थः। "वैशद्यप्रसक्तार्थगौरवाभावनिवर्त्तनार्थं नञ्द्वयं सम्भाव्यनिषेधनिवर्त्तने हो प्रतिषेधौ" इति वामनः। गिरां पदानाम् अवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता, अपुनरुक्तार्थतेति यावत्। रचिता कृता। तथा क्वचिदपि सामर्थ्यं गिराम् अन्योन्यसामर्थ्यं साकाङ्क्षत्वं न अपोहितं न वर्জ্জितम्। अन्यथा दशदाडिमादिशब्दवत् एकवाक्यता न स्यात्। यथाहुः—"अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति। ननु अर्थगौरवमित्यत्र कथं षष्ठीसमासः? "पूरणगुण" इत्यादिना प्रतिषेधान्नैष दोषः। ये शुक्लादयः शब्दा गुणे गुणिनि च वर्त्तन्ते, यथा पटस्य शौक्ल्यं [शुक्लं] शुक्लः पट इति च। तेषाम् एव अत्र निषेधाद् ये च पुनः स्वतो गुणमात्रवचनाः, यथा गौरवं प्राधान्यं रसो गन्धः स्पर्श इत्येवमादयः, तेषामनिषेधात्। यथा "तत्स्थे च गुणे षष्ठी समस्यते" इति वचनाद्बहुलमभियुक्तप्रयोगदर्शनाच्च बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः अतएव आह वामनः—"पत्रपीतिमादिषु गुणवचनसमासो बली स्यात्" इति॥ २७॥

उपपत्तिरिति। किञ्च बलात् स्वबलमाश्रित्य। कर्म्मणि ल्यब्लोपे पञ्चमी वक्तव्या। उपपत्तिर्युक्तिरुदाहृता। पराक्रमपक्ष एव श्रेयानिति युक्तिः उक्ता इत्यर्थः। उचितं चैतत् महावीरस्येति भावः। तथा अनुमानेन युक्त्या आगमः शास्त्रं न क्षतः न हतः। किन्तु आगमाविरुद्धमेव

२१—२८। তোমার এই সুপ্‌তিঙন্ত পদদ্বারা বিশদার্থতা পরিত্যাগ করে নাই, অথচ ইহা অর্থবাহুল্যযুক্ত বলিয়া স্বীকৃত। তোমার অবান্তর বাক্যনিচয়েও পুনরুক্ততা দোষ ঘটে

अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ॥२९

अन्वयः। तथापि मे हृदयम् अवितृप्ततया निर्णयम् एव धावति, विधेयेषु विशेषसम्पदः सुखम् अवसाययितुं न क्षमाः। वाच्य—हृदयेन निर्णयः धाव्यते, सम्पदभिः क्षमाभिः (भूयते)॥२९

उक्तम्। अन्यथा तद्विरोधात् अनुमानस्यैव प्रामाण्यभङ्गप्रसङ्गादिति भावः। ईदृक् इत्थं क्षात्रयुक्तम् इदं वचनम् अविद्यमान ईदृगाशय इत्थं क्षात्रयुक्ताभिप्रायो यस्य सोऽनीदृगाशयः। "अभिप्रायस्त्वन्द आशयः" इत्यमरः। कः प्रसभं हठात् वक्तुमुपक्रमेत न कोऽपीत्यर्थः। इत्थं वक्तुमुपक्रमितैव नास्ति, वक्ता तु दूरापास्त एवेति भावः। केचिदेतत् श्लोकत्रयं निन्दापरत्वेनापि योजयन्ति। तदसत् हितोपदेशमात्रतत्परस्य अतिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूलभूतनिन्दातात्पर्यकल्पनानौचित्यादिति ॥ २८ ॥

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—अवितृप्ततयेति। तथापि त्वया सम्यङ् निर्णीतेऽपि मे हृदयम् अवितृप्ततया असन्तुष्टतया। अद्यापि संशयगतत्वेन इत्यर्थः। निर्णयमेव धावति अनुसरति अपेक्षते इति यावत्। अद्यापि निर्णयस्य अनुदयादिति भावः। निर्णयानुदये हेतुमाह—अवेति। विधेयेषु सन्धिविग्रहादिकर्त्तव्यार्थेषु या विशेषसम्पदोऽवान्तरभेदभूमानः समृद्धयो बाहुल्यानि ताः सुखम् अक्लेशेन अवसाययितुं पुरुषान् प्रत्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं प्रत्यायितुमित्यर्थः। स्यतेर्ण्यन्तादपि कर्म्मकर्त्तृकात्तुमुन्। णेरणाविति सूत्रस्य अयं विषयः। क्षमन्ते इति क्षमाः। पचाद्यच्। शक्ता न भवन्ति। "क्षमं शक्ते हिते त्रिषु" इत्यमरः। विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्याद् बाहुल्याच्च दुर्ज्ञेयत्वात् अद्यापि निर्णयाकाङ्क्षेति तात्पर्य्यार्थः। अत्र निर्णयधावनं प्रत्युत्तरवाक्यार्थस्य हेतुत्वाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। तदुक्तम्—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति ॥ २९ ॥

নাই এবং ঐ সকল বাক্যের কচিৎ আকাঙ্ক্ষাও পরিত্যক্ত হয় নাই। তুমি যে বীরোচিত স্বীয় বল অবলম্বন করিয়া যুক্তির অবতারণা করিয়াছ, ইহা উচিতই হইয়াছে। তোমার অনুমানদ্বারা আগমাদি শাস্ত্রের মর্য্যাদা অক্ষুণ্ণ রহিয়াছে। বাগ্মীর কথা দূরে থাকুক, সহসা এবংবিধ ক্ষাত্রযুক্ত অভিপ্রায়ব্যঞ্জক বাক্যোচ্চারণে প্রবৃত্ত হইতেই কে সমর্থ হয়?

২৯। তুমি কার্য্যসিদ্ধিবিষয়ে দৃঢ়নিশ্চয় করিলেও আমার হৃদয় ইহাতে অদ্যাপি সংশয়মুক্ত হইতেছে না। পরন্তু অতৃপ্তিহেতু এ বিষয়ের নির্ণয়ার্থই অগ্রসর হইতেছে। কেননা সন্ধি-বিগ্রহাদি কার্য্যে যে সকল বিষয় সম্পদ্ বর্ত্তমান, ইহারা অক্লেশে কার্য্যসাধনে নিশ্চিতরূপে স্ব স্ব সামর্থ্য প্রতিপাদন করাইতেছে না।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥३०॥
अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥३१

अन्वयः । क्रियां सहसा न विदधीत, अविवेकः परम् आपदां पदम्, गुणलुब्धाः सम्पदः विमृश्यकारिणं स्वयमेव वृणते हि ॥ वाच्य—क्रिया न विधीयेत । अविवेकेन पदेन (भूयते), गुणलुब्धाभिः सम्पद्भिः विमृश्यकारी व्रियते ॥ ३०

अन्वयः । यः विधिबीजानि अनुपालयन् विवेकवारिणा अभिवर्षति, स फलशालिनीं क्रियां लोकः शरदम् इव अधितिष्ठति ॥ वाच्य—येन अनुपालयता अभिवृष्यन्ते (बीजानि) तेन फलशालिनी क्रिया लोकेन शरत् इव अधिष्ठीयते ॥ ३१

वस्तुविशेषावधारणमन्तरेण व प्रवृत्तिरित्याशङ्क्याह – सहसेति । क्रियते इति क्रिया कार्य्यं तां सहसा अविमृश्येत्यर्थः । "सहसेत्याकस्मिकाविमर्शयोः" इति गणव्याख्याने खरादिपाठादव्ययम् । न विदधीत न कुर्वीत । कुतः ? अविवेकोऽविमृश्यकारित्वं परमत्यन्तम् आपदां पदं स्थानम्, विपत्तिकारणमित्यर्थः । व्यतिरेकेण उक्तमर्थं मन्वयेनाह—वृणते इति । गुणलुब्धा गुणग्राह्याः, गुणग्रहण इति स्वयंवरणहेतूक्तिः । सम्पदः श्रियः विमृश्य करोतीति विमृश्यकारी । "उपपदमतिङ्" इति समासः । तं स्वयमेव वृणते भजन्ते हि । "वृङ् सम्भक्तौ" इति धातुः । तस्मात् विमृश्य एव प्रवर्त्तितव्यमित्यर्थः । अत्र सहसा विधाननिषेधलब्धविमृश्यकारित्वरूपकारणस्य आपद्रूपव्यतिरेककार्य्येण समर्थनात् वैधर्म्म्येण अर्थान्तरन्यासः । द्वितीयार्द्धेन च स एव साधर्म्म्येण इति ज्ञेयम् ॥ ३० ॥

ननु साहसिकस्यापि फलसिद्दिर्दृश्यत एव, तत् किं विवेकेन इति अत्र आह—अभीति । यः पुमान् विधीयन्ते इति विधयः कृत्यवस्तूनि बीजानीवेति उपमितसमासः । शरदं लोक इवेति वाक्यगतोपमानुसारात् । तानि विधिबीजानि विवेको वारीव विवेकवारि तेन विवेकवारिणा पूर्ववत् समासः । अनुपालयन् प्रतीक्षमाणः संरक्षन् अभिवर्षति सिञ्चति । स पुमान् फलं साधननिष्पाद्योऽर्थः शस्यञ्च । "शस्ये हेतुकृते फलम्" इति उभयत्रापि अमरः । तच्छालिनीं क्रियां कर्म्म लोको जनः ।

३०। विवेचना না করিয়া সহসা কোন কার্য্য করা উচিত নহে, কেননা অবিবেচক ব্যক্তি পরম আপদের আস্পদ হয়। গুণগ্রাহিণী সম্পদ স্বয়ংই বিবেকসম্পন্ন ব্যক্তিকে আশ্রয় করিয়া থাকে।

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ ३२ ॥
मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

अन्वयः । शुचि श्रुतं वपुः भूषयति, तस्य प्रशमः अलंक्रिया भवति । पराक्रमः प्रशमाभरणं (भवति) सः (पराक्रमः) नयापादितसिद्धिभूषणः (भवति) ॥ वाच्य—शुचिना श्रुतेन भूष्यते, प्रशमेन अलंक्रियया भूयते, पराक्रमेण प्रशमाभरणेन (भूयते), तेन (पराक्रमेण)...भूषणेन, (भूयते) ॥ ३२

अन्वयः । मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्धः आगमः दीप इव अर्थदर्शनं कुरुते ॥ वाच्य—सुकृतेन परिशुद्धेन आगमेन दीपेन इव क्रियते ॥ ३३

"लोकस्तु भुवने जने" इत्यमरः । शरदमिव सदा नित्यम् अधितिष्ठति । सदा क्रियाफलं प्राप्नोत्येव न कदाचिद् व्यभिचरति इत्यर्थः । साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु नियता इति भावः । अत्र फलशब्देन शस्यहेतुक्रतयोः अर्थयोः अभेदाध्यवसायात् श्लेषमूलानि-श्रयोक्तिः, तदनुग्रहीता च उपमा इत्यनुसन्धेयम् ॥ ३१ ॥

नियता विवेकिनः फलसिद्धिरित्युक्तं, सम्प्रति तामेव रूच्यर्थं स्तौति—शुचीति । शुचि सम्प्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्तृ वपुः भूषयति, अन्यथा अविद्वान् पुरुषः शोच्य इति भावः । तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिः अलङ्क्रिया भूषणं भवति, अन्यथा श्रुतवैफल्यात् इति भावः । पराक्रमः सति अवसरे शौर्यं प्रशमस्य आभरणं भवति, अन्यथा सर्वैः परिभूयते इति भावः । स पराक्रमः नयापादिता नीतिसम्पादिता विवेकपूर्विका इति यावत्, सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः ; अन्यथा साहसिकस्य सिद्धिः काकतालीयत्वेन पक्षे पराक्रम-वैयर्थ्यम् इति भावः । 'वपुषो भूष्यतैवात्र सिद्धेर्भूषणतैव तु । उभयं मध्यमानां तु तेषां पूर्वोत्तरेच्छया" इति विवेकः । एवंविशिष्टसिद्धेः अनन्यभूषिताया एव भूषणत्वोक्त्या सर्वोत्तरतया स्तुतिर्गम्यते । अत्र उत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वात् एकावल्यलङ्कारः । तदुक्तम्—"यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव । भजति परंपरमेषालङ्कृतिरेकावली कथिता" इति ॥ ३२ ॥

৩২ । লোক যেরূপ উপযুক্তকালে বিবেচনাপূর্ব্বক বীজরক্ষা করত যথাসময়ে বারিবর্ষণ করিয়া শরৎকালে ক্রিয়াফলের সাফল্য অর্থাৎ শস্য লাভ করে, তদ্রূপ যে রক্ষণশীল পুরুষ কর্ত্তব্য বিষয়ে বিবেকরূপ বারিসেচন করে, পরিণামে তাহার ক্রিয়া ফলবতী হয় ; ফলতঃ সে সতত ক্রিয়াসাফল্য লাভ করিয়া থাকে ।

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥३४॥
शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतीम्।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥३५॥

अन्वयः। स्पृहणीयगुणैः महात्मभिः चरिते वर्त्मनि मनो यच्छतां विधिहेतुः आगसाम् अहेतुः विनिपातः अपि समुन्नतेः समः (भवति)॥ वाच्य—विधिहेतुना अहेतुना विनिपातेन अपि समेन (भूयते)॥ ३४

विमृश्य कुर्यादिति स्थितं, तत्र विमर्शोपायः कः? इत्युक्ते शास्त्रमेवेत्याह—मतीति। मतिभेदः कार्य्ये विप्रतिपत्तिः। मतिभेदः तम इवेति उपमितसमासः। दीप इवेति उपमानुसारात्। तेन तिरोहिते आच्छन्ने अत एव गहने दुरवगाहे कृत्यविधौ कार्य्यानुष्ठाने विवेकिनां सुकृतः सदभ्यस्तः अत एव परिशुद्धो निश्चितः, अन्यत्र सुविहितः प्रावातादिदोषरहितः आगमः शास्त्रम्। "आगमः शास्त्र आयाते" इति विश्वः। दीप इव अर्थदर्शनं कार्य्यज्ञानं वस्तुप्रतिभासनञ्च कुरुते ॥ ३३ ॥

एवं विमृश्य कुर्वतो दैवात् अर्थनाशेऽपि न कश्चित् अपराध इत्याह—स्पृहणीयेति। स्पृहणीयगुणैर्लोकस्लाघ्यगुणैः महात्मभिः सज्जनैः चरिते अनुष्ठिते वर्त्मनि आचारे मनो यच्छतां निदधतां सम्यागेण व्यवहरतामित्यर्थः। विधिहेतुर्दैवनिमित्तकः। "विधिर्विधाने दैवे च" इत्यमरः। अत एव आगसाम् अपराधानाम् अहेतुर्विनिपातोऽपि दैविकानर्थोऽपि। "विनिपातोऽवपाते स्यात् दैवादिव्यसनेऽपि च" इति विश्वः। समुन्नतेः अतिवृद्धेः समः तुल्यः। दैविकेषु पुरुषस्य अनुपालभ्यत्वादिति भावः। यथाह कामन्दकः—"यत् तु सम्यगुपक्रान्तं कार्य्यमेति विपर्य्ययम्। पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुषः" इति ॥३४॥

৩২। যে শাস্ত্র সম্প্রদায়সম্মত, তাদৃশ শাস্ত্রশ্রবণ শ্রোতার দেহ ভূষিত করে, ক্রোধের উপশম সেই শাস্ত্রজ্ঞানের ভূষণ, অবসর বুঝিয়া শৌর্য্যপ্রকাশই শান্তিগুণের আভরণস্বরূপ; আর সেই শৌর্য্য নীতিদ্বারা সম্পাদিত সিদ্ধির ভূষণস্বরূপ হয়।

৩৩। বাতাদি বিঘ্নবিরহিত দীপালোক যেমন অন্ধকারাবৃত দুর্বিজ্ঞেয় স্থানে প্রয়োজনীয় বস্তুর প্রদর্শক হয়, তদ্রূপ উত্তমরূপে অভ্যস্ত পরিশুদ্ধ শাস্ত্রজ্ঞান কার্য্যবিপ্রতিপত্তিরূপ তমসাচ্ছন্ন,—অতএব দুরবগাহ কার্য্যানুষ্ঠানে বিবেকিগণের কর্ত্তব্যজ্ঞান জন্মাইয়া দেয়।

৩৪। যাহারা সর্ব্বজনমান্য গুণসম্পন্ন সজ্জনগণের অনুষ্ঠিত আচরণে মন নিয়োগ করে, তাহাতে দৈবনিবন্ধন অনর্থ সংঘটিত হইলেও তাহারা অপরাধী হয় না এবং সেই অনর্থও সমৃদ্ধির সমান গণ্য হইয়া থাকে।

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः प्रभया नांशुमतापि दीयते ॥३६॥
बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवेन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥३७

अन्वयः । जिगीषवः विजीतक्रोधरया (सत्तः) गरीयसीम् अदूषितायतीं फलनिष्पत्तिं विगणय्य पौरुषं शिवम् औपयिकं नयन्ति ॥ वाच्य—जिगीषुभिः…रये: नीयते ॥ ३५

अन्वयः । उदेतुमिच्छता पुरः रोषमयं तिमिरं धिया अपनेयम् । अंशुमता अपि प्रभया निशाकृतं तमः अविभिद्य न उदीयते ? वाच्य—उदेतुमिच्छन् अपनयेत्, अंशुमान् उदेति ॥ ३६

सम्प्रति यत् विमृश्यं तदाह—शिवमिति । जिगीषवः जयेच्छवः नृपा विजितक्रोधरया विजितक्रोधवेगाः सन्तः गरीयसीं प्रभूताम् अदूषितायतीम् अक्षतोत्तरकालां स्वन्ताम् इत्यर्थः, फलनिष्पत्तिं फलसिद्धिं विगणय्य फलवत्त्वं निश्चित्य इत्यर्थः । पौरुषं पुरुषकारं शिवम् अनुकूलम् औपयिकम् उपायम् । विनयादित्वात् स्वार्थे ठक्, उपायात् फक्त्वञ्च । नयन्ति प्रापयन्ति, पौरुषम् उपायेन योजयन्ति इत्यर्थः । नानिश्चितफलं कर्म्म कुर्वीतेति भावः । यथाह कामन्दकः—"निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च । न कर्म कुर्य्यान् मतिमान् सदा वैरानुबन्धि च" इति । नयतिः प्रापणार्थं द्विकर्मकः । अत्र पौरुषस्य कर्त्तृस्थकर्मत्वेऽपि उपायस्य अतथात्वात् क्रोधं विनयत इत्यादिवत् "कर्त्तृस्थे चाशरीरे कर्मणि" इति आत्मनेपदं न भवति ॥ ३५ ॥

यदुक्तं विजितक्रोधरया इति तदावश्यकमित्याह—अपनेयमिति । उदेतुम् अभ्युदेतुम् इच्छता पुरुषेण पुरः प्रथमं रोषमयं रोषात् आगतम् । "मयट् च" इति मयट् । तिमिरम् अज्ञानं धिया विवेकबुद्ध्या करणेन अपनेयम् अपनोद्यम् । तथाहि अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमो ध्वान्तम् अविभिद्य न उदीयते, किन्तु विभिद्य एव इत्यर्थः । सूर्य्यस्य अपि एवं किमुत अन्येषाम् इति अपिशब्दार्थः । दृणी भावे लट् ॥ ३६ ॥

३५ । जयेच्छु राजगण रोषावेग संवरणपूर्व्वक परिणामे क्षयहीन प्रभूत फलसिद्धि गणना करिया श्रेयस्कर पुरुषकारके उपायेर सहित मिलित करिया थाकेन, अर्थात् परिणामे स्थायी ओ मङ्गलमय विपुल फल निश्चय ना करिया ताँहारा कार्य्ये प्रवृत्त हन ना ।

३६ । अभ्युदयलाभे अभिलाषी व्यक्ति बुद्धि द्वारा प्रथमे रोषसम्भूत अज्ञता दूर करिबे । अन्येर कथा कि, अंशुमालीओ अंशुजालद्वारा निशाकृत अन्धकार उच्छेद ना करिया उदित हन ना ।

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः॥३८॥
क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः॥३९॥

अन्वयः। बलवान् अपि यः कोपजन्मनः तमसः अभिभवं न रुणद्धि, सः क्षयपक्ष ऐन्दवीः कलाः इव सकलाः शक्तिसम्पदः निहन्ति॥ वाच्य—बलवता अपि येन अभिभवः न रुध्यते, तेन क्षयपक्षेण इव निहन्यन्ते॥ ३७

अन्वयः। यश्च समवृत्तिः समये मार्दवम् उपैति (यश्च) (समये) तिग्मतां तनोति, सः मेदिनीपतिः विवस्वान् इव ओजसा लोकम् अधितिष्ठति॥ वाच्य—येन समवृत्तिना उपेयते (येन) तिग्मता तन्यते, तेन मेदिनीपतिना इव विवस्वता लोकः अधिष्ठीयते॥ ३८

ननु दुर्बलस्य एवम् अस्तु, बलीयसस्तु क्रोधादेव कार्यसिद्धिरिति अत आह—बलवानिति। बलवान् शूरोऽपि यः कोपात् जन्म यस्य तस्य कोपजन्मनः। "अवर्ष्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद" इति वामनः। तमसो मोहस्य। क्त्यन्तयोगात् कर्त्तरि षष्ठी। अभिभवम् आक्रान्तिं न रुणद्धि न निवारयति। स नृपः क्षयस्य पक्षः क्षयपक्षः क्षणपक्षः ऐन्दवीः इन्दुसम्बन्धिनीः कला इव। "कला तु षोड़शो भागः" इत्यमरः। सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साहशक्तीः तिस्रोऽपि हन्ति नाशयति। अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थम् एव इत्यर्थः। अत्र कालस्य सर्वकारणत्वात् क्षयपक्षस्य कलाक्षयकारित्वम् अस्ति एव, तमसस्तु तत्कालविजृम्भणात् तथा व्यपदेशः॥३७॥

विमृश्य कुर्वतः क्रियाप्रकारमाह—समेति। यः समा नातिमृदुः नातितिग्मा वृत्तिः यस्य स समवृत्तिः सन् समये सति अवसरे मार्दवं मृदुवृत्तित्वम् उपैति तिग्मतां तीक्ष्णवृत्तित्वं च तनोति स मेदिनीपतिः विवस्वान् इव सूर्य इव ओजसा तेजसा लोकम् अधितिष्ठति आक्रामति। सूर्योऽपि ऋतुभेदेन समवृत्तिः इत्यादि योज्यम्॥ ३८॥

৩৬। পরাক্রমশালী হইয়াও যে ভূপতি কোপজ মোহ নিবারণ না করেন, কৃষ্ণপক্ষ যেমন চন্দ্রকলা সকল বিনষ্ট করে, তেমনি তিনি নিজ সমস্ত প্রভু, মন্ত্র ও উৎসাহশক্তি বিনাশ করিয়া থাকেন।

৩৮। যিনি সমানবৃত্তি অর্থাৎ যাহার ব্যবহার অতি তীক্ষ্ণও নহে, অতি মৃদুও নহে;—যিনি অবসর বুঝিয়া কোমলও তীক্ষ্ণ ব্যবহার করিয়া থাকেন, সূর্য্য যেমন ঋতুভেদে যথাযোগ্য মৃদু ও তীব্র তেজ দ্বারা জগৎ আক্রমণ করেন, সেই মেদিনীপতি ও তদ্রূপ স্বীয় তেজে অখিল লোক আক্রমণ করিয়া থাকেন।

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां भवता धीरतयाऽधरीकृतः ॥४०॥
श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम् ॥४१॥

अन्वयः । श्रियां चिराय परिग्रहः क्व ? दुष्टेन्द्रियवाजिवश्यता च क्व ? हि (तथाहि) शरदभ्रचला बहुच्छलाः श्रियः चलेन्द्रियैः असुरक्षाः (भवन्ति) ॥ वाच्य—परिग्रहेण वश्यतया च (भूयते), चलाभिः बहुच्छलाभिः असुरक्षाभिः भूयते ॥ ३९

अन्वयः । उपात्तरंहसः मनसः असामयिकं क्षोभं वितन्वता भवता धीरतया अधरीकृतः अपां पतिः किम् उच्चकैः क्रियते । वाच्य—वितन्वन् भवान् अधरीकृतवान् अपांपतिम् ॥ ४०

उक्तान्वयाकरणे ऽनिष्टमाह—क्वेति । श्रियां सम्पदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व । इन्द्रियाणि वाजिन इव इति उपमितसमासः । दुष्टानाम् अमार्गधाविनाम् इन्द्रियवाजिनां वश्यो वशङ्गतः तस्य भावः तत्ता क्व । न उभयम् एकत्र तिष्ठति इत्यर्थः । कुतः ? हि यस्मात् शरदव्भ्रवत् चलाः चञ्चलाः किञ्च बहुच्छला बहुव्याजा बहुरन्ध्रा इति यावत् । "छलं तु स्खलिते व्याजे" इति विश्वः । श्रियः सम्पदः चलेन्द्रियैः असुरक्षा रक्षितुमशक्याः । कथञ्चित् प्राप्ता अपि श्रियो न अविनीतेषु तिष्ठन्ति इत्यर्थः । वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥३९॥

क्रोधस्य दुष्टताम् उक्त्वा तस्य त्यागम् उपदिशति—किमिति । उपात्तरंहसः प्राप्तत्वरस्य मनसः । समयोऽस्य प्राप्तः सामयिकः । "समयस्तदस्य प्राप्तम्" इति ठञ् । स न भवति इति असामयिकः तम् अप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन । "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" इति रसिकाः । अधरीकृतः तिरस्कृतः प्राक् इति शेषः । अपांपतिः समुद्रः किं किमर्थम् उच्चकैः अधिकः क्रियते ? न पराजितं पुनः उच्चकैः कुर्यादिति भावः । अत्र वितन्वता इति भीमविशेषणत्वेन पदार्थस्य उच्चैःकरणे हेतुत्वात् काव्यलिङ्गमलङ्कारः ॥ ४० ॥

৩৯। দেখ, সম্পদ্‌সমূহের চিরস্থায়িতা কোথায় ? আর কোথাই বা কুমার্গধাবিত ইন্দ্রিয়রূপ অশ্বগণের বশ্যতা ? এতদুভয়ের একত্র সমাবেশ অসম্ভব, কেননা শারদমেঘবৎ চঞ্চল বহুচ্ছিদ্র সম্পদ্‌রাশি, চঞ্চলেন্দ্রিয় লোকগণ অতি কষ্টেও রক্ষা করিতে সমর্থ হয় না। ফলতঃ—অবিনীত ব্যক্তিরা বহুকষ্টে সম্পদ্ লাভ করিয়াও তাহা রক্ষা করিতে অসমর্থ হইয়া থাকে।

৪০। তুমি ধৈর্য্যগুণসম্পন্ন হইয়াও ত্বরমাণ মনের অসময়ে ক্ষোভ জন্মাইয়া তোমার দ্বারা পূর্ব্বে ধৈর্য্যগুণে তিরস্কৃত সরিৎপতি সাগরকে সম্প্রতি কেন তোমা হইতে গৌরবান্বিত করিতেছ ?

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी।
जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥
उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः।
अनपायि निवर्हणं द्विषां न तितिक्षासममस्ति साधनम्॥४३

अन्वयः। ये श्रुतम् अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते, ते खलु अचिराय सम्पदां चापलाश्रयम् अयशः जनयन्ति ॥ वाच्य—यैः शरीरजन्मानः रिपवः न विनीयन्ते, तैः जन्यते ॥ ४१

अन्वयः। अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी अक्षमा भवन्तं जनवत् नयसिद्धेः अपनेतुं न अर्हति ॥ वाच्य—...साधनया तापन्या अक्षमया भवान् अर्ह्यते ॥ ४२

अन्वयः। आयतेः भृशम् उपकारकं, भूरिणः कर्मफलस्य प्रसवः, द्विषां अनपायि निवर्हणं तितिक्षासमं साधनं न अस्ति ॥ वाच्य—उपकारकेण प्रसवेण (भूयते), अनपायिना निवर्हणेन तितिक्षासमेन साधनेन न भूयते ॥ ४३

श्रुतमिति। किञ्च, ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान् रिपून् कामक्रोधलोभमोहमदमात्सर्य्यादीन् न विनयन्ते न नियच्छन्ति। "कर्त्तृस्थे चाशरीरे कर्मणि" इति आत्मनेपदम्। ते खलु अचिराय झटिति सम्पदां श्रियां चापलाश्रयम् अस्थैर्य्यनिबन्धनम् अयशो दुष्कीर्त्तिं जनयन्ति। आश्रयदोषात् अस्थैर्य्यं सम्पदां न स्वदोषात् इत्यर्थः। अजितारिषड्वर्गस्य कुतः सम्पद इति भावः ॥ ४१ ॥

तथा क्रोधात् कार्य्यहानिः इत्याशयेन आह—अतिपातितेति। अतिपातितानि अतिक्रान्तानि कालः समयोऽनुरूपः साधनानि सहायादीनि च यया सा तथोक्ता। तापयतीति तापनी। कर्त्तरि ल्युट्, टित्वात् ङीप्। स्वस्य यच्छरीरम् इन्द्रियवर्गश्च तयोः तापनी अक्षमा क्रोधः, भवन्तं जनवत् पृथग्जनमिव। "तेन तुल्यम्" इति वतिप्रत्ययः। तेन इवार्थो लक्ष्यते। "तद्धितश्चासर्वविभक्तिः" इति अव्ययम्। नयसिद्धेः नयसाध्यफलात् अपनेतुं पृथक्कर्त्तुं नार्हति। असमयक्रोधस्य आत्मसन्तापातिरिक्तं फलं नास्ति इत्यर्थः ॥ ४२ ॥

दुष्टः क्रोध इत्युक्तम्, अथ क्षमाया गुणानाह—उपकारकमिति।

४१। যাহারা শাস্ত্র অধ্যয়ন করিয়াও শরীরোৎপন্ন কামক্রোধাদি রিপুগণের নিগ্রহ না করে, তাহারা নিশ্চিতই অচিরে সম্পদ্ বিনাশ-নিবন্ধন অপযশ অর্জ্জন করিয়া থাকে।

৪২। যাহা কার্য্যসিদ্ধির অনুরূপ সময় ও সহায় অতিক্রম করে এবং যাহা নিজদেহ ও ইন্দ্রিয়গণের পরিতাপপ্রদ, সেই ক্রোধ সাধারণ ব্যক্তির ন্যায় তোমাকে নীতিসাধ্য ফল হইতে বিচ্যুত করিতে পারে না।

प्रणतिप्रवणान् विहाय नः सहजस्नेहनिबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः॥४४॥
सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये॥४५॥

अन्वयः । मानभृतां प्रथमे वृष्णयः सहजस्नेहनिबद्धचेतसः प्रणतिप्रवणान् नः विहाय सदा सुयोधनं न प्रणमन्ति ॥ वाच्य—प्रथमैः वृष्णिभिः सुयोधनः न प्रणम्यते ॥ ४४

अन्वयः । एषां (वृष्णीनां) ये सहजाः सुहृदः तथा इतरे ये एषां मतं न विलङ्घयन्ति, (उभयेऽपि नृपाः) आत्मसिद्धये विनयादिव धृतराष्ट्रात्मजं यापयन्ति ॥ वाच्य—यैः सहजैः सुहृद्भिः (तथा) इतरैः (न) विलङ्घ्यते, तैः धृतराष्ट्रात्मजः याप्यते ॥ ४५

आयतेः उत्तरकालस्य भृशम् अत्यन्तम् उपकारकं स्थिरफलहेतुरित्यर्थः । भूरिणः प्रभूतस्य कर्म्मफलस्य प्रसूयतेऽनेनेति प्रसवः कारणम् । अपायि न भवतीति अनपायि स्वयम् अविनश्यदेव द्विषां निवर्हणं विनाशकम् एवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति । "क्षान्तिः क्षमा तितिक्षा च" इत्यमरः । "तिज् निशाने" इति धातोः "गुप्तिज्किद्भ्यः सन्" इति क्षमार्थे सन्प्रत्ययः । तितिक्षासममित्यनुक्तोपमेया समासे आर्थी लुप्तोपमा भृशायत्यनपायिशब्दैः साधनान्तरवैलक्षण्याद्व्यतिरेकश्च व्यज्यते । भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्य्यये च व्यतिरेकः ॥ ४३ ॥

ननु तितिक्षया कालक्षेपे दुर्य्योधनः सर्वान् राज्ञो वशीकुर्य्यादित्याह—प्रणतेति । सहजस्नेहेन अकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः । सुयोधने तु न तथेति भावः । किञ्च मानभृताम् अहङ्कारिणां प्रथमे अग्रेसराः । सुयोधनस्तु ततोऽपौति भावः । वृष्णयो यादवाः प्रणतिप्रवणान् प्रणामपरान् । सुयोधनस्तु न तथेति भावः । नोऽस्मान् विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति, किन्तु कार्य्यकाले त्यजन्ति एव इत्यर्थः । सति यादवविग्रहे न किञ्चित् अस्माकमसाध्यं भवेदिति भावः । अनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

किञ्च कारणान्तरमाह—सुहृद इति । किञ्च एषां वृष्णीनां ये

४३ । যাহা উত্তরকালে বিপুল কর্ম্মফলের নিরতিশয় হেতু, যাহা স্বয়ং অপায়হীন অথচ শত্রুবিনাশন, এবংবিধ ক্ষমার সমান উপায় আর নাই।

৪৪ । অন্ধকবৃষ্ণিবংশের অগ্রণী যাদবগণ অকৃত্রিম স্নেহবশতঃ আমাদের প্রতি নিবিষ্টচিত্ত, আমরা তাঁহাদের প্রণামপরায়ণ, তাঁহারা আমাদিগকে পরিত্যাগ করিয়া সুযোধনের অনুসরণ করিবেন না।

अभियोग इमान् महीभुजो भवता तस्य कृतः कृतावधेः।
प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव॥४६

उपजापसहान् विलङ्घयन्
स विधाता नृपतीन् मदीद्धतः।
सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम्॥ ४७॥

अन्वयः। कृतावधेः तस्य (दुर्योधनस्य) भवता कृतः अभियोगः इमान् महीभुजः हरिदश्वः कमलाकरान् इव समुत्पतन् प्रविघाटयिता॥ वाच्या—कृतेन अभियोगेन समुत्पततता हरिदश्वेन कमलाकरा इव इमे प्रविघाटयितारः॥ ४६

अन्वयः। मदीद्धतः स (दुर्योधनः) नृपतीन् विलङ्घयन् उपजापसहान् विधाता, सहजाः सहजाताः मातृपितृपक्षा इत्यर्थः। "अन्येष्वपि दृश्यते" इति डप्रत्ययः। सुहृदो मित्राणि तथा इतरे कृत्रिमसुहृदश्च एषां मतं दृष्टिपथं न विलङ्घयन्ति न अतिक्रामन्ति। ते इयेऽपि नृपाः दुर्योधनोपजीविनोऽपीति भावः। आत्मसिद्धये आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयात् आनुकूल्यादिव यापयन्ति कालं गमयन्ति। कार्यकाले तु दृष्टिपथप्रवेशिन एव इत्यर्थः। यातेर्ण्यन्तात्लट्। "अर्त्तिह्री" इत्यादिना पुगागमः॥ ४५॥

किञ्च नायमभियोगकाल इत्याशयेनाह—अभियोग इति। कृतावधेः परिभाषितकालस्य। "अवधिस्त्ववधाने स्यात्सीम्नि काले विलेऽपि च" इति विश्वः। तस्य सुयोधनस्य, कर्मणि षष्ठी। भवता कृतः अवधिमनपेक्ष्येति शेषः। अभियोगः आर्द्राभिभव इति यावत्। "अभियोगस्तु शपथे स्यादार्द्रे च पराभवे" इति विश्वः। इमान् पूर्वोक्तान् महीभुजो राज्ञो हरिदश्वः उष्णरश्मिः कमलाकरानिव समुत्पतन् उद्यन् एव प्रविघाटयिता भेत्स्यति। घाटयतेर्भौवादिकाल्लुट्। चौरादिकस्य तु "मितां ह्रस्वः" इति ह्रस्वत्वं स्यात्॥ ४६॥

৪৫। অপর—যাঁহারা এই যাদবগণের সহজাত অর্থাৎ মাতৃপিতৃপক্ষীয় মিত্র এবং যাঁহারা কৃত্রিম সুহৃদ্, বস্তুতঃ যাঁহারা যাদবগণের অভিমত অতিক্রম করেন না; এই উভয়বিধ নৃপতিরা সম্প্রতি কেবল স্বকার্য্যসাধনার্থ বিনয়বশতঃই যেন ধৃতরাষ্ট্রতনয় দুর্য্যোধনের অনুগমন করিতেছেন।

৪৬। উদীয়মান দিবাকর যেমন কমলাকর ভেদ করেন, আমাদের বনবাসরূপ সীমানির্দ্দেশক সেই সুযোধনের প্রতি তোমার এই অকালযুদ্ধোদ্যম তদ্রূপ এই সকল মহীপালকে আমাদের প্রতিকূলে বিচ্ছিন্ন করিয়া দিবে।

असमापितकृत्यसम्पदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥४८॥
मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढ़ता ।
अतिमूढ़ उदस्यते नयात् नयहीनादपरज्यते जनः ॥४९॥

जनः अपि अधःक्रियां न सहते, लोकाधिकधाम राजकं किमु ? वाच्य—मदोद्धतेन विलङ्घयता (दुर्योधनेन) उपजापसहाः विधातारः, जनेन अधःक्रिया न सह्यते, लोकाधिकधाम्ना राजकेन किमु ॥ ४७

अन्वयः । असमापितकृत्यसम्पदाम् अभिमानशालिनां विभूतयः तावता विनयेन हतवेगं मदम् उत्तम्भयितुं प्रभवन्ति ॥ वाच्य—विभूतिभिः प्रभूयते ॥ ४८

अन्वयः । मदमानसमुद्धतं नृपं मूढ़ता नियमेन न वियुङ्क्ते, अतिमूढ़ो नयात् उदस्यते । नयहीनात् जनः अपरज्यते ॥ वाच्य—मूढ़तया...समुद्धतः नृपः वियुज्यते [अतिमूढेन उदस्यते] जनेन अपरज्यते । (कर्मसंकर्षरि वाच्यपरिवर्त्तनं नास्तीति कैषाश्चिन्मतम्) ॥ ४९

अथ न ये तृष्णिपक्षास्तान् प्रत्याह—उपजापेति । मदोद्धतः स दुर्योधनो नृपतीन् अन्यान् विलङ्घयन् मदात् अवमानयन् । सहन्त इति सहाः, पचाद्यच् । उपजापस्य सहान् भेदयोग्यान् । "समौ भेदोपजापौ" इत्यमरः । विधाता विधास्यति । विपूर्वस्य दधातेर्लृट् । अवमानितो जनः सुभेद्य इति भावः ; न च ते सहिष्णव इत्याह—जनः प्राकृतोऽपि अधःक्रियाम् अपमानं न सहते । लोकाधिकधाम लोकोत्तरप्रतापं राजकं राजसमूहः । "गोत्रोक्षोष्ट्र" इत्यादिना वुञ्प्रत्ययः । किमु सहते इति किं वक्तव्यमित्यर्थः । तथा सति कृत्स्नमेव राजमण्डलम् अस्मानेव अवलम्बिष्यते इति भावः ॥ ४७ ॥

ननु 'सखोनिवे'त्यादिवनेचरोक्त्या तस्य मदसम्भावनापि कथमित्यत्राह—असमापितेति । असमापितकृत्यसम्पदाम् अकृतकृत्यानाम् अभिमानशालिनाम् अहङ्कारिणां विभूतयः सम्पद एव तावता स्वल्पेन विनयेन, कार्य्यवशात् आरोपितेनेति शेषः । हतवेगं प्रतिबद्धवेगं न तु स्वरूपतो हतं मदम् उत्तम्भयितुं वर्द्धयितुं प्रभवन्ति । सर्वथा दुर्जनं सम्पदो विकारयन्ति इति भावः ॥ ४८

अथ मदस्य अनर्थहेतुतां युग्मेनाह—मदेति, अपरागेति च । मदमानाभ्यां दर्पाहङ्काराभ्यां समुद्धतं नृपं मूढ़ता कार्य्यापरिज्ञानं नियमेन अवश्यं न वियुङ्क्ते न विमुञ्चति । अतिमूढ़ो नयात् नीतिमार्गात् उदस्यते

४७ । मदोद्धत दुर्য্যোধন মত্ততাবশতঃ নৃপগণের অবমাননা করিবে, তাঁহারা সেই অপমানে অসহিষ্ণু হইয়াই দুর্য্যোধনের পক্ষ পরিত্যাগ করিবেন । সাধারণ মানবও যখন অপমান সহিতে পারে না, তখন লোকোত্তরপ্রতাপ নৃপমণ্ডলীর কথা আর কি বলিব ?

৪৮ । অকৃতকৃত্য অহঙ্কারী ব্যক্তিগণের মত্ততা কার্য্যানুরোধে অত্যল্প বিনয় দ্বারা প্রতিবদ্ধ হইলেও তাহাদের সম্পদই সেই মত্ততাকে বর্দ্ধিত করিয়া থাকে ।

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत् सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥५०॥
अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः॥५१

अन्वयः । अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसन्ततिः महानपि रिपुः तरुवत् सहिष्णुना उन्मूलयितुं सुकरः । वाच्य—...रितेन...सन्ततिना महता रिपुणा सुकरेण (भूयते) ॥ ५०

अन्वयः । अणुः अपि अन्तःप्रकृतिप्रकोपजः विग्रहः प्रभुम् उपहन्ति । हि (तथाहि) तरुशाखान्तनिघर्षजः अनलः भूधरम् अखिलं हिनस्ति । वाच्य—अणुना अपि...कोपजेन विग्रहेण प्रभुः उपहन्यते...निघर्षजेन अनलेन भूधरः हिंस्यते ॥ ५१

उत्क्षिप्यते । कर्मकर्त्तरि लट् । नयहीनात् जनो लोकोऽपरज्यतेऽपरक्तो भवति । "स्खरितजितः" इत्यादिना आत्मनेपदम् ॥ ४८ ॥

अपरागोऽप्रीतिः द्वेष इति यावत् । समीरण इव तेनेरितः चोदितः अत एव क्रमेण शीर्णा शीर्णीभूता आकुला चला च मूलसन्ततिः प्रकृत्यादिस्वजनवर्गः श्रिफासङ्घातश्च यस्य स तथोक्तः । "मूलं वशोक्तौ स्वोये श्रिफातारान्तिकादिषु" इति वैजयन्ती । रिपुर्महानपि तरुवत् वृक्ष इव सहिष्णुना क्षमावता उन्मूलयितुम् उद्धर्त्तुं सुकरः सुसाध्यः सुकरोन्मूलन इत्यर्थः । अत्र मदादेः पूर्वपूर्वस्य उत्तरोत्तरं प्रति कारणत्वात् कारणमाला, तरुवदित्युपमा चेति द्वयोः संसृष्टिः ॥ ५० ॥

ननु अन्तर्भेदमात्रेण कथं सुसाध्य स्तत्राह—अणुरिति । अणुः अल्पोऽपि अन्तःप्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः । "प्रकृतिः" पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्त्वमात्यादिकेष्वपि" इति वैजयन्तो । विग्रहो वैरं प्रभुम् उपहन्ति नाशयति । अत्र दृष्टान्तमाह—तरुशाखान्तानां निर्घर्षो घर्षणं तज्जोऽनलोऽग्निः । भूधरं गिरिम् अखिलं साकल्येन हिनस्ति हि दहति इत्यर्थः । अत्र उपमानोपमेयसमानधर्म्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालङ्कारः ॥ ५१ ॥

४९ । दर्प ও অহঙ্কার দ্বারা সমুদ্ধত নৃপকে মূঢ়তা কদাচ পরিত্যাগ করে না, অতিমূঢ় ব্যক্তি নীতিপথ হইতে দূরে নিক্ষিপ্ত হয়, আর নীতিহীন লোকের প্রতি সকলেই বিরাগবান্ হইয়া থাকে ।

৫০ । যেমন অতিবিশাল তরুও সমীরণদ্বারা সঞ্চালিত এবং ক্রমে শীর্ণবিচ্ছিন্নমূল হইলে সহজে উন্মূলনযোগ্য হয়, সেইরূপ বিদ্বেষবশে যাহার প্রজাদি স্বজনবর্গ আকুল ও বিচলিত হয়, সে অতি প্রবল হইলে ও ক্ষমাশীল ব্যক্তি তাহাকে অনায়াসে উন্মূলিত করিতে সমর্থ হয় ।

৫১ । অমাত্যাদি অন্তরঙ্গগণের কোপ হইতে সমুদ্ভূত অতি অল্পমাত্র বৈরও প্রভুকে বিনষ্ট করে ; যেরূপ, তরুশাখার পরস্পর ঘর্ষণে উত্থিত অনল নিঃশেষরূপে পর্ব্বত দগ্ধ করিয়া থাকে ।

मतिमान् विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतसम्पदः ॥५२॥
लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥५३॥
अनुशासतमित्यनाकुलं नयवर्त्मार्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितः तमभीयाय पराशरात्मजः॥५४॥

अन्वयः । मतिमान् विनयप्रमाथिनः द्विषः समुन्नतिं समुपेक्षेत, तादृगन्तरे सुजयः खलु, हि (तथाहि) अविनीतसम्पदः विपदन्ताः । वाच्या—मतिमता समुन्नतिः समुपेक्षेत, सुजयेन (भूयते), सम्पद्भिः विपदन्ताभिः (भूयते) ॥ ५२

अन्वयः । लघुवृत्तितया बहिः अन्तः च भिदां गतम् नृपस्य मण्डलम् अनन्तरः आपगारयः शिथिलं कूलम् इव अभिभूय हरति । वाच्या—अनन्तरेण आपगारयेण इव क्रियते ॥ ५३

अन्वयः । इति आकुलम् अर्जुनाग्रजम् (भीमसेनं) नयवर्त्म अनाकुलम् अनुशासतं तं (युधिष्ठिरं) पराशरात्मजः स्वयम् अभिवाञ्छितः अर्थ इव अभीयाय । वाच्या—पराशरात्मजेन अभिवाञ्छितेन अर्थेन इव अनुशासत् सः (युधिष्ठिरः) अभीयै ॥ ५४

तथापि कथं वर्द्धमानं शत्रुम् उपेक्षेत इति आशङ्क्य, दुर्विनीतत्वात् इति आह—मतिमानिति । मतिमान् प्राज्ञः विनयं प्रमथ्नाति त्यजति इति विनयप्रमाथिनो दुर्विनीतस्य द्विषः समुन्नतिं वृद्धिं समुपेक्षेत । उपेक्षाया: फलमाह—तादृगविनीतोऽन्तरे क्वचित् रन्ध्रे सुजयः सुखेन जेतुं शक्यः खलु । हि यस्मात् अविनीतसम्पदो विपदन्ता अनर्थोदर्काः ॥ ५२ ॥

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वात् इति आह—लघ्विति । लघुवृत्तितया स्वस्य दुर्वृत्तरूपतया बहिर्मित्रादिजनपदेषु अन्तरमात्यादिषु च भिदां भेदं गतम् । "षिद्भिदादिभ्योऽङ्" इति अङ्प्रत्ययः । नृपस्य मण्डलं राष्ट्रम् अनन्तरः सन्निहितो जिगीषुः आपगारयो नदीवेगः शिथिलम् अन्तर्भेदजर्जरं कूलमिव अभिभूय आक्रम्य हरति ॥ ५२ ॥

अन्विति । इति इत्थम् आकुलम् अरिनिकारस्मरणात् क्षुभितम्

५२। মতিমান্ ব্যক্তি দুর্ব্বিনীত শত্রুর সমুন্নতি উপেক্ষা করিবে, কেননা তাদৃশ বিনয়হীন শত্রুর কোন না কোন ছিদ্র প্রাপ্ত হইয়া তাহাকে অনায়াসে জয় করিতে পারা যায়; বিশেষতঃ বিপদ্‌ই অবিনীত ব্যক্তির সম্পদের পরিণাম।

৫৩। সন্নিহিত নদীবেগ যেমন অন্তঃশিথিল কূল আক্রমণ করিয়া হরণ করে, জিগীষু ব্যক্তিও তদ্রূপ দুর্ব্ব্যবহারবশতঃ বহির্মিত্র প্রজাদি ও অন্তর্মিত্র অমাত্যাদির মধ্যে ভেদপ্রাপ্ত রাষ্ট্র অভিভূত করিয়া অপহরণ করিয়া থাকেন।

मधुरैरवशानि लम्भयन् अपि तिर्य्यञ्चि शमं निरीक्षितैः।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥५५॥
सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम्।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसञ्चयः॥५६॥

अन्वयः। अवशानि तिर्य्यञ्चि अपि मधुरैः निरीक्षितैः शमं लम्भयन् परितः पटु एनसां दहनं विलोकनक्षमं धाम बिभ्रत्॥ वाच्य—लम्भयन्तं बिभ्रतम्॥ ५५

अन्वयः। सहसा उपगतः तपसां सूतिः आपदाम् असूतिः स मुनिः वपुष्मान् पुण्यसञ्चयः इव जगतीभुजा सविस्मयं ददृशे॥ वाच्य—उपगतं तपसां सूतिम् आपदाम् असूतिं तं मुनिं वपुष्मन्तं पुण्यसञ्चयं जगतीभुक् ददर्श॥ ५६

अर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गम् अनाकुलम् असङ्कीर्णं यथा तथा अनुशासतम् उपदिशन्तम्। "जक्षित्यादयः षट्" इत्यभ्यस्ताच्छतुर्नुमभावः। तं युधिष्ठिरं पराशरस्य आत्मजः पुत्रः वेदव्यासः। स्वयमभिवाञ्छितोऽर्थ इव साक्षात् मनोरथ इव इति उत्प्रेक्षा। अभीयाय प्राप्तः॥ ५४॥

अथ युग्मेनाह—मधुरैरिति। मधुरैः शान्तैः निरीक्षितैः अवलोकनैः। नपुंसके भावे क्तः। न विद्यते वशम् आयत्तत्वं येषां तानि अवशानि प्रतिकूलानि। "वशमायत्ततायां च" इति विश्वः। तिर्य्यञ्चि मृगपक्ष्यादीनि अपि शमं शान्तिं लम्भयन् प्रापयन्। "लभेश्च" इति नुमागमः। "गत्यर्थ" इत्यादिना द्विकर्मकत्वम्। परितः पटु उज्ज्वलम् एनसाम्। दह्यतेऽनेनेति दहनं निवर्त्तकं तथापि विलोकनक्षमं दर्शनीयम् वक्त्रादितो विलक्षणमिति भावः। धाम तेजो बिभ्रत्॥ ५५॥

सहसेति। पुनः सहसा उपगतः अकस्मात् आगतः तपसां सूतिः प्रभवः आपदाम् असूतिः अप्रभवः निवर्त्तक इति यावत्। स मुनिर्व्यासः वपुष्मान् देहधारी पुण्यसञ्चयः पुण्यराशिरिव इति उत्प्रेक्षा, जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः॥ ५६॥

৫৪। এইরূপে শত্রুর কার্য্যস্মরণে সমাকুল অর্জ্জুনাগ্রজ ভীমসেনের প্রতি অনাকুল নীতিপথের উপদেষ্টা যুধিষ্ঠির সমীপে পরাশরতনয় বেদব্যাস যেন সাক্ষাৎ অভিলষিত প্রয়োজনের ন্যায় সমাগত হইলেন।

৫৫—৫৬। তাঁহার আগমনকালে তদীয় প্রশান্ত দৃষ্টিতে অবশ্য মৃগপক্ষীরাও শান্তভাব ধারণ করিল। তখন তিনি এমনই কলুষ-নাশন জ্যোতিঃ ধারণ করিয়াছিলেন যে, অনলতুল্য হইলেও তাহা অবলোকনের যোগ্য হইয়াছিল। বিপদ্‌বারণ তপঃপ্রবর্ত্তক সহসা সমাগত দেহধারী পুণ্যরাশির ন্যায় সেই ব্যাসদেবকে যুধিষ্ঠির সবিস্ময়ে অবলোকন করিলেন।

अथोच्चकैरासनतः पराङ्मुखात्
उदयन् स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः
शृङ्गात् सुमेरोरिव तिग्मरश्मिः ॥५७॥
अवहितहृदयो विधाय सोऽर्हाम्
ऋषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात्
प्रशम इव श्रुतमासनं नरेन्द्रः ॥५८॥

अन्वयः । अथ उच्चकैः पराङ्मुखात् आसनतः उदयन् धूतारुणवल्कलाग्रः स कीर्णाकपिशांशु-जालः सुमेरोः शृङ्गात् (उदयन्) तिग्मरश्मिः इव रराज ॥ वाच्य—उदयता धूतारुणवल्कलाग्रेण तेन... जालेन तिग्मरश्मिना इव ॥ ५७

अन्वयः । अवहितहृदयः स नरेन्द्रः ऋषिप्रवरे ऋषिवत् गुरूपदिष्टाम् अर्हां विधाय पश्चात् तदनुमतम् आसनं प्रशमः श्रुतम् इव अलञ्चकार ॥ वाच्य—अवहितहृदयेन तेन नरेन्द्रेण प्रशमेन इव अलञ्चक्रे ॥ ५८

अथेति । अथ दर्शनानन्तरम् । उच्चकैः उन्नतात् पराङ्मुखात् श्रेष्ठात् "अर्द्यात्यपरावराधमोत्तमपूर्वाच्च" इति यत्प्रत्ययः । आसनतः सिंहासनात् उदयन् उत्तिष्ठन् अत एव धूतानि कम्पितानि अरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्णं विस्तृतम् आकपिशम् अंशुजालं यस्य स तथोक्तः । सुमेरोः शृङ्गादुदयन् तिग्मरश्मिरिव रराज ॥ ५७ ॥

अवहितेति । स नरेन्द्रः अवहितहृदयः अप्रमत्तचित्तः सन् । "चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवत् ऋष्यर्हाम् । अर्हत्यर्थे वतिप्रत्ययः । गुरूपदिष्टां शास्त्रीयामित्यर्थः । अर्हां पूजाम् । "गुरोश्च हलः" इति अकारप्रत्ययः । विधाय पश्चात् अनन्तरं तदनुमतं तेन अनुज्ञातम् आसनम् । प्रशमः शान्तिः श्रुतं शास्त्रश्रवणमिव अलञ्चकार । उक्तञ्च पूर्वम्—"प्रशमस्तस्य भवत्यलङ्घ्या" इति । मुन्यान्नया उपविष्टवान् इत्यर्थः ॥ ५८ ॥

५७ । अनन्तर राजा তাঁহাকে অবলোকন করিয়া উন্নত উত্তম সিংহাসন হইতে উত্থিত হইলেন ; দ্রুত উত্থানবেগে তাহার পরিহিত লোহিতবর্ণ বল্কলের অগ্রভাগ ঈষৎ কম্পিত হওয়ায় তখন তিনি কপিলবর্ণ অংশুজাল বিকিরণকারী সুমেরুর অগ্রভাগ হইতে উদ্গত দিবাকরের ন্যায় শোভা ধারণ করিলেন ।

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्त्तेः ॥५९॥

इति श्रीभारविकृतौ किरातार्जुनीये
महाकाव्ये द्वितीयः सर्गः ॥ २ ॥

अन्वयः। व्यक्तोदितस्मितमयूखविभासितोष्ठः विकीर्णधाम्नः मुनेः अभिमुखं तिष्ठन् स नृपः इद्धं अंशुजालं तन्वन्तं गुरुं अभितः सकलस्य शशाङ्कमूर्त्तेः लक्ष्मीम् उवाह ॥ वाच्य—... विभासितोष्ठेन तिष्ठता तेन लक्ष्मीः ऊढे ॥ ५९

व्यक्तेति। व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैः विभासितौ ओष्ठौ यस्य स तथोक्तः। विकीर्णधाम्नः विस्तीर्णतेजसः मुनेः अभिमुखं तिष्ठन् स नृपः इद्धं समृद्धं दीप्तमिति यावत्। अंशुजालं तन्वन्तं गुरुं गौष्पतिम्। "गुरुर्गौष्पतिपित्रादौ" इत्यमरः। "अभितः परितः—" इत्यादिना द्वितीया। अभितोऽभिमुखं तिष्ठत इति शेषः। सकलस्य सम्पूर्णस्य, शशाङ्का मूर्त्तिर्यस्य तस्य इन्दोर्लक्ष्मीमुवाह वहति स्म। अत्र उपमेयस्य राज्ञ उपमानेन इन्दुधर्मेण लक्ष्म्याः साक्षात्सम्बन्धासम्भवात् तत्सदृशीं लक्ष्मीमिवेति प्रतिबिम्बकरणाक्षेपात् असम्भवद्वस्तुसम्बन्धात् पदार्थवृत्तिर्निदर्शनालङ्कारः। तदुक्तम्—"प्रतिबिम्बस्याकरणं सम्भवता यत्र वस्तुयोगेन। तत्साम्यमसम्भवता निदर्शना सा द्विधाभिमता" इति ॥ ५९. ॥

इति महामहोपाध्यायमल्लिनाथसूरिविरचितायां किरातार्जुनीय-
व्याख्यायां घण्टापथसमाख्यायां व्यासागमनो नाम
द्वितीयः सर्गः ॥ २ ॥

৫৮। অপ্রমত্তচিত্ত মহীপাল প্রথমে সেই ঋষিসত্তমকে তপবিজনোচিত শাস্ত্রসম্মত পূজা করিলেন। অনন্তর তাঁহার আদিষ্ট আসনে উপবেশন করত শমশ্রী যেমন শাস্ত্রজ্ঞানকে অলঙ্কৃত করে, তদ্রূপ সেই আসন সমলঙ্কৃত করিলেন।

৫৯। নৃপতি যুধিষ্ঠির সেই বিস্তৃততেজা ঋষির সম্মুখে উপবেশন করিলেন, তাঁহার ওষ্ঠদ্বয় মৃদু হাস্যের উজ্জ্বল কিরণজালে উদ্ভাসিত হইল; রাজা তখন প্রদীপ্তকিরণ-ব্যাপ্ত বৃহস্পতিগ্রহের সম্মুখবর্ত্তী পূর্ণশশধরের শোভা ধারণ করিয়াছিলেন।

দ্বিতীয়সর্গ সমাপ্ত ॥ ২ ॥

तृतीयः सर्गः ।

ततः शरच्चन्द्रकराभिरामै-
रुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गी-
र्जटास्तडित्वन्तमिवाम्बुवाहम् ॥१॥
प्रसादलक्ष्मीं दधतं समग्रां
वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्त-
मसंस्तुतानामपि भावमार्द्रम् ॥२॥

अन्वयः । ततः शरच्चन्द्रकराभिरामैः उत्सर्पिभिः अंशुजालैः प्रांशुमिव आनीलरुचं पिशङ्गीः जटाः बिभ्राणं तडित्वन्तम् अम्बुवाहमिव (स्थितम्) ॥ वाच्य—बिभ्रत् तडित्वान् अम्बुवाट् इव स्थितः ॥ १

अन्वयः । समग्रां प्रसादलक्ष्मीं दधतं जनातिगेन वपुःप्रकर्षेण असंस्तुतानाम् अपि चेतःसु प्रसह्य आर्द्रं भावं समासजन्तम् ॥ वाच्य—दधत्, समासजन् ॥ २

अथ त्रिभिर्मुनिं विशिषंश्चतुर्भिः कलापकमाह । तदुक्तम्—"द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥" इति । तत इति । ततः उपवेशनानन्तरं धर्मात्मजः युधिष्ठिरः शरच्चन्द्रकराभिरामैः आह्लादकैः इत्यर्थः । उत्सर्पिभिः ऊर्ध्वं प्रसारिभिः अंशुजालैः प्रभापटलैः प्रांशुम् उन्नतमिव स्थितम्) इति उत्प्रेक्षा । पुनः आनीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः, गौरादित्वात् ङीष् । जटा बिभ्राणं धारयन्तम् अतएव तडित्वन्तं विद्युद्युक्तम् अम्बुवाहमिव स्थितम् इति उत्प्रेक्षा । धर्मात्मजो युधिष्ठिर एतादृशं मुनिम् आबभाषे इति चतुर्थश्लोकेन अन्वयः ॥ १ ॥

प्रसादेति । पुनः समग्रां सम्पूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं सम्पदं

१। ঋষি উপবেশন করিলে, ঊর্দ্ধে প্রসর্পিত আহ্লাদকর তদীয় অংশুজালে তাঁহাকে উন্নত বলিয়া বোধ হইতে লাগিল ; তাঁহার বর্ণ কৃষ্ণ এবং তিনি পিঙ্গলবর্ণ জটা ধারণ করিয়াছেন, এজন্য সৌদামিনীসমন্বিত মেঘের ন্যায় অনুমিত হইলেন।

अनुद्धताकारतया विविक्तां
तन्वन्तमन्तःकरणस्य वृत्तिम्।
माधुर्य्यविस्रम्भविशेषभाजा
कृतोपसम्भाषमिवेक्षितेन ॥ ३ ॥
धर्मात्मजो धर्मनिबन्धिनीनां
प्रसूतिमेनःप्रणुदां श्रुतीनाम्।
हेतुं तदभ्यागमने परीप्सुः
सुखोपविष्टं मुनिमाबभाषे ॥४॥ इति कलापकम्।

अन्वयः। अनुद्धताकारतया अन्तःकरणस्य वृत्तिं विविक्तां तन्वन्तं माधुर्य्यविस्रम्भविशेषभाजा ईक्षितेन कृतोपसम्भाषमिव ॥ वाच्य—तन्वन् कृतोपसम्भाष इव ॥ ३

अन्वयः। धर्मनिबन्धिनीनाम् एनःप्रणुदां श्रुतीनां प्रसूतिं सुखोपविष्टं मुनिं तदभ्यागमने हेतुं परीप्सुः धर्मात्मजः आबभाषे वाच्य—प्रसूतिः सुखोपविष्टः मुनिः परीप्सुना धर्मात्मजेन ॥ ४

दधतम्। अतएव जनमतिगच्छतीति जनातिगेन लोकातिशायिना। "अन्येष्वपि दृश्यते" इति डप्रत्ययः। वपुःप्रकर्षेण आकारसम्पदा असंस्तुतानाम् अपरिचितानाम् अपि। व्यासोऽयम् इति अजानताम् इत्यर्थः। "संस्तवः स्यात् परिचयः" इत्यमरः। चेतःसु चित्तेषु आर्द्रं स्नेहार्द्रं भावम् अभिप्रायं प्रसह्य बलात् समासजन्तं लगयन्तम् इति यावत्। "दंशसञ्जस्वञ्जां शपि" इत्युपधाया लोपः। प्रसह्याकारेषु सर्वोऽपि स्निह्यतीति भावः ॥ २ ॥

अनुद्धतेति। पुनः अनुद्धताकारतया शान्ताकारत्वेन लिङ्गेन अन्तःकरणस्य वृत्तिं विविक्तां पूतां, शान्ताम् इति यावत्। "विविक्तौ पूतविजनौ" इत्यमरः। तन्वन्तं प्रकटयन्तम् आकृतिः एव अस्य चित्तशुद्धिं कथयति इत्यर्थः। पुनः माधुर्य्यं निसर्गसौम्यता विस्रम्भो विश्वासः। "समौ विस्रम्भविश्वासौ" इत्यमरः। तयोः विशेषम् अतिशयं भजतीति तथोक्तेन ईक्षितेन दर्शनेन एव कृता उपसम्भाषा सम्भाषणं येन तम् इव इति उत्प्रेक्षा। दृष्टिविशेषेणैव उपसम्भाषमाणमिव स्थितम् इत्यर्थः। काशिकायां तु "उपसम्भाषणमुपसान्त्वनम्" इति भासनादिसूत्रे ॥ ३ ॥

२। সেই ব্যাসদেব সমগ্র প্রসাদসমৃদ্ধি ধারণ করিয়াছিলেন এবং লোকাতীত ধীর শরীরকান্তি দ্বারা তিনি পরিচয়বিহীন ব্যক্তিগণেরও অন্তঃকরণে আকস্মিক স্নেহার্দ্রভাব সংলগ্ন করিয়া দিতেছিলেন।

अनाप्तपुण्योपचयैर्दुरापा
फलस्य निर्धूतरजाः सवित्री।
तुल्या भवद्दर्शनसम्पदेषा
दृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥
अद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः सम्प्रति भूमिदेवाः।

अन्वयः। अनाप्तपुण्योपचयैः दुरापा फलस्य सवित्री निर्धूतरजाः एषा भवद्दर्शनसम्पत् वीतबलाहकायाः दिवः दृष्टेः तुल्या (भवति)। वाच्य—दुरापया सवित्र्या निर्धूतरजसा अनया-...सम्पदा तुल्यया (भूयते) ॥ ५

धर्मेति। पुनः धर्मं निबध्नन्ति इति धर्मनिबन्धिनीनाम् अग्निहोत्रादि-धर्मप्रतिपादिकानाम् एनःप्रणुदाम् अवच्छिदां, क्विप्। श्रुतीनां वेदानाम् "श्रुतिः स्त्री वेद आम्नायः" इत्यमरः। प्रसूतिं प्रभवं सुखेन उपविष्टं मुनिं तदभ्यागमने तस्य मुनेरागमने हेतुं कारणं परीप्सुः जिज्ञासुः आप्नोतेः सन्नन्तात् उप्रत्ययः। "आप ज्ञप्यृधामीत्" इतोकारः। "अत्र लोपोऽभ्यासस्य" इत्यभ्यासलोपः। आबभाषे उवाच ॥ ४ ॥

अनाप्तेति। अनाप्तपुण्योपचयैः अकृतपुण्यसंग्रहैः दुरापा दुर्लभा फलस्य सवित्री श्रेयस्करीत्यर्थः। निर्धूतरजा हतरजोगुणा। एकत्र रजो धूलिः अन्यत्र गुणः। निरस्तधूलिः। "रजो रजोगुणे धूली परागार्त्तवयोरपि" इति शाश्वतः। एषा भवद्दर्शनसम्पत् सम्पत्तिः लाभ इति यावत्। सम्पदादिभ्यः क्विपो भावार्थत्वात्। वीतबलाहकायाः गतमेघायाः दिव आकाशस्य सम्बन्धिन्या दृष्टेः तुल्या इति उपमालङ्कारः। अनभ्र-वृष्टिवत् अतर्कितोपपन्नं भवद्दर्शनं सर्वथा कस्यचित् श्रेयसो निदानम् इत्यर्थः। वारि वहतीति वलाहकः। पृषोदरादित्वात् साधुः ॥ ५ ॥

৩। প্রশস্ত আকৃতি দ্বারাই তিনি তাঁহার চিত্তবৃত্তির পবিত্রতা জ্ঞাপন করিয়াছিলেন এবং তাঁহার স্বাভাবিক নিরতিশয় স্নিগ্ধ ও বিনম্র দৃষ্টিই যেন তাঁহার প্রতিসম্ভাষণ সম্পাদন করিয়াছিল।

৪। অগ্নিহোত্রাদি ধর্মপ্রতিপাদিকা পাপনাশিনী শ্রুতিসংহতির প্রবর্তক সেই ঋষি বেদব্যাস সুখে উপবেশন করিলে ধর্মনন্দন যুধিষ্ঠির তাঁহার আগমনের কারণ জানিতে অভিলাষী হইয়া তাঁহাকে বলিলেন।

৫। আপনার দর্শনলাভ শ্রেয়স্কর ও রজোবিনাশক; যাহারা পুণ্যসঞ্চয় করে নাই, তাহাদের পক্ষে ইহা দুর্ঘট; মেঘশূন্য আকাশ হইতে বৃষ্টিপাতের ন্যায় সহসা আপনার এই দর্শনলাভ কোন মঙ্গলেরই নিদানস্বরূপ হইবে।

आ संसृतेरस्मि जगत्सु जात-
स्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥
श्रियं विकर्षत्यपहन्त्यघानि
श्रेयः परिस्तौति तनोति कीर्त्तिम् ।
सन्दर्शनं लोकगुरोरमोघं
तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥

अन्वयः। अद्य क्रतूनां क्रियाः कामदुघाः, सम्प्रति भूमिदेवाः सत्याशिषः (भवन्ति), यत् त्वयि आगते आ संसृतेः जगत्सु बहुमानपात्रं जातः अस्मि । वाच्य—क्रियाभिः कामदुघाभिः, भूमिदेवैः सत्याशीर्भिः (भूयते) । (मया) बहुमानपात्रेण च जातेन भूयते ॥ ६

अन्वयः। आत्मयोनेः इव लोकगुरोः तव अमोघं सन्दर्शनं श्रियं विकर्षति, अघानि अपहन्ति, श्रेयः परिस्तौति, कीर्त्तिं तनोति (किं बहुना) किं न धत्ते । वाच्य—अमोघेन दर्शनेन श्रीः विकृष्यते, अपहन्यन्ते, परिस्तूयते, कीर्त्तिः तन्यते, किं न धीयते ॥ ७

अद्येति । अद्य क्रतूनां क्रिया अनुष्ठानानि । कामान् दुहन्ति इति कामदुघाः फलदा इत्यर्थः । "दुःह कब्घस्च" इति कप् प्रत्ययो घादेशश्च । सम्प्रति अद्य भूमिदेवाः ब्राह्मणाः । "द्विजात्यग्रजन्मभूदेववाड्वाः । विप्रश्च ब्राह्मणः" इत्यमरः । सत्याशिषो जाताः । ब्राह्मणाशिषोऽद्य फलिता इत्यर्थः । यत् यतः कारणात् त्वयि आगते सति त्वदागमनेन निमित्तेन इत्यर्थः । अस्मि इत्यहमर्थेऽव्ययम् । "अस्मीत्यस्मदर्थानुवादेऽहमर्थेऽपि" इति गणव्याख्याने । "दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दुष्ये" इति प्रयोगाच्च । आ संसृतेः आ संसारात् यावत् संसारम् इत्यर्थः, अभिविधावाङ् विकल्पादसमासः । जगत्सु बहुमानपात्रं बहुयोग्यताभाजनं जातः । सकलसत्कर्मफलभूतं त्वदागमनं येन मे जगन्मान्यता इति भावः ॥ ६ ॥

श्रियमिति । आत्मयोनेः ब्रह्मण इव लोकगुरोः तव अमोघम् अविफलं सन्दर्शनं श्रियं विकर्षति आकृष्य ददाति । अघानि दुःखानि अपहन्ति । "अंहोदुःखव्यसनेष्वघम्" इत्यमरः । श्रेयः पुरुषार्थं परिस्तौति स्तवति । परिष्टौ इति पाठेऽपि स एवार्थः । कौर्त्तिं च तनोति किं बहुना किं न धत्ते ? किं न करोति ? सर्वं करोतीत्यर्थः ? ॥ ७ ॥

६। आपनार आगमने एখন যাগক্রিয়াসকল ও বিপ্রগণের আশীর্ব্বাদরাশি সফল হইল ; যেহেতু আমি আজ চিরদিনের জন্য সমস্ত জগতে বহুসম্মানভাজন হইলাম।

৭। লোকগুরু ব্রহ্মার ন্যায় আপনার এই অমোঘ দর্শন সম্বন্ধিকে আকর্ষণ করিয়া প্রদান করে,

শ্রোতন্ময়ূখেঽপি হিমদ্যুতৌ মে
ন-নির্বৃতং নির্বৃতিমেতি চক্ষুঃ।
সমুজ্ঝিতজ্ঞাতিবিয়োগখেদং
ত্বৎসন্নিধাবুচ্ছ্বসিতীব চেতঃ ॥ ৮ ॥
নিরাস্পদং প্রশ্নকুতূহলিত্ব-
মস্মাস্বধীনং কিমু নিঃস্পৃহাণাম্।
তথাপি কল্যাণকরীং গিরং তে
মাং শ্রোতুমিচ্ছা মুখরীকরোতি ॥ ৯ ॥

অন্বয়ঃ। শ্রোতন্ময়ূখে হিমদ্যুতৌ অপি ন নির্বৃতং, মে চক্ষুঃ ত্বৎসন্নিধৌ নির্বৃতিম্ এতি। (তথা) চেতঃ সমুজ্ঝিতজ্ঞাতিবিয়োগখেদং (সৎ) সমুচ্ছ্বসিতি ইব। বাচ্য—ন নির্বৃতেন, চক্ষুষা নির্বৃতিঃ ইয়তে...খেদেন চেতসা উচ্ছ্বস্যতে ইব ॥ ৮

অন্বয়ঃ। প্রশ্নকুতূহলিত্বং নিরাস্পদং নিঃস্পৃহাণাম্ অস্মাসু অধীনম্ কিমু? তথাপি কল্যাণকরীং তে গিরং শ্রোতুমিচ্ছা মাং মুখরীকরোতি। বাচ্য—প্রশ্নকুতূহলিত্বে ন নিরাস্পদেন (ভূয়তে) অধীনেন (ভূয়তে) ইচ্ছয়া অহং মুখরীক্রিয়ে ॥

শ্রোতদিতি। হে ভগবন্! শ্রোতন্ময়ূখে সুধাস্রাবিকরে হিমদ্যুতৌ ইন্দৌ অপি বিষয়ে ন নির্বৃতম্ (নঞর্থস্য নঞ্শব্দস্য সুপ্সুপেতি সমাসঃ)। মে চক্ষুঃ ত্বৎসন্নিধৌ নির্বৃতিং সুখমেতি। তথা চেতশ্চ সমুজ্ঝিতজ্ঞাতিবিয়োগখেদং ত্যক্তবন্ধুবিরহদুঃখং সমুচ্ছ্বসিতীব অনবরোধেন প্রাণিতি ইব ইতি উৎপ্রেক্ষা। পূর্বার্দ্ধে তু নির্বৃতিকারণে সত্যপি ইন্দৌ অনির্বৃতিকথনাৎ বিশেষোক্তিঃ। তদুক্তম্—"তৎসামগ্র্যামনির্বৃত্তির্বিশেষোক্তির্নিগদ্যতে" ইতি ॥ ৮ ॥

নিরাস্পদমিতি। প্রশ্নকুতূহলিত্বং নিরাস্পদম্ ত্বদাগমনপ্রয়োজনপ্রশ্নো নিরাস্পদ ইত্যর্থঃ। "আস্পদং প্রতিষ্ঠায়াম্" ইতি নিপাতঃ। প্রশ্নানবকাশে হেতুমাহ—নিঃস্পৃহাণাম্ যুষ্মৎসদৃশানাম্ ইত্যর্থঃ। অস্মাসু অধীনম্ আয়ত্তং কিমু? ন কিঞ্চিৎ অস্মত্তো লভ্যমিত্যর্থঃ। আধারত্ববিবক্ষায়াং সপ্তমী। তথাপি কল্যাণকরীম্ অস্মদ্ধিতৈকহেতুকাম্ ইত্যর্থঃ। নিস্পৃহ-

কলুষরাশি বিনাশ করে, পুরুষার্থ অর্পণ করে, কীর্ত্তি বিস্তার করে; অধিক কি আপনার দর্শনে না করিতে পারে, এরূপ কি আছে?

৮। সুধাবর্ষী শশধরের দর্শনেও আমার যে নয়ন তৃপ্ত হয় না, আপনার সন্নিধানে সে নির্বৃতি লাভ করিতেছে। হে ভগবন্! আমার হৃদয় বান্ধবগণের বিরহবেদনা পরিত্যাগ করিয়া যেন সর্ব্বথা সজীব হইয়া উঠিয়াছে।

इत्युक्तवानुक्तिविशेषरम्यं
मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां
द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥
चिचीषतां जन्मवतामलघ्वीं
यशोऽवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा
वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥

अन्वयः । इति उक्तिविशेषरम्यम् उक्तवान् उदारचेताः नरेन्द्रः द्वैपायनेन जयोपपत्तौ मनः समाधाय इति (वक्ष्यमाणां) उदारां गिरम् अभिदधे । वाच्य—इति उक्तवन्तम् उदारचेतसं नरेन्द्रं द्वैपायनः अभिदधौ ॥ १० ॥

अन्वयः । अलघ्वीं यशोऽवतंसाम् उभयत्र भूतिं चिचीषतां जन्मवतां बन्धुषु तुल्यरूपा वृत्तिः

वृत्तेः पारार्थ्यादिति भावः । "कृजो हेतु" इति टप्रत्यये ङीप् । अतस्ते गिरं श्रोतुमिच्छा मां मुखं वाक् अस्य अस्तीति मुखरो निरन्तरभाषी । रप्रकरणे "खमुखकुक्षेभ्यो रो वक्तव्यः" इति रः । "दुर्मुखे मुखराबद्धमुखौ" इत्यमरः । ततः च्विप्रत्ययः । मुखरीकरोति व्यापारयति इत्यर्थः । निःस्पृहस्य अपि ते वाक्यम् अस्मद्धितकरत्वात् श्रोतव्यमिति भावः ॥९॥

इतीति । इति इत्थम् उक्तिविशेषरम्यम् उक्तिवैचित्र्यचारु यथा तथा उक्तवान् । उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः स एव द्वैपायनः । "प्रज्ञादिभ्यश्च" इति स्वार्थेऽणप्रत्ययः, नापत्यार्थे "नडादिभ्यः फक्" तेभ्य एव पाठात् बाधितार्थत्वाच्च । जयोपपत्तौ मनः समाधाय जयसिद्धिम् अपेक्ष्य इत्यर्थः । इति वक्ष्यमाणप्रकाराम् उदाराम् अर्थवतीं गिरम् अभिदधे उक्तवान् । दुहादित्वात् अप्रधाने कर्मणि लिट् । "प्रधानकर्मण्याख्येये लादीनाहुर्हि कर्मणाम् । अप्रधाने दुहादीनां ण्वन्ते कर्तुश्च कर्मणः" इति वचनात् ॥ १० ॥

९। आपनार निकट आगमन प्रयोजन जिज्ञासा निष्फल ' केननना. आपनादेर मत निःस्पृह महात्मगणेर प्रयोजनीय वस्तु आमादेर अधीनतार कि आछे ? तथापि आपनार कल्याणकर वाक्य शुनिवार अभिलाषई आमाके वाक्‌चपल करिया तुलितेछे ।

१०। महामना महीपाल एइरूप वैचित्र्यपूर्ण चारु वाक्य बलिले द्वैपायन वेदव्यास जयप्राप्तिर उपाय चिन्ता करिया ताँहाके एइरूप वक्ष्यमाण अर्थसमन्वित वाक्य बलिते लागिलेन ।

तथापि निम्नं नृप तावकीनैः
प्रक्षीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां
भवन्ति भव्येषु हि पक्षपाताः ॥ १२ ॥
सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ।

अभ्यर्हिता, तपोधनानां तु विशेषेण (अभ्यर्हिता) । वाचा—तुल्यरूपया वृत्त्या अभ्यर्हितया (भूयते) ॥ ११

अन्वयः । तथापि हे नृप ! तावकीनैः गुणौघैः प्रक्षीकृतं मे हृदयं निम्नम् । वीतस्पृहाणां मुक्तिभाजाम् अपि भव्येषु पक्षपाताः भवन्ति । वाचा—प्रक्षीकृतेन हृदयेन निम्नेन । पक्षपातैः (भूयते) ॥ १२

आदौ तावत् तस्य माध्यस्थ्यभङ्गदोषं युक्त्या परिहरति—चिचीषतामिति । अलघ्वीं गुर्वीम् । "वोतो गुणवचनात्" इति ङीष् । यशोऽवतंसां कीर्त्तिभूषणाम् उभयत्र इह च अमुत्र च भूतिं श्रेयः चिचीषतां चेतुं संग्रहीतुमिच्छतां चिनोतेः सन्नन्तात् शतृप्रत्ययः । जन्मवतां शरीरिणां बन्धुषु विषये तुल्यरूपा एकविधा वृत्तिः व्यवहारः अभ्यर्हिता उचिता ॥ ११ ॥

तथापीति । तथापि तुल्यवृत्तौ चित्तेऽपि हे नृप ! तावकीनैः त्वदीयैः । "युष्मदस्मदोरन्यतरस्यां खञ् च" इति खञ्प्रत्ययः । "तवकममकावेकवचने" इति तवकादेशः । गुणौघैः प्रक्षीकृतम् आवर्जितं मे हृदयं निम्नं त्वदायत्तम् । "अधीनो निम्न आयत्तः" इत्यमरः । ननु निःस्पृहस्य कोऽयं पक्षपात इत्यत्र आह—वीतेति । वीतस्पृहाणां विरक्तानां मुक्तिभाजां मुमुक्षूणाम् अपीत्यर्थः । भवन्तीति भव्याः साधवः । "भव्यगेय" इत्यादिना कर्त्तरि निपातः । तेषु पक्षपाताः स्नेहा भवन्ति । न तु साध्वनुग्रहो महतां माध्यस्थ्यभङ्गक इति भावः ॥ १२ ॥

११। इह ও পরত্র কীর্ত্তিভূষিত অমুত্তম ঐশ্বর্য্যসঞ্চয়ে অভিলাষী শরীরিগণের বন্ধুবর্গের প্রতি সমান ব্যবহারই করা উচিত ; তাহাতে আবার মাদৃশ তপস্বিজনের বন্ধুগণসম্বন্ধে সেই তুল্যরূপ ব্যবহার একান্তই কর্ত্তব্য বলিয়া নির্ণীত। কিন্তু হে নৃপ। আমার চিত্ত তুল্যবৃত্তিসম্পন্ন অর্থাৎ সর্ব্বত্র ভেদদৃষ্টিবিরহিত হইলেও তোমার গুণনিচয়ে বাধ্য হইয়া তোমারই অধীন হইয়াছে ; যেহেতু বিষয়বিরক্ত মুক্তিকামী ব্যক্তিগণও সাধুদিগের প্রতিই স্নেহপ্রবণ হইয়া থাকেন।

यस्त्यक्तवान् वः स तथा बलादृवा
मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥
जहातु नैनं कथमर्थसिद्धिः
संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः
प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

अन्वयः । यूयं तस्य राज्ञः सुताः न किमु ? सुयोधनं वा गुणैरतीताः न ? यः वः तथा त्यक्तवान् विषयाभिलाषः स बलात् मोहं विधत्ते ॥ वाच्य—युष्माभिः सुतैः न किमु (भूयते) ? न सुयोधनः अतीतः, येन यूयं त्यक्ताः तेन विषयाभिलाषेण मोहः धीयते ॥ १३

अन्वयः । एनं धृतराष्ट्रम् अर्थसिद्धिः कथं न जहातु ? यः संशय्य कर्णादिषु तिष्ठते । हि असाधुयोगाः जयान्तरायाः, प्रमाथिनीनां विपदां पदानि ॥ वाच्य—अर्थसिद्धया एष न हीयतां, येन क्षीयते, असाधुयोगैः जयान्तरायैः पदैः (भूयते) ॥ १४

अथ नृपस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुश्चेष्टाम् उद्घाटयति —सुता इति । यूयं तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्राः न किमु ? अपि तु सुता एवेत्यर्थः । गुणैः शान्तिदान्तिदाक्षिण्यादिभिः सुयोधनं न अतीताः न अतिक्रान्ताः वा ? अतीता एवेत्यर्थः । कर्तरि क्तः । असुतत्वम् अगुणत्वं च त्यागे हेतुः, युष्मासु तन्नास्ति इत्यर्थः । उपालम्भे कारणमाह—य इति । यः धृतराष्ट्रः वः युष्मान् तथा निष्कारणमेव त्यक्तवान्, यदि वयं सुताः गुणाधिक्याच्च तर्हि कथम् अत्याक्षीत् तत्राह—बलादिति । स विषयाभिलाषो भोगतृष्णा बलाद्वा बलात्कारादिव । 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इति विश्वः । मोहम् अविवेकं विधत्ते विषयाभिलाषातिरिक्तो न कश्चिद्युष्मत्त्यागहेतुः अस्ति इत्यर्थः । अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ १३ ॥

अथ राज्ञ उत्साहवर्द्धनाय शत्रोर्हानिं सूचयति—जहातिति । एनं धृतराष्ट्रम् अर्थसिद्धिः कथं न जहातु ? जहातु एव इत्यर्थः । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्राप्तकाले लोट् । तस्य हानिकालः प्राप्त इत्यर्थः कुतः ? यो धृतराष्ट्रः संशय्य सन्दिह्य कर्णादिषु तिष्ठते । कर्णादीन्

१३। तोमरा कि सेई राजा धृतराष्ट्रेर पुत्र (पुत्रवत् स्नेहास्पद) नह ? (अवश्यई तांहार पुत्रवत् स्नेहास्पद), शमदमदाक्षिण्यादि गुणे तोमरा सुयोधनके कि अतिक्रम करा नाई ? (निश्चितई करियाछ) ; तबे ये तिनि विना कारणे तोमादिगके त्याग करियाछेन, इहार हेतु एई ये, विषयलालसा ताहाके येन बलपूर्वक मोहित करियाछे ।

पथश्च्युतायां समितौ रिपूणां
धर्म्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्य-
माविष्कृतं प्रेमपरं गुणेषु ॥ १५ ॥
विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन ।

अन्वयः । रिपूणां समितौ पथश्च्युतायां चिराय धर्म्म्यां धुरं दधानेन त्वया विपत्सु अपि अविपत्तिरम्यं गुणेषु परं प्रेम आविष्कृतम् ॥ वाच्य—दधानः त्वम् आविष्कृतवान् ॥ १५

दुर्मन्त्रिणः सन्दिग्धार्थं निर्णेतृत्वेन अवलम्बते इत्यर्थः । "प्रकाशनस्थेयाख्ययोश्च" इति स्थेयाख्यायाम् आत्मनेपदम् । तिष्ठतेऽस्मिन्निति स्थेयो विवादपदनिर्णेता । तथाहि असाधुयोगा दुर्जनसंसर्गा जयान्तरायाः जयविघातकाः । किञ्च प्रमाथिनोनाम् उन्मूलनशीलानां विपदां पदानि स्थानानि । "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः । न केवलं जयघातिनः किं तु अनर्थकारिणश्च इत्यर्थः । धृतराष्ट्रोऽपि दुर्ज्जनविधेयत्वाद् विनङ्क्ष्यतीति भावः ॥ १४ ॥

एवं शत्रोः अनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति—पथ इति । रिपूणां समितौ सभायाम् । "सभासमितिसंसदः" इत्यमरः । पथश्च्युतायां मार्गादभ्रष्टायाम् । दुरात्मनो दुःशासनस्य स्त्रीग्रहणसाहसम् अङ्गीकृतवत्त्वाम् इत्यर्थः । चिराय धर्म्म्यां धर्मात् अनपेताम् । "धर्मपथ्यर्थन्यायादनपेते" इति यत्प्रत्ययः । धुरं भारं दधानेन क्लृप्तेष्वपि धर्मात् अचलता इत्यर्थः । त्वया विपत्स्वपि अविपत्ति अविनाशि अतएव रम्यं गुणेषु शान्त्यादिषु विषये परम् उत्कृष्टं प्रेम आविष्कृतं प्रकटीकृतम् । दुःसहमपि सोढ़वता त्वया साधु कृतमिति भावः ॥ १५ ॥

१४ । এই ধৃতরাষ্ট্রের অর্থসিদ্ধি দূরে চলিয়া যাইবে, কেননা ইনি কর্ত্তব্যবিষয়ে সন্দিহান হইলে কুমন্ত্রী কর্ণপ্রভৃতির পরামর্শ অবলম্বন করিয়া থাকেন। জানিও—দুর্জ্জনসংসর্গ জয়ের অন্তরায় এবং উন্মূলনকারিণী বিপদের আস্পদ।

১৫। শত্রুসভা ধর্ম্মপথ হইতে ভ্রষ্ট হইলে (যখন ভীষ্মপ্রভৃতি সভাবর্গ দুর্য্যোধনকৃত দ্রৌপদীর অপমানে প্রতিবাদ করিল না, তখন) তুমি ধর্ম্মপথে চির অবস্থান করিয়া বিপৎসময়েও অবিনশ্বর রম্য, শমাদি গুণ-বিষয়ে অত্যন্ত অনুরাগ প্রকটিত করিয়াছ।

प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते ॥ १६ ॥
लभ्या धरित्री तव विक्रमेण
ज्यायांश्च वीर्य्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः
प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥

अन्वयः । शमैकवृत्तेः भवतः कृतेन अनात्मनीनं विध्वंसं विधाय प्रकाशितत्वन्मतिशीलसाराः ते (तव) विद्विषः कृतोपकारा इव (जाताः) ॥ वाच्य—...सारैः विद्विद्भिः कृतोपकारैः इव ॥ १६

अन्वयः । तव (त्वया) धरित्री विक्रमेण लभ्या, विपक्षश्च वीर्य्यास्त्रबलैः ज्यायान्, अतः प्रकर्षाय विधिः विधेयः, हि रणे जयश्रीः प्रकर्षपरतन्त्रा ॥ वाच्य—त्वं धरित्रीं लभेथाः विपक्षेण ज्यायसा, (भूयते), विधिं विदध्याः (त्वं) जयश्रिया प्रकर्षपरतन्त्रया (भूयते) ॥ १७

विधायेति । किञ्च शम एव एका मुख्या वृत्तिर्यस्य तस्य अपरोपतापिनः भवतः कृतेन कपटेन आत्मने हितः आत्मनीनः स न भवतीति अनात्मनीनः स्वस्य एव अनर्थहेतुरित्यर्थः तम् । "आत्मन्विश्वजनभोगोत्तरपदात् खः" इति खप्रत्ययः । विध्वंसम् अपकारं विधाय कृत्वा प्रकाशितः प्रख्यापितः त्वन्मतिशीलयोः तव प्रज्ञास्वभावयोः सारः प्रकर्षो यैः ते तथोक्ताः । ते तव विद्विषः कृतोपकारा इव उपकृतवन्त इव जाता इति शेषः । अपकारोऽपि उपकाराय एव संवृत्तः, यदेषां दौर्जन्यं युष्मत्सौजन्यं च जगति सुव्यक्तम् आसीदित्यर्थः । विद्यमानस्यापि सुजनस्य चन्दनदारुण इव गुणाः परिभव एव प्रचुरीभवन्तीति भावः ॥ १६ ॥

अथ प्रयोजनान्तरमाह—लभ्येति । तव त्वया इत्यर्थः । "कृत्यानां कर्तरि वा" इति षष्ठी । धरित्री विक्रमेण लभ्या प्राप्तव्या । न च सुलभ्या तं विना इत्यर्थः । विपक्षश्च शत्रुरपि वीर्य्यं शौर्य्यम् अस्त्राणि आग्नेयादीनि बलानि सैन्यानि तैः ज्यायान् प्रशस्यतरः अधिकतर इति यावत् । ज्येष्ठस्य "ज्यायादीयसः" इति ज्यादेशः । अतः प्रकर्षाय आधिक्याय विधिः उपायो विधेयः कर्त्तव्यः । कुतः ? हि यस्मात् रणे जयश्रीः प्रकर्षतन्त्रा प्रकर्षप्रधाना उत्कर्षायत्ता इत्यर्थः । "तन्त्रं प्रधाने सिद्धान्ते" इत्यमरः । बलिन एव जयो न तु दुर्बलस्य इति भावः ॥ १७ ॥

१६। शमই তোমার একমাত্র শ্রেষ্ঠ অবলম্বন, এ হেন তোমার অপকার করিতে গিয়া শত্রুগণ আপনাদেরই অনর্থ ঘটাইয়াছে; তাহারা তোমার প্রজ্ঞা ও স্বভাবের প্রকর্ষ প্রখ্যাত করিয়া দিয়া তোমার উপকারই যেন করিয়াছে।

त्रिःसप्तकृत्वो जगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्य्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥
यस्मिन्ननैश्वर्य्यकृतव्यलीकः
पराभवं प्राप इवान्तकोऽपि ।
धुन्वन् धनुः कस्य रणे न कुर्य्या-
न्मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥

अन्वयः । (यदा) त्रिःसप्तकृत्वः जगतीपतीनां हन्ता गुरुः सः जामदग्न्यः, यस्य वीर्य्यावधूतः तदा गुणानां प्रकर्षम् आधारवशं विवेद स्म ॥ वाच्य—हन्ता गुरुणा तेन जामदग्न्येन वीर्य्यावधूतेन प्रकर्षः आधारवशः विविदे ॥ १८

अथ 'त्रिः" इत्यादिना श्लोकचतुष्टयेन विपक्षलक्ष्यीयस्त्वं वर्णयति—त्रिःसप्तेति । त्रिराहृत्तान् सप्त वारान् त्रिःसप्तकृत्वः एकविंशतिकृत्वः इत्यर्थः । त्रिःसप्तशब्दयोः सुप्सुपेति समासः । "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" इति कृत्वसुच् प्रत्ययः । जगतीपतीनां महीपतीनां हन्ता नाशको गुरुः अस्त्रवेदोपदेष्टा सः प्रसिद्ध इत्यर्थः । अतएव यच्छब्दानपेक्षत्वम् । तदुक्तं काव्यप्रकाशे—"प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दापादानं नापेक्षते" इति । जमदग्नेरपत्यं पुमान् जामदग्न्यः । "गर्गादिभ्यो यञ्" इति यञ्प्रत्ययः । यस्य भीष्मस्य वीर्य्यावधूतो विक्रमाभिभूतः अम्बिकाख्ययंवरे इत्यर्थः । तदा भङ्गप्राप्तिसमये गुणानां शौर्य्यादीनां प्रकर्षम् अतिशयं वीर्य्यातिशयम् आधारवशम् आश्रयाधीनं विविदे जज्ञे स्म । स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मात् अपि प्रकर्षाधानदर्शनादिति भावः । "स्म पादपूरणे भूतेऽर्थे च" इति ॥ १८

১৭। তোমাকে বিক্রম দ্বারাই ধরিত্রী লাভ করিতে হইবে ; কিন্তু তোমার শত্রু এখন শৌর্য্য, আগ্নেয়াদি অস্ত্র ও সৈন্য-সমৃদ্ধিতে অতীব শ্রেষ্ঠতা লাভ করিয়াছে ; অতএব তোমাকে এখন শৌর্য্যাদিবিষয়ে প্রকর্ষলাভার্থ উপায় অবলম্বন করিতে হইবে ; যেহেতু যুদ্ধে জয়শ্রী বলবান্ ব্যক্তিরই অধীন হইয়া থাকে।

১৮। যিনি একবিংশতি বার ক্ষত্রিয়গণের ধ্বংসসাধন করিয়াছিলেন, যিনি অস্ত্রবিদ্যার প্রসিদ্ধ উপদেষ্টা, সেই জমদগ্নিনন্দন পরশুরাম, অম্বিকাস্বয়ংবরে বীর্য্য শিক্ষা ভীষ্মের বিক্রমে পরাভূত হইয়া, বুঝিয়াছিলেন যে, শৌর্য্যাদি গুণের উৎকর্ষ সৎপাত্রেরই আয়ত্ত হইয়া থাকে।

सृजन्तमाजाविषुसंहतीर्वः
सहेत कोपज्वलितं गुरुं कः ?
परिस्फुरल्लोलशिखाग्रजिह्वं
जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

অন্বয়:। যস্মিন্ অনৈশ্বর্যকৃতব্যলীক: অন্তক: অপি পরাভবং প্রাপ্ত ইব, স: ভীষ্ম: রণে ধনু: ধুন্বন্ কস্য মন: ভয়ৈকপ্রবণং ন কুর্যাৎ। বাচ্য—...ব্যলীকেন অন্তকেন প্রাপ্ত: পরাভব ইব, তেন ভীষ্মেণ ধুন্বতা ন ক্রিয়েত ॥ ১৯

অন্বয়:। আজৌ ইষুসংহতী: সৃজন্তং কোপজ্বলিতম্ (অতএব) পরিস্ফুরল্লোলশিখাগ্রজিহ্বং জগৎ জিঘৎসন্তম্ অন্তবহ্নিম্ ইব গুরুং (দ্রোণং) ব: ক: সহেত ? বাচ্য—সৃজন্ জ্বলিত: ...জিহ্ব:...সন্ অন্তবহ্নি: ইব গুরু: কেন সহ্যেত ॥ ২০

यस्मिन्निति। यस्मिन् भीष्मे विषये अनैश्वरस्य भावोऽनैश्वर्यम् असामर्थ्यम्। "नञ: शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्" इति विकल्पान्नञ: पूर्वपदवृद्धभाव:। तेन कृतव्यलीको जनितवैलक्ष्य:। "दु:खे वैलक्ष्ये व्यलीकम्" इति यादव:। अन्तकोऽपि यमोऽपि पराभवं प्राप्त इव, भीष्मस्य इच्छामरणत्वात् अन्तकोऽपि पराजित इव आस्ते किमुत अन्य इति भाव:। स भीष्मो रणे धनुर्धुन्वन् कस्य मनो भयैकप्रवणं भये एकप्रवणम् एकोन्मुखं, शिवभागवतवत् समास:। न कुर्यात् ? सर्वस्य अपि मनसि भयं कुर्यादेवेत्यर्थ: ॥ १९ ॥

सृजन्तमिति। आजौ रणे इषुसंहतीर्बाणसङ्घान् सृजन्तं वर्षन्तं कोपज्वलितम् अतएव परिस्फुरन्त्यो लोलाश्च शिखाग्राणि एव जिह्वा यस्य तं तथोक्तं जगत् लोकं जिघत्सन्तम् अत्तुम् इच्छन्तम्। अदे: सन्नन्तात् शतृप्रत्यय:। "लुङ्सनोर्घ्लि" इति घस्लृ आदेश:। अन्तवह्निं कालाग्निम् इव स्थितं गुरुं द्रोणं व: युष्माकं मध्ये क: सहेत ? सोढुं शक्नुयात् न कोऽपीत्यर्थ:। "शकि लिङ् च" इति शक्यार्थे लिङ् ॥ २০

১৯। অন্যের কথা কি বলিব, যমও যাঁহার নিকট অসামর্থ্যবশতঃ লজ্জা প্রাপ্ত হইয়া পরাভূত ব্যক্তির ন্যায় অবস্থান করিতেছেন, সেই ভীষ্ম রণক্ষেত্রে কার্মুক কম্পিত করিলে কাহার মনে না ভীতি উৎপাদন করেন ?

২০। যিনি যুদ্ধে অজস্র বাণজাল বর্ষণ করেন, চঞ্চল শিখারূপ জিহ্বা সমুজ্জ্বল, জগদ্গ্রাসে সমুদ্যত প্রলয়ানলের ন্যায় ক্রোধপ্রজ্বলিত দ্রোণাচার্যকে রণে তোমাদিগের মধ্যে কে সহ্য করিতে পারে ?

निरीक्ष्य संरम्भनिरस्तधैर्य्यं
राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु
जायेत मृत्योरपि पक्षपातः ॥ २१ ॥
यया समासादितसाधनेन
सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्य्यम्
उन्मूलितारः कपिकेतनेन ॥ २२ ॥

अन्वयः । संरम्भनिरस्तधैर्य्यम् आराधितजामदग्न्यं राधेयं निरीक्ष्य मृत्योः अपि असंस्तुतेषु भयेषु प्रसभं पक्षपातः जायेत ॥ वाच्य—पक्षपातेन ॥ २१

अन्वयः । यया सुदुश्चरां तपस्याम् आचरता समासादितसाधनेन कपिकेतनेन दुरापं वीर्य्यं समवाप्य एते (भीष्मादयः) उन्मूलितारः । हे नृप ! महास्त्रयोगाय महामहिम्नां देवतानाम् आरा-

निरीक्ष्येति । संरम्भेण कोपेन निरस्तं त्याजितं धैर्य्यं निर्विकारचित्तत्वं येन तं तथोक्तम् । आटोपेन एव परधैर्य्यापहारिणम् इत्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवं जामदग्न्यात् अधिगतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् । "स्त्रीभ्यो ढक्" । निरीक्ष्य मृत्योरपि असंस्तुतेषु अपरिचितेषु । "संस्तवः स्यात्परिचयः" इत्यमरः । भयेषु प्रसभं पक्षपातः परिचयो जायेत । मृत्युरपि अस्मात् बिभीयात् किमुत अन्य इति भावः । सम्भावनायां लिङ् । अत्र जनिक्रियापेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्सम्भवात् निरीक्ष्येति ल्यप्-निर्देशः समर्थनीयः । "प्रधानोपसर्जनभावस्त्वप्रयोजकः" इति व्यक्तिविवेककारः । अत्र भयसम्बन्धरहितस्य मृत्योः भयसम्बन्धाभिधानात् असम्बन्धे सम्बन्धरूपा अतिशयोक्तिः अलङ्कारः ॥ २१ ॥

अथ अनन्तरं करणीयम् आगमनप्रयोजनस्य युग्मेनाह—ययेति । यया विद्यया करणेन सुदुश्चराम् अतिदुष्करां तपस्यां तपश्चर्य्याम् । "कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः" इति क्यङ् । "अप्रत्ययात्" इति स्त्रियाम् अप्रत्ययः । आचरता । पशुपतिं प्रति तपः कुर्वता इत्यर्थः । अतएव समा-

२१ । যিনি কোপযুক্ত আকার দ্বারাই পরের ধৈর্য্য অপহরণ করেন, পরশুরামের শুশ্রূষা করিয়া যিনি সমস্ত অস্ত্ররহস্য শিক্ষা করিয়াছেন, সেই রাধাসুত কর্ণকে নিরীক্ষণ করিলে কখনও যে ভয় উপস্থিত হয় নাই, ঐরূপ অপরিচিত ভয়ে যমরাজও মহা ব্যাকুল হইয়া থাকেন।

महत्त्वयोगाय महामहिम्ना-
माराधनीं तां नृप देवतानाम् ।
दातुं प्रदानोचित ! भूरिधाम्नीम्
उपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥
इत्युक्तवन्तं व्रज साधयेति
प्रमाणयन् पाक्ष्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद
वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

धनीं भूरिधाम्नीं तां विद्यां सिद्धिम् इव ; हे प्रदानोचित ! दातुम उपागतः अस्मि (अहम्) ॥ वाच्य—(मया) आचरन्—साधनः कपिकेतनः एतान् उन्मूलयिता ॥ (उपागतेन भूयते मया) ॥ २२—२३ ॥

अन्वयः । इति उक्तवन्तं प्रसेदिवांसं तं (मुनिं) जिष्णुः 'व्रज' 'साधय' इति अजातशत्रोः वाक्यं प्रमाणयन् अन्तेवसन् इव विनयेन उपाससाद ॥ वाच्य—जिष्णुना प्रमाणयता अन्तेवसता इव उक्तवान् प्रसेदिवान् सः मुनिः उपसेदे ॥ २४

सादितं प्राप्तं साधनं पाशुपतास्त्ररूपं येन तेन कपिः हनूमान् केतनं चिह्नं यस्य तेन अर्जुनेन इत्यर्थः । दुरापम् अन्यस्य दुर्लभं वीर्यं तेजः समवाप्य एते पूर्वोक्ता भीष्मादयः उन्मूलितार उन्मूलयिष्यन्ते । उन्मूलयतेर्ण्यन्तात् कर्मणि लुट् । अत्र चिण्वदिडागमेऽपि तस्य असिद्धवद्भावात् इति असिद्धत्वात् "णेरनिटि" इति णिलोपः, तन्निमित्तस्य एव "अनिटि" इति निषेधात् । उक्तञ्च—"चिण्वदट्वृद्धिर्युक्चहन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणोति । इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं बलनिमित्तो विधातौ" इति ॥ २२

महत्त्वेति । नृप ! महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानाम् इन्द्रादीनाम् आराध्यते अनयेति आराधनीं तां प्रसादयित्रीम् इत्यर्थः । करणे ल्युट् ङीप् । भूरिधाम्नीं महाप्रभावाम् । "धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः" इति विश्वः । "अन उपधालोपिनोऽन्यतरस्याम्" इति वा ङीप् । विद्याम् ऐन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिम् इव इति विद्यायाः अमोघत्वोक्तिः । हे प्रदानोचित ! दानपात्र ! प्रभूतफलभोक्तृत्वात् अस्य पात्रत्वोक्तिः । दातुम् उपागतोऽस्मि ॥ २३ ॥

२२—२३ । হে দানোচিতপাত্র নৃপ ! কপিধ্বজ অর্জ্জুন যে বিদ্যাদ্বারা পশুপতির অতি দুষ্কর তপশ্চরণ করিয়া পাশুপতাস্ত্র লাভ করত এই ভীষ্মাদি বীরগণের উচ্ছেদ সাধন করিবেন, উৎকর্ষলাভের জন্য মহৈশ্বর্য্যসম্পন্ন ইন্দ্রাদি দেবগণেরও আরাধ্যা মহাপ্রভাবশালিনী সাক্ষাৎ সিদ্ধির ন্যায় সেই বিদ্যা দান করিব বলিয়া আমি সমাগত হইয়াছি।

निर्याय विद्याय दिनादिरम्याद्-
विम्बादिवार्कस्य मुखात् महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥
योगञ्च तं योग्यतमाय तस्मै
तपःप्रभावाद् वितनार सद्यः ।
येनाऽस्य तत्त्वेषु कृतेऽवभासे
समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥

अन्वयः । अथ वह्निकणावदाता विद्या दिनादिरम्यात् अर्कस्य विम्बादिव महर्षेः मुखात् निर्याय दीप्तिः स्फुरत् पद्मम् इव पार्थाननम् अभिपेदे ॥ वाच्य—दात्या विद्यया दीप्त्या ॥२५॥

अन्वयः । (सः) योग्यतमाय तस्मै तं योगं च तपःप्रभावात् सद्यः वितनार । येन योगेन तत्त्वेषु तस्य अवभासे कृते अस्य चक्षुः चिराय समुन्मिमीलेव । तेन स योगः वितनरे । चक्षुषा—समुन्मिमीलेव ॥ २६

इतीति । उक्तवन्तं प्रसेदिवांसं प्रसन्नम् । "भाषायां सदवसश्रुवः" इति क्रसुः । तं मुनिं जिष्णुः जयशीलोऽर्जुनः । "ग्लाजिस्थश्च" इति ग्स्नु प्रत्ययः । व्रज साधय अनुतिष्ठ इति एवंरूपम् अजातशत्रोः धर्मराजस्य स्वयम् अविद्वेषणशीलत्वात् इयं संज्ञा । वाक्यं प्रमाणयन् तदादिष्टः सन्नित्यर्थः । अन्ते वसन् छात्र इव । "छात्रान्ते वासिनौ शिष्ये" इत्यमरः । विनयेन अनौद्धत्येन उपाससाद समीपं प्राप ॥ २४ ॥

निर्यायेति । अथ वह्निकणावदाता स्फुलिङ्गवत् उज्ज्वला देवतासान्निध्यादिति भावः । विद्या ऐन्द्रमन्त्ररूपा दिनादिरम्यात् अर्कस्य प्रभातभास्करस्य विम्बादिव महर्षेः व्यासस्य मुखात् निर्याय निर्गत्य, समासेऽनञ्पूर्वे क्त्वो ल्यप् । दीप्तिः अर्कदीधितिः स्फुरद् विकसत् पद्ममिव । पार्थाननम् अर्जुनस्य मुखम् अभिपेदे प्रविष्टा ॥ २५ ॥

२४ । সেই প্রসন্নাত্মা ঋষি বেদব্যাস এইরূপ বলিলে 'জয়শীল অর্জ্জুন যাও, সাধন কর' অজাতশত্রু ধর্ম্মরাজের এই আদেশবাণী গ্রহণ করিয়া শিষ্যের ন্যায় বিনয়সহকারে ঋষির সমীপে উপনীত হইলেন।

২৫ । অনন্তর প্রভাতরমণীয় দিবাকরের প্রতিবিম্ব হইতে প্রদীপ্ত কিরণ যেরূপ বিকসিত পদ্মে প্রবেশ করে, তদ্রূপ সেই মহর্ষির মুখ হইতে অগ্নিস্ফুলিঙ্গবৎ ঐন্দ্রমন্ত্ররূপিণী মহাবিদ্যা বহির্গত হইয়া অর্জ্জুনের আননে প্রবেশ করিল।

আকারমাশংসিতভূরিলাভং
দধানমন্তঃকরণানুরূপম্।
নিয়োজয়িষ্যন্ বিজয়োদয়ে তং
তপঃসমাধৌ মুনিরিত্যুবাচ ॥ ২৬ ॥
অনেন যোগেন বিবৃদ্ধতেজা
নিজাং পরস্মৈ পদবীমযচ্ছন্।

অন্বয়ঃ। আশংসিতভূরিলাভম্ অন্তঃকরণানুরূপম্ আকারং দধানং তং (অর্জ্জুনং) মুনিঃ বিজয়োদয়ে তপঃসমাধৌ নিয়োজয়িষ্যন্ ইতি উবাচ ॥ বাচ্য—নিয়োজয়িষ্যতা মুনিনা দধত্ (সঃ) ঊচে ॥ ২৬

যোগং চেতি। [সঃ] যোগ্যতমায় অর্হতমায় তস্মৈ পার্থায় তং বক্ষ্যমাণ-মহিমানং যোগং ধ্যানবিধিং চ। "যোগঃ সন্নহনোপায়ধ্যানসঙ্গতিযুক্তিষু" ইত্যমরঃ। তপঃপ্রভাবাৎ সদ্যো বিততার দদৌ, চিরকালগ্রাহ্যমপীতি ভাবঃ। যেন যোগেন তত্ত্বেষু প্রকৃতিমহদাদিষু। তথাচ—"মূলপ্রকৃতিঃ মহান্ অহঙ্কারো মনশ্চ, পঞ্চ তন্মাত্রাণি, পঞ্চ বুদ্ধীন্দ্রিয়াণি, পঞ্চ কর্মেন্দ্রিয়াণি, পঞ্চ মহাভূতানি" ইতি চতুর্বিংশতিতত্ত্বানি। তত্ত্ব অবভাসে সাক্ষাত্কারে ক্রতে সতি অস্য অর্জুনস্য চক্ষুঃ অক্ষি চিরায় সমুন্মিমীলেব উন্মিষিতমিব ইত্যুত্প্রেক্ষা। তদা তস্য কোঽপি মহান্ অখিলাজ্ঞানভঞ্জনঃ তত্ত্বাবভাসঃ চিরাত্ অন্ধস্য দৃষ্টিলাভ ইব অভবদিতি ভাবঃ ॥ ২৬ ॥

আকারমিতি। আশংসিত আখ্যাতো ভূরিলাভো অনেকশ্রেয়ঃপ্রাপ্তিঃ যেন তং তথোক্তং মহাভাগ্যসূচকম্ ইত্যর্থঃ। অন্তঃকরণশব্দেন তদ্বৃত্তি-রুত্সাহো লক্ষ্যতে। তদনুরূপং তদনুকূলম্ উত্সাহানুগুণব্যাপারত্বেন ইত্যর্থঃ। আকারং মূর্ত্তিং দধানং তম্ অর্জুনং মুনির্বিজয়োদয়ে বিজয়-ফলকে তপঃসমাধৌ তপোনিয়মে। "সমাধির্নিয়মে ধ্যানে মৌনে [নীবাকে চ] চৈব সমর্থনে" ইতি বিশ্বঃ। নিয়োজয়িষ্যন্ নিয়োজয়িতুম্ ইচ্ছন্নিত্যর্থঃ। "লৃটঃ শেষে চ" ইতি লৃট্। "লৃটঃ সদ্বা" ইতি সত্প্রত্যয়ঃ। ইতি বক্ষ্যমাণম্ উবাচ ॥ ২৬ ॥

২৬। ঋষি তখন তপঃপ্রভাবে সেই যোগ্যতম অর্জুনকে ধ্যানবিধি প্রদান করিলেন। সেই ধ্যানের এমনই প্রভাব যে, ধ্যানবলে প্রকৃতি-মহদাদি চতুর্ব্বিংশতি তত্ত্বের সাক্ষাৎকার সত্ত্বেও অর্জ্জুনের নয়ন যেন বহুসময় উন্মীলিত হইয়াই রহিল।

২৭। অর্জ্জুন মহাসৌভাগ্যসূচক, উৎসাহানুরূপ কার্য্যক্ষম আকৃতি ধারণ করিয়াছিলেন। মুনি তাঁহাকে বিজয়প্রাপ্তির জন্য তপঃসমাধিতে নিযুক্ত করিবার অভিলাষে বক্ষ্যমাণ বাক্য বলিয়াছিলেন।

समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥
करिष्यसे यत्र सुदुश्चराणि
प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारु शिलोच्चयं त-
मेष क्षणात् नेष्यति गुह्यकस्त्वाम् ॥ २९ ॥
इति ब्रुवाणेन महेन्द्रसूनुं
महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षात्
प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

अन्वयः । अनेन योगेन विद्युत्तेजा निजां पदवीं परस्मै अयच्छन् उपात्तशस्त्रः सन् (त्वं) जपोपवासाभिषवैः मुनीनां आचारं समाचर ॥ वाच्य—विद्युत्तेजसा अयच्छता उपात्तशस्त्रेण (त्वया) आचारः समाचर्यताम् ॥ २८

अन्वयः । यत्र शिलोच्चये गोत्रभिदः प्रसत्तये सुदुश्चराणि तपांसि करिष्यसे चारुशिलोच्चयं तं शिलोच्चयं त्वाम् एष गुह्यकः क्षणात् नेष्यति ॥ वाच्य—करिष्यन्ते (त्वया) अनेन गुह्यकेन त्वं नेष्यसे ॥ २९

अनेन इति । अनेन स्वोपदिष्टेन योगेन विद्युत्तेजाः निजां पदवीं परस्मै अयच्छन् परस्य प्रवेशम् अयच्छन्निित्यर्थः । उपात्तशस्त्रो निगृहीतायुधः सन् । हे अर्जुन ! जपोपवासाभिषवैः स्वाध्यायानशनस्नानैः मुनीनाम् आचारं समाचर अनुतिष्ठ ॥ २८ ॥

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तं निदर्शयन्नाह—करिष्यसे इति । यत्र शिलोच्चये गोत्रभिदः इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे । चारुशिलोच्चयं रम्यशिखरं तं शिलोच्चयं गिरिम् इन्द्रकीलरूपम् । "अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः" इत्यमरः । त्वाम् एष गुह्यको यक्षः । अनन्तरम् एव अस्य पुरःप्रादुर्भावात् एष इति निर्देशः । क्षणात् नेष्यति प्रापयिष्यति ॥ २९ ॥

२८ । (मुनि বলিলেন—হে অর্জ্জুন !) আমি যে তোমাকে যোগ উপদেশ করিলাম, তুমি ইহা দ্বারা তেজীয়ান্ হইয়া নিজ পথে অপরের প্রবেশে বাধা দিয়া অস্ত্র গ্রহণপূর্ব্বক জপ, উপবাস ও স্নানাদি মুনিবৃত্তি আচরণ কর ।

২৯ । তুমি পর্ব্বতপক্ষচ্ছেদী ইন্দ্রের প্রসাদলাভার্থ, যে মনোরমশিখর ইন্দ্রকীল পর্ব্বতে সুদুষ্কর তপস্যা করিবে, এই গুহক তোমাকে ক্ষণকালমধ্যে সেই স্থানে লইয়া যাইবে ।

कृतानतिर्व्याहृतसान्त्ववादे
जातस्पृहः पुण्यजनः स जिष्णौ।
इयाय सख्याविव सम्प्रसादं
विश्वासयत्याशु सतां हि योगः॥ ३१॥
अथोष्णभासेव सुमेरुकुक्षान्
विहीयमानानुदयाय तेन।

अन्वयः। इति महेन्द्रसूनुं ब्रुवाणेन तेन महर्षिणा तिरोबभूवे। राजराजानुचरः अस्य (मुनेः) साक्षात् आदेशम् इव तम् प्रदेशम् अधितष्ठौ॥ वाच्य —ब्रुवाणः स महर्षिः तिरोबभूव। राजराजानुचरेण साक्षात् आदेश इव सः प्रदेशः अधितष्ठे॥ ३०

अन्वयः। स पुण्यजनः कृतानतिः जातस्पृहः व्याहृतसान्त्ववादे जिष्णौ सख्यौ इव सम्प्रसादम् इयाय। हि सतां योगः आशु विश्वासयति॥ वाच्य —पुण्यजनेन तेन कृतानतिना जातस्पृहेण सम्प्रसादः ईये, योगेन विश्वास्यते॥ ३१

इतीति। इति इत्थं महेन्द्रसूनुम् अर्जुनं ब्रुवाणेन उक्तवता। "वर्त्तमानसामीप्ये" इति भूते वर्त्तमानवत् प्रत्ययः, तिरोधानस्य अविलम्बसूचनार्थः। तेन महर्षिणा व्यासेन तिरोबभूवे अन्तर्दधे। भावे लिट्। राजराजो यक्षराजः। "राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रिय-शक्रयोः" इति विश्वः। तस्य अनुचरः पूर्वोक्तयक्षः अस्य मुनेः आदेशं साक्षात् इव तं प्रदेशम् अर्जुनाधिष्ठितस्थानम् अधितष्ठौ प्राप्त इत्यर्थः। "स्यादिष्वभ्यासेन चाभ्यासस्य" इति षत्वम्॥ २०॥

कृतेति। स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः। जातस्पृहो जाता स्पृहा आकाङ्क्षा यस्य तथा सन्। व्याहृतः उक्तः सान्त्ववादः प्रियवचनं येन तस्मिन्। "व्याहार उक्तिर्लपितम्" इत्यमरः। जिष्णौ अर्जुने जातस्पृहः जातानुरागः सन् सख्यौ सुहृदि इव। "अथ मित्रं सखा सुहृत्" इत्यमरः। सम्प्रसादं विश्रम्भम् इयाय प्राप। तथाहि— सतां साधूनां योगः सङ्गतिः आशु विश्वासयति विश्वासं जनयति हि। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ ३१॥

३०। ऋषिवर व्यासदेव महेन्द्रनन्दन अर्জ্জুনকে এইরূপ বলিতে বলিতে অন্তর্হিত হইলেন, যক্ষানুচর গুহ্যকও সেই ঋষির মূর্ত্তিমান্ আদেশের ন্যায় অর্জ্জুনের সমীপে আসিয়া উপস্থিত হইল।

৩১। সেই যক্ষ সস্পৃহ হইয়া প্রিয়ভাষী জয়শীল অর্জ্জুনের নিকট প্রণত হইল এবং বন্ধুজনের ন্যায় অর্জ্জুনের প্রতি অনুরক্ত হইয়া বিশ্বাসস্থাপন করিল। (ইহা উপযুক্তই হইয়াছিল, কেননা) সাধুসঙ্গতি আশুই বিশ্বাস জন্মাইয়া থাকে।

बृहद्द्युतीन् दुःखकृतात्मलाभं
तमः शनैः पाण्डुसुतान् प्रपेदे ॥ ३२ ॥
असंशयालोचितकार्य्यनुन्नः
प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभि-
र्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥

अन्वयः । अथ उष्णभासा उदयाय विहीयमानान् बृहद्द्युतीन् सुमेरुकुञ्जान् इव तेन विहीयमानान् पाण्डुसुतान् दुःखकृतात्मलाभं तमः शनैः प्रपेदे ॥ वाच्य—...लाभेन तमसा सुमेरुकुञ्जाः विहीयमाना इव ययुः तमः पाण्डुसुताः प्रपेदिरे ॥ ३२

अन्वयः । असंशयालोचितकार्य्यनुन्नः प्रेम्णा समानीय विभज्यमानः सः दुःखातिभारः अपि तन्मनोभिः तुल्यात् विभागात् इव लघुः मेने ॥ वाच्य—नुन्नं विभज्यमान...भारं लघुं तन्मनांसि मेनिरे ॥ ३३

अथेति । अथ उष्णभासा सूर्य्येण उदयाय पुनः उद्गमाय विहीयमानान् त्यज्यमानान् इति तमःप्राप्तिकारणोक्तिः बृहद्द्युतीन् सौवर्णत्वात् दीप्यमानान् इत्यर्थः । इति तमसः सङ्कोचकारणोक्तिः । सुमेरुकुञ्जान् इव अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थं, तेन अर्जुनेन उदयाय श्रेयसे विहीयमानान् बृहद्द्युतीन् अनेकवृद्धिप्रकाशान् । पूर्ववद्विशेषणद्वयस्य प्रयोजनम् अनुसन्धेयम् । पाण्डुसुतान् चतुर इति शेषः । दुःखेन क्लेशेन कृतः उपपादितः आत्मलाभः उत्पत्तिः यस्य तत् तथोक्तम् तेषां विवेकित्वात् कथञ्चिद्विलम्बोदयम् इत्यर्थः । तमः शोकः अन्धकारश्च । "तमोऽन्धकारे खर्भानौ तमः शोके गुणान्तरे" इत्युभयत्रापि विश्वः । शनैः मन्दं प्रपेदे तेषां विवेकित्वाद् भीतभीतमिवेति भावः । अत्र तमःशब्दस्य श्लिष्टत्वात् श्लेषानुप्राणिता इयम् उपमा ॥ ३२ ॥

असंशयेति । असंशयम् असन्दिग्धं यथा तथा आलोचितं विवेचितं यत् कार्य्यं तेन नुन्नो निरस्त इति लघुत्वहेतूक्तिः । "नुदविदोन्दत्राघ्राह्वीभ्योऽन्यतरस्याम्" इति निष्ठानत्वम् । कार्य्यगौरवम् आलोच्य निरस्त इत्यर्थः । तथापि प्रेम्णा भ्रातृत्वात्सल्येन कर्त्रा । समानीय पुनः आकृष्य विभज्यमानः

३२ । सूर्यकर्तृक परित्यक्त सुमेरुर समुज्ज्वल कुञ्जसमूह अन्धकार आसिया येमन क्रमे अल्प अल्प परिमाणे प्रवेश करे, तेमन विजयलाभार्थ अर्जुन यात्रा करिले ताहार विरहजनित शोक कथञ्चित् आत्मसत्ता लाभ करिया विवेकसम्पन्न अपर पाण्डवचतुष्टयके धीरे धीरे आश्रय करिल ।

धैर्य्येण विश्वास्यतया महर्षे-
स्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्य्यञ्च विद्वत्सु सुते मघोनः
स तेषु न स्थानमवाप शोकः ॥ ३३ ॥
तान् भूरिधामश्चतुरोऽपि दूरं
विहाय यःमानिव वासरस्य ।

অন্বয়: । धैर्य्येण महर्षे: विश्वास्यतया अरातिप्रभवात् तीव्रात् मन्यो: मघोन: सुते वीर्य्यं च विद्वत्सु तेषु स शोक: स्थानं न अवाप ॥ বাক্য—তেন শোকেন ন অবাপে ॥ ৩৪

समशोकभागो क्रियमाण: तुल्येन प्रेम्णा तुल्यदु:खत्वं भवतीति भाव: । स पूर्वोक्तो दु:खम् एव अतिभारोऽपि अतिभारभूतम् अपि दु:खमित्यर्थ: । तन्मनोभि: तेषां चतुर्णां पार्थानां मनोभि: तुल्यात् विभागादिव पूर्वोक्तात् प्रेमकृतात् समविभागात् इवेत्यर्थ: । वस्तुतस्तु विवेकात् एवेति भाव: । पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षार्थमनुवाददोष: । लघुर्मेने अमानि । यथा एकोऽनेकधा विभज्य बहुभिरुह्यमानो महान् अपि भारो लघु-र्मन्यते तद्वदित्यर्थ: ॥ ३३ ॥

अथैवं प्रेम्णा आक्रम्यमाणम् अपि शोकं विवेको निर्जिगायेत्याह—धैर्य्येणेति । धैर्य्येण तेषां निसर्गतो निर्विकारचित्तत्वेन तथा महर्षे-र्व्यासस्य प्रवर्त्तकस्य इति शेष: । विश्वास्यतया श्रद्धेयवचनत्वेन इत्यर्थ: । अरातिप्रभवात् अरातिहेतुकात् तीव्रात् दु:सहात् मन्यो: क्रोधाद्धेतो: तथा अर्जुनप्रभावपरिज्ञानाच्चेति हेत्वन्तरं विशेषणमुखेनाह—मघोन: सुते अर्जुने वीर्य्यं च । "न लोक" इत्यादिना षष्ठीप्रतिषेध: । विद्वत्सु ज्ञातवत्सु इति यावत् । "विदे: शतुर्वसु:" इति वैकल्पिको वस्वादेश: । तेषु पार्थेषु स शोक: स्थानं स्थितिं न अवाप न प्राप ॥ ३४ ॥

৩৩। যুধিষ্ঠিরাদি পাণ্ডবচতুষ্টয়ের চিত্তচতুষ্টয় নি:সংশয়রূপে কার্য্যগৌরব আলোচনা করিয়া শোকভার দূর করিয়াছিল বটে ; কিন্তু ভ্রাতৃস্নেহবশত: পুনরায় সেই দুর্ব্বহ শোকভার টানিয়া আনিয়া তাহাকে বিভক্ত করিয়া লইল ; শোকভার দু:সহ হইলেও তুল্যরূপে [চতুর্দ্ধা] বিভক্ত হওয়ায় সকলের মনেই লঘু বলিয়া অনুভূত হইল।

৩৪। সেই পাণ্ডবচতুষ্টয়ের স্বাভাবিক ধৈর্য্য, এই ব্যাপারে প্রবর্ত্তক মহর্ষি বেদব্যাসের বাক্যে বিশ্বাস, শত্রুর কার্য্যে জাত তীব্র ক্রোধ ও ইন্দ্রনন্দন অর্জ্জুনের শৌর্য্যে আস্থা স্থাপনবশত: সেই ভ্রাতৃবিরহ শোক তাঁহাদের চিত্তে স্থান লাভ করিল না।

एकौघभूतं तदशर्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥
तुषारलेखाकुलितोत्पलाभे
पर्य्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा
न लोचने मीलयितुं विषेहे ॥ ३६ ॥

अन्वयः । तत् अशर्म भूरिधाम्नः चतुरः तान् अपि वासरस्य (भूरिधाम्नः) यामान् इव दूरं विहाय एकौघभूतं (सत्) [कृष्णां] विभावरीं ध्वान्तमिव कृष्णां प्रपेदे ॥ वाच्य—तेन अशर्मणा एकौघभूतेन सता ध्वान्तेन विभावरी इव कृष्णा प्रपेदे ॥ ३५

अन्वयः । सा (द्रौपदी) विलोकने अगूढभावा अपि मङ्गलभङ्गभीरुः (सती) पर्य्यश्रुणी तुषारलेखाकुलितोत्पलाभे लोचने मीलयितुं न विषेहे ॥ वाच्य—त्वया द्रौपद्या अगूढभावया मङ्गलभङ्गभीर्वा (सत्या) विषेहे । (सकर्मकले विषेहाते) ॥ ३६

तानिति । तत् पार्थत्यागजं [वत्] शर्म सुखम् । "शर्मशातसुखानि च" इत्यमरः । तद्विरुद्धम् अशर्म दुःखम् । "नञ्" इति नञ् समासः । भूरिधाम्नः तेजस्विन इति हानिहेतुत्वोक्तिः । चतुरः तान् पार्थान् अपि वासरस्य भूरिधाम्नः चतुरोऽपि यामान् प्रहरान् इव । दूरं विहाय त्यक्त्वा एकौघभूतम् एकराशिभूतं सत् । "श्येनादयः कृतादिभिः" इत्यर्थे कर्मधारयः । "श्येनादिराकृतिगणः" इति ग्राकटायनः । कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव । कृष्णां द्रौपदीं प्रपेदे प्राप ॥ ३५ ॥

तुषारेति । सा द्रौपदी विलोकने अर्ज्जुनावलोकने अगूढभावा अगूढाभिप्राया स्फुटाभिलाषिणी इति यावत्, अपि । "भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु" इति वैजयन्ती । मङ्गलभङ्गभीरुः मङ्गलहानेः भीता सती पर्य्यश्रुणी परिगतास्रुके वाष्पाप्लुते इत्यर्थः । अतएव तुषारलेखाकुलितोत्पलाभे हिमबिन्दुसहिते इन्दीवरसन्निभे इति उपमालङ्कारः । लोचने मीलयितुं न विषेहे न शशाक । अस्रुणोः दृष्ट्यावरकत्वे ऽपि तन्निपातस्य अमङ्गलत्वात् तन्निवर्त्तकं मीलनं सा न चकार इत्यर्थः ॥ ३६

३५ । अन्धकार যেরূপ প্রকাশমান দিবসীয় প্রহরচতুষ্টয় অতিক্রমপূর্ব্বক একরাশিভূত কৃষ্ণপক্ষ রজনীকে আশ্রয় করে, অর্জ্জুনের অদর্শনজনিত দুঃখও তদ্রূপ সেই মহাতেজঃসম্পন্ন পার্থচতুষ্টয়কে পরিত্যাগ করিয়া দ্রৌপদীর চিত্তে উপস্থিত হইল।

৩৬ । অর্জ্জুনকে অবলোকন করিবার জন্য দ্রৌপদীর অভিলাষ প্রকাশ পাইলেও তিনি

অকৃত্রিমপ্রেমরসাভিরামং
রামার্পিতং দৃষ্টিবিলোভি দৃষ্টম্ ।
মন:প্রসাদাঞ্জলিনা নিকামং
জগ্রাহ পাথেয়মিবেন্দ্রসূনু: ॥ ৩৭ ॥
ধৈর্য্যাবসাদেন হৃতপ্রসাদা
বন্যদ্বিপেনেব নিদাঘসিন্ধু: ।
নিরুদ্ধবাষ্পোদয়সন্নকণ্ঠ-
মুবাচ কৃচ্ছ্রাদিতি রাজপুত্রী ॥ ৩৮ ॥

অন্বয়: । ইন্দ্রসূনু: অকৃত্রিমপ্রেমরসাভিরামং দৃষ্টিবিলোভি রামার্পিতং দৃষ্টং মন:প্রসাদাঞ্জলিনা পাথেয়মিব নিকামং জগ্রাহ ॥ বাচ্য—ইন্দ্রসূনুনা জগ্রহে ॥ ৩৭

অন্বয়: । বন্যদ্বিপেন নিদাঘসিন্ধু: ইব ধৈর্য্যাবসাদেন হৃতপ্রসাদা রাজপুত্রী (দ্রৌপদী) নিরুদ্ধবাষ্পোদয়সন্নকণ্ঠং কৃচ্ছ্রাৎ উবাচ ॥ বাচ্য—নিদাঘসিন্ধ্বা হৃতপ্রসাদয়া রাজপুত্র্যা ঊচে ॥ ৩৮

অকৃত্রিমেতি । ইন্দ্রসূনু: অর্জুন: ক্রিয়য়া নিষ্পন্ন: কৃত্রিম: । "ডিত: ক্লিঃ" ইতি ক্লি: । "ত্রে মন্মিত্যম্" ইতি মম্প্রত্যয়: । তদ্বিরুদ্ধং প্রেমৈব রস: । অকৃত্রিমেণ প্রেমরসেন অভিরামম্ । দৃষ্টিং বিলোভয়তীতি দৃষ্টিপ্রিয়ম্ ইত্যর্থ:, দৃষ্টং দর্শনম্ । "নপুংসকে ভাবে ক্ত:" মন:প্রসাদ: প্রসন্নং মন ইত্যর্থ: । সোঽঞ্জলিরিব ইতি উপমিতসমাস: । তেন মন:প্রসাদাঞ্জলিনা পথি সাধু পাথেয়ং সম্বলমিব । "পথ্যতিথিবসতিস্বপতের্ঢঞ্" । নিকামম্ অতিশয়েন জগ্রাহ । রামার্পিতং পাথেয়ং পথি ক্ষেমায় ভবতি ইতি আগম: ॥৩৭

ধৈর্য্যেতি । বন্যদ্বিপেন বন্যগ্রহণম্ উচ্ছৃঙ্খলত্বদ্যোতনার্থং, নিদাঘসিন্ধু: গ্রীষ্মনদী ইব, নিদাঘগ্রহণং দৌর্ব্বল্যদ্যোতনার্থং, ধৈর্য্যাবসাদেন ধৈর্য্যভঙ্গেন কর্ত্রা হৃতপ্রসাদা হৃতনৈর্ম্মল্যা ক্ষোভং গমিতা ইত্যর্থ: । রাজপুত্রী ক্ষত্রিয়সুতা দ্রৌপদী, অত: ক্ষাত্রযুক্তম্ এব বক্ষ্যতি ইতি ভাব: । নিরুদ্ধবাষ্পোদয়ং সংরুদ্ধরোদনং সন্নকণ্ঠং হীনকণ্ঠস্বরম্ । অথ তয়ো: উভয়ো: কৃতবহ্নীন্দ্রো: ক্রিয়াবিশেষণয়ো: বিশেষণসমাস: । কৃচ্ছ্রাৎ কথঞ্চিদিতি বক্ষ্যমাণম্ উবাচ ॥ ৩৮ ॥

অমঙ্গলভয়ে তাঁহার তুষারাকুলিত ইন্দীবরসন্নিভ বাষ্পবারিপরিপূর্ণ নয়নদ্বয় উন্মীলন করিতে সমর্থ হইলেন না।

৩৭। ইন্দ্রনন্দন অর্জুন সেই অকৃত্রিম প্রেমরসাভিরাম দৃষ্টিপ্রিয় রমণীদৃষ্টি প্রসন্নচিত্তে অঞ্জলিদ্বারা পাথেয়ের ন্যায় পর্য্যাপ্তরূপে গ্রহণ করিলেন।

मग्नां द्विषच्छद्मनि पङ्कभूते
सम्भावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धे-
रस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥
यशोऽधिगन्तुं सुखलिप्सया वा
मनुष्यसङ्ख्यामतिवर्त्तितुं वा ।
निरुत्सुकानामभियोगभाजां
समुत्सुकैवाङ्कमुपैति सिद्धिः ॥ ४० ॥

अन्वयः । पङ्कभूते द्विषच्छद्मनि मग्नां सम्भावनां भूतिम् इव उद्धरिष्यन् आधिद्विषाम् तपसां प्रसिद्धेः आ अस्मद्विना भृशम् सा उन्मनीभूः ॥ वाच्य—उद्धरिष्यता (त्वया) सा उन्मनीभाविः ॥३९

अन्वयः । यशः अधिगन्तुं सुखलिप्सया वा, मनुष्यसंख्याम् अतिवर्त्तितुं वा अभियोगभाजां निरुत्सुकानां सिद्धिः समुत्सुका इव अङ्कम् उपैति ॥ वाच्य—सिद्ध्या समुत्सुकया इव अङ्कः उपेयते ॥ ४०

मग्नामिति । पङ्कभूते पङ्कोपमिते । "भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः" इति विश्वः । द्विषच्छद्मनि शत्रुकपटे मग्नां दुरुद्धराम् इत्यर्थः । सम्भावनां योग्यतां गौरवम् इति यावत् । भूतिं सम्पदमिव । "भूतिर्भस्मनि सम्पदि" इत्यमरः । उद्धरिष्यन् उद्धारकः त्वम् एव इति शेषः । आधिद्विषां दुःखच्छिदां तपसाम् आ प्रसिद्धेः सम्यक् सिद्धिपर्य्यन्तम् अस्मद्विना अस्माभिर्विना इत्यर्थः । "पृथग्विना" इत्यादिना विकल्पात् पञ्चमी । भृशं मा उन्मनीभूः अस्मद्विरहाद् दुर्मना मा भूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थित्वात् इति भावः । "माङि" इति आशीरर्थे लुङ् । "नमाङ्योगे" इत्याडागमप्रतिषेधः । अनुन्मना उन्मनाः सम्पद्यमानः उन्मनो अभूततद्भावे च्विः । "अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च" इति सकारलोपः । 'अस्य च्वौ' इतीकारः ॥ ३९ ॥

अथ अनीत्सुक्यदाढ्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह—यश इति ।

৩৮ । বস্তুহস্তী দ্বারা নিদাঘবনে যেরূপ কুব্জ হয়, তদ্রূপ ধৈর্য্যচ্যুতিবশতঃ কুব্জা রাজনন্দিনী দ্রৌপদী অতিকষ্টে রোদন সংরুদ্ধ করিয়া ক্ষীণকণ্ঠে বক্ষ্যমাণ বাক্য বলিলেন ।

৩৯ । শত্রুকৃত পঙ্কোপম কাপট্যে মগ্ন গৌরব-সম্পদের আপনিই উদ্ধারকর্ত্তা ; (কিন্তু) দুঃখনাশক তপস্যার সিদ্ধি না হওয়া পর্য্যন্ত আপনি আমাদের জন্য উৎকণ্ঠিত হইবেন না । কেননা অধৈর্য্যই তপস্যার পরম শত্রু ।

লোকং বিধাত্রা বিহিতস্য গোপ্তুং
ক্ষত্রস্য মুষ্ণন্ বসু জৈত্রমোজঃ।
তেজস্বিতায়া বিজয়ৈকবৃত্তে-
র্নিঘ্নন্ প্রিয়ং প্রাণমিবাভিমানম্ ॥ ৪১ ॥
ব্রীড়ানতৈরাপ্লবনোপনীতঃ
সংশয্য কৃচ্ছ্রেণ নৃপৈঃ প্রপন্নঃ।

অন্বয়ঃ। বিধাত্রা লোকং গোপ্তুং বিহিতস্য ক্ষত্রস্য জৈত্রং ওজঃ (তদেব) বসু মুষ্ণন্, বিজয়ৈকবৃত্তেঃ তেজস্বিতায়াঃ প্রিয়ং প্রাণম্ ইব অভিমানং নিঘ্নন্ ॥ বাচ্য—মুষ্যতা, নিঘ্নতা ॥ ৪১ ॥

যশঃ অধিগন্তুং কীর্ত্তিং লব্ধুম্ ইত্যর্থঃ। সুখস্য লিপ্সয়া লব্ধুমিচ্ছয়া বা। মনুষ্যসংখ্যাং মনুষ্যগণনাম্ অতিবর্ত্তিতুম্ অতিক্রমিতুম্ অমানুষং কর্ম্ম কর্ত্তুং বা ইত্যর্থঃ। অভিযোগভাজাম্ অভিনিবেশবতাং নিরুৎসুকানাম্ অনুৎসুকানাম্ অদুর্মনায়মানানাম্ ইত্যর্থঃ। সিদ্ধিঃ পূর্বোক্তযশঃসুখাদ্যর্থসিদ্ধিঃ সমুৎসুকা ইব অনুরক্তকান্তা ইব অঙ্কম্ অন্তিকম্ উপৈতি। তস্মাৎ অস্মদ্বিরহদুঃখম্ আ তপঃসিদ্ধেঃ সোঢ়ব্যম্ ইতি ভাবঃ ॥ ৪০ ॥

অথ অস্য মন্যুহীপনদ্বারা তপঃপ্রবৃত্তিং প্রথয়িতুম্ অরিনিকারং তাবদ্ধেতুভিঃ উদ্ঘাটয়তি—লোকমিতি। বিধাত্রা ব্রহ্মণা লোকং গোপ্তুং বিহিতস্য সৃষ্টস্য ক্ষত্রস্য ক্ষত্রিয়জাতেঃ সম্বন্ধি। জয়নশীলং জৈত্রং তদেব জৈত্রম্। জৈত্রশব্দাৎ তৃজন্তাৎ "প্রজ্ঞাদিভ্যশ্চ" ইতি স্বার্থে অণ্প্রত্যয়ঃ। ওজো বলং দীপ্তির্বা। "ওজো বলে চ দীপ্তৌ চ" ইতি বিশ্বঃ। তদেব বসু ধনমিতি রূপকালঙ্কারঃ। মুষ্ণন্ অপহরন্ অরিনিক্কৃতস্য কৃতঃ ক্ষাত্রং তেজ ইতি ভাবঃ। কিঞ্চ বিজয়ৈকবৃত্তেঃ বিজয়ৈকজীবিতায়াঃ। "ক্ষত্রিয়স্য বিজেতব্যম্" ইতি স্মরণাৎ ইতি ভাবঃ। "বৃত্তির্বর্ত্তনজীবনে" ইত্যমরঃ। তেজস্বিতায়াঃ তেজস্বিনাম্ ইত্যর্থঃ। তেজঃপ্রাধান্যদ্যোতনার্থং ভাবপ্রধানো নির্দ্দেশঃ। প্রিয়ং প্রাণম্ ইব প্রাণসমম্ ইত্যর্থঃ। অভিমানম্ অহঙ্কারং নিঘ্নন্ খণ্ডয়ন্ তেজস্বিনাং প্রাণহানিপ্রায়া মানহানিরিতি ভাবঃ ॥ ৪১ ॥

৪০। যশোলাভার্থ অথবা সুখলাভের জন্য কিংবা অমানুষিক কর্ম্ম করিবার জন্য অভিনিবিষ্ট উদ্বেগশূন্য মানবগণের অভীষ্টসিদ্ধি অনুরক্তা কান্তার ন্যায় ক্রোড়ে আসিয়া উপস্থিত হয়।

৪১। বিধাতা লোকরক্ষার্থ যে ক্ষত্রিয়জাতির সৃষ্টি করিয়াছেন; আপনি সেই ক্ষত্রিয়জাতির অয়নীল বলরূপ ধন বিনাশপূর্ব্বক, বিজয়ই যাঁহাদের জীবিকা, সেই তেজস্বী ক্ষত্রিয়দিগের প্রিয় প্রাণতুল্য অভিমান বিনষ্ট করিতেছেন।

वितानभूतं विततं पृथिव्यां
यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥
वीर्य्यावदानेषु कृतावमर्ष-
स्तन्वन्नभूतामिव सम्प्रतीतिम् ।
कुर्वन् प्रयासक्षयमायतीना-
मर्कत्विषामङ्क इवावशेषः ॥ ४३ ॥

अन्वयः । आप्तजनोपनीतः (तथापि) संगम्य व्रीड़ानतैः नृपैः क्रक्षेण प्रपन्नः पृथिव्यां वितानभूतं दिग्विकीर्णं विततं यशः समूहन् इव ॥ वाच्य—आप्तजनोपनीतेन प्रपन्नेन समूहता इव ॥ ४२ ॥

अन्वयः । वीर्य्यावदानेषु कृतावमर्षः (अतएव) सम्प्रतीतिम् अभूताम् इव तन्वन् अङ्कः अवशेषः अर्कत्विषाम् इव आयतीनां प्रयासक्षयं कुर्वन् ॥ वाच्य—कृतावमर्षेण तन्वता, अवशेषेण कुर्वता ॥ ४३ ॥

अधिक्षेपाद्यसहनं तेजः प्राणात्ययेषु अपि न त्याज्यम् इति आह—व्रीड़ेति । पुनश्च आप्तजनोपनीतः आप्तजनेन उपनीतः प्रापितः आवित इत्यर्थः । तथापि संगम्य सन्दिह्य असम्भावितबुद्ध्या इति भावः । व्रीड़ानतैः जुगुप्सितवृत्तान्तश्रवणात् इति भावः । नृपैः देशान्तरस्थैः क्रक्षेण प्रपन्नः प्राप्तः, आप्तोक्तत्वात् कथञ्चित् विश्वस्त इत्यर्थः । यः नृपवताम् अपि दुःसहः किमुत अनुभवताम् इति भावः इत्येषा पूर्वेषां व्याख्या । अन्यथा अपि व्याख्यायते,—आप्तजनोपनीतः ज्ञातिकृतः संगम्य कथम् इदम् अन्याय्यम् उपेक्ष्यम् इति विचार्य व्रीड़ानतैः जुगुप्सितकर्मदर्शनात् इति भावः । नृपैः सभास्थैः क्रक्षेण प्रपन्नः अङ्गीकृतः । गोत्रकलहेषु मध्यस्थैः उदासितव्यम् इति वृद्धा उपेक्षित इत्यर्थः । पक्षद्वयेऽपि प्रपन्न इत्यत्र आप्तजनोपनीतत्वस्य पदार्थभूतस्य विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः । पृथिव्यां वितानभूतम् उल्लोचोपमितम् । यद्वा वितानभूतं वितानसमम् उल्लोचतुल्यम् । "युक्ते च्छादाक्षते भूते प्राग्वंशे तोते समे त्रिषु" इत्यमरः । "अस्त्रीवितानमुल्लोचे" इत्यमरः । दिग्विकीर्णं दिगन्तलग्नं वितानमपि दिगन्तलग्नम् इति भावः । विततं प्रथितं यशः समूहन् इव सङ्कोचयन् इव इति उत्प्रेक्षा । अरातिपरिभूतस्य कुतः कीर्त्तिरिति भावः ॥ ४२

वीर्य्येति । पुनश्च वीर्य्याणि एव अवदानानि तेषु कृतावमर्षः कृता-

४२ । সভাস্থিত রাজগণ সুযোধনাদির অনুষ্ঠিত মদীয় কেশাকর্ষণরূপ নিন্দিত কর্ম্ম দর্শনে এই অন্যায্য কার্য্য জ্ঞাতিজনকৃত বিবেচনা করিয়া লজ্জায় অধোবদন হইয়া অতিকষ্টে উপেক্ষা করিলেও সেই পরিভব পৃথিবীর বিতানভূত দিগন্তলগ্ন তবদীয় যশ যেন সঙ্কুচিত করিতেছে।

प्रसह्य योऽस्मासु परैः प्रयुक्तः
स्मर्त्तुं न शक्यः किमुताधिकर्त्तुम्।
नवीकरिष्यत्युपशुष्यदार्द्रः
स त्वद् विना मे हृदयं निकारः॥ ४४॥
इति कलापकम्।

अन्वयः। परैः अस्मासु प्रसह्य प्रयुक्तः यः (निकारः) स्मर्तुं न शक्यः, अधिकर्त्तुं किमुत सः निकारः त्वद्विना आर्द्रः सन् उपशुष्यत् मे हृदयं नवीकरिष्यति॥ वाच्य—यूयेन येन न शक्येन (भूयते) तेन निकारेण आर्द्रेण नवीक्रियते।

स्कन्दनः। पुराकृतपराक्रमोद्भूतानि अपि प्रमृजन् इत्यर्थः। "अवदानं कर्म्म वृत्तम्" इत्यमरः। अतएव सम्प्रतीतिं ख्यातिम्। 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः" इत्यमरः। अभूताम् अविद्यमानाम् इव इति उत्प्रेक्षा। सतोऽपि असत्त्वम् उत्प्रेक्ष्यते। तन्वन् कुर्वन्। पुनश्च अङ्कः अवशेषः दिनान्तः अर्कत्विषाम् इव आयतीनाम् उत्तरकालानां प्रयामत्रयं दैर्घ्यं नाशं कुर्वन् इति श्रौतो पूर्णा इयम् उपमा। अरिनिराकृतस्य कृतस्थिरावस्थानम् इति भावः॥ ४३

प्रसह्येति। पुनश्च परैः शत्रुभिः अस्मासु प्रसह्य प्रयुक्तः आचरितः यः निकारः परिभवः केशाकर्षणरूपः स्मर्त्तुं न शक्यः, अधिकर्त्तुम् अनुभवितुं किमुत? यस्य स्मरणमपि दुःसहम् अनुभवस्तु सुतरां दुःसह इति किमुत वक्तव्यम् इत्यर्थः। स निकारः त्वद्विना त्वया विना। "पृथग्विना" इत्यादिना पञ्चमी। आर्द्रः सन् कुतश्चित् अभिभू[धा]तात् पुराणप्रहारः इव त्वद्विरहदुःखात् पुनः नवीकरिष्यति नवीभविष्यति इत्यर्थः। उपशुष्यत् त्वया विना शुष्कम् इति भावः। दुःखस्तम्भनं शोषदार्थः मे हृदयं नवीकरिष्यति आर्द्रीकरिष्यति व्रणम् इव इति भावः। दुःखितस्य पुनर्दुःखोपचयः प्रशान्तप्रायमपि दुःखहेतुं पुनरुद्घाटयति इत्यर्थः। अत्र शोषादिविशेषणसाम्यात् व्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलङ्कारः॥ ४४

४३। এই অরিপরাভব আপনাদের পূর্ব্বকৃত শৌর্য্যবীর্য্যের কার্য্য সকল বিলোপ করিয়া কখনও যেন কোন কীর্ত্তি হয় নাই, এরূপ ঘটাইতেছে এবং দিবসের শেষভাগ যেরূপ সূর্য্যকিরণের দীর্ঘতা বিনাশ করে, তদ্রূপ উত্তরকালের খর্ব্বতা সাধন করিতেছে।

৪৪। শত্রুগণ আমাদের প্রতি বলপূর্ব্বক কেশাকর্ষণরূপ যে অসদাচরণ করিয়াছে, তাহা স্মরণ করিতেও পারা যায় না, অনুভব যে কিরূপ দুঃসহ, তদ্বিষয়ে আর কি বক্তব্য? সম্প্রতি ভবদীয়

प्राप्तोऽभिमानव्यसनादसह्यं
दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः
शरद्घनाकीर्ण इवादिरर्कः ॥ ४५ ॥
सव्रीड़मन्दैरिव निष्क्रियत्वात्
नात्यर्थमस्वैरवभासमानः ।
यशःक्षयक्षीणजलार्णवाभ-
स्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥

अन्वयः । अभिमानव्यसनात् दन्तव्यसनात् दन्ती इव (त्वं) असह्यं विकारं प्राप्तः । द्विषत्प्रतापान्तरितोरुतेजाः (अतएव) शरद्घनाकीर्णः अर्कः आदिः इव (स्थितः) ॥ वाच्य—दन्तिना इव (त्वया) असह्यो विकारः प्राप्तः ।...तेजसा...कीर्णेन आदिना (स्थितम्) । ४५ ॥

अन्वयः । निष्क्रियत्वात् सव्रीड़मन्दैः इव अस्वैः अत्यर्थं न अवभासमानः । यशःक्षयक्षीणजलार्णवाभः त्वम् अन्यम् आकारम् अभिपन्नः इव ॥ वाच्य—'''मानेन...—मेन त्वया अन्यः आकारः अभिपन्नः ॥ ४६

पुनः प्रकारान्तरेण मन्युम् उद्दीपयति—"प्राप्तः" इत्यादिभिः त्रिभिः । अत्र वक्ष्यमाणप्रत्यभिज्ञानहेतुभिः धनञ्जयं विशिनष्टि । अभिमानस्य व्यसनात् भ्रंशात् । "व्यसनं विपदि भ्रंशे दोषे कामजकोपजे" इत्यमरः । दन्तव्यसनात् दन्तभङ्गात् दन्ती इव असह्यं विकारं वैरूप्यं प्राप्तः । अतो न प्रत्यभिज्ञायते इति भावः । एवम् उत्तरत्रापि अनुसन्धेयम् । पुनश्च द्विषत्प्रतापेन यत्तु तेजसा अन्तरितं तिरस्कृतम् उरु तेजः प्रतापो यस्य स तथोक्तः । अतएव शरद्घनाकीर्णः शरन्मेघाच्छन्नः अर्कः आदिः प्रत्यूषः इव स्थितः । तद्वत् एव अप्रत्यभिज्ञायमान इत्यर्थः । मध्याह्नस्तु मेघावरणेऽपि च कथञ्चित् प्रत्यभिज्ञायत एव इत्याशयेन उक्तम् आदिरिति ॥ ४५ ॥

सव्रीड़ेति । पुनश्च निष्क्रियत्वात् अर्थक्रियाशून्यत्वात् सव्रीड़मन्दैः इव सव्रीड़ैः अतएव मन्दैः अपटुभिः इव स्थितैः इति उत्प्रेक्षा । "मूढ़ाल्पापटुनिर्भाग्या मन्दाः स्युः" इत्यमरः । अस्वैः अत्यर्थं न अवभासमानः न

विरहে সেই পরিভব পুনরায় নূতন হইয়া আমার শুষ্ক হৃদয়কে আবার নূতনব্যথাগ্রস্ত করিয়া তুলিতেছে ।

४५—४६ । শত্রুগণের তেজে তোমার বিপুল তেজ আচ্ছাদিত হইয়াছে, তাই তুমি শরৎকালীন জলদাচ্ছন্ন সূর্য্যের ন্যায় অবস্থান করিতেছ । এবং অভিমানচ্যুতিবশতঃ দন্তভগ্ন দন্তীর ন্যায় অসহ

दुःशासनामर्षरजोविकीर्णै-
रेभिर्विनाथैरिव भाग्यनाथैः।
क्षीणैः कदर्थीकृतवीर्य्यसारः
कच्चित् स एवासि धनञ्जयस्त्वम् ॥ ४७ ॥

॥ विशेषकम् ॥

स क्षत्रियस्त्राणसहः सतां यः
तत् कार्मुकं कर्म्मसु यस्य शक्तिः।

अन्वयः। दुःशासनामर्षरजोविकीर्णैः (अतएव) विनाथैः इव भाग्यनाथैः एभिः (परिदृश्यमानैः) क्षीणैः कदर्थीकृतवीर्य्यसारः त्वम् सः एव धनञ्जयः असि कच्चित्॥ वाच्य—'''सारेण त्वया धनञ्जयेन भूयते॥ ४७

प्रकाश्यमानः पूर्वं तु नैवम् इति भावः। किन्तु यश्यःक्षयात् हेतोः क्षीणजलः यः अर्णवः तद्वाभः तत्सदृशः त्वम् अन्यम् आकारम् अभिपन्नः प्राप्तः इव स्थितः। इव इति उत्प्रेक्षा, तस्याः क्षीणजलार्णवाभः इति उपमासंसृष्टिः॥ ४६

दुःशासनेति। पुनश्च, दुःशासनस्य कर्त्तुः आमर्षः आमर्षणम् आकर्षणं सः एव रजः धूलिः मालिन्यहेतुत्वात् इति भावः। तेन विकीर्णैः विक्षिप्तैः अतएव विनाथैः इव स्थितवतां युष्माकम् असत्त्वप्रायत्वात् अनाथैः इव स्थितैः इति उत्प्रेक्षा। अन्यथा कथम् इयं दुर्दशा इति भावः। किन्तु भाग्यनाथैः दैवमात्रशरणैः। अन्यथा स्वरूपम् अपि लुप्येत इति भावः। एभिः परिदृश्यमानैः असंयमितैः इति भावः। क्षीणैः शिरोरुहैः कुत्सितः अर्थः वस्तु कदर्थः। "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः। "कोः कत्तत्पुरुषेऽचि" इति कुशब्दस्य कदादेशः। कदर्थीकृतौ गर्ह्यार्थीकृतौ वीर्य्यसारौ शौर्य्यबले यस्य सः तथोक्तः। इत्थं पूर्वविलक्षणः त्वं स एव धनञ्जयः असि कच्चित्? "कच्चित्कामप्रवेदने" इत्यमरः। स एव चेत् त्वं नैवमस्मान् उपेक्षसे इति भावः॥ ४७॥

विकार प्राप्त हইয়াছ। আর সম্প্রতি কোন কার্য্য না থাকায় লক্ষিত ও দুর্ভাগ্যের ন্যায় অবস্থিত অস্ত্রশস্ত্রসকলে তুমি পূর্ব্ববৎ নিরতিশয় দীপ্যমান হইতেছ না, কিন্তু কীর্ত্তিক্ষয়হেতু ক্ষীণজল জলাশয়ের ন্যায় অন্যরূপ আকার যেন ধারণ করিয়াছ। মদীয় অনাথবৎ অবস্থিত, দৈবমাত্রশরণাপন্ন, এই অসংযত কেশকলাপ দ্বারা তিরস্কৃত তুমিই কি সেই শৌর্য্যবীর্য্য সম্পন্ন অর্জ্জুন?

वहन् द्वयीं यद्यफलेऽर्थजाते
करोत्यसंस्कारहतामिवोक्तिम् ॥ ४८ ॥
वीतौजसः सन्निधिमात्रशेषा
भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः
सरूपतां पार्थ गुणा भजन्ते ॥ ४९ ॥

अन्वयः । यः सतां त्राणसहः सः क्षत्रियः ; यस्य कर्म्मसु शक्तिः तत् कार्मुकम् ; द्वयीम् उक्तिम् अफले अर्थजाते वहन् असंस्कारहतामिव करोति ॥ वाच्य—येन त्राणसहेन तेन क्षत्रियेण (भूयते) यस्या (भूयते) तेन कार्मुकेण (भूयते) वहता इदं क्रियते ॥ ४८

अन्वयः । हे पार्थ ! वीतौजसः सन्निधिमात्रशेषाः भवत्कृतां भूतिम् अपेक्षमाणाः त्वदीयाः गुणाः समानदुःखाः इव नः सरूपतां भजन्ते ॥ वाच्य—वीतौजोभिः...शेषैः अपेक्षमाणैः त्वदीयैः गुणैः समानदुःखैः इव सरूपता भज्यते ॥ ४९

अथाप्युपेक्षणे दोषमाह—स इति । क्षतात् त्रायते इति क्षत्रं क्षत्रियकुलम् । "सुपि" इति योगविभागात् कप्रत्ययः । पृषोदरादित्वात् पूर्वपदस्य अन्त्यलोपः । अथवा क्षदिति क्विबन्तोपपदात् कप्रत्ययः । क्षत्रे जातः क्षत्रियः । "क्षत्राद्घः" इति घप्रत्ययः । कर्म्मणे प्रभवति इति कार्मुकम् । "कर्म्मण उकञ्" इति उकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते—यः सतां साधूनां सहते इति सहः पचाद्यच् । यः त्राणस्य सहः त्राणसहो रक्षणक्षमः स एव क्षत्रियशब्दवाच्यः । तथा यस्य कार्मुकस्य कर्म्मसु रणक्रियासु शक्तिः अस्तीति शेषः । तदेव कार्मुकशब्दवाच्यम् । अत्रैव एतौ शब्दौ मुख्यौ न अन्यत्र इत्यर्थः । एवं स्थिते द्वयीं द्विविधाम् उक्तिं द्वौ द्वौ क्षत्रियकार्मुकशब्दौ इत्यर्थः । अफले पूर्वोक्तावयवार्थशून्ये अर्थजाते स्वाभिधेयसामान्यजातिमात्रे इत्यर्थः । "जातं जात्योर्जन्मसु" इति विश्वः । वहन् वर्त्तयन् असंस्कारहताम् अव्युत्पत्तिदूषिताम् इव करोति इति उत्प्रेक्षा । तस्मात् त्वम् अस्मद्रक्षणे न उक्तदोषात् आत्मानं मोचयस्व इत्यर्थः ॥ ४८ ॥

४८ । যিনি সাধুগণের রক্ষণক্ষম, তিনিই ক্ষত্রিয়পদবাচ্য ; আর যে কার্মুকের সমরসামর্থ্য বিদ্যমান, সেই কার্মুকই কার্মুক । (এ অবস্থায়) যে পুরুষ ক্ষত্রিয়কর্ত্তব্য না করিয়া ক্ষত্রিয় ও কার্মুক এই শব্দ দুইটীকে পূর্ব্বোক্ত ব্যুৎপত্তিলভ্য অর্থশূন্য ক্ষত্রিয়ত্ব ও কার্মুকত্ব এই জাতিমাত্র অর্থে পরিণত করেন, তিনি ঐ শব্দ দুইটীকে অব্যুৎপত্তিদোষে দুষ্ট করিয়া থাকেন ।

आक्षिप्यमाणं रिपुभिः प्रमादा-
न्नागैरिवालूनसटं मृगेन्द्रम्।
त्वां धूरियं योग्यतयाधिरूढ़ा
दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ५० ॥
करोति योऽशेषजनातिरिक्तां*
सम्भावनामर्थवतीं क्रियाभिः।

अन्वयः। प्रमादात् रिपुभिः आक्षिप्यमाणं नागैः आलूनसटं मृगेन्द्रम् इव त्वाम् इयं धूः तिग्मरश्मिं दीप्त्या दिनश्रीः इव योग्यतया अधिरूढा॥ वाच्या—आक्षिप्यमाणः आलूनसटः मृगेन्द्र इव त्वम् अनया धुरा तिग्मरश्मिः दिनश्रिया अधिरूढः॥ ५०

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह—वीतेति। हे पार्थ! वीतौजसः निष्प्रभाः सन्निधिमात्रशेषाः सत्तामात्रावशिष्टाः भवत्कृतां भवता करिष्यमाणाम्, "आशंसायां भूतवच्च" इति भूतवत्प्रत्ययः, भूतिम् अभ्युदयम् अपेक्षमाणाः त्वदीयाः गुणाः समानदुःखाः समदुःखभाजः इव नः अस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्ते इति उपमा, सा च समानदुःखा इव इति उत्प्रेक्षया वीतौजस्त्वादिसम्भावितया अनुप्राणिता इति अनुसन्धेयम्॥ ४९॥

तथापि ममैव कोऽयं भारः इत्यत आह—आक्षिप्येति। प्रमादात् प्रज्ञाहीनत्वात् न तु दौर्बल्यात् इति भावः। रिपुभिः आक्षिप्यमाणम् अधिक्षिप्यमाणम् अतएव प्रमादात् नागैः गजैः। "अहेर्भाङ्गिगजा नागाः" इति वैजयन्ती। आलूनसटम् आक्षिप्तकेशरम्। "सटा जटाकेशरयोः" इति विश्वः। मृगेन्द्रं सिंहम् इव स्थितं त्वाम् इयं धूः कार्यभारः तिग्मरश्मिं सूर्यं दीप्त्या दिनश्रीः इव योग्यतया निर्वाहकतया। अधिरूढा आरूढवती। कर्तरि क्तः। त्वदधीना इत्यर्थः॥ ५०॥

४९। हे पार्थ! বয়সস্তামাত্রে পর্য্যবসিত তবদীয় নিষ্প্রভ গুণনিচয় তুল্যদুঃখভাগী হইয়াই যেন আপনার অভ্যুদয়লাভের অপেক্ষা করিয়া আমাদিগের সারূপ্য গ্রহণ করিতেছে।

৫০। রিপুগণ প্রমাদবশে আপনাকে অভিভূত করিয়াছে; সুতরাং গজগণ প্রমাদক্রমে সিংহকে অভিভূত করিয়া তদীয় কেশরজাল বিক্ষিপ্ত করিলে তাহার যেরূপ অবস্থা হয়, আপনারও সেই অবস্থা হইয়া দাঁড়াইয়াছে। দিনশ্রী যেমন দীপ্তিনিমিত্ত সূর্য্যের শরণাপন্ন হয়, তেমনি এই কার্য্যভারও যোগ্যতাহেতু একণ আপনাকেই আশ্রয় করিতেছে।

* অত্র सम्भावनातिरिक्तामिति बहुषु मुद्रितपुस्तकेषु पाठो दृश्यते, परं नासौ मल्लिनाथाभिमतः।

संसत्सु जाते पुरुषाधिकारे
न पूरणी तं समुपैति संख्या ॥ ५१ ॥
प्रियेषु यैः पार्थ विनोपपत्ते-
र्विचिन्त्यमानैः क्लममेति चेतः ।
तव प्रयातस्य जयाय तेषां
क्रियादघानां मघवा विघातम् ॥ ५२ ॥

अन्वयः । यः अशेषजनातिरिक्तां सम्भावनां क्रियाभिः अर्थवतीं करोति, संसत्सु पुरुषाधिकारे जाते (सति) पूरणी संख्या तं न समुपैति । वाच्य—येन अशेषजनातिरिक्ता सम्भावना क्रियाभिः अर्थवती क्रियते, पूरण्या संख्यया स न समुपेयते ॥ ५१

अन्वयः । हे पार्थ ! प्रियेषु उपपत्तेर्विना यैः विचिन्त्यमानैः चेतः क्लममेति जयाय प्रयातस्य तव तेषाम् अघानां मघवा विघातं क्रियात् ॥ वाच्य—चेतसा क्लम ईयते मघोना विघातः क्रियेत ॥ ५२

पूर्वं निर्व्यवसायस्य "स क्षत्रियः" इत्यादिना दोष उक्तः, सम्प्रति-व्यवसायिनो गुणमाह—करोतीति । यः पुमान् अशेषजनात् इतरजनात् अतिरिक्ताम् अधिकां सर्वातिशायिनीम् इत्यर्थः । सम्भावनां योग्यतां क्रियाभिः चरितैः अर्थवतीं सफलां करोति । तं पुमांसं संसत्सु सभासु । "सभासमितिसंसदः" इत्यमरः । पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति, पूर्यते अनया इति पूरणी संख्या द्वित्वादिसंख्या न समुपैति न गच्छति, अद्वितीयो भवति इत्यर्थः । तस्मात् असाधारणत्वलाभाय त्वया अपि महानुत्साहः आस्थेय इति भावः ॥ ५१ ॥

अथ द्वाभ्यां सुलभविपक्षस्य प्रोत्सितस्य अर्जुनस्य कर्त्तव्यम् उपदिशति—प्रियेषु इति । हे पार्थ ! प्रियेषु अस्मासु विषये उपपत्तेः कारणात् विना एव विचिन्त्यमानैः अकस्मात् एव आशङ्क्यमानैः यैः अघैः चेतः क्लमं खेदम् एति । जयाय प्रयातस्य तव सम्बन्धिनां तेषाम् अघानां व्यसनानाम् । "दुःखेनोव्यसनेऽघम्" इत्यमरः । मघवा इन्द्रः यः अस्माभिः उपास्यते इति भावः । विघातं निवारणं क्रियात् करोतु । आशिषि लिङ् । तस्मात् अस्मच्चिन्तया न चेतः खेदयितव्यं जयार्थिना त्वया । अन्यथा तदसम्भवात् इति भावः ॥ ५२ ॥

५१ । যে জন সর্ব্বাতিশায়িনী যোগ্যতাকে ক্রিয়ার দ্বারা সফল করিয়া তুলে, সভাক্ষেত্রে পুরুষগণনার প্রস্তাব উপস্থিত হইলে, পূরণী অর্থাৎ দ্বিত্বাদি সংখ্যা তাহাকে প্রাপ্ত হয় না, অর্থাৎ সেই ব্যক্তি অদ্বিতীয় হইয়া থাকে ।

मा गाश्चिरायैकचरः प्रमादं
वसन्नसम्बाधशिवेऽपि देशे ।
मात्सर्य्यरागोपहृतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥
तदाशु कुर्वन् वचनं महर्षे-
र्मनोरथान् नः सफलीकुरुष्व ।
प्रत्यागतं त्वाऽस्मि कृतार्थमेव
स्तनोपपीड़ं परिरब्धुकामा ॥ ५४ ॥

अन्वयः । (त्वं) असम्बाधशिवे अपि देशे चिराय एकचरः वसन् प्रमादं मा गाः । मात्सर्य्यरागोपहृतात्मनां मानसानि साधुषु अपि स्खलन्ति हि ॥ वाच्य—एकचरेण वसता प्रमादः मा गाथि, मानसैः स्खल्यते ॥ ५३ ॥

अन्वयः । तत् त्वं महर्षेर्वचनम् आशु कुर्वन् नः मनोरथान् सफलीकुरुष्व । (किञ्च अहं) कृतार्थं प्रत्यागतं त्वा स्तनोपपीड़ं परिरब्धुकामा अस्मि ॥ वाच्य—महर्षेर्वचनं कुर्वता मनोरथाः सफलीक्रियन्तां परिरब्धुकामया भूयते ॥ ५४ ॥

मा गा इति । असम्बाधः असङ्कटः विजन इत्यर्थः । "सङ्कटं ना तु सम्बाधः" इत्यमरः । शिवः निर्बाधः, द्वयोः अन्यतरस्य विशेष्यत्वविवक्षायां विशेषणसमासः । अस्मिन् असम्बाधशिवे अपि देशे चिराय चिरम् एकश्चासौ चरश्चेति एकचरः एकाकी वसन् प्रमादं दौर्बल्यं मा गाः । "दृणो गा लुङि" इति गादेशः । ननु निःस्पृहस्य मम अकिञ्चित्करः प्रमाद इति वाच्यम् इति आशङ्क्याह—मात्सर्य्येति । मत्सरः एव मात्सर्य्यं, द्वेषः रागः स्नेहः ताभ्याम् उपहृतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु सज्जनेषु अपि विषये स्खलन्ति विकुर्वते हि । अत्र प्रमादनिषेधलब्धाप्रमादरूपकारणेन अर्थप्राप्तिरूपकार्य्यस्य व्यतिरेककारणसमर्थनात् वैधर्म्येण कार्य्यकारणसमर्थनरूपः अर्थान्तरन्यासः ॥ ५३ ॥

৫২। হে পার্থ! কারণ না থাকিলেও প্রিয়জনে বিঘ্নপাতের আশঙ্কায় তোমার চিত্ত খেদ প্রাপ্ত হইতেছে, তুমি জয়ার্থ প্রয়াণ করিলে দেবরাজ তোমার সেই সকল আশঙ্কিত বিঘ্ন নিবারণ করিবেন।

৫৩। যদিও সঙ্কটশূন্য মঙ্গলময় দেশেই তোমাকে বহুদিন একাকী বাস করিতে হইবে, তথাচ তুমি দৌর্ব্বল্য আশ্রয় করিও না; কেননা রাগদ্বেষদূষিতস্বভাব ব্যক্তিদিগের চিত্ত সাধুজনেও স্খলিত হইয়া থাকে।

उदीरितां तामिति याज्ञसेन्या
नवीकृतोद्ग्राहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे
काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥
अथाभिपश्यन्निव विद्विषः पुरः
पुरोधसारोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं
गतः क्रियां मन्त्र इवाभिचारिकीम् ॥५६॥

अन्वयः । सः याज्ञसेन्या इति उदीरितां नवीकृतोद्ग्राहितविप्रकारां तां वाचम् आसाद्य उदीचीं काष्ठां तिग्मरश्मिरिव भृशं दिदीपे ॥ वाचा—तेन तिग्मरश्मिना इव दिदीपे ॥ ५५ ॥

तदिति । तत् तस्मात्, कारणात्, आशु शीघ्रं महर्षेः वचनं कुर्वन् इत्यर्थः । नः अस्माकं मनोरथान् सफलीकुरुष्व अरिनिर्यातनेन अस्मान् प्रतिष्ठापय इत्यर्थः । प्रार्थनायां लोट् । किञ्च कृतार्थं कृतकृत्यं प्रत्यागतम् एव त्वा त्वाम् । "त्वामौ द्वितोयायाः" इति त्वादेशः । स्तनयोः उपपीडा इति स्तनोपपीडम् । "सप्तम्यां चोपपीडरुधकर्षेः" इति णमुल् । परिरब्धुं कामः यस्याः सा परिरब्धुकामा अस्मि । आलिङ्गितुम् इच्छामि इत्यर्थः । "तुमर्थाच्च भावकर्मणोरपि" इति मकारलोपः । प्राक् कार्यसिद्धेः प्रमदालिङ्गनम् अपि न प्रीतिप्रदमिति भावः ॥ ५४ ॥

उदीरितामिति । सः अर्जुनः इति इत्थं याज्ञसेन्या द्रौपद्या उदीरिताम् उक्ताम् । नवीकृतः पुनः उद्घाटनेन तथा प्रत्यायितः अतएव उद्ग्राहितः मनसि निधापितश्च विप्रकारः परिभवः यया सा तां वाचम् आसाद्य आकर्ण्य इत्यर्थः । उदीचीं काष्ठां दिशम् "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः । तिग्मरश्मिः इव भृशं दिदीपे जज्वाल चुक्रोध इत्यर्थः ॥ ५५ ॥

५४ । অতএব তুমি মহর্ষির বচন পালন (অর্থাৎ তপস্যা) করিয়া আমাদের সমস্ত মনোরথ সফল কর। তুমি কৃতকার্য্য হইয়া আসিলেই আমি স্তনোপপীড়ন করিয়া তোমায় আলিঙ্গন করিতে ইচ্ছা করি।

৫৫ । দ্রুপদনন্দিনী অর্জ্জুনকে এই যে সকল কথা কহিলেন, ইহাতে অর্জ্জুনের মনে ক্ষাত্রিকৃত সেই পরাভব যেন নবীকৃত হইয়া উঠিল, তিনি সেই সকল কথা শ্রবণ করিয়া উত্তরদিগবলম্বী দিবাকরের ন্যায় দেদীপ্যমান হইতে লাগিলেন।

अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म्म कार्मुकम्।
अगतावरिदृष्टिगोचरं
शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

अन्वयः। अथ विद्विषः पुरः अभिपश्यन्निव तथा पुरोधसारोपितहेतिसंहतिः स रम्योऽपि आभिचारिकीं क्रियां गतः मन्त्र इव भीषणं वपुः बभार। वाच्य—विद्विषः अभिपश्यता इव स्थितेन पुरोधसारोपितहेतिसंहतिना तेन रम्येण सतापि आभिचारिकीं क्रियां गतेन मन्त्रेणेव भीषणं वपुः बभ्रे ॥ ५६ ॥

अन्वयः। [अर्जुनः] परैः अविलङ्घ्यविकर्षणं प्रथितज्यारवकर्म्म कार्मुकं तथा अरिदृष्टिगोचरम् अगतौ शितनिस्त्रिंशयुजौ महेषुधी उदहन्॥ वाच्य—महेषुधी उह्यता अर्जुनेन ॥ ५७

अथेति। अथ विद्विषः शत्रून् पुरः अभिपश्यन् इव स्थितः तथा पुरोधसा धौम्येन आरोपिता समन्त्रं समाहिता हेतिसंहतिः आयुधकलापः यस्य सः तथोक्तः। "हेतिर्ज्वालाङ्कुरायुधे" इति वैजयन्ती। सोऽर्जुनः रम्यः सौम्यः सन् अपि। अभिचारः परहिंसा प्रयोजनं यस्याः सा आभिचारिकी। "तदस्य प्रयोजनम्" इति ठक्। तां क्रियां गतः अभिचारकर्म्मणि नियुक्तः इत्यर्थः। मन्त्रः इव, रम्यः प्रकृत्या रमणीयः। भीषयते इति भीषणम्। नन्द्यादित्वात् ल्युप्रत्ययः। वपुः बभार। प्रशान्तो मन्त्रः प्रयोगभेदात् इव सोऽपि अवस्थाभेदात् भीषणः बभूव इत्यर्थः ॥ ५६ ॥

उक्तम् आयुधारोपणं विद्वत्त्वन् प्रस्थानम् आह त्रिभिः। अविलङ्घ्येति। परैः शत्रुभिः अविलङ्घ्यम् अनतिक्रमणीयं विकर्षणं यस्य तत्, अमोघाकर्षणम् इत्यर्थः। किं च प्रथितः ज्यारवः गुणध्वनिः कर्म बाणमोक्षणादिकं च यस्य तत् कार्मुकं च उदहन् इति अन्वयः। यथा अरीणां दृष्टिगोचरं दृष्टिपथम् अगतौ, आहवेषु अनिवर्त्तित्वात् अस्य इति भावः। निर्गतः त्रिंशतः अङ्गुलिभ्यः निस्त्रिंशः खड्गः। डप्रत्यये सङ्ख्यायाः तत्पुरुषस्य उपसंख्यानात् समासान्तः। तेन शितेन तीक्ष्णेन युङ्क्त इति शितनिस्त्रिंशयुजौ। "सत्सूद्विष" इत्यादिना क्विप्। महेषुधी महानिषङ्गौ इषवः धीयन्त अनयोः इति विग्रहः। "कर्मण्यधिकरणे च"

५७। अनन्तर अर्জ্জুন সম্মুখেই যেন শত্রুদিগকে দেখিতে লাগিলেন; পুরোহিত ধৌম্য তাঁহার আয়ুধসমূহ সমন্ত্রক সমাহিত করিয়া দিলেন। তিনি সৌম্যাকৃতি হইয়াও অভিচার-ক্রিয়াগত মন্ত্রের ন্যায় ভীষণ বপুঃ ধারণ করিলেন।

यशसेव तिरोदधन्मुहु-
र्महसा गोत्रभिदायुधच्छतीः।
कवचं च सरत्नमुद्वहन्
ज्वलितज्योतिरिवान्तरं दिवः॥ ५८॥
अलकाधिपभृत्यदर्शितं
शिवमुर्वीधरवर्त्म सम्प्रयान्।
हृदयानि समाविवेश स
क्षणमुद्भाष्पदृशां तपोभृताम्॥ ५९॥
॥ विशेषकम्॥

अन्वयः। गोत्रभिदायुधच्छतीः महसा यशसेव मुहुः तिरोदधत्, तथा सरत्नं ज्वलितज्योतिः दिवः अन्तरमिव कवचं उद्वहन्—(परेणान्वयः)॥ वाच्य—तिरोदधता—कवचं उद्वहता (अर्জুনेन)॥ ५८॥

अन्वयः। अलकाधिपभृत्यदर्शितं शिवम् उर्वीधरवर्त्म सम्प्रयान् सः क्षणम् उद्भाष्पदृशां तपोभृतां हृदयानि समाविवेश॥ वाच्य—उर्वीधरवर्त्म सम्प्रयाता तेन हृदयानि समाविविशिरे॥ ५९

इति क्विप्प्रत्ययः। "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्यां खड्गे तु निस्त्रिंशश्चन्द्रहासासिरिष्टयः" इत्यमरः॥ ५७॥

यशसेति। किं च। गोत्रभिद इन्द्रस्य आयुधच्छतीः वज्रप्रहार-रन्ध्राणि खाण्डवदाहसम्भवादिति भावः। महसा स्वकान्त्या यशसा इव मूर्त्तया कीर्त्या इव मुहुः तिरोदधत् आच्छादयन्। सरत्नं रत्न-सहितम् अतएव ज्वलितज्योतिः दीप्ततारकम्। "ज्योतिस्तारारुचिभा ज्वाला दृक्पुत्त्रार्थं धरात्मसु" इति वैजयन्ती। दिवः अन्तरं नभोमध्यम् इव अवस्थितम्। "अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि। क्लीवे मध्ये प्रकाशे च" इति वैजयन्ती। कवचं च उद्वहन्॥ ५८॥

अलकेति। सः अर्জুনः अलकाधिपभृत्येन यक्षेण दर्शितम्, अतः शिवं निर्बाधम् उर्वीधरवर्त्म हिमवन्मार्गं प्रति सम्प्रयान् प्रगच्छन्।

५७। शत्रुगण যাহার আকর্ষণ অতিক্রম করিতে পারে নাই এবং যাহার জ্যারব ও কর্ম চিরগ্রথিত, এ হেন কার্ম্মুক, তথা শত্রুর দৃষ্টিপথাতীত তীক্ষ্ণ খড়্গাঙ্কিত মহাবিষধর অর্জ্জুন ধারণ করিলেন।

৫৮। ইন্দ্র খাণ্ডবদাহনকালে অর্জ্জুনের গাত্রে বজ্র প্রহার করিয়াছিলেন, সেই প্রহার-জনিত রন্ধ্রগুলি অর্জ্জুন এক্ষণে মূর্ত্তিমতী কীর্ত্তির ন্যায় স্বীয় প্রভায় তিরোহিত করিলেন এবং বিবিধ রত্নখচিত এক কবচ ধারণ করিলেন। ঐ কবচ উদ্দীপ্ততারক নভোমধ্যবৎ প্রতিভাত হইতে লাগিল।

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥६०॥
इति श्रीभारविकृतौ किरातार्जुनीये
महाकाव्ये तृतीयः सर्गः ॥ ३ ॥

अन्वयः। अथ आशाः दिव्यं दुन्दुभिध्वानम् अनुजगुः, व्योम्नि सुरकुसुमनिपातैः लक्ष्मीः वितेने। अनिभृतवेलावीचिबाहुः पयोधिः स्फुरन्तीं भुवं प्रियं कथयिष्यन् इव आलिलिङ्ग ॥ वाच्य—आशाभिः दिव्यः दुन्दुभिध्वानः अनुजगे। सुरकुसुमनिपातैः लक्ष्मीः वितेनुः, अनिभृतवेलावीचिबाहुना पयोधिना स्फुरन्तीं प्रियं कथयिष्यता आलिलिङ्गे ॥ ६० ॥

क्षणम् उद्वाष्पदृशां वियोगदुःखात् साश्रुनेत्राणां तपोभृतां श्वेतवननिवासिनां तपस्विनां हृदयानि समाविवेश खेदयामास इत्यर्थः। संपूर्वस्य विशतेः खेदार्थत्वम् अवधेयम् ॥ ५८ ॥

अनुजगुरिति। अथ आशाः दिशः। दिवि भवं दिव्यम्। "दिगादिभ्यो यत्।" दुन्दुभिध्वानम् अनुजगुः अनुदध्वनुः। अनुगायतेर्लिट्। व्योम्नि सुरकुसुमनिपातैः लक्ष्मीः वितेने। पुष्पवृष्टिः च अजनिष्ट इत्यर्थः। किंच अनिभृताः चञ्चलाः वेलायां कूले या वीचयः ताः एव बाहवः यस्य सः तथोक्तः। "वेला कुलविकारयोः" इति शाश्वतः। पयोधिः स्फुरन्तीम् उल्लसन्तीं हर्षात् स्यन्दमानां च भुवं प्रियम् इष्टं भारावतारणरूपं कथयिष्यन् इव कथयितुमिव इत्यर्थः। "लुट् शेषे च" इति चकारात् क्रियार्थायां क्रियायां लुट्। आलिलिङ्ग। सर्वं च इदं शिवं दैवकार्थिप्रवृत्तत्वात् अस्य इति भावः। अत्र विशेषणमात्रसाम्यात् अप्रस्तुतस्य गम्यत्वात् समासोक्तिरलङ्कारः। तत्र च अप्रस्तुतयोः भूमिसमुद्रयोः प्रतिपत्राभ्यां नायकाभ्यां भेदे अभेदलक्षणातिशयोक्तिवशात् आलिङ्गनोक्तिः इति

५७। अर्জ্জুন যক্ষ-প্রদর্শিত নিকটক হিমালয়পথে অগ্রসর হইতে লাগিলেন, তাঁহার বিয়োগদুঃখে শ্বেতবনবাসী তপস্বীরা ক্ষণেকের তরে সাশ্রুনেত্র হইলেন। অর্জ্জুন তাঁহাদের হৃদয় খেদান্বিত করিয়া চলিলেন।

चतुर्थः सर्गः ।

ततः स कूजत्कलहंसमेखलां
सपाकशस्याहितपाण्डुतागुणाम् ।
उपाससादोपजनं जनप्रियः
प्रियामिवासादितयौवनां भुवम् ॥ १ ॥

अन्वयः । ततः जनप्रियः सः कलहंसमेखलां सपाकशस्याहितपाण्डुतागुणाम् आसादितयौवनां प्रियाम् इव भुवम् उपजनम् उपाससाद ॥ वाच्य—जनप्रियेण तेन कलहंसमेखला सपाकशस्याहितपाण्डुतागुणा प्रिया इव आसादितयौवना भूः उपासेदे ॥ १ ॥

रहस्यम् । एवम् अतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात् स्त्रेहवत् जीवयति तदङ्गभावं भजते इति उभयीरङ्गाङ्गिभावेन सङ्कर इति विवेचनीयम् ॥ ६० ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरि-विरचितायां
किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां
तृतीयः सर्गः ॥ ३ ॥

तत इति । ततः प्रस्थानानन्तरं जनप्रियः सः अर्जुनः कलहंसाः मेखलाः इव इति उपमितसमासः । अन्यत्र कलहंसाः इव मेखलाः इति विग्रहवाक्यसमासः । कूजन्ती कलहंसमेखला यस्याः ताम् । सह पाकेन वर्त्तन्ते इति सपाकानि शस्यानि तैः शस्यैः आहितः सम्पादितः पाण्डुता एव गुणः यस्याः तां भुवम् आसादितयौवनां प्राप्तयौवनां प्रियाम् इव उपजनं जनसमीपे अन्यत्र सखीसमक्षम् । समीपार्थे अव्ययीभावः । उपाससाद उपगतवान् । उपमालङ्कारः ॥ १ ॥

৬০। দিক্‌সমূহে দিব্য দুন্দুভিধ্বনি হইতে লাগিল। দিব্য পুষ্পবৃষ্টিপাতে আকাশে অপূর্ব্ব শোভা বিস্তারিত হইল। বেলাসংলগ্ন চঞ্চল বীচিরূপ বাহুশালী পয়োনিধি হর্ষোল্লসিতা ধরণীকে যেন ভারাবতরণরূপ প্রিয়বার্ত্তা বিজ্ঞাপন করতই আলিঙ্গন করিতে লাগিল।

তৃতীয় সর্গ সমাপ্ত ॥ ৩

১। অনন্তর জনপ্রিয় অর্জ্জুন কূজনতৎপর কলহংসরূপ মেখলান্বিতা, পরিপক্ক শস্য জন্য পাণ্ডুবর্ণা পৃথিবীকে সখীজনসমক্ষে কূজননিরত কলহংসবৎ মেখলামণ্ডিতা যুবতী রমণীর ন্যায় জনগণ সমীপে প্রাপ্ত হইলেন।

विनम्रशालिप्रसवौघशालिनी-
रपेतपङ्काः ससरोरुहाम्भसः।
ननन्द पश्यन्नुपसीम स स्थली-
रुपायनीभूतशरद्गुणश्रियः॥ २॥
निरीक्ष्यमाणा इव विस्मयाकुलैः
सरोभिरुन्मीलितपद्मलोचनैः।
हृतप्रियादृष्टिविलासविभ्रमाः
मनोऽस्य जह्रुः शफरीविवृत्तयः॥ ३॥

अन्वयः। विनम्रशालिप्रसवौघशालिनीः अपेतपङ्काः ससरोरुहाम्भसः उपायनीभूतशरद्गुणश्रियः उपसीम स्थलीः पश्यन् ननन्द॥ वाच्य—तेन स्थलीः पश्यता ननन्दे॥ २॥

अन्वयः। विस्मयाकुलैः उन्मीलितपद्मलोचनैः पयोभिः निरीक्ष्यमाणा इव हृतप्रियादृष्टिविलासविभ्रमाः शफरीविवृत्तयः अस्य मनः जह्रुः॥ वाच्य—निरीक्ष्यमाणाभिरिव हृतप्रियादृष्टिविलासविभ्रमाभिः शफरीविवृत्तिभिः मनः जह्रे॥ ३॥

विनम्रेति। सः अर्जुनः विनम्रशालिप्रसवौघशालिनीः अवनतशालिफलस्तोमशोभिनीः अपेतपङ्काः निष्पङ्काः ससरोरुहाणि अम्भांसि यासु ताः तथोक्ताः। उपायनीभूताः अर्जुनं प्रति उपहारीभूताः शरद्गुणश्रियः पूर्वोक्ताः शरदृतुसम्पदः यासु ताः। उपसीम ग्रामसीमासु, विभक्त्यर्थे अव्ययीभावः, समासान्तविधेः अनित्यत्वात् "अनञ्" इति समासान्तो न भवति। केचित् तु "अप्यन्येषां कठिनवपुषां दुर्गमे ग्रामसीम्नि" इत्यादौ नपुंसकप्रयोगदर्शनात् "नपुंसकादन्यतरस्याम्" इति विकल्पात् साधुः इति आहुः। स्थलीः अकृत्रिमाः भुवः। "जानपद" इत्यादिना अकृत्रिमार्थे ङीष्। पश्यन् ननन्द जहर्ष। अत्र शरद्गुणेषु तादात्म्येन आरोप्यमाणस्य उपायनस्य प्रकृतेः नन्दनक्रियोपयोगित्वात् परिणामालङ्कारः॥ २॥

निरीक्ष्यमाणा इति। विस्मयाकुलैः आश्चर्यरसाविष्टैः अतएव उन्मीलितानि पद्मानि एव लोचनानि येषां तैः पयोभिरम्भोभिः निरीक्ष्यमाणाः इव स्थिताः हृतः प्रियादृष्टिविलासानां विभ्रमः शोभा याभिः

२। अर्জ্জুন দেখিলেন,—গ্রামসমূহের প্রান্তে প্রান্তে অবস্থিত ভূখণ্ডসকল বিনম্র কলম ফলে সুশোভিত হইয়া রহিয়াছে; তাঁহাতে কর্দ্দম কিছুই নাই; জল যেখানে যাহা আছে, তাহা পদ্মপরিশোভিত; যেন শরৎকালের গুণসম্পত্তিই নিজের প্রতি উপহারীকৃত দেখিয়া তিনি আনন্দিত হইলেন।

तुतोष पश्यन् कलमस्य सोऽधिकं
सवारिजे वारिणि रामणीयकम् ।
सुदुर्लभे नार्हति कोऽभिनन्दितुं
प्रकर्षलक्ष्मीमनुरूपसङ्गमे ॥ ४ ॥
नुनोद तस्य स्थलपद्मिनीगतं
वितर्कमाविष्कृतफेनसन्ततेः ।
अवाप्तकिञ्जल्कविभेदमुच्चकै-
र्विवृत्तपाठीनपराहतं पयः ॥ ५ ॥

अन्वयः । सः सवारिजे वारिणि कलमस्य रामणीयकं पश्यन् अधिकं तुतोष । तथाहि सुदुर्लभे अनुरूपसङ्गमे (सति) प्रकर्षलक्ष्मीं अभिनन्दितुं कः न अर्हति ॥ वाच्य—तेन कलमस्य रामणीयकं पश्यता अधिकं तुतुषे । केन प्रकर्षलक्ष्मीः अभिनन्दितुं नार्हते ॥ ४ ॥

अन्वयः । आविष्कृतफेनसन्ततेः अवाप्तकिञ्जल्कविभेदं उच्चकैः विवृत्तपाठीनपराहतं पयः तस्य स्थलपद्मिनीगतं वितर्कं नुनोद ॥ वाच्य—आविष्कृतफेनसन्ततिना अवाप्तकिञ्जल्कविभेदेन विवृत्तपाठीनपराहतेन पयसा स्थलपद्मिनीगतो वितर्कः नुनुदे ॥ ५ ॥

ताः तथोक्ताः इति मनोहरणे हेतूक्तिः । "विभ्रमः संशये भ्रान्तौ शोभायां च" इति वैजयन्ती । शफरीविवृत्तयः प्रोष्ठीस्फुरितानि अस्य अर्जुनस्य मनः जह्रुः ॥ ३ ॥

तुतोषेति । सः अर्जुनः सवारिजे वारिणि कलमस्य शालिविशेषस्य "शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी" इत्यमरः । रामणीयस्य भावः रामणीयकम् । "योपधाद्गुरूपोत्तमाद् वुञ्" तत्र पश्यन् अधिकं तुतोष, अनुरूपसङ्गमात् इति भावः । तथाहि सुदुर्लभे अनुरूपसङ्गमे योग्यसमागमे लब्धे सति इति शेषः, प्रकर्षलक्ष्मीं योग्यसमागमननिमित्ताम् उत्कर्षसम्पदम् अभिनन्दितुं स्तोतुं कः न अर्हति ? सर्वः अपि अभिनन्दति एव इत्यर्थः । सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः ॥४

नुनोदेति । आविष्कृता प्रकटीकृता फेनसन्ततिः हिण्डोरसमूहः यस्य तथोक्तम् । "हिण्डोरोऽब्धिकफः फेनः" इत्यमरः । अवाप्तः किञ्जल्क-

३ । स्थाने स्थाने सरोवरजले शफरीकुल स्फुरित हইতেছিল। বিস্ময়াবেশে সরোবরেরা যেন তাহাদের পদ্মনেত্র উন্মীলিত করিয়া তাহা দেখিতেছিল। ঐ শফরীস্ফুরণ প্রণয়িনীর দৃষ্টিবিলাসবিভ্রম হরণ করিতেছিল। তাহাতে অর্জুনের মন হরণ করিল।

৪। অর্জুন পদ্মপূর্ণ জলে কলমধান্যের রমণীয়তা দেখিয়া অধিক পরিতুষ্ট হইলেন। বস্তুতঃ দুর্লভ যোগ্যসমাগম লব্ধ হইলে উৎকর্ষশ্রীর অভিনন্দন কে না করিয়া থাকে ?

कृतोर्मिरेखं शिथिलत्वमायता
शनैः शनैः शान्तरयेण वारिणा।
निरीक्ष्य रेमे स समुद्रयोषितां
तरङ्गितं क्षौमविपाण्डु सैकतम् ॥ ६ ॥
मनोरमं प्रापितमन्तरं भुवो-
रलङ्कृतं केसररेणुनाऽणुना।
अलक्तताम्राधरपल्लवश्रिया
समानयन्तौमिव बन्धुजीवकम् ॥ ७ ॥

अन्वयः। शिथिलत्वम् आयता, शनैः शनैः शान्तरयेण वारिणा कृतोर्मिरेखं तरङ्गितं क्षौमविपाण्डु समुद्रयोषितां सैकतं निरीक्ष्य सः रेमे ॥ वाच्य—तेन...निरीक्ष्य रेमे ॥ ६ ॥

अन्वयः। पाण्डोः सुतेन अणुना केसररेणुना अलङ्कृतं मनोरमं भुवोरन्तरं प्रापितं बन्ध-

विभेदः केसरापगमः येन तत् तथोक्तम्। कुतः? उच्चकैः उच्चकं यथा तथा विवृत्तेन लुठितेन पाठीनेन मत्स्यविशेषेण पराहतं ताड़ितम्। "सहस्रदंष्ट्रः पाठीनः" इत्यमरः। पयः कर्त्तृ। तस्य अर्जुनस्य स्थलपद्मिनीगतं तद्गोचरम् इत्यर्थः। वितर्कं संशयं नुनोद चिच्छेद। पाठीनपराहत्या किञ्चल्कापायेन जलदर्शनात् स्थलपद्मिनीशङ्का निवृत्ता इत्यर्थः। अत्र निश्चयोत्तरसन्देहालङ्कारः ॥ ५ ॥

कृतेति। सः अर्जुनः शिथिलत्वम् आयता गच्छता दिने दिने क्षीयमाणेन इत्यर्थः। अत एव शनैः शनैः शान्तरयेण अन्यथा ऊर्मिरेखानुदयात् इति भावः। वारिणा कृताः ऊर्म्मयः पर्व्वाण्येव रेखाः राजयः यस्य, तत् तथोक्तम् तरङ्गा अस्य सञ्जाताः तरङ्गितं भङ्गिमत्। "तदस्य सञ्जातम्" इति इतच्। तत् क्षौमं दुकूलं तद्वत् विपाण्डु शुभ्रम् इति उपमालङ्कारः। समुद्रयोषितां नदीनां सिकता अस्य अस्तीति सैकतं पुलिनम्। "सिकताशर्कराभ्यां च" इति अण्प्रत्ययः। "तीयोत्थितं तत्पुलिनं सैकतं सिकतामयम्" इत्यमरः। निरीक्ष्य रेमे तुतोष ॥ ६ ॥

६। कोथाও জলে ফেনপুঞ্জ ভাসিতেছিল; কিঞ্জল্কাপগম ঘটিয়াছিল; সেই জল পাঠীন-মৎস্যের বিপরীত পরিবর্ত্তনে পরাহত হইয়া অর্জ্জুনের স্থলপদ্মিনীগত সংশয় অপনোদন করিয়াছিল।

৬। অর্জ্জুন দেখিলেন—শুভ্র, ভঙ্গিমযুত ক্ষৌম, দুকূলবৎ নদীপুলিন দিনে দিনে ক্ষীয়মান—সুতরাং শনৈঃ শনৈঃ শান্তবেগ বারিধারা উর্ম্মিরেখা ধারণ করিয়াছে; দেখিয়া তিনি তুষ্ট হইলেন।

नवातपालोहितमाहितं मुहु-
र्महानिवेशौ परितः पयोधरौ ।
चकासयन्तौमरविन्दजं रजः
परिश्रमाम्भःपुलकेन सर्पता ॥ ८ ॥
कपोलसंश्लेषि विलोचनत्विषा
विभूषयन्तौमवतंसकोत्पलम् ।
सुतेन पाण्डोः कलमस्य गोपिकां
निरीक्ष्य मेने शरदः कृतार्थता ॥ ९ ॥

॥ विशेषकम् ॥

जीवकम् अलक्तताम्राधरपल्लवश्रिया समानयन्तौमिव महानिवेशौ पयोधरौ परितः मुहुः आहितं नवातपालोहितम् अरविन्दजं रजः सर्पता परिश्रमाम्भःपुलकेन चकासयन्तौ कपोलसंश्लेषि अवतंसकोत्पलं विलोचनत्विषा विभूषयन्तौ कलमस्य गोपिकां निरीक्ष्य शरदः कृतार्थता मेने । वाच्या—पाण्डोः सुतः कृतार्थतां मेने ॥ ७—९ ॥

ततः त्रिभिः शालिगोपत्नीं वर्णयति—मनोरममिति । अणुना सूक्ष्मेण केसरेषु किञ्जल्केषु । "किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः । यः रेणुः परागः तेन अलङ्कृतम्, अत एव मनः रमयति इति मनोरमम् । 'कर्मण्यण्' इत्यण् । भ्रुवोः अन्तरं प्रापितं भ्रूमध्ये निवेशितं बन्धुजीवकं बन्धूकपुष्पम् । "बन्धूको बन्धुजीवकः" इत्यमरः । अलक्तताम्रस्य लाक्षारागरक्तस्य अधरपल्लवस्य श्रिया शोभया समानयन्तीं समीकुर्वतीम् इव साम्यपरीक्षां कुर्वतीम् इव इत्यर्थः । उत्प्रेक्षालङ्कारः ॥ ७ ॥

नवेति । महान् निवेशः स्थानं ययोः तौ महानिवेशौ पीवरौ इत्यर्थः । पयोधरौ परितः स्तनयोः समन्तात् इत्यर्थः । "अभितः परितः समयानिकषाहाप्रतियोगेऽपि" इति द्वितीया । मुहुः आहितं निक्षिप्तं नवातपालोहितं बालातपताम्रम् अरविन्दजं रजः परागं सर्पता प्रसरता परिश्रमाम्भःपुलकेन स्वेदोद्भेदेन पुलकेन चकासयन्तीं शोभयन्तीं, चकास्तेर्ण्यन्तात् शतरि ङीप् । अलङ्करणं कुर्वतीम् । तत्र अपि विलक्षतता इति भावः ॥ ८ ॥

कपोलेति । पुनः कपोलसंश्लेषि यदवतंसकोत्पलं कर्णोत्पलं तद्विलो-

१—३ । কোথাও কোন শালিবধূকা রমণী সূক্ষ্ম সূক্ষ্ম কেসররেণুদ্বারা সমলঙ্কৃত মনোরম ভ্রূমধ্যগত বন্ধুকপুষ্পকে লাক্ষারাগরক্ত স্বীয় অধরপল্লবের শোভার সহিত যেন সমান করিবার

उपारताः पश्चिमरात्रिगोचरा-
दपारयन्तः पतितुं जवेन गाम्।
तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं
गवां गणाः प्रस्नुतपीवरौधसः॥ १०॥

अन्वयः। पश्चिमरात्रिगोचरात् उपारताः जवेन गां पतितुम् अपारयन्तः प्रस्नुतपीवरौधसः उत्सुकाः गवां गणाः तम् अवेक्षणोत्सुकं चक्रुः॥ वाचा—उपारतैः अपारयद्भिः प्रस्नुतपीवरौधोभिः उत्सुकैः गवां गणैः सः अवेक्षणोत्सुकः चक्रे॥ १०॥

चनत्विषा विभूषयन्तीम् आभरणस्य अपि आभरणम् इति भावः। कलमं गोपायति इति गोपिकां शालिगोपत्नीं ण्वुल्प्रत्ययः। निरीक्ष्य पाण्डोः सुतेन अर्जुनेन शरदः कृतार्थायाः भावः कृतार्थता साफल्यम्। शरदः स्वगुणसम्पत्तिद्विनियोगलाभात् इति भावः। "त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः"। मेने अमानि। मन्यतेः कर्मणि लिट्॥ ९॥

उपारता इति। पश्चिमा च असौ रात्रिश्च इति विशेषणसमासः। अपररात्रः इत्यर्थः। ("पूर्वा दिक् पश्चिमं नभः" इत्यादिवत् एकदेशिशब्दस्य एकदेशशब्दसामानाधिकरण्यात् एकदेशे पर्य्यवसानं न तु पश्चिमं रात्रेः इति एकदेशिसमासः। तद्धिधायके पूर्वापरादिसूत्रे पश्चिमशब्दाग्रहणात् अत एव "अहःसर्वैकदेशः" इत्यादिना न समासान्तोऽपि तस्य अपि पूर्वापरादिसूत्रोक्तसमासविषयत्वात् इति। प्रकाशवर्षस्तु एकदेशिसमासम् एव आश्रित्य समासान्तमाह—तत् मृग्यम्।) गावः चरन्ति अत्र इति गोचरः गवां जङ्घिस्थानं वनम्। पश्चिमरात्रौ यः गोचरः तस्मात् उपारताः संनिवृत्ताः जवेन गां भुवं पतितुं धावितुम् अपारयन्तः अशक्नुवन्तः प्रस्नुतपीवरौधसः वत्सस्मरणात् स्रवत्पीनापीनाः। "ऊधस्तु क्लोवमापीनम्" इत्यमरः। "ऊधसोऽनङ्" इति स्त्रीग्रहणं कर्त्तव्यम् इति नियमात् न अनङादेशः। उत्सुकाः वत्सेषु उत्कण्ठिताः गवां गणाः तम् अर्जुनम् अवेक्षणोत्सुकं दर्शनलालसं चक्रुः। "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" इत्युभयत्र अपि अमरः। अत्र स्वभावोक्तिरलङ्कारः, "स्वभावोक्तिरलङ्कारो यथावद्वस्तुवर्णनम्" इति लक्षणात्॥ १०॥

तूलियाछे; पीवर परोधरयुगेर चारिदिके नवातपालोहित पद्मपराग निक्षिप्त हइयाछे; प्रस्पर्शित स्वेदजन्य पुलकभरे सेई परागके से शोभामय करियाछे; ताहार नयनेर शोभाय से ताहार कपोलसंश्लिष्ट अवतंस-पद्मेर शोभा सम्पादन करितेछे। इहा देखिया पाण्डुनन्दन शरतेर कृतार्थताई मने करिलेन।

परीतमुच्चापजये जयश्रिया
तदन्तमुच्चैः चतसिन्धुरोधसम्।
ददर्श पुष्टिं दधतं स शारदीं
सविग्रहं दर्पमिवाधिपं गवाम् ॥ ११ ॥

see // विमुच्यमानैरपि तस्य मन्थरं
गवां हिमानीविशदैः कदम्बकैः।
शरन्नदीनां पुलिनैः कुतूहलं
गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥

अन्वयः। उच्चापजये जयश्रिया परीतम् उच्चैः नदन्तं चतसिन्धुरोधसं शारदीं पुष्टिं दधतं गवाम् अधिपं सविग्रहं दर्पमिव स ददर्श ॥ वाच्य—तेन जयश्रिया परीतः उच्चैः नदन् चतसिन्धुरोधसा पुष्टिं दधत् गवामधिपः सविग्रहः दर्प इव दृष्टश्चे ॥ ११ ॥

अन्वयः। हिमानीविशदैः गवां कदम्बकैः मन्थरं विमुच्यमानैः शरन्नदीनां पुलिनैः गलद्दुकूलैः जघनैरिव तस्य कुतूहलम् आदधे ॥ वाच्य—गवां कदम्बकैः विमुच्यमानानि पुलिनानि गलद्दुकूलानि जघनानीव कुतूहलम् आदधुः ॥ १२ ॥

परीतमिति। सः अर्जुनः उच्चापजये उच्चान्तरभङ्गे सति जयश्रिया परीतं वेष्टितम् उच्चैः नदन्तं चतसिन्धुरोधसं रुग्णसरित्तटं शरदि भवां शारदीं पुष्टिम् अवयवोपचयं दधतं गवाम् अधिपं महोक्षं सविग्रहं मूर्त्तिमन्तम्। "कायो देहः क्लीवपुंसोः शरीरं वर्ष्म विग्रहः" इत्यमरः। दर्पम् इव इति उत्प्रेक्षा। ददर्श ॥ ११ ॥

विमुच्यमानैरिति। हिमानीविशदैः हिमसङ्घातशुभ्रैः। "हिमानी हिमसंहतिः" इत्यमरः। "इन्द्रवरुण" इत्यादिना ङीष्। तत्सन्नियोगात् आनुगागमश्च। गवां कदम्बकैः कर्तृभिः। "कदम्बकं समूहे स्यात्फले पुष्पविशेषके" इत्यमरः। मन्थरं मन्दं विमुच्यमानैः अपि किमुत अवि-

১০। গোগণ শেষরাত্রের বিচরণস্থান হইতে প্রত্যাবর্ত্তন করিতে গিয়া বেগে ভূ-পথে ধাবিত হইতে পারিতেছিল না; বৎসস্মরণে তাহাদের পীবর স্তনমণ্ডল হইতে ক্ষীরক্ষরণ হইতেছিল, তাহারা স্বয় বৎসের প্রতি উৎকণ্ঠিত ছিল। এহেন গোগণ অর্জ্জুনকে দর্শনোৎসুক করিয়া তুলিয়াছিল।

১১। অর্জ্জুন দেখিলেন—একটা বড় বৃষ অন্য একটা বৃষকে পরাজিত করিয়া জয়শ্রী লাভ করতঃ উচ্চ নাদ করিতে করিতে নদীতট খুঁড়িয়া শরৎকালোচিত শরীরপুষ্টিধারণপূর্ব্বক মূর্ত্তিমান্ দর্পের ন্যায় বিরাজ করিতেছে।

गतान् पशूनां सहजन्मबन्धुतां
गृहाश्रयं प्रेम वनेषु बिभ्रतः।
ददर्श गोपानुपधेनु पाण्डवः
कृतानुकारानिव गोभिरार्जवे ॥ १३ ॥

परिभ्रमन्मूर्ज्जषट्पदाकुलैः
स्मितोदयादर्शितदन्तकेसरैः।
मुखैश्चलत्कुण्डलरश्मिरञ्जितै-
र्नवातपास्पृष्टसरोजचारुभिः ॥ १४ ॥

अन्वयः। पाण्डवः पशूनां सहजन्मबन्धुतां गतान् गृहाश्रयं, प्रेम वनेषु बिभ्रतः आर्जवे गोभिः कृतानुकारान् इव गोपान् उपधेनु ददर्श ॥ वाच्य—पाण्डवेन...बन्धुतां गताः... बिभ्रतः...कृतानुकारा इव गोपाः दृष्टाः ॥ १३ ॥

अन्वयः। परिभ्रमन्मूर्ज्जषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः चलत्कुण्डलरश्मिरञ्जितैः नवातपास्पृष्टसरोजचारुभिः मुखैः श्रमानैरिति भावः शरत्प्रदोषाणां सम्बन्धिभिः। शरदुग्रहणं प्रावृड्-निवृत्त्यर्थं तत्र पुलिनादर्शनात् इति भावः। पुलिनैः कर्त्तृभिः गलद्-कूलैः जघनैः इव तस्य अर्जुनस्य कुतूहलं कौतुकम् आदधे आहितम् ॥ १२

गतानिति। पाण्डवः अर्जुनः पशूनां गवां सह जन्म येषां ते सह-जन्मानः सोदराः ते एव बन्धवः तेषां भावः तत्ता तां गतान् पशुषु सोद-राभिमानवतः इत्यर्थः। गृहाश्रयं गृहविषयं प्रेम वनेषु बिभ्रतः वनेषु गृहाभिमानिनः इत्यर्थः। आर्जवे ऋजुत्वे विधेयत्वे, गोभिः पशुभिः, कृतानुकारान् अनुकृतावस्थितान् इव इति उत्प्रेक्षा। ततः विधेयान् इत्यर्थः। गाः पाति इति गोपाः गोपालकाः। "आतोऽनुपसर्गे कः" इति कप्रत्ययः। तान् उपधेनु धेनुसमीपे, सामीप्यार्थे अव्ययीभावः। ददर्श। अत्र उत्प्रेक्षानुप्राणिता स्वभावोक्तिरलङ्कारः ॥ १३ ॥

अथ चतुर्भिः वल्लवीः नर्त्तकीसाम्येन वर्णयति—परिभ्रमन्निति।

१२। शरतের সমুদয় নদীপুলিন হইতে তুষারশুভ্র গোসমূহ ধীরে ধীরে সরিয়া গিয়াছে; তাহাতে সেই পুলিনসকল যেন উত্তোলিতবসন জঘনসমূহের ন্যায় অর্জ্জুনের কুতূহল উৎপাদন করিতেছিল।

১৩। অর্জ্জুন দেখিলেন—ধেনুগণসমীপে কতকগুলি গোপ অবস্থান করিতেছে, ঐ সকল গোপ গোসমূহে সোদরাভিমানী এবং বনেই গৃহাভিমানশালী; তাহাদের এতই সারল্য যে, তাহাতে যেন তাহারা গোগণেরই অবস্থার অনুকরণ করিতেছিল।

निबद्धनिश्वासविकम्पिताधरा
लता इव प्रस्फुरितैकपल्लवाः ।
व्यपोढपार्श्वैरपवर्त्तितत्विका
विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥
व्रजाजिरेष्वम्बुदनादशङ्किनीः
शिखण्डिनामुन्मदयत्सु योषितः ।
मुहुः प्रणुन्नेषु मथां विवर्त्तनै-
र्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥

नवातपामृष्टसरोजचारुभिः मुखैः निबद्धनिश्वासविकम्पिताधरा प्रस्फुरितैकपल्लवा लताः इव, व्यपोढपार्श्वैः पाणिविहारहारिभिः विकर्षणैः अपवर्त्तितत्विका व्रजाजिरेषु अम्बुदनादशङ्किनीः

मूर्द्धजाः षट्पदा इव इति उपमितसमासः । सरोजचारुभिः इति उपमानुसारात् । परिभ्रमद्भिः चलद्भिः मूर्द्धजैः षट्पदैः आकुलानि तैः दन्ताः केसराः इव इति पूर्ववत् समासः । स्मितोदयेन आदर्शिताः ईषत् प्रकाशिताः दन्तकेसराः येषां तैः तथोक्तैः चलत्कुण्डलरश्मिरञ्जितैः चञ्चलकनककर्णवेष्टनप्रभानुलिप्तैः अत एव नवातपामृष्टं बालातपस्पृष्टं यत् सरोजं तद्वत् चारुभिः मुखैः उपलक्षिताः ॥ १४ ॥

निबद्धेति । निबद्धेन अनुरुद्धेन निश्वासेन विकम्पिताः अधराः यासां ताः तथोक्ताः, अत एव प्रस्फुरितैकपल्लवाः प्रचलितैकपल्लवा इत्यर्थः, "क्वचित् सङ्ख्याशब्दस्य वृत्तिविषये वोपसार्थत्वं सप्तपर्णादिवत्" इति कैयटः । लता इव स्थिताः दैवात् एकपल्लवस्फुरणस्य अपि लोके सम्भवात् उपमा एव इयं न उत्प्रेक्षा । किञ्च व्यपोढानि विपरीतानि पार्श्वानि येषु तैः पाणिविहारहारिभिः पाणिविक्षेपमनोहरैः । "अङ्गहारोऽङ्गविक्षेपः" इत्यमरः । विकर्षणैः मन्थगुणकर्षणैः अपवर्त्तितत्विकाः सञ्चलितनितम्बाः यद्यपि "पृष्ठवंशाधरे त्विक्" इत्यमरः, तथापि अत्र नितम्बः लक्ष्यते तन्नैकव्यात् इति भावः ॥ १५ ॥

व्रजेति । व्रजाजिरेषु गोष्ठप्राङ्गणेषु । अधिकरणे सप्तमी । "व्रजो गोष्ठाध्वबृन्देषु" इति विश्वः । अम्बुदनादशङ्किनीः गर्ज्जितभ्रमवतीः इति

१४—१७ । अर्জ্জুন দেখিলেন,—কতিপয় বল্লবী মন্থনকার্য্যে ব্যাপৃত, তাহাদের মুখমণ্ডল পরিচলিত কেশরূপ অলিকুলে সমাকুলিত, ঈষৎ হাস্যবিকাশে উহাদের দশনরূপ কেশর ঈষৎ

স মন্থরাবল্গিতপীবরস্তনীঃ
পরিশ্রমক্লান্তবিলোচনোৎপলাঃ।
নিরীক্ষিতুং নোপররাম বল্লবী-
রভিপ্রনৃত্তা ইব বারযোষিতঃ ॥ ১৩ ॥

ক্রিয়াপক্ষম্ ॥

শিখণ্ডিনাং যোষিতঃ উন্মদয়ৎসু মথাং বিবর্ত্তনৈঃ মুহুঃ প্রণুন্নেষু কুম্ভেষু মৃদঙ্গমন্থরং নদৎসু সৎসু মন্থরাবল্গিতপীবরস্তনীঃ পরিশ্রমক্লান্তবিলোচনোৎপলাঃ বল্লবীঃ অভিপ্রনৃত্তাঃ বারযোষিত ইব সঃ নিরীক্ষিতুং ন উপররাম ॥ বাচ্য—তেন ন উপরেমে ॥ ১৪—১৩ ॥

ভ্রান্তিমদলঙ্কারঃ। শিখণ্ডিনাং যোষিতঃ ময়ূরীঃ। যোষিদ্গ্রহণং মৌগ্ধ্যাতিশয়ার্থম্। উন্মদয়ৎসু উন্মদাঃ কুর্ব্বৎসু। "তৎকরোতি" ইতি ণ্যন্তাৎ শতৃপ্রত্যয়ঃ। মথাং মন্থনদণ্ডানাম্। "বৈশাখমন্থমন্থান-মন্থানো মন্থদণ্ডকে" ইত্যমরঃ। বিবর্ত্তনৈঃ পরিভ্রমণৈঃ মুহুঃ প্রণুন্নেষু কম্পিতেষু ইতি স্বভাবোক্তিঃ। কুম্ভেষু কলসীষু মৃদঙ্গবৎ মন্থরম্ ধ্বনদৎসু স্তনবৎসু সৎসু ইতি নাট্য [বাদ্য] সাম্যোক্তিঃ। ভাবলক্ষণে সঙ্করোঽয়ম্ ॥ ১৬ ॥

স ইতি। মন্থরং মন্দম্ আবল্গিতাঃ চঞ্চলাঃ পীবরাঃ স্তনাঃ যাসাং তাঃ তথোক্তাঃ। "স্বাঙ্গাচ্চোপসর্জনাদসংযোগোপধাৎ" ইতি ঙীষ্। পরিশ্রমেণ ক্লান্তানি ম্লানানি বিলোচনোৎপলানি যাসাং তাঃ তথোক্তাঃ। বল্লবীঃ গোপীঃ। "গোপে গোপালগোসংখ্যগোধুগাভীরবল্লবাঃ" ইত্যমরঃ। অভিপ্রনৃত্তাঃ নৃত্যন্তীঃ। "গত্যর্থাকর্ম্মক" ইত্যাদিনা কর্ত্তরি ক্তঃ। "মতিবুদ্ধিপূজার্থেভ্যশ্চ" ইতি চকারাদ্বর্ত্তমানার্থত্বম্। বারযোষিতঃ বেশ্যা ইব। "বারস্ত্রী গণিকা বেশ্যা" ইত্যমরঃ। সঃ অর্জুনঃ নিরীক্ষি-তুম্। ঈক্ষতেস্তুমুন্। ন উপররাম ন বিরমতি স্ম। "উপাচ্চ" "বিভাষা-কর্ম্মকাৎ" ইতি পরস্মৈপদম্। অত্র চতুঃশ্লোক্যাম্ উপমাস্বভাবোক্তয়োঃ সংসৃষ্টিঃ ॥ ১৩ ॥

প্রকাশিত, এবং চঞ্চল কুণ্ডলরশ্মিদ্বারা উহারা রঞ্জিত; সুতরাং বালাতপ-স্পৃষ্ট সরোজসমূহের ন্যায়ই ঐ সকল বল্লবীমুখ মনোজ্ঞ। বল্লবীরা শ্রম রুক্ষ করিতেছিল, তাই তাহাদের অধরদেশ বিকম্পিত হইতেছিল, সুতরাং প্রফুল্লিতৈকপল্লবা লতার ন্যায়ই তাহাদের শোভা হইয়াছিল। তাহারা যে সুন্দর পার্শ্বিবিক্ষেপ সহকারে মন্থনরজ্জু আকর্ষণ করিতেছিল, তাহাতে তাহাদের পার্শ্বদেশের বিবর্ত্তন হইতেছিল এবং নিতম্বদেশ দুলিতেছিল। তাহাদের মন্থনদণ্ডবিবর্ত্তনে দুগ্ধকুম্ভসকল বারংবার কম্পিত হইয়া মৃদঙ্গবৎ মন্থরধ্বনি করিতেছিল, তাহাতে গোষ্ঠপ্রাঙ্গণস্থ ময়ূরীরা উন্মাদিত হইয়াছিল। গোপীদিগের পীবরস্তন কিঞ্চিৎ কিঞ্চিৎ চঞ্চল হইতেছিল, এবং

पपात पूर्वां जहतो विजिह्मतां
वृषोपभुक्तान्तिकशस्यसम्पदः ।
रथाङ्गसीमन्तितसान्द्रकर्दमान्
प्रसक्तसम्पातपृथक्कृतान् पथः ॥ १८ ॥
जनैरुपग्राममनिन्द्यकर्म्मभि-
र्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः
सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥

अन्वयः । सः पूर्वां विजिह्मतां जहतः वृषोपभुक्तान्तिकशस्यसम्पदः रथाङ्गसीमन्तितसान्द्रकर्दमान् प्रसक्तसम्पातपृथक्कृतान् पथः पपात ॥ वाच्य—तेन जिह्मताः जहतः...सम्पदः...कर्दमाः...पृथक्कृताः पन्थानः पेतिरे ॥ २८ ॥

अन्वयः । सः उपग्रामम् अनिन्द्यकर्म्मभिः विविक्तभावेङ्गितभूषणैः वृताः आश्रममण्डपोपमाः सपुष्पहासाः निवेशवीरुधः भृशं ददर्श ॥ वाच्य—तेन...निवेशवीरुधः दृष्टाश्चिरे ॥ १८ ॥

पपातेति । सः अर्जुनः पूर्वां प्राट्पर्षेण्यां विजिह्मतां वक्रतां जहतः त्यजतः । शरदि निष्पङ्कत्वेन समरेखया एव सुगमत्वात् इति भावः । जहातेः शतृप्रत्ययः । वृषोपभुक्तान्तिकशस्यसम्पदः वृषभचर्वितप्रान्तशस्यसमृद्धीन् । "सुक्तते वृषभे वृषः" इत्यमरः । सीमन्ताः इव सीमन्ताः चक्राङ्गपद्धतयः सीमन्तवन्तः कृताः सीमन्तिताः । मत्वन्तात् "तत्करोति" इति णिचि क्तः, णाविष्ठवद्भावान्मतुपो लुक् । रथाङ्गैः चक्रैः सीमन्तिताः सान्द्राः कर्दमाः घनीभूताः पङ्का येषु तान् प्रसक्तसम्पातेन सन्ततसञ्चारेण पृथक्कृतान् पथः मार्गान् पपात जगाम इति स्वभावोक्तिः ॥ १८ ॥

जनैरिति । स अर्जुनः उपग्रामं ग्रामेषु, विभक्त्यर्थे अव्ययीभावः । अनिन्द्यकर्म्मभिः अनिषिद्धवृत्तिभिः । वृत्तिश्च एकत्र क्षत्रियादिः, अन्यत्र शिलोञ्छादिः । विविक्तानि एकाग्राणि, भावः अभिप्रायः, इङ्गितं चेष्टा, भूषणम्

श्रमভরে তাহাদের নয়নোৎপলসকল ক্লান্ত হইয়াছিল। অর্জ্জুন ঐ সকল বল্লরীদিগকে নর্ত্তনরত বায়বনিতাদিগের ন্যায় অবিরত দর্শন করিতে লাগিলেন।

১৮। পথসকল পূর্ব্ববক্রতা পরিত্যাগ করিয়া শরতে সরল হইয়াছে ; বৃষগণ পথের প্রান্তভাগের শস্যসকল খাইয়া ফেলিয়াছে ; রথচক্রের চলনে পথের সীমন্তীকৃত কর্দ্দমসকল ঘনীভূত হইয়াছে ; এবং সদা সঞ্চারে সমস্ত পথই পৃথক্‌কৃত হইয়াছে। অর্জ্জুন এহেন পথে যাইতে লাগিলেন।

ततः स सम्प्रेक्ष्य शरद्गुणश्रियं
शरद्गुणालोकनलोलचक्षुषम्।
उवाच यच्चस्तमनोदितोऽपि गां
न ह्यङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥
इयं शिवाया नियतेरिवायतिः
कृतार्थयन्ती जगतः फलैः क्रियाः।
जयश्रियं पार्थ पृथूकरोतु ते
शरत् प्रसन्नाम्बुरनम्बु-वारिदा ॥ २१ ॥

अन्वयः। ततः स यच्चः शरद्गुणश्रियं सम्प्रेक्ष्य शरद्गुणालोकनलोलचक्षुषं तम् अनोदितोऽपि गाम् उवाच। तथाहि इङ्गितज्ञः अवसरे न अवसीदति ॥ वाच्य—तेन यच्चेण शरद्गुणालोकनलोलचक्षुः सः अनोदितेनापि गाम् ऊचे। इङ्गितज्ञेन न अवसद्यते ॥ २० ॥

अलङ्कारस्य येषां तथोक्तैः जनैः दृताः अधिष्ठिता इत्यर्थः। अत एव आश्रमेषु सुनिस्थानेषु ये मण्डपाः तदुपमाः। "मण्डपोऽस्त्री जनाश्रयः" इत्यमरः। सपुष्पहासाः पुष्पविकाशसहिताः। "तेन सह" इत्यादिना बहुव्रीहिः। निवेशवीरुधः गृहगुल्मिनीः। "वीरुधो वल्लिगुल्मिन्यौ" इति वैजयन्ती। भृशं सादरं ददर्श। उपमालङ्कारः ॥ १९ ॥

तत इति। ततः स पूर्वोक्तः यच्चः शरद्गुणश्रियं सम्प्रेक्ष्य दर्शनीयां वर्णनीयां च विचार्य्य इत्यर्थः। शरद्गुणालोकने लोलचक्षुषं सतृष्णदृष्टिम्। "लोलश्चलसतृष्णयोः" इत्यमरः। तम् अर्जुनम् अनोदितः अपि अपृष्टः अपि गां वाचम् उवाच। तथाहि इङ्गितज्ञः भावज्ञः। "इङ्गितं हृद्गतो भावः" इति विश्वः। अवसरे उक्तियोग्ये काले न अवसीदति न वाचं यच्छति। "नापृष्टः कस्यचिद् ब्रूयात्" इति निषेधस्तु अनाकाङ्क्षितोक्तिविषय इति भावः। सामान्ये विशेषसमर्थनरूपः अर्थान्तरन्यासः ॥ २० ॥

১৯। অর্জ্জুন গ্রামে গ্রামে প্রস্ফুট পুষ্পযুত বহু গৃহগুল্মিনী সাদরে দেখিতে লাগিলেন। দেখিলেন,—যাহাদের কর্ম্ম অগর্হিত এবং ভাব, ইঙ্গিত ও তৃষণ সকল বিরিক্ত, এইরূপ জনগণ কর্ত্তৃক ঐ সকল গৃহগুল্মিনী অধিকৃত; সুতরাং উহারা আশ্রমস্থানস্থিত মণ্ডপনিচয়ের ন্যায়ই প্রতিভাত।

২০। অনন্তর সেই অর্জ্জুনসমভিব্যাহারী যক্ষ শরদ্গুণশ্রী অবলোকন করিয়া শরদ্গুণদর্শনে লোলদৃষ্টি অর্জ্জুনকে অপৃষ্ট হইয়াও বলিতে লাগিল। বস্তুতঃ ইঙ্গিতজ্ঞ ব্যক্তি কখনও কখনো-চিতকালে কথা না বলিয়া থাকে না।

उपैति शस्यं परिणामरम्यता
नदीरनौद्वत्यमपङ्कता महीम् ।
नवैर्गुणैः सम्प्रति संस्तवस्थिरं
तिरोहितं प्रेम घनागमश्रियः ॥ २२ ॥
पतन्ति नास्मिन् विशदाः पतत्रिणो
धृतेन्द्रचापा न पयोदपङ्क्तयः ।

अन्वयः । हे पार्थ ! शिवायाः नियतेः आयतिरिव जगतः क्रियाः फलैः कृतार्थयन्ती प्रसन्नाम्बुः अनम्बुवारिदा इयं शरत् ते जयश्रियं पृथूकरोतु ॥ वाच्या—आयत्या इव कृतार्थयन्त्या प्रसन्नाम्बा अनम्बुवारिदया अनया शरदा जयश्रीः पृथूक्रियताम् ॥ २१ ॥

अन्वयः । परिणामरम्यता शस्यम् उपैति, अनौद्वत्यम् नदीः उपैति, अपङ्कता महीम् उपैति । तथाहि सम्प्रति नवैः गुणैः संस्तवस्थिरमपि घनागमश्रियः प्रेम तिरोहितम् ॥ वाच्या—शस्यं परिणामरम्यतया नदी अनौद्वत्येन मही अपङ्कतया उपेयते । नवाः गुणाः प्रेम तिरोहितवन्तः ॥२२॥

इयमिति । हे पार्थ ! शिवायाः कल्याणकारिण्याः नियतेः । "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः" इत्यमरः । शुभावहदैवस्य आयतिः फलदानकालः सा एव जगतः क्रिया कृष्यादिकर्माणि फलैः लाभैः । "लाभनिष्पत्तियोगेषु बीजभावे धने फलम्" इति वैजयन्ती । कृतार्थयन्ती सफलयन्ती प्रसन्नाम्बुः निर्मलोदका अनम्बुवारिदा निर्जलमेघा, अनेन विशेषणद्वयेन द्यावापृथिव्योः आनुकूल्यं सूचयति । इयं शरत् ते जयश्रियं पृथूकरोतु । आशीरर्थे लोट् ॥ २१ ॥

उपैतीति । शस्यं ब्रीह्यादिकं परिणामेन परिपाकेण या रम्यता सा (कर्त्री) उपैति । नदीः अनौद्वत्यं गम्यरूपत्वम् (कर्त्तृ) उपैति । महीम् अपङ्कता निष्पङ्कत्वम् (कर्त्री) उपैति । तथाहि सम्प्रति नवैः गुणैः पूर्वोक्तैः शरद्धर्मैः संस्तवेन परिचयेन स्थिरं दृढम् अपि घनागमश्रियः प्रावृड्लक्ष्म्याः सम्बन्धि तद्विषयम् इत्यर्थः, प्रेम तिरोहितं निरर्थकं कृतम् इत्यर्थः । गुणतन्त्राः प्रेमाणः न परिचयतन्त्रा इति भावः । वास्तवालङ्कारः ॥ २२ ॥

२१ । [यक्ष कहिल] हे पार्थ ! এই যে কল্যাণকারিণী নিয়তির ফলদানকালের ন্যায় ফলদ্বারা জগতের কৃষ্যাদি-কর্ম্ম-নির্ব্বাহকারিণী নির্ম্মলোদকা নির্জ্জলমেঘা শরৎ, ইনি তোমার জয়শ্রী বৃদ্ধি করুন ।

২২ । শস্য—পরিণামরম্যতা, নদীসকল—অনুদ্ধতভাব, মহী—পঙ্কহীনতা প্রাপ্ত হইতেছে । বস্তুতঃ সম্প্রতি নবীন শরদ্গুণরাশি, ঘনাগমলক্ষ্মীর প্রেম পূর্ব্বপরিচয়ে সুদৃঢ় হইলেও তাহা নিষ্ফল (নাকচ) করিয়া দিতেছে ।

तथापि पुष्णाति नभः श्रियं परां
न रम्यमाहार्य्यमपेक्षते गुणम् ॥ २३ ॥
विपाण्डुभिर्म्लानतया पयोधरै-
श्च्युताचिराभागुणहेमदामभिः ।
दृयं कदम्बानिलभर्त्तुरत्यये
न दिग्बधूनां क्लमता न राजते ॥ २४ ॥

अन्वयः । अस्मिन् विशदाः पतत्त्रिणः न पतन्ति, धृतेन्द्रचापाः पयोदपङ्क्तयः च न पतन्ति । तथापि नभः परां श्रियं पुष्णाति । तथाहि रम्यं (वस्तु) आहार्य्यं गुणं न अपेक्षते ॥ वाच्य—विशदैः पतत्त्रिभिः न पत्यते, धृतेन्द्रचापाभिः पयोदपङ्क्तिभिः न पत्यते । नभसा परा श्रीः पुष्यते । रम्येण आहार्य्यो गुणो न अपेक्ष्यते ॥ २३ ॥

अन्वयः । कदम्बानिलभर्त्तुरत्यये म्लानतया विपाण्डुभिः च्युताचिराभागुणहेमदामभिः पयोधरैः दिग्बधूनाम् इयं क्लमता न राजते (इति) न ॥ वाच्य—अनया क्लमतया न राज्यते न ॥ २४ ॥

पतन्तीति । अस्मिन् नभसि विशदाः पतत्त्रिणः बलाकाः न पतन्ति न प्रसरन्ति, धृतेन्द्रचापाः पयोदपङ्क्तयश्च न पतन्ति । तथापि श्रीकारणाभावेऽपि नभः परां श्रियं शोभां पुष्णाति । तथाहि रम्यं स्वभावसुन्दरं वस्तु आहार्य्यम् आरोप्यमाणं गुणं न अपेक्षते । तत्र स्वभावस्य एव समर्थत्वात् इति भावः । अत्र अर्थान्तरन्यासः ॥ २३ ॥

विपाण्डुभिरिति । कदम्बानिलशब्देन वर्षर्तुः उपलक्ष्यते । स एव भर्त्ता तस्य अत्यये विरहे म्लानतया निर्जलतया दुर्बलतया च विपाण्डुभिः च्युतानि रहितानि अचिराभा विद्युत् तस्या गुणा एव हेमदामानि सुवर्णसूत्राभरणानि येभ्यः तैः पयोधरैः अम्भोदैः, अन्यत्र स्तनैः उपलक्षितानाम् । "स्तनाम्भोदौ पयोधरौ" इति वैजयन्तौ । दिश एव बधूः तासाम् इयं क्लमता न राजते इति न, किन्तु राजत एव भर्त्तृवियुक्तत्वात् । "आर्त्ताः सुदिते हृष्टा प्रोषिते मलिना क्षामा" इति स्मरणात् इति भावः । सामान्यतः प्रसक्तम् अराजनं कार्य्यस्य एकेन नञानूद्य द्वितीयेन निषेधति । यथाह वामनः—"सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ" इति । अत्र रूपकालङ्कारः स्फुट एव ॥ २४ ॥

২৩। এই আকাশে বলাকাশ্রেণী উড়িতেছে না; ইন্দ্রধনু লইয়া মেঘরাজিও উঠিতেছে না; তথাপি আকাশ পরমশোভা ধারণ করিতেছে। ফলতঃ যাহা স্বভাবরম্য বস্তু, তাহা কখনও আহার্য্য গুণের অপেক্ষা করে না।

২৪। বর্ষাঋতুরূপ পতির বিরহে দিগঙ্গনাগণ পরিম্লান হওয়ায় পয়োধরসকল পাণ্ডু বর্ণ

विहाय वाञ्छामुदिते मदात्यया-
दरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं
गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥ २५ ॥
अमी पृथुस्तम्बभृतः पिशङ्गतां
गता विपाकेन फलस्य शालयः ।
विकासि वप्राभ्यसि गन्धसूचितं
नमन्ति निघ्नातुमिवासितोत्पलम् ॥ २६ ॥

अन्वयः । मदात्ययात् अरक्तकण्ठस्य शिखण्डिनः उदिते रुते वाञ्छां विहाय श्रुतिः उन्मदहंसनिःस्वनं श्रयति । तथाहि प्रियत्वे गुणाः अधिकृताः, संस्तवः न ॥ वाच्य—श्रुत्या उन्मदहंसनिःस्वनः श्रीयते । गुणैः अधिकृतं न संस्तवेन ॥ २५ ॥

अन्वयः । अमी पृथुस्तम्बभृतः फलस्य विपाकेन पिशङ्गतां गताः, शालयः वप्राभ्यसि विकासि गन्धसूचितम् असितोत्पलं निघ्नातुमिव नमन्ति ॥ वाच्य—अमीभिः पृथुस्तम्बभृद्भिः...पिशङ्गतां गतैः शालिभिः...नम्यते ॥ २६ ॥

विहायेति । मदात्ययात् मदक्षयात् अरक्तकण्ठस्य अस्राव्यकण्ठस्य कण्ठशब्देनात्र तद्वतः स्वरः लक्ष्यते, शिखण्डिनः मयूरस्य सम्बन्धिनि उदिते उच्चैस्तरे रुते कूजिते वाञ्छां विहाय श्रुतिः श्रोत्रम् । "कर्णशब्दग्रही श्रोत्रं श्रुतिः स्त्री श्रवणं" इत्यमरः । उन्मदहंसनिःस्वनं मत्तमरालकूजितं श्रयति भजते । ननु अकाण्डे परिचितपरिहारेण अपरिचिते कथं प्रीत्युदयः इत्याशङ्क्य अर्थान्तरं न्यस्यति—गुणा इति । प्रीणाति इति प्रियः । "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्ययः । प्रियत्वे प्रीतिकरत्वे गुणाः अधिकृताः नियुक्ताः संस्तवः परिचयः न अधिकृतः न समर्थः, प्रेमाधाने गुणवत्त्वं प्रयोजकं न परिचय इत्यर्थः ॥ २५ ॥

अमी इति । अमी पृथून् स्तम्बान् गुच्छान् बिभ्रति पृथुस्तम्बभृतः ।

धारण करियाछे ; विद्युद्गुणरूप हेमदामराजि ताहा हइते विच्युत हइयाछे । एই कारण ऐ सकल विगञ्जनार कृशताই प्रकाश पाइतेछे ।

२५ । मदापगमे अश्राव्यस्वर मयूरेर उच्चारित उच्च कूजने स्पृहा परित्याग करिया श्रोत्र एक्षणे मत्तमरालकूजनेर आश्रय लইतेछे । वस्तुतः प्रीतिव्यापारे गुणसमूहेरই अधिकार ; किन्तु परिचयेर नहे । अर्थात् मयूरेर कण्ठस्वर पूर्व्वपरिचित बटे, किन्तु शरते ताहा निर्गुण बलिया अश्राव्य । अधुना अपरिचित हইलেও मत्त मरालस्वरই गुणयुक्त बलिया श्राव्य ।

मृणालिनीनामनुरञ्जितं त्विषा
विभिन्नमम्भोजपलाशशोभया।
पयः स्फुरच्छालिशिखापिशङ्गितं
द्रुतं धनुःखण्डमिवाहिविद्विषः ॥ २७ ॥
विपाण्डु संन्यानमिवानिलोद्धतं
निरुन्धतीः सप्तपलाशजं रजः।
अनाविलोन्मीलितबाणचक्षुषः
सपुष्पहासा वनराजियोषितः ॥ २८ ॥

अन्वयः। मृणालिनीनां त्विषा अनुरञ्जितम् अम्भोजपलाशशोभया विभिन्नं स्फुरच्छालिशिखापिशङ्गितं द्रुतम् अहिविद्विषः धनुःखण्डमिव स्थितं पयः, विपाण्डु अनिलोद्धतं सप्तपलाशजं रजः निरुन्धतीः वनराजियोषितः अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासाः (इव) [स्थिताः]।

"स्तम्बो गुच्छस्तृणादिनः" इत्यमरः। फलस्य प्रसवस्य विपाकेन परिणामेन पिशङ्गतां गताः शालयः ब्रीहिविशेषाः। वप्राम्भसि केदारोदके। "पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम्" इत्यमरः। विकसति इति विकासि विकसितं गन्धेन सूचितं घ्रापितम् असितोत्पलं निघ्रातुम् आघ्रातुम् इव नमन्ति। "निध्यातुमिव" इति पाठे द्रष्टुम् इत्यर्थः। निर्वर्णयितुं वा। "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः। अत्र फलभारात् नमनस्य निघ्राणफलकत्वम् उत्प्रेक्ष्यते इति फलोत्प्रेक्षा ॥ २६ ॥

अथ चतुर्भिः कलापकमाह—मृणालिनीनामिति। मृणालिनीनां पद्मलतानां त्विषा हरिद्वर्णेन अनुरञ्जितम् तद्वर्णताम् आपादितम् इत्यर्थः। तथा अम्भोजपलाशशोभया पद्मदलकान्त्या आरुण्येन इत्यर्थः। विभिन्नं मिश्रितम्। तथा स्फुरच्छालिशिखापिशङ्गितं स्फुरद्भिः कलमाग्रैः पिङ्गलीकृतम् इत्यं नानावर्णत्वात् द्रुतं विगलितं पलायितम् अहिविद्विषः वृत्रशत्रोः इन्द्रस्य "सर्पे वृत्रासुरेऽप्यहिः" इति वैजयन्ती। धनुःखण्डम् इव स्थितम्। "नित्यं समासेऽनुत्तरपदस्थस्य" इति विसर्जनीयस्य षत्वम्। पयः वप्राम्भः अपदिश्य व्याजीकृत्य धावताम् इत्यागामिना सम्बन्धः। अत्र धनुःखण्डस्य द्रुतस्य लोके अप्रसिद्धत्वात् उत्प्रेक्षा इयं, न उपमा ॥ २७ ॥

२७। এই সকল পৃথুগুচ্ছধারী ফলপাক-পিশঙ্গ শালি কেদারজলে বিকসিত গন্ধসূচিত নীলোৎপলের আঘ্রাণ লইবার জন্যই যেন নত হইয়া পড়িয়াছে।

২৭—৩০। এ সময়ের জল মৃণালিনীসমূহের প্রভাপুঞ্জে অনুরঞ্জিত হইয়াছে। পদ্মপলাশের

अदीपितं वैद्युतजातवेदसा
सिताम्बुदच्छेदतिरोहितातपम् ।
ततान्तरं सान्तरवारिशीकरैः
शिवं नभोवर्त्म सरोजवायुभिः ॥ २९ ॥
सितच्छदानामपदिश्य धावतां
रुतैरमीषां ग्रथिताः पतत्त्रिणाम् ।
प्रकुर्वते वारिदरोधनिर्गताः
परस्परालापमिवामला दिशः ॥ ३० ॥

संव्यानम् इव निरुन्धतीः अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासा वनराजियोषितः, वैद्युतजातवेदसा अदीपितं सिताम्बुदच्छेदतिरोहितातपं सान्तरवारिशीकरैः ततान्तरं सरोजवायुभिः शिवं नभोवर्त्म च अपदिश्य धावताम् अमीषां सितच्छदानां पतत्त्रिणां रुतैः ग्रथिताः वारिदरोधनिर्गताः अमलाः दिशः परस्परालापम् प्रकुर्वते इव ॥ वाच्य—.....ग्रथिताभिः वारिदरोधनिर्गताभिः अमलाभिः दिग्भिः परस्परालाप इव प्रक्रियते ॥ २७—३० ॥

विपाण्डु इति । विपाण्डुशुभ्रम् अनिलोद्धतम् अनिलोत्क्षिप्तम् । सप्त सप्त पलाशानि पत्राणि पर्वसु येषां ते सप्तच्छदाः सप्तपलाशाः । क्वचित् संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत् इति उक्तम् । तेषां पुष्पाणि सप्तपलाशानि । "हिङ्गोनं प्रसवे सर्वम्" इत्यमरः । "फले लुक्" इत्यणो लुक् । तेषु जातं सप्तपलाशजं रजः परागं संव्यानम् उत्तरीयम् इव । "संव्यानमुत्तरीयं च" इत्यमरः । निरुन्धतीः निवारयन्तीः प्रावृतवतीः इति यावत् । अनाविलानि अकलुषाणि उन्मीलितानि च बाणानि नीलसैरेयकाणि चक्षुंषि इव यासां ताः तथोक्ताः । "नीलस्त्वर्थं गलो दासो बाण ओदनपाक्यपि" इति धन्वन्तरिः । पुष्पाणि हासा इव तैः सह वर्त्तन्ते इति सपुष्पहासाः । वनराजयः योषित इव वनराजियोषितः ताः अपदिश्य इति अन्वयः । अत्र संव्यानम् इव इति उपमा एव अन्यत्र उपमितसमासे लिङ्गम् । यथा काचित् केनचित् कामुकेन आक्षिप्तं स्तनांशुकं निरुन्धे तद्वत् इति भावः ॥ २८ ॥

अदीपितमिति । वैद्युतजातवेदसा वैद्युताग्निना अदीपितम् अप्रकाशितं, विद्युत्प्रकाशस्य दृष्टिविघातकत्वात् तद्राहित्यं गुण इति भावः ।

शोभासह विशिया गियाछे । एवं उच्छल कलमाग्रभागधारा पिङ्गलीकृत हईयाछे । एईरूपे उहा नानावर्ण बलिया विगलित इन्द्रचापखण्डेर न्यायई विराज करितेछे । पुष्पहासयुत वनराजिरमणीरा

॥ कलापकम् ॥

विहारभूमेरभिघोषमुत्सुकाः
शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयः स्रवन्त्यमू-
रुपायनानीव नयन्ति धेनवः ॥ ३१ ॥

अन्वयः। विहारभूमेरभिघोषम् उत्सुकाः च्युतयूथपङ्क्तयः अमूः धेनवः असक्तं पयः स्रवन्ति, ऊधांसि शरीरजेभ्यः उपायनानीव नयन्ति ॥ वाच्य—उत्सुकाभिः च्युतयूथपङ्क्तिभिः अमूभिः धेनुभिः पयः स्रव्यते, ऊधांसि उपायनानीव नीयन्ते ॥ ३१ ॥

सिताम्बुदानां च्छेदैः खण्डैः तिरोहितातपम् । न दृष्टिबाधो नापि आतपबाधः इति भावः । सान्तरवारिशीकरैः विरलाम्बुकणैः ततान्तरं व्याप्तमध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्म च अपदिश्य इति। स्वभावोक्तिः अलङ्कारः ॥ २९ ॥

सितेति । अपदिश्य धावताम् इति पूर्वश्लोकत्रयोक्तं पयःप्रभृतिकम् उद्दिश्य धावताम् अमीषां सितच्छदानां पतत्रिणां हंसानाम् । "हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः" इत्यमरः । रुतैः शब्दैः ग्रथिताः दृब्धाः । "ग्रथितं गुम्फितं दृब्धम्" इत्यमरः । वारिदरोधनिर्गताः मेघोपरोधनिर्मुक्ताः अत एव अमलाः प्रसन्नाः दिशः परस्परालापं प्रकुर्वते इव, दिष्ट्या मेघोपरोधनिर्मुक्ताः चिरात् उच्छ्वसिताः इति हंसकूजितव्याजेन परस्परम् आलपन्ति इव इति उत्प्रेक्षा ॥ ३० ॥

विहारेति । विहारभूमेः अपररात्रगोचरात् इत्यर्थः । आगच्छन्त्यः इति शेषः । अभिघोषम् उत्सुकाः व्रजं प्रति उत्कण्ठिताः, वत्सप्रेम्णा इति भावः । "घोष आभीरपल्ली स्यात्" इत्यमरः । च्युता त्रुटिता यूथानां कुलानां पङ्क्तिः श्रेणीबन्धः यासां ताः तथोक्ताः । "सजातीयैः कुलं यूथम्" इत्यमरः । अमूः धेनवः असक्तम् अप्रतिबन्धं पयः क्षीरं स्रवन्ति स्रवन्ति । वत्सस्मरणात् प्रस्रवन्ति इत्यर्थः । स्रवतेः शतृप्रत्ययः । ऊधांसि शरीरजेभ्यः अपत्येभ्यः उपायनानि इव अतितोषकारीणि इव

स्वच्छ वाणपुष्परूप नेत्र उन्मीलित करिया येन अनिलचालित धवल सप्तपर्णपरागरूप उत्तरीय वस्त्र धारण करियाछे। नभोमार्गेर अभ्यन्तर विरल जलकणासमूहे व्याप्त हइयाछे नभःपथे वैद्युतांग्निर प्रकाश एखन आर नाई, शुभ्र मेघखण्डे उहार आतपच्छटा तिरोहित हइयाछे। एवं कमलसम्पृक्त अनिलद्वारा उहा रमणीय हइया उठियाछे। एই सकलेर उद्देशेই ঐ मरालकुल धावित हইতেছে। উহাদের ध्वनिगुञ्जित मेघरोधरहित प्रसन्न दिक्‌समूह येन परस्पर आलाप-आप्यायनই करিতেছে।

जगत्प्रसूतिर्जगदेकपावनी
व्रजोपकण्ठं तनयैरुपेयुषी ।
द्युतिं समग्रां समितिर्गवामसा-
वुपैति मन्त्रैरिव संहिताहुतिः ॥ ३२ ॥
कृतावधानं जितबर्हिणध्वनौ
सुरक्तगोपीजनगीतनिःस्वने ।
इदं जिघत्सामपहाय भूयसीं
न शस्यमभ्येति मृगीकदम्बकम् ॥ ३३ ॥

अन्वयः । जगत्प्रसूतिः जगदेकपावनी तनयैः व्रजोपकण्ठम् उपेयुषी असौ गवां समितिः मन्त्रैः संहिताहुतिरिव समग्रां द्युतिम् उपैति ॥ वाच्य—...प्रसूत्या...पावन्या...उपेयुष्या असुया गवां समित्या संहिताहुत्येव समग्रया द्युतिः उपेयते ॥ ३२ ॥

अन्वयः । जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने कृतावधानम् इदं मृगीकदम्बकं भूयसीं जिघत्साम् अपहाय शस्यं न अभ्येति ॥ वाच्य—.....कृतावधानेन अनेन मृगीकदम्बकेन .....शस्यं न अभीयते ॥ ३३ ॥

इति उत्प्रेक्षा । नयन्ति प्रापयन्ति । यथा लोके कुतश्चित् प्रवासात् एत्य मातरः किञ्चित् खाद्यम् आनयन्ति तद्वत् इति भावः ॥ ३१ ॥

जगदिति । जगत्प्रसूतिः जगत्कारणम् आज्यादिहविर्हारेण इति भावः । जगताम् एकपावनी मुख्यशोधनी व्रजोपकण्ठं गोष्ठान्तिकम् । "दूरान्तिकार्थैभ्यो द्वितीया च" इति द्वितीया । "उपकण्ठान्तिकाभ्यर्णाभ्यया:" इत्यमरः । तनयैः वत्सैः उपेयुषी सङ्गता । "उपेयिवाननाश्याननूचानश्च" इति क्वसुप्रत्ययान्तः निपातः । "उगितश्च" इति ङीप् । असौ गवां समितिः संहतिः । मन्त्रैः ऋग्यजुषादिभिः । "मन्त्रो ऋगादिरुद्गीथोक्तिः" इति वैजयन्ती । संहिता योजिता आहुतिः इव, समग्रां द्युतिम् उपैति । आहुतिः अपि जगत्प्रसूतिः जगदेकपावनी च । "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति स्मरणात् इति भावः ॥ ३२ ॥

৩১। কতকগুলি ধেনু শেষরাত্রির বিচরণস্থান হইতে ব্রজাভিমুখগমনে উৎকণ্ঠিত হইয়া যূথভ্রষ্ট হইয়াছে। তাহাদের আলান (স্তন) সকল অবাধে ক্ষীর ক্ষরণ করিতেছে। তাহারা যেন ঐ সকল আলান আপনাদের অপত্যদিগের উপহারের জন্যই আনয়ন করিয়াছে।

৩২। ঐ গাভীসকল জগতের কারণ, এবং একমাত্র পাবক, উহারা বৎসগণসহ গোষ্ঠান্তিকে উপনীত হইয়া মন্ত্রযোজিত আহুতির ন্যায় পরম দ্যুতি প্রাপ্ত হইতেছে।

असावनास्थापरयावधीरितः
सरोरुहिण्या शिरसा नमन्नपि ।
उपैति शुष्यन् कलमः सहाम्भसा
मनोभुवा तप्त इवाभिपाण्डुताम् ॥ ३४ ॥
अमी समुद्भूतसरोजरेणुना
हृता हृतासारकणेन वायुना ।

अन्वयः । शिरसा नमन्नपि अनास्थापरया सरोरुहिण्या अवधीरितः अम्भसा सह शुष्यन् असौ कलमः मनोभुवा तप्त इव अभिपाण्डुताम् उपैति ॥ वाच्य—नमतापि अवधीरितेन शुष्यता अमुना कलमेन तप्तेनेव अभिपाण्डुता उपेयते ॥ ३४ ॥

ज्ञतेति । जितवर्हिणध्वनौ केकानुकारिणि इत्यर्थः । एतेन षड्जस्वरप्रायं गायन्ति इति गम्यते । यथाह मातङ्गः—"षड्जं मयूरो वदति" इति । गाः पान्ति इति गोपाः ; तेषां भार्याः गोप्यः "आतोऽनुपसर्गे कः" इति कप्रत्ययः । "पुंयोगादाख्यायाम्" इति ङीष् । ता एव जनः सुरक्तः मधुरकण्ठः यः गोपीजनः वल्लवीजनः तस्य गीतनिःस्वने गाने ज्ञतावधानम् एकाग्रचित्तम् इदं पुरोवर्त्ति मृगीकदम्बकं कर्त्तुं भूयसीम् अतिमहतीं जिघत्साम् अत्तुम् इच्छाम् । अदेः सन्नन्तात् अप्रत्ययः । "लुङ्सनोर्घस्लृ" इति घस्लादेशः । अपहाय हित्वा शस्यं न अभ्येति न उपैति । गीतासक्त्या क्षुधाम् अपि न गणयति इत्यर्थः ॥ ३३ ॥

असाविति । शिरसा अग्रेण मूर्ध्ना नमन् प्रणमन् अपि अनास्थापरया अनादरपरया सरोरुहिण्या अवधीरितः अवज्ञातः, अम्भसा सहचरभूतेन इति भावः । शुष्यन् असौ कलमः शालिविशेषः, मनोभुवा तप्त इव कामार्त्त इव अभिपाण्डुताम् उपैति । अत्र अनास्थापरया इति प्रकृतसरोरुहिणीविशेषणसामर्थ्यात् अप्रस्तुतनायिकाप्रतीतेः समासोक्तिः, उत्तिष्ठमानायाः सरोरुहिण्याः प्रतीयमानया नायिकया शुद्धभेदे अपि अभेदलक्षणातिशयोक्तिमहिम्ना अवधीरणक्रियासम्बन्धान् निर्वहन्ती मनोभुवा तप्त इव इति उत्प्रेक्षानिर्वाहिका इति अतिशयोक्त्यनुप्राणितसमासोक्त्युत्प्रेक्षयोः अङ्गाङ्गिभावेन सङ्करः ॥ ३४ ॥

৩৩। এই সমুদ্বহ মৃগীগণ মধুরকণ্ঠ গোপীজনের মধুরকণ্ঠজয়ী গীতরবে একাগ্রচিত্ত হইয়াছে। উহারা ভূয়সী ভক্ষণেচ্ছা পরিত্যাগপূর্ব্বক শস্যাভিমুখে আর যাইতেছে না।

৩৪। ঐ কলম শিরোভাগ দ্বারা প্রণত হইলেও অনাদরিণী সরোজিনী কর্ত্তৃক অবজ্ঞাত হইয়া সহচরস্বরূপ সলিলসহ শুকাইতে শুকাইতে কামার্ত্তবৎ একান্ত পাণ্ডুভাব প্রাপ্ত হইয়াছে।

उपागमे दुश्चरिता इवापदां
गतिं न निश्चेतुमलं शिलीमुखाः ॥ ३५ ॥
मुखैरसौ विद्रुमभङ्गलोहितैः
शिखाः पिशङ्गीः कलमस्य बिभ्रती ।
शुकावलिर्व्यक्तशिरीषकोमला
धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥ ३६ ॥
इति कथयति तत्र नातिदूरा-
दथ दृष्टे पिहितोष्णरश्मिबिम्बः ।

अन्वयः । समुद्धूतसरोजरेणुना हृतासारकणेन वायुना हृताः असौ शिलीमुखाः आपदाम् उपागमे दुश्चरिता इव गतिं निश्चेतुं न अलम् ॥ वाच्य—...हृतैः असौभिः शिलीमुखैः दुश्चरितैः इव न अलम् ॥ ३५ ॥

अन्वयः । विद्रुमभङ्गलोहितैः मुखैः पिशङ्गीः कलमस्य शिखाः बिभ्रती असौ व्यक्तशिरीषकोमला शुकावलिः गोत्रभिदः धनुःश्रियम् अनुगच्छति । वाच्य—...शिखाः बिभ्रत्या...कोमलया असुया शुकावल्या धनुःश्रीः अनुगम्यते ॥ ३६ ॥

असौ इति । समुद्धूतसरोजरेणुना इति सौरभ्योक्तिः । हृतासारकणेन उपात्ताम्बुकणेन इति शैत्योक्तिः । "धारासम्पात आसारः" इत्यमरः । वायुना हृताः आकृष्टाः असौ शिलीमुखाः भृङ्गाः । आपदाम् उपागमे राजादिभयागमे दुश्चरिताः दुष्टकर्माणः चौरादयः इव । गम्यते इति गतिं गन्तव्यदेशम् । "देशोपायगमे गतिः" इति वैजयन्ती । निश्चेतुं न अलं न समर्थाः । एकत्र वायोः सार्वत्रिकत्वेन उपादानात् अनिश्चयात् अन्यत्र भयान्धत्वात् इति भावः ॥ ३५ ॥

मुखैरिति । विद्रुमभङ्गलोहितैः मुखैः पिशङ्गीः पिशङ्गवर्णाः कलमस्य शिखाः शाल्यग्राणि बिभ्रती व्यक्तशिरीषकोमला विकसितशिरीषसवर्णा असौ शुकावलिः गोत्रभिदः इन्द्रस्य धनुषः श्रियम् अनुगच्छति अनुकरोति नानावर्णत्वात् इन्द्रधनुः इव आभाति इति उपमालङ्कारः ॥ ३६ ॥

৩৫। ঐ সকল ভৃঙ্গ পদ্মপরাগবাহী জলকণহারী বায়ু কর্তৃক আকৃষ্ট হইয়া রাজাদিভয় উপস্থিত হইলে দুষ্টকর্ম্মা চৌরাদির ন্যায় আপন গন্তব্য দেশ নিশ্চয় করিতে সমর্থ হইতেছে না।

৩৬। ফুল্ল শিরীষবৎ কোমলাকৃতি শুকাবলী বিদ্রুমভঙ্গবৎ লোহিতবর্ণ মুখদ্বারা পিঙ্গ কলমশিখা ধারণ করতঃ ইন্দ্রধনুর শোভার অনুকরণ করিতেছে।

विगलितजलभारशुक्लभासां
निचय इवाम्बुमुचां नगाधिराजः ॥ ३७ ॥
तमतनुवनराजिश्यामितोपत्यकान्तं
नगमुपरि हिमानीगौरमासाद्य जिष्णुः।
व्यपगतमदरागस्यानुसस्मार लक्ष्मी-
मसितमधरवासो बिभ्रतः सौरपाणेः ॥ ३८ ॥
इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
शरद्वर्णनो नाम चतुर्थः सर्गः ॥ ४ ॥

अन्वयः। अथ तव इति कथयति सति नातिदूरात् पिहितोष्णरश्मिबिम्बः नगाधिराजः विगलितजलभारशुक्लभासाम् अम्बुमुचां निचय इव दृष्टगे ॥ वाच्य—(अर्जुनः)...रश्मिबिम्बं नगाधिराजम् अम्बुमुचां निचयमिव ददर्श ॥ ३७ ॥

अन्वयः। जिष्णुः अतनुभिः वनराजिभिः श्यामितोपत्यकान्तम् उपरि हिमानीगौरं नगम् आसाद्य व्यपगतमदरागस्य असितम् अधरवासः बिभ्रतः सौरपाणेः लक्ष्मीम् अनुसस्मार ॥ वाच्य—जिष्णुना लक्ष्मीः अनुसस्मरे ॥ ३८ ॥

इतीति। अथ तत्र तस्मिन् पूर्वोक्ते यक्षे इति इत्थं कथयति सति नातिदूरात् अनतिदूरात् ईषद्दूरे इत्यर्थः। नञर्थस्य नञ्शब्दस्य सुप्सुपा इति समासः। पिहितोष्णरश्मिबिम्बः तिरोहितार्कमण्डलः इति औत्पत्तिकः। नगाधिराजः हिमाद्रिः विगलितः जलभारः येषां ते तथोक्ताः। अतएव शुक्लभासः इयोः अन्यतरस्य विशेष्यत्वविवक्षया विशेषणसमासः। तेषां विगलितजलभारशुक्लभासां शुभ्राणाम् अम्बुमुचां निचय इव मेघवृन्दम् इव ददृशे दृष्टः ॥ ३७ ॥

तमिति। जिष्णुः अर्जुनः अतनुभिः महतीभिः वनराजिभिः श्यामिताः श्यामलाः उपत्यकान्ताः आसन्नभूमिप्रदेशाः यस्य तं तथोक्तम्। "उपत्यकाद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका" इत्यमरः। "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इति त्यकन्प्रत्ययः। उपरि हिमानीभिः हिमसङ्घातैः गौरं शुभ्रं नगं हिमाद्रिम् आसाद्य व्यपगतः निवृत्तः मदरागः यस्य तस्य। असितं

৩৭। যক্ষ এই সকল কথা বলিতে আরম্ভ করিলে, অর্জ্জুন অনতিদূরে সূর্য্যবিম্বাচ্ছাদী নগাধিরাজ হিমালয়কে দেখিতে পাইলেন। দেখিলেন—জলভারাপগমে শুক্লবর্ণ মেঘজালের ন্যায়ই উহা প্রতিভাত হইতেছে।

पञ्चमः सर्गः ।

Naturalistic Realism of Bhāravi

// अथ जयाय नु मेरुमहीभृतो-
रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमाचलमुक्षितं
समुदितं नु विलङ्घयितुं नभः ॥ १ ॥

अन्वयः । अथ स मेरुमहीभृतः जयाय नु, रभसया दिगन्तदिदृक्षया नु, नभः विलङ्घयितुं नु समुदितम् उक्षितं हिमाचलम् अभिययौ ॥ वाच्य—तेन समुदितः उक्षितः हिमाचलः अभिययौ ॥ १ ॥

नीलम् अधरवासः उत्तरीयं बिभ्रतः धृतवतः सीरं हलं पाणौ यस्य तस्य सीरपाणेः हलायुधस्य । "हलायुधः । नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हलो । सङ्कर्षणः सीरपाणिः" इत्यमरः । "सप्तमी विशेषणे" इति ज्ञापकात् व्यधिकरणपदः बहुव्रीहिः "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्तः" इति सप्तम्याः परनिपातः । लक्ष्मीं शोभाम् अनुसस्मार स्मृतवान् । अत्र सदृशदर्शनेन सदृशान्तरस्य स्मरणात् स्मरणालङ्कारः । "सदृशं सदृशानुभवाद्यत्र स्मर्यते तत् स्मरणम्" इति विद्याधरः ॥ ३८ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां
चतुर्थः सर्गः ॥ ४ ॥

—:०:—

अथ हिमवद्वर्णनम् आरभते तत्र पञ्चदशभिः कुलकम् आह—अथेति । अथ अनन्तरं सः अर्जुनः मेरुमहीभृतः हेमाद्रेः जयाय नु जयार्थं वा । नुशब्दः अत्र वितर्के । "नु पृच्छायां वितर्के च" इत्यमरः ।

३८ । दीर्घ दीर्घ वनराजिद्वारा नगाधिराजের আসন্ন ভূভাগসকল শ্যামল শোভা ধারণ করিয়াছে ; উপরে হিমস্তোম অবস্থিত হওয়ায় উহা গৌরবর্ণ হইয়াছে । অর্জুন এইরূপ পর্ব্বত প্রাপ্ত হইয়া মদরাগবিরহিত নীলাম্বরধারী হলায়ুধের শোভা স্মরণ করিলেন ।

চতুর্থ সর্গ সমাপ্ত ॥

तपनमण्डलदीपितमेकतः
सततनैशतमोद्वृतमन्यतः।
हसितभिन्नतमिस्रचयं पुरः
शिवमिवानुगतं गजचर्म्मणा ॥ २ ॥
क्षितिनभःसुरलोकनिवासिभिः
कृतनिकेतमदृष्टपरस्परैः।

अन्वयः। एकतः तपनमण्डलदीपितम् अन्यतः सततनैशतमोद्वृतम् (अतः) पुरः हसितभिन्नतमिस्रचयं गजचर्म्मणा अनुगतं शिवमिव (स्थितम्) ॥ २ ॥ इममारभ्य पञ्चदशश्लोकं यावत् हिमालयविशेषणं सर्वं द्वितीयान्तपदं वाक्यान्तरे प्रथमाविभक्त्या समाधेयम्।

रभसः वेगः। "रभसो वेगहर्षयोः" इति वैजयन्तीविश्वप्रकाशौ। तद्दत्या रभसया अतीवोत्कण्ठतया इति यावत्। अर्शआदित्वात् अच्प्रत्ययः। दिगन्तानां दिदृक्षया नु द्रष्टुमिच्छया वा, नभः अन्तरिक्षं विलङ्घयितुं नु अतिक्रमितुं वा समुदितं समुत्पतितम् इव स्थितम् इत्यर्थः। कुतः? उच्छ्रितम् उन्नतं हिमस्य अचलं हिमाचलम् अभिययौ। अत्र अभिद्योतितानेकफलविशिष्टौन्नत्यगुणनिमित्तोदितादिक्रियोत्प्रेक्षा, सा च व्यञ्जकाप्रयोगात् प्रतीयमाना इति संक्षेपः। द्रुतविलम्बितं वृत्तम्—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥ १ ॥

तपनेति। पुनः एकतः एकस्मिन् भागे। सार्वविभक्तिकः तसिः। तपनमण्डलेन दीपितं प्रकाशितम् अन्यतः अन्यस्मिन् भागे सततेन अनिषिद्धेन नैशेन निशिभवेन तमसा वृतम्। एकत्र अह्ना, रात्र्या च अन्यत्र सङ्गतम् इत्यर्थः। अत एव पुरः अग्रे हसितेन अट्टहासेन भिन्नतमिस्रचयं निरस्ततमःस्तोमं तथा गजचर्म्मणा अनुगतं पश्चाद्व्याप्तम्। "पश्चात्साट्टहास्ययोरनु" इत्यमरः। शिवम् इव स्थितम्। तपनतेजःप्रसारः अपि अस्य कारणमिव कुत्रचित् परिसमाप्यते इति महत्त्वातिशयोक्तिः ॥२

१। অনন্তর অর্জ্জুন সেই হিমাচলাভিমুখে গমন করিলেন। ঐ সমুন্নত হিমাচল কি মেরুমহীধরকে জয় করিবার নিমিত্ত কিংবা বেগাতিশয্যে দিগ্‌দিগন্ত দেখিবার নিমিত্ত অথবা উহা কি নভোদেশ অতিক্রম করিবার নিমিত্তই উৎপতিতবৎ অবস্থিত?

प्रथयितुं विभुतामभिनिर्मितं
प्रतिनिधिं जगतामिव शम्भुना ॥ ३ ॥
भुजगराजसितेन नभःश्रिता
कनकराजिविराजितसानुना ।
समुदितं निचयेन तडित्वतीं
लघयता शरदम्बुदसंहतिम् ॥ ४ ॥

अन्वयः । अदृष्टपरस्परैः क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतम् (अतः) शम्भुना विभुतां प्रथयितुम् अभिनिर्मितं जगतां प्रतिनिधिमिव (स्थितम्) ॥ ३ ॥

अन्वयः । भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना (अतः) तडित्वतीम् शरदम्बुदसंहतिं लघयता निचयेन समुदितम् ॥ ४ ॥

क्षितीति । परस्परे अन्योऽन्ये । "कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः" इति वक्तव्यत्वात् परशब्दस्य द्विर्भावः । "समासवच्च बहुलम्" "यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्य" इति वक्तव्यत्वात् प्रथमैकवचनम् । सुः, कस्कादित्वात् विसर्जनीयस्य सत्वम्, बहुवचनञ्च अन्योऽन्यशब्दवत् । यथा माघे—"अन्योऽन्येषां पुष्करैरास्पृशन्त" इति । अदृष्टाः परस्परे यैः ते अदृष्टपरस्पराः तैः तथोक्तैः । क्षितौ नभसि सुरलोके च निवसन्ति इति तैः तथोक्तैः भूर्भुवःस्वर्लोकवासिभिः इत्यर्थः । कृतनिकेतं कृतास्पदम् अतएव शम्भुना विभुतां स्वसामर्थ्यं प्रथयितुम् अभिनिर्मितं जगतां प्रतिनिधिं प्रतिकृतिम् इव स्थितम् इति उत्प्रेक्षा । "प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्" इत्यमरः । त्रैलोक्यश्लाघ्योपमम् अपरिच्छेद्यं च इति भावः ॥ ३ ॥

भुजगेति । पुनश्च, भुजगराजसितेन शेषाहिधवलेन नभःश्रिता गगनस्पृशा कनकस्य राजिभिः रेखाभिः विराजिताः सानवः यस्य तेन तथोक्तेन अतएव तडित्वतीं शरदम्बुदसंहतिं शरन्मेघचयं लघयता लघूकुर्वता तत्तुल्येन इत्यर्थः । अत एव उपमालङ्कारः । निचयेन शिखरसमुच्चयेन समुदितं समुन्नतम् । निचयेनेति । यद्यपि निचयशब्दः शिखरस्यावाचकस्तथापि पर्वतवर्णनप्रकरणोक्तत्वात् पाषाणनिचयः शृङ्गवाची

२। उहार এক অংশ—সৌরকরনিকরে সমুদ্দীপিত, অন্য অংশ সতত নৈশান্ধকারে সমাবৃত। সুতরাং অট্টহাস্যদ্বারা সমুখস্থ তমঃস্তোমনিরসনকারী গজকর্ম্মানুগত শিবের ন্যায় উহা অবস্থিত।

৩। পরস্পর পরস্পরের অদৃষ্ট হইয়া ভূলোক, অন্তরীক্ষলোক ও সুরলোকবাসীরা ঐ হিমালয়ে বাস করিতেছেন ; সুতরাং স্বসামর্থ্য প্রকটিত করিবার জন্যই শম্ভু যেন উহাকে জগতের প্রতিনিধিরূপে নির্ম্মাণ করিয়াছেন।

मणिमयूखचयांशुकभासुराः
सुरबधूपरिभुक्तलताग्रहाः।
दधतमुच्चशिलान्तरगोपुराः
पुर इवोदितपुष्पवना भुवः॥ ५॥
अविरतोज्झितवारिविपाण्डुभि-
र्विरहितैरचिरद्युतितेजसा।
उदितपक्षमिवारतनिःस्वनैः
पृथुनितम्बविलम्बिभिरम्बुदैः॥ ६॥

अन्वयः। मणिमयूखचयांशुकभासुराः सुरबधूपरिभुक्तलताग्रहाः उच्चशिलान्तरगोपुराः उदितपुष्पवनाः (अतः) पुरः इव भुवः दधतम्॥ ५॥

अन्वयः। अविरतोज्झितवारिविपाण्डुभिः अचिरद्युतितेजसा विरहितैः आरतनिःस्वनैः पृथुनितम्बविलम्बिभिः अम्बुदैः उदितपक्षमिव॥ ६॥

भवितुमर्हति। यथा "कूटोऽस्त्री शिखरं शृङ्गम्" इति कूटशब्दः समूहापरपर्य्यायः। अतएव लक्षणाश्रयणीया। अत एवावाच्यवचनं न दोषः॥४॥

मणीति। पुनः मणिमयूखचयाः अंशुकानि इव पटकाण्डादीनि इव तैः भासुराः सुरबधूभिः परिभुक्ताः लताः गृहा इव यासु ताः तथोक्ताः। उच्चानि शिलान्तराणि शिलामध्यानि गोपुराणि पुरद्वाराणि इव यासु ताः, उदितानि ऊर्जितानि पुष्पाणां वनानि यासु ताः, अतएव पुरः इव नगराणि इव स्थिताः भुवः दधतम्॥ ५॥

अविरतेति। पुनश्च अविरतम् अविच्छिन्नम् उज्झितं वारि यैः ते अविरतोज्झितवारयः अवृष्टिमन्त इत्यर्थः। अतएव विपाण्डवश्च तैः अविरतोज्झितवारिविपाण्डुभिः। अतएव हिमवत्पक्षत्वं सम्भवति इति भावः। अचिरद्युतितेजसा विरहितैः विद्युत्तेजोरहितैः। आरतनिःस्वनैः

৪। উহার গগনস্পর্শী শিখরসকল ভুজগরাজের ন্যায় শুভ্র এবং সানুদেশ কনকরাজিদ্বারা বিরাজিত; সুতরাং উহারা তড়িৎজড়িত শারদ অম্বুদনিচয়ের ন্যায়ই প্রতিভাত। ঈদৃশ শিখরসমূচ্চয়ে ঐ হিমাচল সমুন্নত।

৫। ঐ হিমালয় নগরনিচয়বৎ নানা ভূভাগ ধারণ করিতেছে। ঐ সকল নগরোপম ভূভাগ মণিময়ূখ-পুঞ্জরূপ অংশুকসমূহে সমুজ্জ্বল; সুরাঙ্গনাগণ ঐ সকল স্থানের লতাগৃহসকল উপভোগ করিতেছে; উচ্চ উচ্চ শিলান্তর বিবিধ গোপুরবৎ প্রতিভাত হইতেছে; অনেক সুসমৃদ্ধ পুষ্পবন ঐ সমুদায় স্থানে শোভা পাইতেছে।

दधतमाकरिभिः करिभिः क्षतैः
समवतारसमैरसमैस्तटैः ।
विविधकामहिता महिताम्भसः
स्फुटसरोजवना जवना नदीः ॥ ७ ॥
नवविनिद्रजपाकुसुमत्विषां
द्युतिमतां निकरेण महाश्मनाम् ।
विहितसान्ध्यमयूखमिव क्वचित्
निचितकाञ्चनभित्तिषु सानुषु ॥ ८ ॥

अन्वयः । आकरिभिः करिभिः क्षतैः समवतारसमैः असमैः तटैः (उपलक्षिताः) महिताम्भसः विविधकामहिताः स्फुटसरोजवनाः नदीः दधतम् ॥ ७ ॥

प्रशान्तगर्जितैश्च, अन्यथा पक्षत्वहानिः स्यात् इति भावः । पृथुनितम्ब-विलम्बिभिः महाकटकसङ्गिभिः । "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः । अम्बुदैः उदितपक्षं सञ्जातपक्षम् इव स्थितम् । प्राक् छिन्नपक्षस्य अपि हिमाद्रेः धवलाम्बुदसम्बन्धात् पुनः पक्षोत्थानम् उत्प्रेक्षते ॥ ६ ॥

दधतमिति । पुनश्च आकरः खनिः एषाम् अस्ति योनित्वेन इति आकरिभिः आकरजैः । "खनिः स्त्रियामाकरः स्यात्" इत्यमरः । करिभिः गजैः कर्त्तृभिः क्षतैः व्रणैः समवतारेषु तीर्थेषु समैः अविषमैः असमैः असदृशैः अनुपमैः इत्यर्थः । तटैः उपलक्षिताः तथा महिताम्भसः श्लाघ्योदकाः अतएव विविधेभ्यः कामेभ्यः अवगाहनाद्युपभोगेभ्यः हिताः अनुकूलाः । "चतुर्थी तदर्थे" इत्यादिना समासः । स्फुटानि विकसितानि सरोजवनानि यासु ताः जवनाः वेगवतीः । "जुचंक्रम्य" इत्यादिना युच् । नदीः दधतम् । यमकवृत्त्यनुप्रासभेदत्वात् यमकालङ्कारः । अर्थालङ्कारस्तु अभ्युच्चयः तस्य अतिदुष्करत्वात् रसपोषः अपि न आद्रियते । तदुक्तम्—चित्रे रसवद्भिर्न मृग्यते" ॥ ७ ॥

৬। হিমাদ্রির বিপুল নিতম্ব-বিম্ব বিলম্বিত অম্বুদাবলী অবিরত বারি বর্ষণ করিয়া পাণ্ডুবর্ণ হইয়াছে; উহাতে বিদ্যুৎপ্রভা নাই; মেঘগর্জ্জন নাই; সুতরাং ঐ সকল অম্বুধর দ্বারা হিমাদ্রি যেন সঞ্জাতপক্ষ বলিয়াই বোধ হইতেছিল।

৭। হিমালয় স্ফুট পদ্মবনান্বিত বেগবতী বহু নদী ধারণ করিতেছে। ঐ সকল নদীর তট আকরজাত করিগণ কর্ত্তৃক ক্ষতবিক্ষত; উহার কোথাও তীর্থব্যাপারে সম এবং কোথাও বা অসম; উহার জল অতি উত্তম; সুতরাং অবগাহনাদি উপভোগ ব্যাপারের একান্ত অনুকূল।

पृथुकदम्बकदम्बकराजितं
ग्रथितमालतमालवनाकुलम्।
लघुतुषारतुषारजलस्रुतं
धृतसदानसदाननदन्तिनम् ॥ ९ ॥
रहितरत्नचयान्न शिलोच्चया-
नपलतामवना न दरीभुवः।

अन्वयः। नवविनिद्रजपाकुसुमत्विषां द्युतिमतां महाश्मनां निकरेण क्वचित् निचित-काञ्चनभित्तिषु सानुषु विहितसान्ध्यमयूखमिव ॥ ८ ॥

अन्वयः। श्लोकोऽयं सान्वयो विरचितः ॥ ९ ॥

नवेति। पुनश्च नवानि विनिद्राणि विकसितानि च यानि जपाकुसुमानि ताम्रपुष्पिकाकुसुमानि तेषां त्विष इव त्विषः येषां ते तेषाम्, "श्रोड्रपुष्पं जपापुष्पं रूपिका ताम्रपुष्पिका" इति वाग्भटः। द्युतिमतां महाश्मनां मणीनां पद्मरागाणाम् इत्यर्थः विशेषणसामर्थ्यात्। निकरेण समूहेन हेतुना क्वचित् निचिताः सङ्घटिताः काञ्चनभित्तयः येषु तेषु सानुषु विहिताः सान्ध्याः सन्ध्यायां भवाः मयूखाः यस्मिन् तम् इव स्थितम्। काञ्चनभित्तिषु पद्मरागप्रभाप्रसरात् उदितसन्ध्याराग इव भाति इति उत्प्रेक्षा ॥ ८ ॥

पृथ्विति। पुनश्च पृथुभिः कदम्बकदम्बकैः नोपकुसुमसमूहैः स्तवकैः राजितम्। "कदम्बमाहुः सिद्धार्थं नोपे च निकुरम्बके" इति उभयत्रापि विश्वः। ग्रथितमालैः बद्धपङ्क्तिभिः तमालवनैः तापिञ्छवनैः आकुलम् आकीर्णम्। "कालस्कन्धस्तमालः स्यात्तापिञ्छोऽपि" इत्यमरः। लघुतुषारम् अल्पहिमोकरं यत् तुषारजलं हिमोदकं तत् स्रवतीति वर्षति तं तथोक्तम्। "तुषारो हिमहीकरौ" इति शाश्वतः। "अन्येभ्योऽपि दृश्यते" इति क्विप्। सदानाः समदाः सदाननाः शोभनाननाश्च ये दन्तिनः ते धृताः येन तं तथोक्तम् ॥ ९ ॥

८। हिमालয়ে কত দ্যুতিশালী মহামণি আছে, তাহাদের কান্তি নবোন্মীলিত তাম্রপুষ্পিকা-কুসুমের কান্তির ন্যায়; ঐ সকল মহামণিপুঞ্জে হিমাদ্রির সানুদেশস্থ কাঞ্চনভিত্তিগুলি কচিৎ কচিৎ পরিব্যাপ্ত হওয়ায় তাহাতে যেন সন্ধ্যাকালীন ময়ূখমালাই প্রতিভাত হইতেছে।

৯। হিমালয় বহুল নীপকুসুমস্তবকে বিরাজিত; পংক্তিবদ্ধ তমালবনসমূহে সমাকীর্ণ; উহা হইতে বিন্দু বিন্দু হিমোদক বর্ষিত হইতেছে। মদজলবর্ষী প্রশস্তমুখ মাতঙ্গগণ উহাতে বিচরণ করিতেছে।

বিপুলিনাম্বুরুহা ন সরিদ্বধূ-
রকুসুমান্ দধতং ন মহীরুহঃ ॥ ১০ ॥
ব্যথিতসিন্ধু মনীরশনৈঃ শনৈ-
রমরলোকবধূজঘনৈর্ঘনৈঃ ।
ফণভৃতামভিতো বিততং ততং
দয়িতরম্যলতাবকুলৈঃ কুলৈঃ ॥ ১১ ॥

অন্বয়ঃ । রহিতরত্নচয়ান্ শিলোচ্চয়ান্ ন, অপলতাভবনা দরীভুবঃ ন, বিপুলিনাম্বুরুহাঃ সরিদ্বধূঃ ন (তথা) অকুসুমান্ মহীরুহান্ ন দধতম্ ॥ ১০ ॥

অন্বয়ঃ । অনীরশনৈঃ ঘনৈঃ অমরলোকবধূজঘনৈঃ শনৈঃ ব্যথিতসিন্ধুং দয়িতারম্য-লতাবকুলৈঃ ফণভৃতাং কুলৈঃ অভিতঃ ততং তথা বিততম্ ॥ ১১ ॥

রহিতেতি । পুনশ্চ রহিতরত্নচয়ান্ রহিতঃ পরিত্যক্তঃ রত্নচয়ঃ যৈঃ তান্ রত্নরাশিরহিতান্ শিলোচ্চয়ান্ শিখরাণি ন দধতম্ অপলতাভবনাঃ লতাগৃহরহিতাঃ দরীভুবঃ গুহাপ্রদেশান্ ন দধতম্ । "দরী তু কন্দরো বা স্ত্রী দেবখাতবিলে গুহা" ইত্যমরঃ । বিগতানি পুলিনানি অম্বুরুহাণি চ যাসাং তাঃ সরিতঃ বধ্বঃ ইব তাঃ সরিদ্বধূঃ ন দধতম্ । অত্র সরিতাং বধ্বীপম্যাৎ পুলিনানামম্বুরুহাণাঞ্চ বদনজঘনৌপম্যং গম্যতে । অকুসুমান্ মহীরুহঃ বৃক্ষান্ ন দধতং, কিন্তু রত্নাদিসম্পন্নান্ এব শিলোচ্চয়াদীন্ দধতম্ ইত্যর্থঃ । মহাবিভাষয়া নাত্র নঞ্সমাসঃ ॥ ১০ ॥

ব্যথিতেতি । পুনশ্চ অনীরশনৈঃ অনির্মেখলৈঃ সরশনৈরিত্যর্থঃ । ঘনৈঃ নিবিড়ৈঃ অমরলোকবধূজঘনৈঃ শনৈঃ মন্দং মন্দং ব্যথিতসিন্ধুং ক্ষোভিত-নদীকম্ অয়ম্ অপরঃ স্বর্গ ইতি ভাবঃ । দয়িতাঃ প্রিয়াঃ রম্যাঃ লতাঃ বীরুধঃ বকুলাঃ কেসরাশ্চ যেষাং তৈঃ তথোক্তৈঃ । "বিশারদো মদগন্ধো বকুলঃ স চ কেসরঃ" ইতি বৈদ্যকে । ফণভৃতাং সর্পাণাং কুলৈঃ অভিতঃ ততং ব্যাপ্তং তথা বিততং বিস্তৃতম্ ॥ ১১ ॥

১০ । হিমালয় যে সকল শিখর ধারণ করে, তৎসমুদয় রত্নরাশিবিরহিত নহে ; তদীয় গুহাগুলি লতাগৃহ-বিরহিত নহে ; তত্রত্য সরিদ্বধূগণ পুলিন ও পদ্মবর্জ্জিত নহে ; আর তথাকার মহীরুহগণও কুসুমহীন নহে। ফলে হিমালয়ধৃত সমস্ত শিখরই রত্নরাশিযুক্ত, সকল গুহাই লতাগৃহমালাযুক্ত, সকল নদীই পুলিন ও পদ্মসম্পন্ন এবং সকল বৃক্ষই কুসুমশোভিত।

১১ । অমরনারীগণের মেখলাসুশোভিত ঘন জঘন দ্বারা হিমাদ্রির সরিৎপ্রবাহ মন্দ মন্দ ক্ষুভিত হইতেছে ; রম্য বল্লী ও বকুল যাহাদের প্রিয়, ঐ রূপ ফলধরগণে উহার চারিদিক্ পরিব্যাপ্ত রহিয়াছে।

ससुरचापमनेकमणिप्रभै-
रपपयोविशदं हिमपाण्डुभिः।
अविचलं शिखरैरुपबिभ्रतं
ध्वनितसूचितमम्बुमुचां चयम् ॥ १२ ॥
विकचवारिरुहं दधतं सरः
सकलहंसगणं शुचिमानसम्।
शिवमगात्मजया च कृतेर्ष्यया।
सकलहं सगणं शुचिमानसम् ॥ १३ ॥

अन्वयः। अनेकमणिप्रभैः हिमपाण्डुभिः ससुरचापम् अपपयोविशदम् अविचलं ध्वनितसूचितम् अम्बुमुचां चयं बिभ्रतम् ॥ १२ ॥

अन्वयः। विकचवारिरुहं सकलहंसगणं शुचि निर्मलं मानसं सरः दधतं कृतेर्ष्यया अगात्मजया सकलहं सगणं शुचिमानसम् ॥ १३ ॥

ससुरेति। अनेका विचित्रा मणिप्रभा येषां तैः तथोक्तैः, हिमेन पाण्डुभिः शिखरैः कृत्वा ससुरचापं सेन्द्रचापम् अपपयो निर्जलः अत एव विशदश्च तम् अपपयोविशदम् अविचलं दैवात् निश्चलं च, अतः शिखरग्रङ्का अस्य अभूत् इत्यर्थः। किन्तु ध्वनितेन गर्जितेन सूचितं ज्ञापितम् अम्बुमुचां चयम् अविरतम् उपबिभ्रतम्। अत्र किल कविकल्पितसाट्श्यात् विखरमेघसन्देहो मेघनिश्चयान्तः सन्देहालङ्कारः ॥१२॥

विकचेति। पुनश्च विकचवारिरुहं नित्यविकसितारविन्दम् इत्यर्थः वृत्तिसामर्थ्यात्। कलहंसगणैः सह वर्त्तते इति सकलहंसगणम्। "कादम्बः कलहंसः स्यात्" इत्यमरः। यद्वा सकलाः सर्वे हंसगणा यस्मिन् तत् तथोक्तम्। शुचि नित्यनिर्मलं मानसं मानसाख्यं सरः दधतम्। किञ्च कृतेर्ष्यया कुतश्चित् निमित्तात् कुपितया इत्यर्थः। अगात्मजया पार्वत्या सकलहंसविवादम्। "सगणं सप्रमथम्। गणाः प्रमथसङ्घौघाः" इति वैजयन्ती। शुचिमानसम् अविद्याविनिर्मुक्तचित्तं शिवं च दधतम्। एतेन सकलशैलवैलक्षण्यमस्य उक्तम् ॥ १३ ॥

१२। हिमालय बहु मेघ धारण करितेछे ; ऐ सकल मेघ तत्रत्य बहु विचित्र मणिप्रभामण्डित हिमपाण्डुर शिखरसमूहे येन इन्द्रचापान्वित बलिया मने हइतेछे। उहाते जल नाई ; काजेई उहा स्वच्छ—प्राय सर्व्वदाई निश्चलभावे अवस्थित ; किन्तु गर्ज्जनेई ज्ञापित।

१३। हिमालये मानस सरोवर आछे ; ऐ सरोवर कलहंसकुले शोभित ओ नित्य निर्म्मल।

ग्रहविमानगणानभितो दिवं
ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षपं
त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥
विततशीकरराशिभिरुच्छ्रितै-
रुपलरोधविवर्त्तिभिरम्बुभिः ।
दधतमुन्नतसानुसमुद्गतां
धृतसितव्यजनामिव जाह्नवीम् ॥ १५ ॥

॥ कुलकम् ॥

अन्वयः । दिवम् अभितः ग्रहविमानगणान् ज्वलयता ओषधिजेन कृशानुना अनुक्षपम् उमापतिसेविनः त्रिपुरदाहं मुहुः अनुस्मरयन्तम् ॥ १४ ॥

अन्वयः । विततशीकरराशिभिः उच्छ्रितैः उपलरोधविवर्त्तिभिः अम्बुभिः धृतसितव्यजनाम् उन्नतसानुसमुद्गतां जाह्नवीम् इव दधतम् ॥ १५ ॥

ग्रहेति । दिवम् अभितः दिवः अभिमुखम् । "अभितः परितः" इत्यादिना द्वितीया । ग्रहाः चन्द्रादयः विमानानि देवयानानि च । "व्योमयानं विमानोऽस्त्री" इत्यमरः । तेषां गणान् ज्वलयता प्रदीपयता । "मितां ह्रस्वः" इति ह्रस्वः । ओषधिजेन तृणविशेषजन्येन कृशानुना वह्निना कृत्वा अनुक्षपं प्रतिक्षपम् । वीप्सायाम् अव्ययीभावः । उमापतिसेविनः प्रमथादीन् । "गतिबुद्धि" इत्यादिना द्विकर्मकत्वम् । त्रयाणां पुराणां समाहारः त्रिपुरम् । "तद्धितार्थ" इत्यादिना समासः । "पात्रादिभ्यः प्रतिषेधो वक्तव्यः" इति स्त्रीलिङ्गप्रतिषेधः । तस्य दाहं त्रिपुरदाहं मुहुः अनुस्मरयन्तम् । ननु "अधीगर्थ" इत्यादिना दाहम् इत्यत्र षष्ठी किं न स्यात्, तस्याः शेषार्थे विधानात् शेषत्वस्य अविवक्षितत्वात् । अत्र 'कविसम्मतसाहश्यात् स्मृतिः' इति स्मरणालङ्कारः ॥ १४ ॥

विततेति । विततशीकरराशिभिः विस्तृतशीकरपुञ्जैः उच्छ्रितैः

प्रमथगण তথায় নিত্য বিরাজমান এবং (সময়বিশেষে) কোন কারণে কুপিতা পার্ব্বতীর সহিত কখন কখন কলহপরায়ণ শিব তথায় অবস্থান করেন ।

১৪ । হিমালয়ে বিবিধ ওষধি আছে । ঐ সকল ওষধিজাত অগ্নি স্বর্গভূমির চতুর্দ্দিকস্থিত গ্রহ ও বিমানশ্রেণী উদ্দীপিত করিতেছে ; অতএব হিমালয় যেন প্রতিরাত্রে প্রমথদিগকে ত্রিপুরদাহ ব্যাপার বার বার স্মরণ করাইয়া দিতেছে ।

अनुचरेण धनाधिपतेरथो
नगविलोकनविस्मितमानसः।
स जगदे वचनं प्रियमादरा-
न्मुखरतावसरे हि विराजते ॥ १६ ॥
अलमेष विलोकितः प्रजानां
सहसा सन्ततिमंहसां विहन्तुम्।
घनवर्त्म सहस्रधेव कुर्वन्
हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥

अन्वयः। अथ धनाधिपतेरनुचरेण नगविलोकनविस्मितमानसः सः आदरात् प्रियं वचनं जगदे। वाच्य—अनुचरः नगविलोकनविस्मितमानसं तं प्रियं वचनं जगदे ॥ १६ ॥

अन्वयः। हिमगौरैः शिरोभिः घनवर्त्म सहस्रधा कुर्वन् इव एषः अचलाधिपः विलोकितः एव प्रजानाम् अंहसां सन्ततिं सहसा विहन्तुम् अलम्। वाच्य—कुर्वता एतेन अचलाधिपेन विलोकितेन...समर्थ्यते ॥ १७ ॥

उत्पतितैः। कुतः? उपलरोधेन विवर्त्तिभिः अम्बुभिः हेतुभिः धृतसित-व्यजनामिव गृहीतामलचामराम् इव स्थिताम् इति उत्प्रेक्षा। उन्नत-सानुषु समुद्गतां वहन्तीं जाह्नवीं गङ्गां दधतम् ॥ १५ ॥

अनुचरेणेति। अथ अनन्तरम्। "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः। धनाधिपतेरनुचरेण यक्षेण नगविलोकनेन विस्मित-मानसः सः अर्जुनः। आदरात् प्रियं वचनं जगदे गदितः। ब्रुवर्थस्य दुहादित्वात् प्रधाने कर्म्मणि लिट्। अपृष्टपरिभाषणदोषं परिहरति —मुखरतेति। मुखरता वाचालत्वम् अपृष्टपरिभाषित्वम् इति यावत्। अवसरे श्रोतुराकाङ्क्षासमये विराजते हि। आकाङ्क्षितम् अपृष्टोऽपि ब्रूयात् इति भावः ॥ १६ ॥

अलमिति। हिमेन गौरैः शुभ्रैः शिरोभिः शिखरैः घनवर्त्म खं सहस्रधा कुर्वन् विपाटयन् इव इति उत्प्रेक्षा। एषः अचलाधिपः हिम-

১৫। হিমালয়ের সমুন্নত সানুদেশ দিয়া গঙ্গা প্রবাহিত হইতেছেন, তদীয় অম্বুরাশি উপলরোধে বিবর্ত্তিত হইয়া বিস্তৃতভাবে শীকর প্রসারণ করতঃ উৎপতিত হওয়ায় ঐ গঙ্গা যেন নির্ম্মল চামর-ধারিণী বলিয়াই প্রতিভাত হয়েন।

১৬। অর্জ্জুন হিমাদ্রিদর্শনে বিস্মিতচিত্ত হইয়াছিলেন। অনন্তর যক্ষ সাদরে তাঁহাকে প্রিয়-বাক্য বলিল। বস্তুতঃ বাক্যপটুতা শ্রোতার আকাঙ্ক্ষিত কালেই শোভা পায়।

इह दुरधिगमैः किञ्चिदेवागमैः
सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिग्व्यापिनं
पुरुषमिव परं पद्मयोनिः परम् ॥ १८ ॥
रुचिरपल्लवपुष्पलताग्रहै-
रुपलसज्जलजैर्जलराशिभिः ।
नयति सन्ततमुत्सुकतामयं
धृतिमतोरुपकान्तमपि स्त्रियः ॥ १९ ॥

अन्वयः । इह असुतरम् अन्तरं दुरधिगमैः किञ्चिदेव सततं वर्णयन्ति, (किन्तु) अतिविपिनं दिग्व्यापिनम् अमुं परं पुरुषम् इव परं पद्मयोनिः वेद । वाच्य—किञ्चिदेव वर्ण्यते । अतिविपिनः दिग्व्यापी असौ परः पुरुष इव पद्मयोनिना विदितः अथवा विदाञ्चक्रे ॥ १८ ॥१८॥

वान् विलोकितः दृष्टमात्र एव प्रजानाम् अंहसां सन्ततिं पापसङ्घातं सहसा विहन्तुम् अलं समर्थः । "पर्याप्तिवचनेष्वलमर्थेषु" इति तुमुन् । औपच्छन्दसिकं वृत्तम् । "पठ्यन्तेऽमी तथैव शेषं चौपच्छन्दसिकं सुधीभिरुक्तम्" इति स्मरणात् ॥ १७ ॥

इहेति । इह अस्मिन् पर्वते सुतरं न भवति इति असुतरं दुस्तरम् इत्यर्थः । तरतेः खल्प्रत्ययः । अन्तरं मध्यभागं पुरुषे तु अन्तरं तत्त्वं दुरधिगमैः दुरारोहैः अन्यत्र दुर्गैः दुःखेन अधिगन्तुम् अशक्यैः आगमैः अन्यत्र पुराणादिभिः "पुराणेऽप्यागमो वृत्ते" इति रुद्रः । किञ्चित् एव सततं वर्णयन्ति । न तु कदाचित् प्रत्यक्षेणापि निःशेषं ज्ञातुम् अशक्यत्वात् इति भावः । किन्तु अतिविपिनम् अतिगहनं दिग्व्यापिनम् उभयत्रापि समम् । अमुं गिरिं परं पुरुषं परमात्मानम् इव परं केवलम् । "परमव्ययमिच्छन्ति केवलं" इति विश्वः । पद्मयोनिः ब्रह्मा इव वेद न अन्य इत्यर्थः । "विदो लटो वा" इति णलादेशः । अत्र उपमायमकयोः संसृष्टिः । क्षमावृत्तम् "तुरगरसयतिनौ भरौ गः क्षमा" ॥१८॥

१७। ঐ অচলাধিপ তুষারশুভ্র শিখরসমূহদ্বারা মেঘপথ যেন সহস্রধা বিদীর্ণ করিতেছে। ইহা অবলোকিত হওয়ামাত্রই জনগণের পাপপুঞ্জ বিনাশ করিতে সমর্থ।

১৮। (বিচক্ষণগণ) দুরধিগম পুরাণাদির সাহায্যে এই পর্ব্বতের সদা সুদুস্তর অভ্যন্তরস্থ কিঞ্চিন্মাত্রই বর্ণন করিয়া থাকেন। কিন্তু এই অতিগহন দিগ্ব্যাপ্ত পর্ব্বতকে পদ্মযোনি ব্রহ্মাই কেবল পরম পুরুষবৎ অবগত আছেন।

सुलभैः सदा नयवताऽयवता
निधिगुह्यकाधिपरमैः परमैः ।
अमुना धनैः क्षितिभृताऽतिभृता
समतीत्य भाति जगती जगती ॥ २० ॥

अन्वयः । अयं रुचिरपल्लवपुष्पलताग्रहैः उपलसज्जलजैः जलराशिभिः उपकान्तं धृतिमतीरपि स्त्रियः सन्ततमुत्सुकतां नयति । वाच्य—अनेन धृतिमत्यः स्त्रियः उत्सुकतां नीयन्ते ॥ १९ ॥

अन्वयः । नयवता अयवता सदा सुलभैः निधिगुह्यकाधिपरमैः परमैः धनैः अमुना क्षितिभृता अतिभृता जगती जगती समतीत्य भाति । वाच्य—अतिभृत्या जगत्या जगत्या भायते ॥ २० ॥

रुचिरपल्लवेति । अयं गिरिः । रुचिराणि पल्लवानि पुष्पाणि च येषां ते तथाभूताः लताग्रहाः येषु तैः तथोक्तैः उपलसज्जलजैः शोभितकमलैर्जलराशिभिः सरोभिः करणैः उपकान्तं कान्तसमीपे धृतिमतीः धैर्य्यवतीरपि समीपस्थान् अपि प्रियान् न गणयन्तीः, मानिनीरित्यर्थः । स्त्रियः सन्ततम् उत्सुकतां नयति तासां मानग्रन्थिं शिथिलयति इत्यर्थः । अथवा उपकान्तं धृतिमतीः तुष्टिमतीरपि सुरततृष्णा अपि पुनः उत्सुकतां नयति इत्यर्थः । उभयत्रापि उद्दीपकत्वातिशयोक्तिः । वृत्तम् उक्तम् ॥ १९ ॥

सुलभैरिति । नयवता नीतिमता अयवता भाग्यवता च सदा सुलभैः न अन्यैः इत्यर्थः । "अयः शुभावहो विधिः" इत्यमरः । निधीनां महापद्मादीनाम् । "अब्जो पद्मो महापद्मः शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव" इत्यमरः । गुह्यकानां च अधिपं कुबेरं रमयन्ति इति तथोक्तैः । "कर्म्मण्यण्" । परमैः उत्कृष्टैः धनैः करणैः अमुना क्षितिभृता हिमाद्रिणा हेतुना अतिभृता पूर्णा सती जगती महती मही जगती स्वर्गपातालालोकौ समतीत्य अतिक्रम्य भाति । अमानुषैरपि दुर्लभाः सम्पदः अत्र सम्भवन्ति इति भावः । अत्र धनाधिपतेरिति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुत्वोक्त्या काव्यलिङ्गं तस्य यमकेन संसृष्टिः । प्रमिताक्षरा वृत्तम्—"प्रमिताक्षरा सजससैरुदिता" इति लक्षणात् ॥ २० ॥

১৯। ঐ হিমালয়োপরি পদ্মপরিশোভিত প্রভূত সরোবর আছে। ঐ সকল সরোবরের তীরে তীরে সুন্দর সুন্দর পুষ্পপল্লবশালী লতাগৃহসকল বিরাজ করিতেছে। হিমাদ্রি তথাবিধ সরোবরসমূহ দ্বারা কান্ত-সমীপাগতা অতিধীরা রমণীদিগকেও সতত উৎসুক করিয়া তুলিয়াছে।

২০। নীতিমান্ ও ভাগ্যশালীদিগের সদা সুলভ—নিধিও গুহ্যকদিগের অধিপতি কুবেরের প্রীতিকর উত্তম উত্তম ধনরাশিদ্বারা এই জগতী ঐ ক্ষিতিধর হেতু পরিপূর্ণ হইয়া স্বর্গ ও পাতাললোক অতিক্রমপূর্ব্বক প্রতিভাত হইতেছে।

अखिलमिदममुष्य गौरीगुरो-
स्त्रिभुवनमपि नैति मन्ये तुलाम् ।
अधिवसति सदा यदेनं जनै-
रविदितविभवो भवानीपतिः ॥ २१ ॥
वीतजन्मजरसं परं शुचि
ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः ॥ २२ ॥

अन्वयः । अमुष्य गौरीगुरोः इदम् अखिलं त्रिभुवनमपि तुलां न एति इति मन्ये । यत् जनैः अविदितविभवः भवानीपतिः सदा एनम् अधिवसति । वाचा—अनेन अखिलेन त्रिभुवनेन तुला न ईयते । अविदितविभवेन भवानीपतिना एष अध्युष्यते ॥ २१ ॥

अन्वयः । वीतजन्मजरसं ब्रह्मणः परं शुचिपदम् उपैतुम् इच्छताम् आगमात् इव तमोऽपहात् इव भवच्छिदः मतयः सम्भवन्ति । वाचा—भवच्छिद्भिः मतिभिः सम्भूयते ॥ २२ ॥

अखिलमिति । अमुष्य गौरीगुरोः हिमवतः इदम् अखिलं त्रयाणां भुवनानां समाहारः त्रिभुवनम् अपि । "तद्धितार्थ" इत्यादिना समासः । पात्रादित्वात् स्त्रीत्वप्रतिषेधः । तुलां साम्यं न एतीति मन्ये । यत् यतः जनैः अविदितविभवः अज्ञातमहिमा भवानीपतिः शिवः सदा एनं गिरिम् अधिवसति अस्मिन् वसति इत्यर्थः । "डपान्वध्याङ् वस" इति कर्म्मत्वम् । अतोऽयं धर्मक्षेत्रम् इति भावः । प्रभावृत्तम्—"खरशर-विरतिर्नौ गुरौ प्रभा" इति लक्षणात् ॥ २३ ॥

वीतेति । वीते निवृत्ते जन्मजरसी यस्य तत् वीतजन्मजरसम् । "जराया" "जरसन्यतरस्याम्" इति जरसादेशः । अत्र तदन्तविधेरिष्टत्वात् परत्वेन स्यादेशबाधकत्वाच्च । तथाहि—"टाङसिङसामिनात्स्याः" इति स्यादेशबाधनात् । "परत्वाज्जरसादेशं बभाषे भाष्यकृत् स्वयम्" "सूत्रकारमते यत्तु, ज्ञापकात् परबाधनम् । भवेत् तदपि टाङस्योर्नपुनर्ङसि सम्भवेत् । मतद्वयेऽपि तत्तुल्यं ङसि यत्पूर्वबाधनम् । परत्वाज्जरसादेशस्तत् स्यात् स्यादेशबाधनात् । ज्ञापकञ्चात्र टाङस्योर्यावादेशाविनादिति ।

२१ । আমি মনে করি, এই অখিল ত্রিভুবনও ঐ হিমালয়ের সমান নহে । কেননা জনগণ যাঁহার মাহাত্ম্যপরিজ্ঞানে অসমর্থ, সেই ভবানীপতি সর্ব্বদা এখানেই বাস করেন ।

দিব্যস্ত্রীণাং সচরণলাক্ষারাগা
রাগায়তে নিপতিতপুষ্পাপীড়াঃ।
পীড়াভাজঃ কুসুমচিতাঃ সাশংসং
শংসন্ত্যস্মিন্ সুরতবিশেষং শয্যাঃ ॥ ২৩ ॥

অন্বয়ঃ। অস্মিন্ সচরণলাক্ষারাগাঃ নিপতিতপুষ্পাপীড়াঃ পীড়াভাজঃ কুসুমচিতাঃ দিব্যস্ত্রীণাং শয্যাঃ রাগায়তে সাশংসং সুরতবিশেষং শংসন্তি ॥ বাচ্য—'''লাক্ষারাগাভিঃ'''পুষ্পাপীড়াভিঃ পীড়াভাগ্‌ভিঃ কুসুমচিতাভিঃ শয্যাভিঃ সাশংসঃ সুরতবিশেষঃ শংস্যতে ॥ ২৩ ॥

ইকারদোর্ঘ্যোস্তত্র বৈয়র্থ্যং তত্তু তৌ বিনা। এত্বে সবর্ণদীর্ঘে চ রূপসিদ্ধির্ভবেদ্যতঃ ব্যর্থসূত্রাচ্চরত্যাগাদ্ভড্‌ক্লৌতজ্ঞাপকং ফণী। স্নাতন্ত্বাজ্জরসাদেশং জগৌ পূর্বস্য বাধনাৎ। সমর্থনপ্রপঞ্চস্তু ভাষ্যকৈয়টয়োঃ স্ফুটঃ॥" এবঞ্চ যদত্র জরস ইতি কেষাঞ্চিৎ পাঠান্তরকল্পনং তৎ অজ্ঞানবিজৃম্ভিতম্ এব। ব্রহ্মণঃ পরমাত্মনঃ সম্বন্ধি পরম্ উৎকৃষ্টং শুচি নিষ্কলঙ্কম্। পদ্যতে ইতি পদং স্থানং তাদাত্ম্যলক্ষণম্, মুক্তিম্ ইত্যর্থঃ। উপেতুং প্রাপ্তুম্ ইচ্ছতাং মুমুক্ষূণাম্ আগমাৎ শাস্ত্রাৎ ইব। তমঃ অপহন্তি ইতি তমোঽপহাৎ অবিদ্যানিবর্ত্তকাৎ। "অপেঃ ক্লেশতমসোঃ" ইতি ডপ্রত্যয়ঃ। ইতঃ অস্মাৎ গিরেঃ, ভবং ছিন্দন্তি ইতি ভবচ্ছিদঃ সংসারনিবর্ত্তকাঃ। "সত্‌সূদ্বিষ" ইত্যাদিনা ক্বিপ্। মতয়ঃ তত্ত্বজ্ঞানানি সম্ভবন্তি উৎপদ্যন্তে। ক্ষেত্রবিশেষস্যাপি জ্ঞানোপপাদকত্বাৎ ইত্যাশয়ঃ। ন চ কেবলমিয়ং ভোগভূমিঃ, কিন্তু মুক্তিক্ষেত্রম্ অপীতি তাৎপর্য্যার্থঃ। রথোদ্ধতাবৃত্তম্। তল্লক্ষণম্—"রান্নরাবিহ রথোদ্ধতা লগৌ" ইতি ॥ ২২ ॥

দিব্যেতি। অস্মিন্ গিরৌ। চরণলাক্ষারাগৈঃ সহ বর্ত্তন্তে যাঃ তথোক্তাঃ, ধেনুকপুরুষায়িতাদিবন্ধেষু স্ত্রিয়াঃ পাদতলস্যাধঃস্পর্শাৎ তদ্রাগাঙ্কিতাঃ ইত্যর্থঃ। নিপতিতাঃ ব্যানতকরণে স্ত্রীণাম্ অধোমুখত্বাৎ ভ্রষ্টাঃ পুষ্পাপীড়াঃ কুসুমশেখরাঃ যাসু তাঃ তথোক্তাঃ। "শিখাস্রাপীড়শেখরৌ" ইত্যমরঃ। পীড়াভাজঃ বিমর্দভাজঃ ভঙ্গিমত্য ইত্যর্থঃ। ভ্রমরপ্রেঙ্খোলিতাদৌ সর্বতঃ কটীপরিভ্রমণসম্ভবাদিতি ভাবঃ। কুসুমৈঃ চিতাঃ

২২। যথায় জন্ম নাই, জরা নাই, এ হেন পরম পবিত্র ব্রহ্মপদ পাইবার অভিলাষী জনের—আগমের ন্যায় এই তমোহর গিরি হইতে সংসারচ্ছেদকর তত্ত্বজ্ঞান প্রাদুর্ভূত হইয়া থাকে।

২৩। এই হিমালয়ে সুরস্ত্রীগণের বহু শয্যা রহিয়াছে, ঐ সকল কুসুমাস্তৃত শয্যা স্ত্রীগণের অলক্তাক্ত পাদতলস্পর্শে রাগরঞ্জিত, পতিতপুষ্প-শেখরযুত ও মর্দিত হইয়া আছে। উহারা রাগোদ্রিক্ত অবস্থায় সতৃষ্ণ সুরতবিশেষই খ্যাপন করিতেছে।

गुणसम्पदा समधिगम्य परं
महिमानमत्र महिते जगताम्।
नयशालिनि श्रिय इवाधिपतौ
विरमन्ति न ज्वलितुमोषधयः ॥ २४ ॥

अन्वयः। जगतां महिते अत्र हिमवति ओषधयः नयशालिनि अधिपतौ श्रियः इव गुणसम्पदा परं महिमानं समधिगम्य ज्वलितुं न विरमन्ति ॥ वाच्य—ओषधिभिः श्रीभिरिव न विरम्यते ॥२४

कुसुमचिताः कुसुमव्याप्ताः। द्विपमार्जारादिकरणेषु स्तनभुजाद्यवयवानां शय्यातलस्थायित्वात् मार्दवाय कुसुमाचिताः कुसुमास्तृताः, दिव्यस्त्रीणां सम्बन्धिन्यः इत्यर्थः। शेरते आसु इति शय्याः तल्पानि। "संज्ञायां समजनिषद" इत्यादिना क्यप्। रागायाते रागोद्रेके सति यः साशंसः सतृष्णः सुरतविशेषः तं,जातावेकवचनम्। सुरतविशेषान् इत्यर्थः। शंसन्ति सूचयन्ति विदृष्यन्ति इत्यर्थः। अत्र लाक्षारागादिपदार्थानां सुरतविशेषशंसनं प्रति विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः यमकेन संसृज्यते। जलधरमालावृत्तम् "भौ स्त्रौ चेत् स्याज्जलधरमाला ख्याता" इति लक्षणात् धेनुकादिबन्धलक्षणं तु रतिरहस्ये—"न्यस्तहस्तयुगला निजे पदे योषिदेति कटिरूढ़वल्लभा। अग्रतो यदि शनैरधोमुखो धेनुकं वृषवदुन्नते प्रिये ॥१॥ स्वेच्छया भ्रमति वल्लभेऽपि या योषिदाचरति वल्लभायितम्। व्यानतं रतमिदं यदि प्रिया स्यादधोमुखचतुष्पदाकृतिः ॥ २ ॥ तत्कटिं समधिरुह्य वल्लभः स्यादृषादिपशुसंस्थितिस्थितः। चक्रवद्भ्रमति कुञ्चिताङ्घ्रिका भ्रामरं न जघने समुद्वहे ॥ ३ ॥ सर्वतः कटिपरिभ्रमो यदि प्रेङ्खपूर्वमिदमुक्तमूर्जितम्। भूगतस्तनभुजास्यमस्तकामुन्नतां स्वयमधोमुखीं स्त्रियम् ॥ ४ ॥ क्रामति स्वकरलग्नमेहने वल्लभे करिरतं तदुच्यते।' "प्रसारिते पाणिपादे शय्यास्पर्शिमुखोरसि। उन्नतायाः स्त्रियाः कव्यां मार्जारीक्रमणं विदुः ॥" इति ग्रन्थान्तरे। ["कान्तोत्पीड़ा भौ स्त्रौ" इति वृत्तम्] ॥ २३ ॥

गुणेति। जगतां महिते जगद्भिः पूजिते पूज्यमाने। "मतिबुद्धि" इत्यादिना वर्त्तमाने क्तः, "क्तस्य च वर्त्तमाने" इति षष्ठी। अत्र हिमवति ओषधयः तृणज्योतींषि नयशालिनि अधिपतौ नीतिसम्पन्ने राज्ञि श्रियः सम्पदः इव गुणसम्पदा स्वे स्वगुणसम्पत्त्या अन्यत्र सन्ध्यादिगुण-

२४। नयनिष्ठ नराधिपे যেমন সম্পদ্‌রাশি, তদ্রূপ এই জগৎপূজিত হিমালয়ে ওষধিসকল গুণসম্পদে একান্ত সমৃদ্ধ হইয়া অনবরত প্রজ্বলিত হইতেছে।

कुररीगणः कृतरवस्तरवः
कुसुमानताः सकमलं कमलम्।
इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥ २५ ॥
सादृश्यं गतमपनिद्रचूतगन्धै-
रामोदं मदजलसेकजं दधानः।
एतस्मिन् मदयति कोकिलानकाले
लीनालिः सुरकरिणां कपोलकाषः ॥ २६ ॥

अन्वयः। इह कुररीगणः कृतरवः तरवः कुसुमानताः कमलं सकमलं वरणावरणाः सनलदानलदाः सिन्धवः करिणां मुदे (भवन्ति) ॥ वाच्य—कुररीगणेन कृतरवेण तरुभिः कुसुमानतैः कमलेन सकमलेन वरणावरणाभिः सनलदानलदाभिः सिन्धुभिः (भूयते) ॥ २५ ॥

अन्वयः। एतस्मिन् अपनिद्रचूतगन्धैः सादृश्यं गतं मदजलसेकजम् आमोदं दधानः (अतः) लीनालिः सुरकरिणां कपोलकाषः अकाले कोकिलान् मदयति ॥ वाच्य—आमोदं दधानेन लीनालिना कपोलकाषेण कोकिलाः मादयन्ते ॥ २६ ॥

सम्पदा। परं महिमानम्, उभयत्रापि प्रकाशसामर्थ्यं समधिगम्य ज्वलितुं प्रकाशितुं न विरमन्ति अविरतं ज्वलन्ति इत्यर्थः। अन्यत्र रात्रादावेवेति भावः ॥ २४ ॥

कुररीति। इह अद्रौ कुररीगणः उत्क्रोशसङ्घः। "उत्क्रोशकुररौ समौ" इत्यमरः। कृतरवः कृतारवः तरवः कुसुमैः आनताः कमलं जलं सकमलं सपद्मम्। "कमलं जलपद्मयोः" इति विश्वः। यद्वा कं जलम् अमलमत्यन्तं सपद्मं वर्त्तते। "कं जले शिरसि च" इत्यमरः। किञ्च वरणाः द्रुमाः आवरणं यासां ताः वरणावरणाः। "वरणो वरुणः सेतुस्तिक्तशाकः कुमारकः" इत्यमरः। सनलदाः सोशीराः। "मूलेऽस्योशीरमस्त्रियाम्। "अभयं नलदं सेव्यम्" इत्यमरः। अनलं सन्तापं द्यन्ति खण्डयन्ति शमयन्ति इति अनलदाः। सनलदाश्च ताः अनलदाः सिन्धवः नद्यः करिणां मुदे भवन्ति इति शेषः। न कुत्रापि उक्तवैपरीत्यम् इति भावः ॥ २५ ॥

सादृश्यमिति। एतस्मिन् पर्वते अपनिद्रचूतगन्धैः सादृश्यं गतं

२५। এই পর্ব্বতে কুররীগণ কলরব করিতেছে; তরুগণ কুসুমভরে আনত হইয়াছে, জল পদ্ম-পরিশোভিত রহিয়াছে; ক্রমাবরণশালী সিন্ধুগণ উশীরসমন্বিত ও সন্তাপহর হইয়া করিগণের প্রীতিজনক হইতেছে।

২৬। এই পর্ব্বতে সুরকরিগণের কপোলঘর্ষণের স্থান—দ্রুমস্কন্ধাদি করিগণের মদজল-সেক-

सनाकवनितं नितम्बरुचिरं
चिरं सुनिनदैर्नदैर्वृतममुम् ।
मता फणवतोऽवतो रसपरा
परास्तवसुधा सुधाधिवसति ॥ २७ ॥

अन्वयः । सनाकवनितं नितम्बरुचिरं सुनिनदैः नदैः वृतम् अमुम् अवतः फणवतः नागराजस्य मता रसपरा परास्तवसुधा सुधा चिरम् अधिवसति ॥ वाच्य—मतया रसपरया परास्तवसुधया सुधया अध्युष्यते ॥ २७ ॥

फुल्लाम्रपुष्पगन्धसट्टशं मदजलसेकजम् आमोदं परिमलं दधानः बिभ्राणः । अत एव लोनालिः संसक्तभृङ्गः सुरकरिणां कष्यते अनेन इति काषः । कपोलानां काषः कषणस्थानं द्रुमष्कन्धादि । अकाले वसन्तातिरिक्ते काले अपि कोकिलान् मदयति । "मितां क्नस्नः" इति क्नस्नः । अत्र वसन्तरूपकारणाभावेऽपि मदाख्यकार्य्योत्पत्तिकथनात् विभावना लङ्कारः । तदुक्तम्—"कारणेन विना कार्य्यस्योत्पत्तिः स्याद्विभावना" इति । सा च चूतगन्धैः साट्टश्यम् इति उपमया आमोदं दधान इति पदार्थहेतुककाव्यलिङ्गेन च अङ्गाङ्गिभावेन सङ्कीर्य्यते । किञ्च कोकिलानां मदगन्धे चूतगन्धभ्रान्त्या भ्रान्तिमदलङ्कारो व्यज्यते । प्रहर्षिणीवृत्तम् । "म्नौ ज्नौ गस्त्रिदशयतिः प्रहर्षिणीयम्" इति लक्षणात् ॥ २६ ॥

सनाकेति । पुनश्च सनाकवनितं साप्सरस्कं नितम्बैः कटकैः रुचिरम् । सुनिनदैः सुघोषैः नदैः प्रवाहैः वृतम् अमुं अमुष्मिन् गिरौ इत्यर्थः । "उपान्वध्याङ्वसः इति कर्म्मत्वम् । अवतोऽधोलोकरक्षकस्य फणवतः नागराजस्य मता इष्टा । "मतिबुद्धि" इत्यादिना वर्त्तमाने क्तः । तद्योगात् षष्ठी । रसेन स्वादेन परा उत्कृष्टा । परास्तवसुधा त्यक्तभूलोका सुधा अमृतं चिरम् अधिवसति । अतः अन्यत्र भूमण्डले कुत्रापि सुधा नास्ति इत्यर्थः । मेरुप्रतिभटः अयं गिरिः इति भावः । अत्र प्रस्तुतविशेषणसामर्थ्यात् अप्रस्तुतमेरुप्रतीतेः समासोक्तिरलङ्कारः, स च यमकेन संसृज्यते । जलोद्धतगतिर्वृत्तम्—"रसैर्जसजसा जलोद्धतगतिः" इति लक्षणात् ॥ २७ ॥

अन्य प्रफुल्लचूतगन्धवत् परिमल धारण करितेछे, सुतराः उहाते अलिकुल लीन आछे। उहा वसन्तेतर कालेओ कोकिलदिगके माताइया तुलियाछे।

२७। ऐ हिमालय अप्सरोगणयुत, नितम्बशोभित ओ सुनिनदशाली नदनिचये परिव्याप्त; अधोलोकरक्षक नागराज उहाके धारण करियाछेन। सेई नागराजेर अभीष्ट रसोत्कृष्ट सुधा भूलोक त्याग करिया चिरकाल एই हिमालये विराज करितेछे।

শ্রীমল্লতাভবনমোষধয়ঃ প্রদীপাঃ
শয্যা নবানি হরিচন্দনপল্লবানি।
অস্মিন্ রতিশ্রমনুদশ্চ সরোজবাতাঃ
স্মর্ত্তুং দিশন্তি ন দিবঃ সুরসুন্দরীভ্যঃ ॥২৮॥
ঈশার্থমভ্রসি চিরায় তপশ্চরন্ত্যা
যাদোবিলঙ্ঘনবিলোলবিলোচনায়াঃ।
আলম্বতাগ্রকরমত্র ভবো ভবান্যাঃ
স্বেদোদ্গিরদ্বিরলিতাঙ্গুলিনা করেণ ॥ ২৯ ॥

অন্বয়ঃ। অস্মিন্ শ্রীমল্লতাভবনম্ ওষধয়ঃ প্রদীপাঃ নবানি হরিচন্দনপল্লবানি শয্যাঃ রতিশ্রমনুদঃ সরোজবাতাশ্চ সুরসুন্দরীভ্যঃ দিবং স্মর্ত্তুং ন দিশন্তি॥ বাচ্য—লতাভবনেন ওষধিভিঃ প্রদীপৈঃ নবৈঃ হরিচন্দনপল্লবৈঃ শয্যাভিঃ রতিশ্রমনুদ্ভিঃ সরোজবাতৈঃ স্মর্ত্তুং ন দিশ্যতে ॥ ২৮ ॥

অন্বয়ঃ। ঈশার্থং চিরায় অভ্রসি তপঃ চরন্ত্যাঃ (অতঃ) যাদোবিলঙ্ঘনবিলোলবিলোচনায়াঃ ভবান্যাঃ অগ্রকরং ভবঃ স্বেদোদ্গিরদ্বিরলিতাঙ্গুলিনা করেণ অত্র আলম্বত ॥ বাচ্য—ভবেন অগ্রকরঃ আলম্ব্যত ॥ ২৯ ॥

শ্রীমদিতি। অস্মিন্ অদ্রৌ শ্রীমৎ সমৃদ্ধিমৎ লতা এব ভবনম্, ওষধয়ঃ তৃণজ্যোতীংষি এব প্রদীপাঃ নবানি হরিচন্দনপল্লবানি সুরতরুকিসলয়ানি এব শয্যাঃ। "হরিচন্দনমাখ্যাতং গোশীর্ষে সুরপাদপে" ইতি বিশ্বঃ। রতিশ্রমনুদঃ সুরতশ্রমহারিণঃ সরোজবাতাশ্চ সুরসুন্দরীভ্যঃ। ক্রিয়াগ্রহণাৎ চতুর্থী। দিবঃ দিবম্। "অধীগর্থ" ইত্যাদিনা কর্ম্মণি ষষ্ঠী। স্মর্ত্তুং ন দিশন্তি। বিস্মারয়ন্তি ইত্যর্থঃ। স্বর্গাদপি অতিরিচ্যতে অসৌ ইতি ভাবঃ। অত্র পূর্ব্বার্দ্ধে রূপকত্রয়ং স্ফুটম্ এব ॥ ২৮ ॥

ঈশার্থমিতি। ঈশায় অতিশয়ায় যথা তথা ইতি ক্রিয়াবিশেষণম্। "অর্থেন সহ নিত্যসমাসঃ সর্ব্বলিঙ্গতা চ বক্তব্যা।" চিরায় চিরম্ অভ্রসি তপঃ চরন্ত্যাঃ অত এব যাদোবিলঙ্ঘনবিলোলবিলোচনায়া জল-

২৮। এখানে সুসমৃদ্ধ লতারাজিই ভবন, তৃণজ্যোতিঃসমূহই প্রদীপ, নবীন হরিচন্দনপল্লবই শয্যা; এই সকল এবং রতিশ্রমাপহারী সরোজবায়ু, ইহারা সুরসুন্দরীদিগকে আর স্বর্গ স্মরণ করাইতেছে না।

২৯। ভবানী ভবদেবকে পাইবার জন্য বহু দিন জলমধ্যে থাকিয়া তপস্যা করিয়াছিলেন; তৎকালে জলজন্তুগণের বিষট্টনে তাঁহার নয়ন চঞ্চল হইতেছিল। তখন ভবদেব স্বীয় স্বেদজলস্রাবী করাঙ্গুলির অগ্রভাগদ্বারা এইখানেই ভবানীর কর গ্রহণ করিয়াছিলেন।

येनापविद्धसलिलः स्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
आवर्त्तनैरहिपतेरयमाहिताङ्कः
खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥३०॥

अन्वयः । देवासुरैः येन अपविद्धसलिलः स्फुटनागसद्मा अम्बुनिधिः अमृतं ममन्थे । अहिपतेः आवर्त्तनैः आहिताङ्कः अयं मन्दराद्रिः खं व्यालिखन् इव विभाति ॥ वाच्य— देवासुराः अपविद्धसलिलं स्फुटनागसद्मानम् अम्बुनिधिम् अमृतं ममन्थुः । आहिताङ्केन अनेन मन्दराद्रिणा खं व्यालिखतेव विभायते ॥ ३० ॥

जन्तुविघट्टितचकितेक्षणायाः तपसः अपि अधिकं दृष्ट्वा एव विलोभयन्त्याः इति भावः । "यादांसि जलजन्तवः" इत्यमरः । भवान्याः भवपत्न्याः प्रयोगकालापेक्षः अयं निर्देशः । "इन्द्रवरुणभव" इत्यादिना ङीष् आनुगागमश्च । करैकदेशस्यापि करत्वात् अग्रश्वासौ करश्चेति समानाधिकरणसमासः । अत एव वामनः—"हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदौ" इति । तम् अग्रकरं भवः शिवः स्वेदोत्तम्भितश्रमसलिलाङ्गुलिना स्रवत्स्वेदाङ्गुलिना इति सात्त्विकोदयोक्तिः । करेण अत्र गिरौ आलम्बत गृहीतवान् । अत्र अङ्गुलीतीतवृत्तान्तस्य प्रत्यक्षवत् अभिधानात् भाविकालङ्कारः । "अतीतानागते यत्र प्रत्यक्षवदलक्षिते । अत्यङ्गुलार्थकार्य्यत्वाद्भाविकं तदुदाहृतम् ॥" इति लक्षणात् । वसन्ततिलकावृत्तम्— "उक्ता वसन्ततिलका तभजा जगौ गः" इति लक्षणात् ॥ २८ ॥

येनेति । देवाश्च असुराश्च तैः देवासुरैः । "येषां च विरोधः शाश्वतिकः" इति नैकवद्भावः । एषां यतः कार्य्यत एव विरोधः न गोव्याघ्रादिवत् शाश्वतिक इति आहुः । येन मन्दराद्रिणा मन्थदण्डीकृतेन इति भावः । अपविद्धसलिलः क्षिप्तजलः अत एव स्फुटं नागसद्म पातालं यस्मिन् सः अम्बुनिधिः अमृतं ममन्थे मथितः । मथ्नातेर्हि कर्म्मकत्वात् दुहादित्वात् अप्रधाने कर्म्मणि लिट् । अहिपतेः मन्थगुणीकृतस्य वासुकेरित्यर्थः । "मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्" इति भारतवचनात् । व्यावर्त्तनैः वेष्टनैः आहिताङ्कः कृतचिह्नः सः अयं मन्दराद्रिः

३०। सुरासुरगण जलधিতে অমৃত মথন করিয়াছিলেন। তৎকালে মন্দরাদ্রিদ্বারা জলধির জল ক্ষিপ্ত হইয়াছিল ; কাজেই নাগলোক স্পষ্টতঃ প্রকাশ পাইয়াছিল। তখন মথনগুণীকৃত বাসুকির বেষ্টনে কৃতচিহ্ন হইয়া ঐ মন্দরাদ্রি যেন আকাশ উল্লেখন করতই বিভাত হইয়াছিল।

नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रै-
रानीलाभैर्विरचितपरभागा रत्नैः।
ज्योत्स्नाशङ्कामिह वितरति हंसश्लेनी
मध्येऽप्यङ्कः स्फटिकरजतभित्तिच्छाया ॥३१॥
दधत इव विलासशालि नृत्यं
मृदु पतता पवनेन कम्पितानि।
इह ललितविलासिनीजनभ्रू-
गतिकुटिलेषु पयःसु पङ्कजानि ॥ ३२ ॥

अन्वयः। इह अशिशिररश्मेः उस्रैः उच्छ्रायं नीता आनीलाभैः रत्नैः विरचितपरभागा हंसश्लेनी स्फटिकरजतभित्तिच्छाया मध्याङ्के अपि मुहुः ज्योत्स्नाशङ्कां वितरति ॥ वाच्य—नीतया विरचितपरभागया हंसश्लेन्या स्फटिकरजतभित्तिच्छायया ज्योत्स्नाशङ्के व वितीर्यते ॥३१

अन्वयः। इह मृदु पतता पवनेन कम्पितानि पङ्कजानि ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु विलासशालि नृत्यं दधत इव ॥ वाच्य—कम्पितैः पङ्कजैः विलासशालि नृत्यं धीयते ॥३२॥

खम् आकाशं व्यालिखन् व्यापाटयत् इव विभाति। अत्र औन्नत्यानुपादानेनैव खलेखनेन उत्प्रेक्षणात् अनुपात्तगुणनिमित्ता क्रियास्वरूपा उत्प्रेक्षा ॥ ३० ॥

नीतेति। इह अद्रौ अशिशिररश्मेः उष्णांशोः उस्रैः मयूखैः सङ्क्रान्तैः इत्यर्थः। नीतोच्छ्रायम् उच्छ्रायं नीता विस्तारिता इत्यर्थः। तथा आनीलाभैः असितप्रभैः रत्नैः इन्द्रनीलैः विरचितपरभागा तत्सन्निधानात् लब्धोत्कर्षा इत्यर्थः। हंस इव श्लेनी श्लेतवर्णा "विशदश्लेतपाण्डुराः" इत्यमरः। "वर्णादनुदात्तात्तोपधात्तो नः" इति श्लेतशब्दात् ङीप्। तकारस्य च नकारः। स्फटिकानां रजतानां च भित्तयः तासां छाया कान्तिः। अङ्कः मध्ये मध्याङ्के अपि इत्यर्थः। मुहुः ज्योत्स्नाशङ्कां ज्योत्स्नाभ्रान्तिं वितरति। ज्योत्स्नाकृते भ्रान्तिं जनयति इति भ्रान्तिमदलङ्कारः ॥ ३१ ॥

दधत इति। इह अद्रौ मृदु पतता मन्दं वहता पवनेन। कम्पितानि

৩১। এই পর্ব্বতে হংসের ন্যায় শুভ্রবর্ণ স্ফটিক ও রজতভিত্তির কান্তিপুঞ্জ প্রতিফলিত সূর্য্যকিরণে বিস্তারিত এবং নীলকান্তি রত্নখচিতের নৈকট্যবশে উৎকর্ষপ্রাপ্ত হইয়াও মধ্যাহ্ন কালেও বারংবার জ্যোৎস্নাশঙ্কা জন্মাইতেছে।

৩২। এই পর্ব্বতে পঙ্কজকুল মৃদু পবনে কম্পিত হইয়া সুন্দরী বিলাসিনীজনের ভ্রূগতিবৎ কুটিল জলে যেন বিলাস সহকারে নৃত্য করিতেছে।

अस्मिन्नगृह्णत पिनाकभृता सलील-
मावद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरौश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥
क्रामद्भिर्घनपदवीमनेकसङ्ख्यै-
स्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उत्साणां व्यभिचरतीव सप्तसप्तेः
पर्य्यस्यन्निह निचयः सहस्रसङ्ख्याम् ॥ ३४ ॥

अन्वयः । अस्मिन् पिनाकभृता अधीरविलोचनायाः ईश्वरायाः आवद्धवेपथुः विन्यस्तमङ्गल-महौषधिः पाणिः स्रस्तोरगप्रतिसरेण करेण अगृह्यत ॥ वाच्या—पिनाकभृत् आवद्धवेपथुं विन्यस्तमङ्गलमहौषधिं पाणिम् अगृह्णात् ॥ ३३ ॥

अन्वयः । घनपदवीं क्रामद्भिः अनेकसंख्यैः शुचिमणिजन्मभिः तेजोभिः विभिन्नः (अतः) पर्य्यस्यन् इह सप्तसप्तेः उत्साणां निचयः सहस्रसंख्यां व्यभिचरति इव ॥ वाच्या—विभिन्नेन पर्य्यस्यता उत्साणां निचयेन सहस्रसंख्या व्यभिचर्य्यते ॥ ३४ ॥

पङ्कजानि ललितविलासिनोजनस्य भ्रूगतिवत् कुटिलेषु ईषत्तरङ्गितेषु इतार्थैः पयःसु विलासशालि नृत्तं दधत इव सविलासं नृत्यन्ति इव इति उत्प्रेक्षा । पुष्पिताग्रा वृत्तम् ॥ ३२ ॥

अस्मिन्निति । अस्मिन् अद्रौ पिनाकभृता शिवेन अधीरविलोचनायाः चकितदृष्टेः उरगदर्शनादिति भावः । ईश्वरायाः गौर्याः । "स्त्रेग्भास" इत्यादिना वरच् । पुंयोगविवक्षाभावात् न ङीष् । आवद्धवेपथुः प्राप्त-कम्प इति साक्षिकोक्तिः । "ट्वितोऽथुच्" इति अथुच्प्रत्ययः । विन्यस्ता मङ्गलमहौषधिः यवाङ्कुरादिः यस्मिन् सः पाणिः स्रस्तः गलितः उरग एव प्रतिसरः कौतुकसूत्रं यस्य तेन । "प्राडुः प्रतिसरो हस्तसूत्रे माल्ये च मण्डने" इति विश्वः । करेण सलीलम् अगृह्यत इति देवस्य पार्वती-परिणयनवर्णनम् । ईशार्थम् इतात्र तु अनुग्रहमात्रोक्तिरिति अपौन-रुक्त्यम् । भाविकम् एव अलङ्कारः ॥ ३३ ॥

क्रामद्भिरिति । घनपदवीम् आकाशं क्रामद्भिः व्यश्नुवानैः अनेक-

००। এই পর্ব্বতেই পিনাকপাণি চকিতনয়না গৌরীর মঙ্গলমহৌষধিযুত কম্পান্বিতকর নীলসর্পকারে গ্রহণ করিয়াছিলেন। গ্রহণকালে তাঁহার করের সর্পরূপ কৌতুকসূত্র স্রস্ত হইয়াছিল।

व्यधत्त यस्मिन् पुरमुच्चगोपुरं
पुरां विजेतुर्धृतये धनाधिपः।
स एष कैलास उपान्तसर्पिणः
करोत्यकालास्तमयं विवस्वतः॥ ३५॥
नानारत्नज्योतिषां सन्निपातै-
स्कन्नेष्वन्तःसानु बप्रान्तरेषु।

अन्वयः। यस्मिन् धनाधिपः पुरां विजेतुः धृतये उच्चगोपुरं पुरा व्यधत्त। स एषः कैलासः उपान्तसर्पिणः विवस्वतः अकालास्तमयं करोति। वाच्य—धनाधिपेन उच्चगोपुरं पुरं व्यधीयत। तेन एतेन कैलासेन अस्तमयः क्रियते॥ ३५॥

संख्यैः। परःसहस्रैरित्यर्थः। क्वचित् "अनेकवर्णैः" इति पाठस्तु प्रामादिक एव वैयर्थ्यात् व्याघाताच्च इति। शुचिमणिभ्यः स्फटिकेभ्यः जन्म येषां तैः। "जन्माद्युत्तरपदो बहुव्रीहिर्व्यधिकरणेऽपीष्यते" इति वामनः। तेजोभिः विभिन्नः मिश्रः अतएव पर्य्यस्यन् प्रसर्पन् इह अद्रौ सप्तसप्तेः सवितुः उष्णाणां किरणानां निचयः निकरः। सहस्रम् इति संख्या सहस्रसंख्या तां स्वनियताम् इति शेषः। व्यभिचरति अतिक्रामति इवेत्युत्प्रेक्षा॥ ३४॥

व्यधत्तेति। यस्मिन् कैलासे धनाधिपः कुबेरः पुरां विजेतुः शिवस्य धृतये सन्तोषाय उच्चगोपुरम् उन्नतपुरद्वारम्। "पुरद्वारन्तु गोपुरम्" इत्यमरः। पुरम् अलकाख्यां पुरीं व्यधत्त निर्मितवान्, तत्सखित्वात् इति भावः। सः एषः कैलासः उपान्तसर्पिणः प्रान्तचारिणः विवस्वतः सूर्य्यस्य अकाले प्रसिद्धेतरकाले अस्तमयं करोति इव इति उत्प्रेक्षा। वस्तुतस्तु तत्कारणाभावात् व्यङ्ग्योत्प्रेक्षा गम्या उत्प्रेक्षा। सा च उपान्तवर्त्तितया असम्बन्धे सम्बन्धलक्षणातिशयोक्त्युत्थापिता इति विवेकः। अस्तम् इति मकारान्तम् अव्ययम्। तस्य पचाद्यजन्तेन अयशब्देन षष्ठीसमासः। वंशस्थं वृत्तम् उक्तम्॥ ३५॥

৩৪। স্বচ্ছ স্ফটিকজাত সহস্র সহস্র তেজ আকাশে পরিব্যাপ্ত হইয়াছে। ঐ সকল তেজে সম্মিশ্রিত—সুতরাং প্রসর্পিত হইয়া এ পর্ব্বতে সবিতার কিরণপুঞ্জ সহস্র সংখ্যাকেও যেন অতিক্রম করিয়াছে।

৩৫। যে কৈলাসে পুরারির সন্তোষের জন্য কুবের উচ্চ গোপুরান্বিত পুরী নির্ম্মাণ করাইয়াছিলেন, এই সেই ধাম কৈলাসপ্রান্তচারী দিবাকরের আকালিক অস্ত বিধান করিতেছে।

बद्धां बद्धां भित्तिशङ्कामसृष्मि-
न्नावानावान् मातरिश्वा निहन्ति ॥ ३६ ॥
रम्या नवद्युतिरपैति न शाद्वलेभ्यः
श्यामीभवन्त्यनुदिनं नलिनीवनानि ।
अस्मिन् विचित्रकुसुमस्तवकाचितानां
शाखाभृतां परिणमन्ति न पल्लवानि ॥ ३७ ॥

अन्वयः । असुष्मिन् अन्तःसानु नानारत्नज्योतिषां सन्निपातैः क्लृप्तेषु वप्रान्तरेषु बद्धां बद्धां भित्तिशङ्काम् आवान् आवान् मातरिश्वा निहन्ति । वाच्य—आवाता आवाता मातरिश्वना बद्धा बद्धा भित्तिशङ्का निहन्यते ॥ ३६ ॥

अन्वयः । अस्मिन् शाद्वलेभ्यः रम्या नवद्युतिः न अपैति, नलिनीवनानि अनुदिनं श्यामीभवन्ति, विचित्रकुसुमस्तवकाचितानां शाखाभृतां पल्लवानि न परिणमन्ति । वाच्य—रम्यया नवद्युत्या न अपेयते । नलिनीवनैः श्यामीभूयते, पल्लवैः परिणम्यते ॥ ३७ ॥

नानेति । असुष्मिन् कैलासे अन्तःसानु सानुषु इत्यर्थः । विभक्त्यर्थे अव्ययीभावः । नानारत्नज्योतिषां अनेकमणिकान्तीनां सन्निपातैः व्यतिकरैः क्लृप्तेषु कृतादिषु । "वा दान्तशान्त" इत्यादिना निपातः । वप्रान्तरेषु कटकान्तरेषु बद्धां बद्धामभीक्ष्णं बद्धाम् । दृढ़ोत्पादिताम् इत्यर्थः । "नित्यवीप्सयोः" इति नित्यार्थे द्विर्भावः । "नित्यमभीक्ष्णम्" इति काशिका । एकपदं चैतत् । भित्तिशङ्कां भित्तिः इति सन्देहम् आवान् आवान् अभीक्ष्णम् आपतन् । आङ्पूर्वात् वाधातोः शतृप्रत्ययः । द्विर्भावादि पूर्ववत् । मातरि अन्तरिक्षे श्वयति गच्छति इति मातरिश्वा वायुः । कनिन्प्रत्ययः । "तत्पुरुषे कृति बहुलम्" इति अलुक् । निहन्ति निवर्त्तयति । वायुसञ्चारात् भित्त्यभावः अवधार्यते इत्यर्थः । अतः निश्चयान्तः सन्देहालङ्कारः । शालिनीवृत्तम् ॥ ३६ ॥

रम्येति । अस्मिन् अद्रौ । शादाः शष्पाणि सन्ति एषु इति शाद्वलाः तेभ्यः । "शाद्वलः शादहरिते" इत्यमरः । "नडशादाद्वलच्" । रम्या नवा द्युतिः न अपैति किन्तु नित्या इत्यर्थः । नलिनीवनानि अनुदिनं सर्वदा श्यामीभवन्ति, न कदाचित्पाण्डुरीभवन्ति इत्यर्थः । विचित्रकुसुमस्तवकैः आचितानां व्याप्तानां शाखाभृतां तरूणां पल्लवानि न परिणमन्ति न जीर्णानि भवन्ति इत्यर्थः, सर्वदा नूतनानि एव वर्त्तन्त इत्यर्थः । अत्र

৩৬ । এই কৈলাসের সানুদেশে বিবিধ রত্নজ্যোতির সমবায়ে বপ্রান্তর সকল সমাচ্ছাদিত হওয়ায় সতত ভিত্তিশঙ্কা জন্মিতেছে ; কিন্তু পুনঃ পুনঃ পবনপাতে সেই ভিত্তিশঙ্কা নিরস্ত করিতেছে ।

परिसरविषयेषु लोढ़मुक्ता
हरितत्तृणोद्गमशङ्कया मृगौभिः ।
इह नवशुककोमला मणीनां
रविकरसंवलिताः फलन्ति भासः ॥ ३८ ॥
उत्फुल्लस्थलनलिनीवनादमुष्मा-
दुद्भूतः सरसिजसम्भवः परागः ।
वात्याभिर्वियति विवर्त्तितः समन्ता-
दाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ३९ ॥

अन्वयः । इह परिसरविषयेषु मृगौभिः हरितत्तृणोद्गमशङ्कया लोढ़मुक्ताः नवशुककोमलाः मणीनां भासः रविकरसंवलिताः फलन्ति । वाच्य—लोढ़मुक्ताभिः नवशुककोमलाभिः भाभिः रविकरसंवलिताभिः फल्यते ॥ ३८ ॥

अन्वयः । वात्याभिः अमुष्मात् उत्फुल्लस्थलनलिनीवनात् उद्भूतः वियति समन्तात् विवर्त्तितः सरसिजसम्भवः परागः कनकमयातपत्रलक्ष्मीम् आधत्ते । वाच्य—उद्भूतेन विवर्त्तितेन सरसिज-सम्भवेन परागेण कनकमयातपत्रलक्ष्मीः आधीयते ॥ ३९ ॥

प्रस्तुतस्य एव तत्तद्वस्तुगतकान्तिस्थैर्यरूपकार्य्यस्य वर्णनात् प्रस्तुतम् इव कारणं कञ्चित् असाधारणः कैलासस्य महिमा अवगम्यते इति पर्य्यायोक्तिरलङ्कारः । तदुक्तम्—"कारणं गम्यते यत्र प्रस्तुतात् कार्य्यवर्णनात् । प्रस्तुतत्वेन सम्बन्धस्तत्पर्य्यायोक्तमुच्यते" इति ॥ ३७ ॥

परिसरेति । इह अद्रौ परिसरविषयेषु पर्य्यन्तदेशेषु । "विषयो देशे" इति निपातः । मृगौभिः हरितत्तृणोद्गमशङ्कया नीलतृणाङ्कुर-भ्रान्त्या इति भ्रान्तिमदलङ्कारः । लोढ़ाः पूर्वम् आस्वादिताः पश्चात् मुक्ताः लोढ़मुक्ताः, दग्धप्ररूढ़ः इत्यादिवत् "पूर्वकाल" इत्यादिना समानाधि-करणसमासः । नवशुककोमलाः शुकसवर्णा इत्यर्थः । मणीनां मरकत-मणीनां भासः रविकरैः संवलिताः मिश्रिताः सत्यः फलन्ति सम्मूर्च्छन्ति । वर्द्धन्ते इति यावत् ॥ ३५ ॥

৩৭। এই পর্ব্বতে শাদ্বলসমূহের রম্য নবদ্যুতি অপগত হয় না ; সমস্ত নলিনীবন সকল সময় শ্যামশোভাই ধারণ করে; বিচিত্র কুসুম-ব্যাপ্ত মহীরুহগণের পল্লবসকলও কখনই জীর্ণ হয় না।

৩৮। এ পর্ব্বতের পর্য্যন্তদেশে মৃগীগণ নীলবর্ণ তৃণাঙ্কুরভ্রমে অগ্রে আস্বাদন করিয়াছে, পরে পরিত্যাগ করিয়াছে, এ হেন নবশুকনিভ কোমল মরকতমণির কান্তিপুঞ্জ দিবাকরের করনিকরে মিশ্রিত হইয়া বর্দ্ধিত হইতেছে।

इह सनियमयोः सुरापगाया-
मुषसि सयावकसव्यपादरेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥ ४० ॥

अन्वयः । इह उषसि सुरापगायां सयावकसव्यपादरेखा विषमपदा विवर्त्तनेषु पदवी सनियमयोः शिवयोः शरीरयोगं कथयति । वाचा—पादरेखया विषमपदया...पदव्या शरीरयोगः कथ्यते ॥४०॥

उत्फुल्लेति । वात्याभिः वातसमूहैः "वातादिभ्यो यत्" इति यत्प्रत्ययः । असुखात् दृश्यमानात् उत्फुल्लस्थलनलिनीवनात् जलपतितस्य परागस्य उत्थानासम्भवात् स्थलग्रहणम् । उत्फुल्लसंफुल्लयोरुपसंख्यानात् निष्ठालत्वम् । उद्भूतः उत्थापितः वियति समन्तात् विवर्त्तितः परिमण्डलितः । अन्तराले तु दण्डायमान एवेति भावः । सरसिजसम्भवः पद्मोद्भवः परागः । रूढ्यभिप्रायेण अत्र सरसिजशब्दप्रयोगः द्रष्टव्यः । कनकमयातपत्रलक्ष्मीम् आधत्ते अनुकरोति । अत्र परागस्य आतपत्रलक्ष्मीसम्बन्धासम्भवात् तत्सदृशीं लक्ष्मीं इति प्रतिबिम्बेन आक्षेपात् असम्भविधर्म्मसम्बन्धा इयं निदर्शना । तदुक्तम्—"असम्भवद्धर्मयोगादुपमानोपमेययोः प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना ॥" इति ॥ ३९ ॥

इहेति । इह अद्रौ उषसि प्रभाते सुरापगायां लक्षणया तत्कच्छे सयावका सालक्तका सव्यपादस्य रेखा वामचरणमुद्रा यस्यां सा । "यावोऽलक्तो द्रुमामयः" इत्यमरः । तथा विषमाणि महदल्पानि पदानि यस्यां सा विवर्त्तनेषु प्रदक्षिणक्रियासु पदवी शिवयोः प्रदक्षिणपद्धतिरित्यर्थः । सनियमयोः सन्ध्यायां प्रणमतोरित्यर्थः । शिवा च शिवश्च तयोः शिवयोः उमाशङ्करयोः । "पुमान् स्त्रिया" इति एकशेषः । शरीरयोगम् अर्द्धाङ्गसङ्घटनारूपं कथयति । सनियमयोः इति नियमविषये अपि विरहासहौ इह विहरतः शिवौ इति भावः । अत्र पदवीविशेषणपदार्थयोः कथनं प्रति हेतुत्वात् काव्यलिङ्गम् अलङ्कारः ॥ ४० ॥

৩৯। এই উৎফুল্ল স্থলপদ্মবন হইতে পদ্মপরাগ বায়ুবশে উত্থিত ও আকাশের চারিদিকে পরিমণ্ডলিত হইয়া কনকময় আতপত্রের শোভা সম্পাদন করিতেছে।

৪০। এই পর্ব্বতে প্রভাতে সুরনদীর কচ্ছদেশে নিয়মনিষ্ঠ শিব-শিবার অলক্তাক্ত বামপদশালী সম-বিষম প্রদক্ষিণপদ্ধতি তাঁহাদের অর্দ্ধাঙ্গসংঘটনরূপ শরীরসংযোগ প্রকাশ করিতেছে।

सम्मूर्च्छितां रजतभित्तिमयूखजालै-
रालोलपादपलतान्तरनिर्गतानाम्।
घर्मद्युतेरिह मुहुः पटलानि धाम्ना-
मादर्शमण्डलनिभानि समुल्लसन्ति ॥ ४१ ॥
शुक्लैर्मयूखनिचयैः परिवीतमूर्त्ति-
र्वप्राभिघातपरिमण्डलितोरुदेहः।
शृङ्गाग्यमुष्य भजते गणभर्त्तुरुच्चा
कुर्वन् बधूजनमनःसु शशाङ्कशङ्काम् ॥ ४२ ॥

अन्वयः। इह रजतभित्तिमयूखजालैः सम्मूर्च्छिताम् आलोलपादपलतान्तरनिर्गतानां घर्मद्युतेः धाम्नाम् आदर्शमण्डलनिभानि पटलानि समुल्लसन्ति। वाच्य—धाम्नाम् आदर्शमण्डलनिभैः पटलैः समुल्लस्यते ॥ ४१ ॥

अन्वयः। शुक्लैः मयूखनिचयैः परिवीतमूर्त्तिः वप्राभिघातपरिमण्डलितोरुदेहः गणभर्त्तुः उच्चा बधूजनमनःसु शशाङ्कशङ्कां कुर्वन् असुष्य शृङ्गाणि भजते। वाच्य—परिवीतमूर्त्तिना... उरुदेहेन उच्चता शशाङ्कशङ्कां कुर्वता शृङ्गाणि भज्यन्ते ॥ ४२ ॥

सम्मूर्च्छितामिति। इह अद्रौ रजतभित्तिमयूखजालैः सम्मूर्च्छितां बहुलीभवताम् आलोलानां पादपलतानां तरुशाखानाम् अन्तरेषु रन्ध्रेषु निर्गतानां प्रसृतानां घर्मद्युतेः उष्णांशोः धाम्नां तेजसाम् आदर्शमण्डलनिभानि दर्पणबिम्बसदृशानि इति उपमालङ्कारः। पटलानि मण्डलानि मुहुः वारं वारं समुल्लसन्ति पुनः पुनः स्फुरन्ति न तु सातत्येन लतानाम् आलोलत्वाभावात्। तच्च नान्यत्र मृत्पाषाणादिप्रायाणां सम्भवति इति भावः ॥ ४१ ॥

शुक्लैरिति। शुक्लैः मयूखनिचयैः शुभ्रकिरणसमूहैः परिवीतमूर्त्तिः व्याप्तदेहः। वप्राभिघातेन वप्रक्रीड़या परिमण्डलितः वर्त्तुलीकृतः उरुदेहः बृहच्छरीरं यस्य तथोक्तः गणभर्त्तुः प्रमथनाथस्य उच्चा वृषभः। "उक्षानड्वान्बलीवर्दः ऋषभो वृषभो वृषः" इत्यमरः। बधूजनमनःसु शशाङ्कशङ्कां चन्द्रभ्रान्तिं कुर्वन् तेषां मौग्ध्यादिति भावः। असुष्य अद्रेः शृङ्गाणि भजते सेवते। अत्र शृङ्गाग्यशब्दस्य सन्देहार्थत्वे सन्देहालङ्कारः। भ्रान्तिपरत्वे भ्रान्तिमदलङ्कारः। यथा इच्छसि तथा अस्तु। स च उच्चविशेषणोत्थेन काव्यलिङ्गेन अङ्गाङ्गिभावेन सङ्कीर्यते ॥४२

४१। এ পর্ব্বতে সূর্য্যের দর্পণবিম্বপ্রতিম তেজোরাশি রজতভিত্তির ময়ূখমালায় বহুলীকৃত, তথা চঞ্চল পাদপলতার রন্ধ্রপথে নির্গত হইয়া বারংবার সমুল্লসিত হইতেছে।

সম্প্রতি লব্ধজন্ম শনকৈঃ কথমপি লঘুনি
ক্ষৌণপয়স্যুপেযুষি ভিদাং জলধরপটলে।
খণ্ডিতবিগ্রহং বলভিদো ধনুরিহ বিবিধাঃ
পূরয়িতুং ভবন্তি বিভবঃ শিখরমণিরুচঃ ॥৪৩॥
স্নপিতনবলতাতরুপ্রবালৈ-
রমৃতলবস্যুতিশালিভির্ম্ময়ূখৈঃ।
সততমসিতযামিনীষু শম্ভো-
রমলয়তীহ বনান্তমিন্দুলেখা ॥ ৪৪ ॥

অন্বয়ঃ। ইহ বিবিধাঃ শিখরমণিরুচঃ সম্প্রতি লঘুনি ক্ষৌণপয়সি ভিদাম্ উপেযুষি জলধরপটলে কথমপি শনকৈঃ লব্ধজন্ম খণ্ডিতবিগ্রহং বলভিদো ধনুঃ পূরয়িতুং বিভবঃ ভবন্তি। বাচ্য—বিবিধাভিঃ শিখরমণিরুগ্ভিঃ বিভুভিঃ ভূয়তে ॥ ৪৩ ॥

অন্বয়ঃ। ইহ শম্ভোঃ ইন্দুলেখা স্নপিত নবলতাতরুপ্রবালৈঃ অমৃতলবস্যুতিশালিভিঃ ময়ূখৈঃ সততম্ অসিতযামিনীষু অপি বনান্তম্ অমলয়তি। বাচ্য— ইন্দুলেখয়া বনান্তম্ অমল্যতে ॥৪৪॥

সম্প্রতীতি। ইহ অদ্রৌ বিবিধাঃ নানাবর্ণাঃ শিখরমণিরুচঃ সম্প্রতি গ্রহি ইত্যর্থঃ। লঘুনি অগুরুণি কুতঃ ক্ষৌণপয়সি অতএব ভিদাং ভেদম্। "ষিদ্ভিদাদিভ্যোঽঙ্" ইতি অঙ্প্রত্যয়ঃ। উপেযুষি গতে জলধরপটলে মেঘমণ্ডলে কথম্ অপি শনকৈঃ লব্ধজন্ম উত্পন্নম্ ইত্যর্থঃ। অতএব খণ্ডিতবিগ্রহং ছিন্নস্বরূপং বলভিদঃ ইন্দ্রস্য ধনুঃ পূরয়িতুং বিভবঃ সমর্থাঃ ভবন্তি। অত্র ইন্দ্রধনুষঃ মণিরুচীনাম্ অসম্বন্ধে সম্বন্ধকথনাত্ অতিশয়োক্তিঃ অলঙ্কারঃ। বংশপত্রপতিতং বৃত্তম্। "দ্বিঙ্মুনিবংশপত্রপতিতং ভরনভনলগৈঃ" ইতি লক্ষণাত্ ॥ ৪৩ ॥

স্নপিতেতি। ইহ অদ্রৌ শম্ভোঃ ইন্দুলেখা স্নপিতানি নবানি লতানাং তরুণাং চ প্রবালানি যৈঃ তৈঃ। অমৃতলবস্যুত্বা অমৃতবিন্দুনিঃস্যন্দেন গ্রালন্তে যে তৈঃ ময়ূখৈঃ সততং সর্ব্বকালম্ অসিতযামিনীষু কৃষ্ণপক্ষ-

৪২। প্রমথনাথের বৃষভের দেহ শুভ্র কিরণপুঞ্জে পরিব্যাপ্ত ; উহার বৃহৎ বপু বপ্রাভিঘাতে বর্ত্তুলীকৃত ; ঐ বৃষভ বধূজনের মনে শশাঙ্কশঙ্কা উৎপাদন করিয়া ঐ গিরির শৃঙ্গ হইতে শৃঙ্গান্তরে বিচরণ করিতেছে।

৪৩। বর্ত্তমান শরৎকালে ক্ষীণজল হইয়া ছোট ছোট মেঘগুলি ভিন্ন ভিন্ন হইয়া যাইতেছে ; উহাতে ইন্দ্রধনু অস্পষ্টভাবে কথঞ্চিৎ উৎপন্ন ও খণ্ডিত হইতেছে, (পরন্তু) এই পর্ব্বতস্থিত নানাবর্ণ শিখরমণিপ্রভা ঐ ধনুর আকৃতিপূরণে সমর্থ হইতেছে।

क्षिपति योऽनुवनं वितनां बृहद्-
बृहतिकामिव रौचनिकीं रुचम्।
अयमनेकहिरण्मयकन्दर-
स्तव पितुर्दयितो जगतीधरः॥ ४५॥
सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तड़ित्विलसितानि विड़म्बयन्ति॥ ४६॥

अन्वयः। यः अनुवनं वितनां रौचनिकीं रुचं बृहद्बृहतिकाम् इव क्षिपति, अनेकहिरण्मय-कन्दरः अयं तव पितुः दयितः जगतीधरः। वाच्या—येन वितता रौचनिकी रुक् बृहद्बृहतिकेव क्षिप्यते, अनेकहिरण्मयकन्दरेण अनेन दयितेन जगतीधरेण (भूयते)॥ ४५॥

अन्वयः। अमुत्र अनिले जवात् लतानां सक्तिम् अपनयति (सति) सहसा वैरोचनैः मयूखैः द्विगुणिताः हिरण्मयीनां रोधोभुवां भासः मुहुः तड़ित्विलसितानि विड़म्बयन्ति। वाच्या—द्विगुणिताभिः भाभिः तड़ित्विलसितानि विड़म्ब्यन्ते॥ ४६॥

रात्रिषु अपि वनान्तम् अमलयति धवलयति। अन्यत्र न एतदस्ति इति व्यतिरेकः व्यज्यते॥ ४४॥

क्षिपतीति। अथ यः अद्रिः अनुवनं वितनां रौचनिकीं रुचं सौवर्णीम् कान्तिमित्यर्थः। रोचनया रक्तां रौचनिकोम्। "लाक्षारोचनग्रकलकर्दमाद्रुक्" इति ठक्। ठिड्ढाणञ्" इत्यादिना ङीप्। उत्प्रेक्षते। बृहद्बृहतिकां महोत्तरासङ्गम् इव। "द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा" इत्यमरः। क्षिपति प्रसारयति। अनेकाः हिरण्मय्यः कन्दरा यस्य सः। हिरण्मयशब्दः "दाण्डिनायन" इत्यादिना निपातनात् साधुः। अयं पुरोवर्त्ती गिरिः इत्यर्थः। तव पितुः इन्द्रस्य दयितः प्रियः जगत्याः धरः जगतीधरः। यस्ते गन्तव्य इन्द्रकीलाख्य इत्यर्थः॥ ४५॥

सक्तिमिति। अमुत्र अमुष्मिन् अद्रौ अनिले जवात् झटिति लतानां

৪৪। এ পর্ব্বতে শম্ভুর শিরঃস্থিত চন্দ্রলেখা-মযূখমালায় সতত কৃষ্ণপক্ষীয় রাত্রিকালেও বনান্তভূমি ধবলিত করিতেছে; ঐ মযূখমালায় তরুণতারাজির নব প্রবাল সকল ধৌত হইতেছে, আর বিন্দু বিন্দু অমৃত ক্ষরণ করিয়া শোভা পাইতেছে।

৪৫। যে পর্ব্বত প্রতিবনে বৃহৎ উত্তরীয় বস্ত্রের ন্যায় সুবর্ণকান্তি ছড়াইয়া দিতেছে, বহু হিরণ্ময়কন্দরশালী—তোমার পিতার প্রিয় সেই ঐ পর্ব্বত অবস্থিত।

कषणकम्पनिरस्तमहाहिभिः
क्षणविमत्तमतङ्गजवर्जितैः ।
इह मदस्रपितैरनुमीयते
सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥
जलदजालघनैरसिताश्मनाम्
उपहृतप्रचयेह मरीचिभिः ।
भवति दीप्तिरदीपितकन्दरा
तिमिरसंबलितेव विवस्वतः ॥ ৩৮ ॥

অন্বয়ঃ । ইহ কষণকম্পনিরস্তমহাহিভিঃ ক্ষণবিমত্তমতঙ্গজবর্জিতৈঃ মদস্রপিতৈঃ হরিচন্দনৈঃ সুরগজস্য গতম্ অনুমীয়তে ॥ বাচ্য—গতম্ অনুমান্তি (পর্বতচারিণো জনাঃ) ॥ ৪৭

অন্বয়ঃ । ইহ জলদজালঘনৈঃ অসিতাশ্মনাং মরীচিভিঃ উপহৃতপ্রচয়া (অতঃ) অদীপিতকন্দরা বিবস্বতঃ দীপ্তিঃ তিমিরৈঃ সম্বলিতা ইব ভবতি ॥ বাচ্য—উপহৃতপ্রচয়য়া অদীপিতকন্দরয়া দীপ্ত্যা সংবলিতয়েব ভূয়তে ॥ ৪৮ ॥

सक्तिम् अन्योऽन्यसङ्गम् अपनयति सति सहसा हठात् वैरोचनेः सावित्रैः मयूखैः द्विगुणिताः द्विराहृत्ताः कृता इति द्विगुणिताः । "गुणस्त्वावृत्तिशब्दादिष्विन्द्रियामुख्यतन्तुषु" इति वैजयन्ती । हिरण्मयीनां हिरण्यविकाराणाम् । "दाण्डिनायन" इत्यादिना निपातनात् साधुः । रोधोभुवां भासः मुहुः तड़िद्विलसितानि विड़म्बयन्ति अनुकुर्वन्ति इत्यर्थः । उपमालङ्कारः ॥ ४६ ॥

कषणेति । इह अद्रौ कषणेन कण्डूयनेन यः कम्पः तेन निरस्ताः महाहयः महासर्पाः यैभ्यः तैः । क्षणं विमत्तमतङ्गजवर्जितैः मत्तमतङ्गजरहितैः, कुतः मदस्रपितैः ऐरावतमदसिक्तैः इत्यर्थः । "मितां ह्रस्वः" इति ह्रस्वः । हरिचन्दनैः चन्दनद्रुमैः सुरगजस्य ऐरावतस्य गतं प्राप्तिः अनुमीयते । हरिचन्दनविशेषणैः काव्यलिङ्गम् उन्नेयम् ॥ ४७ ॥

৪৬। এ পর্ব্বতে বেগে বায়ু বহিয়া লতাজালের পরস্পর সঙ্গ ঘুচাইয়া দিতেছে ; সুতরাং হিরণ্ময়ী তটভূমির দীপ্তিচ্ছটা হঠাৎ রবিকরযোগে দ্বিগুণিত হইয়া বিদ্যুদ্বিলসিতের অনুকরণ করিতেছে ।

৪৭। এ পর্ব্বতে যে সকল হরিচন্দন আছে, গজগণ্ডকণ্ডূয়নকল্পনে মহাসর্প সকল তাহা হইতে চলিয়া গিয়াছে ; ঐরাবতের মদজলে সিক্ত ঐ সকল চন্দনতরুতলে মত্তমাতঙ্গগণ এক্ষণ আর উপস্থিত নাই ; সুতরাং ঐ সকল চন্দনতরু দ্বারা এখানে ঐরাবতের আগমন অনুমিত হইতেছে ।

भव्यो भवन्नपि मुनेरिह शासनेन
क्षात्रे स्थितः पथि तपस्य हतप्रमादः।
प्रायेण सत्यपि हितार्थकरे विधौ हि
श्रेयांसि लब्धुमसुखानि विनाऽन्तरायैः ॥४९॥
मा भूवन्नपथहृत[हरा]स्त्वेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसक्तिम्।

अन्वयः। इह भव्यो भवन् अपि मुनेः शासनेन क्षात्रे पथि स्थितः हतप्रमादः (सन्) त्वं तपस्य, हि प्रायेण हितार्थकरे विधौ सत्यपि अन्तरायैः विना श्रेयांसि लब्धुम् असुखानि॥ वाच्य—भव्येन भवतापि पथि स्थितेन हतप्रमादेन सता त्वया तपस्यतां, श्रेयोभिः लब्धुम् असुखं भूयते॥ ४९॥

जलदेति। इह अस्मिन् अद्रौ जलदजालघनैः मेघवृन्दसान्द्रैः असिताश्मनाम् इन्द्रनीलानां मरीचिभिः दीधितिभिः। "भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्" इत्यमरः। उपहतप्रचया विघट्टितसङ्घाता अतएव अदीपितकन्दरा अप्रकाशितगह्वरा विवस्वतः दीप्तिः तिमिरैः संवलिता संहता व्यामिश्रिता इव भवति इति उत्प्रेक्षा॥ ४८॥

भव्य इति। इह अद्रौ भव्यः शान्तः भवन् अपि मुनेः व्यासस्य शासनेन इन्द्राराधनरूपेण क्षात्रे पथि क्षत्रियमार्गे स्थितः गृहीतशस्त्र एव इत्यर्थः। हतप्रमादः अप्रमत्तः सन् तपस्य तपश्चर्यां कुरु। तपस्य इति "कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः" इति क्यङ्। तदन्तादाधातो-र्लोट्। न च सर्वभूतहितकारिणः मे प्रमादः किं करिष्यतीति विस्र-सितव्यम् इति अर्थान्तरन्यासेन आह—प्रायेणेति। हि यस्मात् बाहुल्येन। "प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः" इति हेमचन्द्रः। हितम् अ॰ करोतीति तस्मिन् हितार्थकरे विधौ व्यापारे सति अन्तरायैः विघ्नैः विना श्रेयांसि लब्धुम् असुखानि अशक्यानि इत्यर्थः। अतएव "शकिधृष" इत्यादिना समानकर्तृकेषु तुमुन्। अकारणवैरिणः सर्वत्र सर्व्वस्यापि सन्ति इति भावः॥ ४९॥

४८। এ পর্ব্বতে ইন্দ্রনীলমণিসমূহের মেঘসান্দ্র মরীচিনিচয়ে দিবাকরের কিরণনিকর উপহত হওয়ায় গিরিগহ্বর আলোকিত হইতেছে না; ঐ দিবাকরের আলোক যেন তিমিররাশিতে মিশ্রিত হইয়াই বিরাজ করিতেছে।

৪৯। তুমি শান্তপ্রকৃতি হইলেও ব্যাসমুনির আদেশে ক্ষত্রোচিত পথে অর্থাৎ শস্ত্রপাণি হইয়া অপ্রমত্তভাবে তপস্যা কর। বস্তুতঃ হিতার্থকর ব্যাপার হইলেও বিনা বিঘ্নে মঙ্গললাভ করা যায় না। ভাবার্থ এই যে, সর্ব্বত্রই সকলের অহেতুক শত্রু বিদ্যমান, অতএব সাবধানে তপস্যা কর্ত্তব্য।

रचन्तस्तपसि बलञ्च लोकपालाः
कल्याणीमधिकफलां क्रियां क्रियासुः ॥५०॥
इत्युक्त्वा सपदि हितं प्रियं प्रियार्हं
धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
संधत्ते भृशमरतिं हि सद्वियोगः ॥५१॥

अन्वयः । तव इन्द्रियाश्वाः ते अपथहृतः [अपथहराः] मा भूवन् सन्तापे सति शिवः शिवां प्रसक्तिं दिशतु । लोकपालाः तपसि बलं रचन्तः कल्याणीं क्रियाम् अधिकफलां क्रियासुः ॥ वाच्य—इन्द्रियाश्वैः अपथहृद्भिः [अपथहरैः] मा भावि, शिवेन शिवा प्रसक्तिः दिश्यताम् । लोकपालैः बलं रचद्भिः कल्याणी क्रिया अधिकफला क्रुष्टा ॥ ५० ॥

अन्वयः । प्रियार्हं राजराजभृत्ये इति हितं प्रियम् उक्त्वा सपदि स्वं धाम गतवति (सति) पृथासुतः सोत्कण्ठं किम् अपि प्रदध्यौ । हि सद्वियोगः भृशम् अरतिं संधत्ते ॥ वाच्य—पृथासुतेन किमपि प्रदध्ये, सद्वियोगेन अरतिः संधीयते ॥ ५१ ॥

मा भूवन्निति । तव इन्द्रियाणि एव अश्वाः; ते अपथेन हरन्ति इति अपथहृतो [अपथहराः] मा भूवन् त्वाम् अपथं मा नैषुः इत्यर्थः । [अपपूर्वकहृञः कर्त्तरि क्विप् अच् वा पाठभेदात्] । "माङि लुङ्" इति आशीरर्थे लुङ् । सन्तापे तपःक्लेशे सति शिवः शिवां साधीयसीं प्रसक्तिं प्रवृत्तिम् उत्साहं दिशतु । किञ्चेति चार्थः । लोकपालाः इन्द्रादयः तपसि विषये बलं शक्तिं रचन्तः वर्द्धयन्तः सन्तः कल्याणीं क्रियाम् अनुष्ठानम् अधिकफलां साध्वीं क्रियासुः कुर्वन्तु । करोतेः आशिषि लोट् ॥ ५० ॥

इतीति । प्रियार्हं राजराजभृत्ये इति पूर्वोक्तम् । हितं प्रियं वचनम् इति शेषः । उक्त्वा सपदि स्वं स्वकीयं धाम स्थानं गतवति सति, पृथासुतः अर्जुनः सोत्कण्ठं सौत्सुक्यं किम् अपि प्रदध्यौ चिन्तयामास । तथाहि—सद्वियोगः सुजनवियोगः भृशम् अरतिं व्यथां संधत्ते करोति इत्यर्थः । अर्थान्तरन्यासः ॥ ५१ ॥

५०। তোমার ইন্দ্রিয়রূপ অশ্বগণ যেন অপথে পদার্পণ করে না; ক্লেশ উপস্থিত হইলে শিব তোমায় প্রবল উৎসাহ প্রদান করুন। লোকপালগণ তোমার তপঃশক্তি বর্দ্ধিত করিয়া কল্যাণময়ী ক্রিয়াকে অধিকফলদাত্রী করুন।

৫১। প্রেমাস্পদ কুবেরানুচর এইরূপ হিত এবং প্রিয়বাক্য বলিয়া স্বস্থানে প্রস্থান করিলে, পৃথানন্দন অর্জ্জুন উৎকণ্ঠা সহকারে কি যেন চিন্তা করিতে লাগিলেন। বস্তুতঃ সুজনবিয়োগ একান্তই দুঃখোৎপাদন করিয়া থাকে।

তমনতিশয়নীয়ং সর্বতঃ সারযোগা-
দবিরহিতমনেকেনাঙ্গভাজা ফলেন।
অকৃশমকৃশলক্ষ্মীশ্চেতসাশংসিতং সঃ
স্বমিব পুরুষকারং শৈলমভ্যাসসাদ ॥৫২॥
ইতি ভারবিকৃতৌ মহাকাব্যে হিমবদ্বর্ণনং নাম
পঞ্চমঃ সর্গঃ ॥ ৫ ॥

অন্বয়ঃ। অকৃশলক্ষ্মীঃ সঃ অর্জুনঃ সর্বতঃ সারযোগাৎ অনতিশয়নীয়ম্ অনেকেন অঙ্গভাজা ফলেন অবিরহিতম্ অকৃশং চেতসা আশংসিতং শৈলং স্বং পুরুষকারমিব অভ্যাসসাদ ॥ বাচ্য—অকৃশলক্ষ্মা তেন অর্জুনেন অনতিশয়নীয়ঃ অবিরহিতঃ অকৃশঃ আশংসিতঃ শৈলঃ স্বঃ পুরুষকার ইব অভ্যাসীদে ॥ ৫২ ॥

তমিতি। অকৃশাঃ পূর্ণাঃ লক্ষ্মাঃ শোভাঃ যস্য সঃ অকৃশলক্ষ্মীঃ ইতি বহুব্রীহিঃ। এবঞ্চ "উরঃপ্রভৃতিভ্যশ্চ" ইতি কপ্‌প্রত্যয়ানবকাশঃ তত্র লক্ষ্মীশব্দস্য একবচনান্তপাঠাৎ। নাপি "নদ্যৃতশ্চ" ইত্যস্য অবকাশঃ উরঃপ্রভৃতিপাঠসামর্থ্যাদেব। শৈষিকস্তু বৈভাষিক ইতি অবিরোধঃ। সঃ অর্জুনঃ সর্বতঃ সর্বত্র সারযোগাৎ উৎকৃষ্টবলপ্রযোগাৎ। "সারো বলে স্থিরাংশে চ ন্যায্যে ক্লীবে বরে ত্রিষু" ইতি উভয়ত্রাপি অমরঃ। অনতিশয়নীয়ম্ অনতিক্রমণীয়ম্ অনেকেন বহুনা অঙ্গভাজা সমীপং গতেন শীঘ্রভাবিনা ইতি যাবৎ। ফলেন কার্য্যসিদ্ধ্যা অবিরহিতম্ অশূন্যং কার্য্যসিদ্ধেরবশ্যং সাধকম্ ইত্যর্থঃ। অকৃশম্ অতনুং চেতসা আশংসিতং প্রাপ্তুম্ ইষ্টং শৈলম্ ইন্দ্রকীলং স্বম্ আত্মীয়ং পুরুষস্য কারঃ কর্ম তং পুরুষকারম্ উক্তবিশেষণবিশিষ্টং পৌরুষম্ ইব অভ্যাসসাদ অধিষ্ঠিতবান্। মালিনীবৃত্তম্ ॥ ৫২ ॥

ইতি শ্রীমদ্ভামহোপাধ্যায়কোলাচলমল্লিনাথসূরিবিরচিতায়াং
কিরাতার্জুনীয়ব্যাখ্যায়াং ঘণ্টাপথসমাখ্যায়াং
পঞ্চমঃ সর্গঃ ॥ ৫ ॥

৫২। পূর্ণশোভাসম্পন্ন সেই অর্জ্জুন স্বীয় সুস্পষ্ট পুরুষকারবৎ বিপুল ইন্দ্রনীল পর্ব্বতে অধিষ্ঠান করিলেন। ঐ পর্ব্বত সর্ব্বথা বলপ্রয়োগ করিলেও অনতিক্রমণীয়; অচিরভাবী বহু ফলে উহা পরিপূর্ণ, অর্জ্জুন উহাকে পাইবার জন্য বহুদিন হইতে মনে মনে আকাঙ্ক্ষা করিতেছিলেন।

षष्ठः सर्गः ।

रुचिराकृतिः कनकसानुमथो
परमः पुमानिव पतिं पतताम् ।
धृतसत्पथस्त्रिपथगामभितः
स तमारुरोह पुरुहूतसुतः ॥ १ ॥
तमनिन्द्यबन्दिन इवेन्द्रसुतं
विहितालिनिक्कणजयध्वनयः ।
पवनेरिताकुलविजिह्मशिखा
जगतीरुहोऽवचकरुः कुसुमैः ॥ २ ॥

रुचिराकृतिरिति । अथो आसादनानन्तरं रुचिराकृतिः सौम्यविग्रहः । धृतसत्पथः अवलम्बितसन्मार्गः आकारानुरूपगुणवान् इत्यर्थः । "यत्राकृतिस्तत्र गुणा वसन्ति" इति सामुद्रिकाः, उपमाने अपि समानम् एतत् । सः पुरुहूतसुतः अर्जुनः, कनकस्य विकाराः सानवो यस्य तं कनकसानुम् । गरुड़सावर्ण्यार्थं विशेषणम् एतत् । "समुदाये विकारषष्ठ्यश्च" इति बहुव्रीहिः उत्तरपदलोपश्च । तम् इन्द्रकीलं परमः पुमान् विष्णुः पततां पक्षिणां पतिं गरुड़म् इव । त्रिभिः पथिभिः गच्छतीति त्रिपथगा भागीरथी । "अन्येष्वपि दृश्यते" इति डप्रत्ययः, उपपदसमासः उत्तरपदसमासश्च । ताम् अभितः अभिमुखम् आरुरोह । "समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः" इत्यमरः । प्रमिताक्षरावृत्तम् । "प्रमिताक्षरा सजससैरुदिता" इति लक्षणात् ॥ १ ॥

अथ अस्य काव्यसिद्धिनिमित्तानि सूचयन् मार्गं वर्णयति—तमिति । विहिताः अलिनिक्कणाः जयध्वनयः इव यैः ते तथोक्ताः । पवनेरिताः पवनेन वायुना नुन्नाः अतएव आकुलाः लोलाः विजिह्माः वक्राश्च शिखाः अग्राणि येषां ते तथोक्ताः । "शिखा ज्वाला केकिमौल्योः शिखाग्राखाग्रमौलिषु" इति वैजयन्तो । जगतीरुहः भूरुहः । क्विप् । अनिन्द्याः अनवद्याः ये बन्दिनः स्तुतिपाठकाः ते इव तम् इन्द्रसुतम् अर्जुनं कुसुमैः अवचकरुः अभिववृषुः इत्यर्थः । "ऋच्छत्यताम्" इति गुणः । अत्र किरतेर्ह्यर्थत्वात् कुसु-

अवधूतपङ्कजपरागकणा-
स्तनुजाङ्गवोसलिलवीचिभिदः।
परिरेभिरेऽभिमुखमेत्य सुखाः
सुहृदः सखायमिव तं मरुतः॥ ३॥
उदितोपलस्खलनसंवलिताः
स्फुटहंससारसविरावयुजः।
मुदमस्य माङ्गलिकतूर्य्यकृतां
ध्वनयः प्रतेनुरनुवप्रमपाम्॥ ४॥
अवरुग्णतुङ्गसुरदारुतरौ
निचये पुरः सुरसरित्पयसाम्।

मानां करणत्वं विक्षेपार्थत्वे तु कर्मत्वमेव। यथा "कटाक्षान् वामा किरति" इति। दृश्यते च धातूनामर्थभेदात् कारकव्यत्ययः, यथा सिञ्चतेः चरणार्द्रीकरणयोः अर्थयोः द्रवद्रव्यस्य कर्म्मत्वकरणत्वे। यथा—"मेघोऽमृतं सिञ्चति गौः पयश्च।" "सिञ्चतीवामृतैर्वपुः" इति। अत्र वाक्ये समासगतयोरुपमयोः साध्यसाधनभावात् अङ्गाङ्गिभावेन सङ्करः॥ २॥

अवधूतेति। अवधूताः प्रसारिताः पङ्कजपरागकणाः यैः ते तथोक्ताः इति सौरभ्योक्तिः। तनूः जाङ्ग्याः सलिलवीचीः भिन्दन्ति इति तथोक्ताः इति शैत्योक्तिः। सुखयन्ति इति सुखाः 'पचाद्यच्' सुखस्पर्शाः इति मान्द्योक्तिः। मरुतः वाताः तम् अर्जुनं सुहृदः सखायम् इव अभिमुखम् एत्य आगत्य परिरेभिरे आलिङ्गितवन्तः॥ ३॥

उदितेति। उदितोपलेषु उन्नतपाषाणेषु स्खलनेन प्रतिघातेन संवलिताः चूर्णिताः अतः तूर्य्यघोष इव घुमघुमायमाना इत्यर्थः। स्फुटैः हंसानां सारसानां च विरावैः युज्यन्ते इति तथोक्ताः। क्विप्। अनुवप्रम् अपाम् अन्तः पतन्तीनाम् इति शेषः। ध्वनयः अस्य अर्जुनस्य मङ्गलं प्रयोजनम् एषां ते माङ्गलिकाः "प्रयोजनम्" इति ठञ्। तैः तूर्य्यैः कृतां मुदं हर्षं प्रतेनुः। अत्र अन्यस्य अन्यकार्य्यकरणासम्भवात् तूर्य्यकृतमुत्सृष्टार्थां मुदम् इति प्रतिबिम्बेन आक्षेपात् निदर्शनालङ्कारः॥ ४॥

स ददर्श वेतसवनाचरितां
प्रणतिं बलीयसि समृद्धिकरीम् ॥ ५ ॥
प्रबभूव नालमवलोकयितुं
परितः सरोजरजसाऽरुणितम्।
सरिदुत्तरीयमिव संहतिमत्
स तरङ्गरङ्गि कलहंसकुलम् ॥ ६ ॥
दधति क्षतौः परिणतद्विरदे
मुदितालियोषिति मदस्रुतिभिः।
अधिकां स रोधसि बबन्ध धृतिं
महते रुजन्नपि गुणाय महान् ॥ ७ ॥

अवरुग्णेति। सः अर्जुनः पुरः अग्रे अवरुग्णतुङ्गसुरदारुतरौ भग्नोन्नतदेवदारुद्रुमे बलीयसि बलवत्तरे। मत्वन्तात् ईयसुनि "विन्मतोर्लुक्" इति मतुपो लुक्। सुरसरित्पयसां निचये पूरे विषये वेतसवनेन वाणीरवनेन आचरिताम्। "अथ वेतसे रथाभ्रपुष्पविदुरशीतवानीरवञ्जुला" इत्यमरः। समृद्धिकरीं श्रेयस्करीं लोके यथा दृष्टाम् इत्यर्थः। प्रणतिं ददर्श। या सर्वलोकदृष्टान्तभूता इति भावः ॥ ५ ॥

प्रबभूवेति। सः अर्जुनः परितः सरोजरजसा कमलरेणुना अरुणितं पाटलितम्, उत्तरीयं च कुसुमादिना अरुणितं भवति। संहतिमत् नीरन्ध्रं तरङ्गरङ्गि वारितरङ्गशोभि सरिदुत्तरीयं स्तनांशुकम् इव स्थितं कलहंसकुलं कादम्बकुलम् अवलोकयितुम् अलम् अत्यर्थं न प्रबभूव न शशाक। तत्सौन्दर्य्याद्दिलत्वात् इति भावः ॥ ६ ॥

दधतीति। सः अर्जुनः क्षतानि दधति धारयति। कुतः? परिणताः तिर्य्यग्दन्तप्रहारिणः द्विरदाः यस्मिन् तस्मिन्। "तिर्य्यग्दन्तप्रहारस्तु गजः परिणतो मतः" इति हलायुधः। मदस्रुतिभिः मुदितालियोषिति रोधसि अधिकां धृतिं प्रीतिं बबन्ध निश्चलीकृतवान् इत्यर्थः। तथाहि—महान् जनः रुजन् पीड़यन् अपि महते गुणाय उत्कर्षाय भवति, महत्कृता पीड़ा अपि शुभावहा एव इत्यर्थः। तत् युक्तं गजरुग्णस्य अपि रोधसः प्रीतिकरत्वम् इति भावः ॥ ७ ॥

अनुहेमवप्रमरुणैः समतां
गतमूर्मिभिः सहचरं पृथुभिः ।
स रथाङ्गनामवनितां करुणै-
रनुबध्नतीमभिननन्द रुतैः ॥ ८ ॥
सितवाजिने निजगदू रुचय-
श्चलवीचिरागरचनापटवः ।
मणिजालमम्भसि निमग्नमपि
स्फुरितं मनोगतमिवाकृतयः ॥ ९ ॥
उपलाहतोद्ध्वततरङ्गधृतं
जविना विधूतविततं मरुता ।
स ददर्श केतकशिखाविशदं
सरितः प्रहासमिव फेनमपाम् ॥ १० ॥

अन्विति । सः अर्जुनः अनुहेमवप्रं कनकमानुसमीपे । समीपार्थे अव्ययीभावः । अरुणैः कनककान्त्युपरञ्जनादिति भावः । पृथुभिः ऊर्मिभिः समतां तुल्यरूपतां गतम् । सादृश्यात् दुर्विवेच्यम् इति भावः । सहभूतं सहचरं प्रियं, सहशब्दस्य पचाद्यजन्तेन चरशब्देन समासः । करुणैः दीनैः रुतैः कूजितैः अनुबध्नतीम् अन्विष्यन्तीं रथाङ्गनामवनितां चक्रवाकीम् अभिननन्द । प्रकृष्टप्रेमदर्शनात् कस्य न आनन्द इति भावः । अत्र तावत् ऊर्मीणां स्वधावल्यत्यागेन आरुण्यस्वीकारात् तद्गुणालङ्कारः । "तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाश्रयात् ।" इति लक्षणात् । तन्मूला च इयं चक्रवाक्याः स्वकान्ते तरङ्गभ्रान्तिरिति तद्गुणभ्रान्तिमतोरङ्गाङ्गिभावेन सङ्करः ॥ ८ ॥

सितवाजिन इति । चलवीचीनां रागः रञ्जनं वर्णान्तरापादनं तस्य रचना क्रिया तत्र पटवः समर्थाः रुचयः प्रभाः अम्भसि निमग्नम् अपि मणिजालं स्वाश्रयभूतम् इति भावः । मनोगतं स्फुरितं रोषादिविकारम् आकृतयो भ्रूभङ्गादिवाह्यविकारा इव सितवाजिने अर्जुनाय निजगदुः ज्ञापयामासुरित्यर्थः । आकृत्या हि मनोगतं विचक्षणा जानन्ति इति भावः ॥ ९ ॥

उपलेति । उपलैः आहताः अतएव उद्धताश्च ये तरङ्गाः तैः धतं

बहु बर्हिचन्द्रकमिभं विदधे
धृतिमस्य दानपयसां पटलम् ।
अवगाढ़मौच्चितुमिवेभपतिं
विकसद्विलोचनशतं सरितः ॥ ११ ॥
प्रतिबोधजृम्भणविभिन्नमुखौ
पुलिने सरोरुहदृशा ददृशे ।
पतदच्छमौक्तिकमणिप्रकरा
गलदश्रुबिन्दु रिव शुक्तिवधूः ॥ १२ ॥
शुचिरप्सु विद्रुमलताविटप-
स्तनुसान्द्रफेनलवसंवलितः ।
स्मरदायिनः स्मरयति स्म भृशं
दयिताधरस्य दशनांशुभृतः ॥ १३ ॥

निर्गमरोधात् इत्यर्थः । जविना वेगवता मरुता वातेन विधूतं वितत-च केतकस्य शिखाग्रं तद्वत् विशदम् अपां फेनं हिण्डोरम् । "हिण्डो-रोऽब्धिकफः फेन" इत्यमरः । सरितः प्रहासम् अट्टहासम् इव इति उत्प्रेक्षा । सः अर्जुनः ददर्श ॥ १० ॥

बर्हेति । बर्हिचन्द्रकनिभं मयूरमेचकसदृशम् । "सभौ चन्द्रक-मेचकौ" इत्यमरः । बहु अनेकधा दानपयसां पटलम् । जातावेकवचनम् । बहवः मदाम्बुबिन्दव इत्यर्थः । अवगाढ़म् अन्तःप्रविष्टम् । गाहेः कर्त्तरि क्तः । इभपतिम् ईचितुं विकसत् उन्मिषत् सरितः विलोचन-शतम् इव इति उत्प्रेक्षा । अस्य अर्जुनस्य धृतिं प्रीतिं विदधे चकार ॥११

प्रतिबोधेति । प्रतिबोधः स्फुटनं निद्रापगमश्च तत्र यत् जृम्भणम् उच्छ्वसता जृम्भा च तेन विभिन्नमुखौ विश्लिष्टाग्रौ,विवृतास्यौ च । अतएव पतन् प्रसरन् अच्छः मौक्तिकमणीनां प्रकरः स्तोमः यस्याः सा तथोक्ता अतएव गलदश्रुबिन्दुः इव स्थिता इति उत्प्रेक्षा । शुक्तिः वधूः इव शुक्ति-वधूः पुलिने शयनीये इव इति भावः । सरोरुहदृशा अर्जुनेन दृष्टे दृष्टा । अत्र प्रतिबोधादि(विशिष्ट)श्लिष्टपदोपात्तानां प्रकृतानां शुक्तिवध्वोश्च उपमारूपकयोः साधकबाधकाभावात् सन्देहसङ्करः । तत्रापेक्षा च अश्रुगलनोत्प्रेक्षा इति तयोः अङ्गाङ्गिभावः ॥ १२ ॥

उपलभ्य चञ्चलतरङ्गधृतं
मदगन्धमुत्थितवतां पयसः।
प्रतिदन्तिनामिव स सम्बुबुधे
करियादसामभिमुखान् करिणः॥ १४॥
स जगाम विस्मयमुदीच्य पुरः
सहसा समुत्पिपतिषोः फणिनः।
प्रहितं दिवि प्रजविभिः श्वसितैः
शरदभ्रबिभ्रममपां पटलम्॥ १५॥
स ततार सैकतवतीरमितः
शफरोपरिस्फुरितचारुदृशः।
ललिताः सखीरिव बृहज्जघनाः
सुरनिम्नगामुपयतीः सरितः॥ १६॥

शुचिरिति। अप्सु शुचिः स्वच्छः तनुना सान्द्रेण च फेनस्य लवेन शकलेन संवलितः सङ्गतः विद्रुमलतायाः विटपः पल्लवः। "विटपः पल्लवे पिञ्जे विस्तारे स्तम्बशाखयोः" इति विश्वः। स्मरदायिनः कामोद्दीपकस्य दशनांशुभृतः दन्तकान्तिकलितस्य दयिताधरस्य इत्यर्थः। "अधीगर्थ" इत्यादिना षष्ठी। भृशं स्मरयति स्म। "लट् स्मे" इति भूतार्थे लट्। "मितां ह्रस्वः" इति ह्रस्वः। स्मरणालङ्कारः॥ १३॥

उपलभेति। सः अर्जुनः चञ्चलतरङ्गैः धृतं तत्संक्रान्तम् इत्यर्थः। मदगन्धम् उपलभ्य आघ्राय पयसः उत्थितवतां रोषादिति शेषः। कर्यां-कराणां यादसाम्। शाकपार्थिवादिषु द्रष्टव्यः। प्रतिदन्तिनाम् इव अभि-मुखान् अभियातान् इत्यर्थः। करिणः गजान् सम्बुबुधे ददर्श इत्यर्थः॥ १४

स इति। सः अर्जुनः पुरः अग्रे सहसा समुत्पिपतिषोः समुत्पतितु-मिच्छोः। पतेः सन्नन्तात् उप्रत्ययः। "तनिपतिदरिद्रादिभ्यः सन् इड्वा वक्तव्यः" इति विकल्पात् इड़ागमः। फणिनः सर्पस्य प्रजविभिः अतिवेग-वद्भिः श्वसितैः फुल्कारैः दिवि आकाशे प्रहितं प्रेरितं शरदभ्रस्य विभ्रमः इव विभ्रमः सौन्दर्यं यस्य तत् शुभ्रम् अभ्रव्यापकं च इत्यर्थः। अपां पटलं पुरः उदीच्य विस्मयं जगाम। अत्र उपमानुप्राणिता स्वभावोक्ति-रलङ्कारः॥ १५॥

अधिरुह्य पुष्पभरनम्रशिखैः
परितः परिस्कृततलां तरुभिः ।
मनसः प्रसत्तिमिव मूर्धि गिरेः
शुचिमाससाद स वनान्तभुवम् ॥ १७ ॥
अनुसानु पुष्पितलतावितति-
र्फलितोरुभूरुहविविक्तवनः ।
धृतिमाततान तनयस्य हरे-
स्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥
प्रणिधाय तत्र विधिनाथ धियं
दधतः पुरातनमुनेर्मुनिताम् ।

स इति । सः अर्जुनः सैकतवतीः पुलिनवतीः अभितः शफरीणां प्रोष्ठीनां परिस्फुरितानि एव चारवः दृशः यासां ताः । सुरनिम्नगां गङ्गाम् उपयतीः भजन्तीः । इणः शतुः उगित्त्वात् ङीप् । अत एव बृहज्जघनाः ललिताः सखीः इव स्थिताः सरितस्तारं अतिचक्रमे ॥ १६ ॥

अधिरुहेति । सः अर्जुनः अधिरुह्य अर्थात् गिरिम् इति शेषः । पुष्पभरेण नम्रशिखैः नताग्रैः तरुभिः परितः परिस्कृततलां भूषित-स्वरूपाम् । "अधःस्वरूपयोरस्त्री तलम्" इत्यमरः । "संपर्युपेभ्यः करोतौ भूषणे इति सुडागमः । शुचिं शुद्धाम् अत एव मनसः प्रसत्तिम् इव मूर्त्त-मनःप्रसादम् इव स्थितां तद्धैतीं तद्भावोत्प्रेक्षा । गिरेः मूर्धि वनान्तभुवम् आससाद । अन्तशब्दः स्वरूपवचनः । "अन्तोऽधावसिते मृत्यौ स्वरूपे गिरयेऽन्तिके" इति वैजयन्ती ॥ १७ ॥

अनुसान्विति । अनुसानु प्रतिसानु । वीप्सार्थे अव्ययीभावः । पुष्पिताः सञ्जातपुष्पाः लताविततयः यस्मिन् सः फलिताः तरवो भूरुहाः येषु तानि विविक्तानि विजनानि पूतानि वा वनानि यस्मिन् सः तथोक्तः । "विविक्तौ पूतविजनौ" इत्यमरः । अचलः इन्द्रकीलः हरेस्तनयस्य अर्जुनस्य तपसे तपस्यर्थं अधिवस्तुम् अधिष्ठातुम् । तनिक्रियापेक्षया समानकर्तृकत्वात् तुमुन् । अचलां धृतिम् आततान । अत्र अचलविशेषणपदार्थस्य धृतिकरणहेतुत्वात् काव्यलिङ्गमलङ्कारः ॥ १८ ॥

श्रममादधावसुकरं न तपः
किमिवावसादकरमात्मवताम् ॥ १९ ॥
शमयन् धृतेन्द्रियशमैकसुखः
शुचिभिर्गुणैरघमयं स तमः ।
प्रतिवासरं सुकृतिभिर्ववृधे
विमलः कलाभिरिव शीतरुचिः ॥ २० ॥
अधरीचकार च विवेकगुणा-
दगुणेषु तस्य धियमस्तवतः ।
प्रतिघातिनीं विषयसङ्गरतिं
निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

प्रणिधायेति । अथ तत्र अद्रौ विधिना योगशास्त्रानुसारेण धियं चित्तवृत्तिं प्रणिधाय ध्येयविषये धियं नियम्य । "नेर्गद" इत्यादिना णत्वम् । सुनितां दधतः तपस्यतः इत्यर्थः । पुरातनमुनेः अर्जुनस्य इत्यर्थः । असुकरं दुष्करं तपः श्रमं खेदं न आदधौ न चकार । तथाहि— आत्मवतां मनस्विनाम् अवसादकरम् अशान्तिजनकं किम् इव । न किञ्चित् इत्यर्थः । इवशब्दो वाक्यालङ्कारे ॥ १८ ॥

शमयन्निति । धृतम् इन्द्रियशमः विषयव्यावृत्तिः एव एकं मुख्यं सुखम् आह्लादः येन सः तथोक्तः आत्मारामः इत्यर्थः । अन्यत्र धृतम् इन्द्रियाणां शमः सन्तापनिवर्त्तनम् एकम् अद्वितीयं सुखम् आह्लादश्च येन सः तथोक्तः । शुचिभिः निर्मलैः गुणैः मैत्र्यादिभिः, अन्यत्र कान्त्यादिभिः । अघमयं पापरूपं तमः अज्ञानम्, अन्यत्र अन्धकारं च शमयन् निवर्त्तयन् । विमलः अमलिनः पापरहितः शुभ्रः, अन्यत्र सः अर्जुनः प्रतिवासरं सुकृतिभिः सुकृतैः तपोभिः इत्यर्थः । स्त्रियां क्तिन् । कलाभिः शीतरुचिः चन्द्रः इव ववृधे ॥ २० ॥

अधरीचकारेति । किं च इति चार्थः । विवेकः तत्त्वावधारणं सः एव गुणः तस्मात् तेन हेतुना इत्यर्थः । "विभाषा गुणेऽस्त्रियाम्" इति पञ्चमी । अगुणेषु कामक्रोधादिदोषेषु विषये । तद्विरोधेन नञ्समासः । धियं चित्तवृत्तिम् अस्तवतः निवारितवतः तस्य अर्जुनस्य निरुपप्लवः

मनसा जपैः प्रणतिभिः प्रयतः
समुपेयिवानधिपतिं स दिवः ।
सहजेतरौ जयशमौ दधतो
बिभराम्बभूव युगपत् महसी ॥ २२ ॥
शिरसा हरिन्मणिनिभः स वहन्
कृतजन्मनोऽभिषवणेन जटाः ।
उपमां ययावरुणदीधितिभिः
परिमृष्टमूर्द्धनि तमालतरौ ॥ २३ ॥
धृतहेतिरप्यधृतजिह्ममति-
श्चरितैर्मुनीनधरयन् शुचिभिः ।
रजयाञ्चकार विरजाः स मृगान्
कमिवेशते रमयितुं न गुणाः ॥ २४ ॥

निर्बाधः शमसुखानुभवः शान्त्यानन्दानुभवः प्रतिघातिनीं सोपप्लवां विषयसङ्गरतिं शब्दादिरूपभोगरुचिम् अधरोचकार विषयनिष्पृहं चकार इत्यर्थः । उत्कृष्टसुखलाभस्य अप्रकृष्टवैराग्यहेतुत्वादिति भावः ॥ २१ ॥

मनसेति । प्रयतः अहिंसानिरतः मनसा ध्यानेन जपैः विशिष्टमन्त्राभ्यासैः प्रणतिभिः नमस्कारैः एवं मनोवाक्कायकर्मभिः दिवः अधिपतिम् इन्द्रं समुपेयिवान् उपसेदिवान् सः अर्जुनः सहजेतरौ नैसर्गिकागन्तुकौ जीयते अनेन इति जयः वीररसः । "एरच्" इति अच् । शम्यते अनेन इति शमः जयशमौ वीरशान्तिरसौ दधतो पुष्णतो तेजसो महसो युगपत् बिभराम्बभूव बभार । "भीक्ष्णोर्भृहुवाम्" इति विकल्पात् आम्प्रत्ययः । अत्र युगपत् वीरशान्ताधिकरणत्वाभिधानात् अस्य लोकाद्भुतमहिमत्वं व्यज्यते ॥ २२

शिरसेति । हरिन्मणिनिभः मरकतमणिश्यामः अभिषवणेन स्नानेन कृतजन्मनः जनिताः अतः पिशङ्गोः इति भावः । जटाः शिरसा वहन् सः अर्जुनः अरुणस्य अनूरोः दीधितिभिः परिमृष्टमूर्धनि व्याप्तशिरसि तमालतरौ उपमां तमालतरोः सादृश्यं ययौ इति आर्थी इयम् उपमा । तरोः औपम्याधिकरणत्वात् तदपेक्षया सप्तमी ॥ १३ ॥

धृतेति । धृतहेतिः धृतायुधः अपि अधृता जिह्मा मतिः कुटिलमतिः

अनुकूलपातिनमचण्डगतिं
किरता सुगन्धिमभितः पवनम् ।
अवधीरितार्त्तवगुणं सुखतां
नयता रुचां निचयमंशुमतः ॥ २५ ॥
नवपल्लवाञ्जलिभृतः प्रचये
वृक्षतस्तरून् गमयतावनतिम् ।
स्तृणता तृणैः प्रतिनिशं मृदुभिः
शयनीयतामुपयतीं वसुधाम् ॥ २६ ॥
पतितैरपेतजलदान् नभसः
पृषतैरपां शमयता च रजः ।

येन सः शुचिभिः चरितैः मुनीन् अधरयन् तिरस्कुर्वन् वेषेण एव भोषणः न तु कर्मणा इति भावः । कुतः ? विरजाः रजोगुणरहितः सः अर्जुनः मृगान् रजयाञ्चकार रमयामास । "रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः" इति नलोपः । तथाहि—गुणाः दयादयः कम् इव रमयितुं न ईशते कं वा वशीकर्त्तुं न शक्नुवन्ति इति भावः । शुद्धिः एव हि परं विश्वासबीजं परस्य न वेषः नापि संस्तवः इति भावः ॥ १४ ॥

अथ अस्य त्रिभिः तपःसिद्धिमाह—अनुकूलेत्यादिना । अनुकूलपातिनं न तु प्रतिकूलपातिनम् अचण्डगतिं मन्दगामिनं सुगन्धिम् । गन्धस्येत्वे तदेकान्तग्रहणेऽपि कवीनां निरङ्कुशत्वात् समासान्तः । अथवा केचित् आगन्तुकत्वे अपि एकवचनेन समासान्तम् इच्छन्ति । पवनम् अभितः किरता प्रवर्त्तयता इत्यर्थः । ऋतुः अस्य प्राप्तः आर्त्तवः । "ऋतोरण्" इत्यण् प्रत्ययः । सः च असौ गुणः तिग्मत्वरूपः सः अवधीरितः तिरस्कृतः यस्य तम् अंशुमतः रुचां निचयं सुखतां सुखस्पर्शतां नयता प्रापयता । नयतेर्हि कर्मकत्वम् ॥ २५ ॥

नवेति । प्रचये पुष्पावचयप्रसङ्गे नवपल्लवा एव अञ्जलयः तान् बिभ्रतीति तथोक्तान् वृक्षतः उच्चान् तरून् अवनतिं नम्रतां गमयता । "गतिबुद्धि" इत्यादिना तरूणां कर्मत्वम् । प्रतिनिशं निशि निशि शयनीयताम् उपयतीं शयनस्थानीभूताम् इत्यर्थः । वसुधां मृदुभिः तृणैः स्तृणता आच्छादयता ॥ २६ ॥

स दयालुनेव परिगाढ़क्लमः
परिचर्य्ययानुजगृहे तपसा ॥ २७ ॥
महते फलाय तदवेक्ष्य शिवं
विकसन्निमित्तकुसुमं स पुरः ।
न जगाम विस्मयवशं वशिनां
न हिनस्ति धैर्य्यमनुभावगुणः ॥ २८ ॥
तदभूरिवासरकृतं सुकृतै-
रुपलभ्य वैभवमनन्यभवम् ।
उपतस्थुराश्रितविषादधियः
शतयज्वनो वनचरा वसतिम् ॥ २९ ॥

पतितैरिति । अपेतजलदात् निरभ्रात् नभसः पतितैः अपां पृषतैः जलबिन्दुभिः रजश्च गमयता तपसा कर्त्रा दयालुना इव इति उत्प्रेक्षा । दयालुत्वे हेतुं सूचयति—परिगाढ़क्लमः अतिक्षीणः सः अर्जुनः परिचर्य्यया उक्तविधया शुश्रूषया अनुजगृहे अनुगृहीतः । अनुग्रहः अत्र सहकारित्वम् एव सर्वभूतानुकूल्यलिङ्गात् । पचेलिमं तपः अस्य इति भावः । अस्य श्लोकत्रयस्य अपि एकवाक्यत्वात् उत्प्रेक्षा एव प्रधानालङ्कारः ॥ २७ ॥

महत इति । सः अर्जुनः महते फलाय श्रेयसे शस्त्राय च विकसत् पूर्वोक्तं शिवं निमित्तम् एव कुसुमं पुरः अग्रे अवेक्ष्य विस्मयवशं न जगाम । तथाहि—वशिनाम् अनुभाव एव गुणः सः च धैर्य्यं न हिनस्ति विस्मयादिविकारं न जनयति इत्यर्थः । जनने वा तपः क्षीयेत । "तपः क्षरति विस्मयात्" इति स्मरणात् इति भावः ॥ २८ ॥

तदिति । सुकृतैः तपोभिः करणैः अभूरिभिः कतिपयैः एव वासरैः कृतं तत् पूर्वोक्तं वैभवम् अतः अन्यस्य न भवति इति अनन्यभवम् अन्यस्य असाध्यम् इत्यर्थः । पचाद्यजन्तोत्तरपदेन नञ्समासः । उपलभ्य निश्चित्य आश्रितविषादाः प्राप्तखेदाः धियः येषां ते वनचराः । "तत्पुरुषे कृति बहुलम्" इति बहुलग्रहणात् लुक् । शतेन शतस्य वा मखानां यज्वनः शतक्रतोः । अत्र संख्यायविशेषलाभः यजिसन्निधानात् अवगन्तव्यः । "यज्वा तु विधिनेष्टवान्" इत्यमरः । "सुयजोर्ङ्वनिप्" । वसतिम् उपतस्थुः प्रापुः ॥ २९ ॥

विदिताः प्रविश्य विहितानतयः
शिथिलीकृतेऽधिकृतकृत्यविधौ ।
अनपेतकालमभिरामकथाः
कथयाम्बभूवुरिति गोत्रभिदे ॥ ३० ॥
शुचिवल्कवीतवपुरन्यतम-
स्तिमिरच्छिदामिव गिरौ भवतः ।
महते जयाय मघवन्ननघः
पुरुषस्तपस्यति तपन् जगतीम् ॥ ३१ ॥
स बिभर्ति भीषणभुजङ्गभुजः
पृथु विद्विषां भयविधायि धनुः ।
अमलेन तस्य धृतसच्चरिता-
श्चरितेन चातिशयिता मुनयः ॥ ३२ ॥

विदिता इति । वनचराः इति अनुवर्त्तनीयम् । विदिताः ज्ञाताः अनुमतप्रवेशाः सन्तः इत्यर्थः । प्रविश्य विहितानतयः कृतप्रणामाः अधिकृतकृत्यस्य नियुक्तकर्मणः शैलरक्षणात्मकस्य विधौ अनुष्ठाने शिथिलीकृते सति अनपेतकालम् अनतिक्रान्तकालं यथा तथा गोत्रभिदे शक्राय इति वक्ष्यमाणप्रकारेण अभिरामकथाः श्राव्यवाचः । "चिन्ति-पूजिकथिकुम्बिचर्चश्च" इति अङ्प्रत्ययः । कथयाम्बभूव ॥ ३० ॥

शुचीति । शुचिना वल्केन वल्कलेन वीतम् आच्छादितं वपुः यस्य सः । तिमिरच्छिदां सूर्य्यादीनाम् अन्यतमः इव स्थितः इत्युत्प्रेक्षा । अनघः पुरुषः हे मघवन् ! भवतः गिरौ इन्द्रकीले जगतीं भुवं तपन् तापयन् महते जयाय तपस्यति तपश्चरति । "कर्मणो रोमन्थ" इत्यादिना क्यङि लट् ॥ ३१ ॥

जयाय तपस्यति इत्युक्तं तत्र हेतुमाह—स इति । भीषयेते इति भीषणौ । नन्द्यादित्वात् ल्युप्रत्ययः । तौ च तौ भुजङ्गौ च तौ इव भुजौ यस्य सः तथोक्तः पुरुषः, विद्विषां भयविधायि पृथु धनुः बिभर्त्ति अतः जयार्थो इत्यर्थः । अमलेन तस्य पुरुषस्य चरितेन धृतानि सच्चरितानि यैः ते मुनयः अतिशयिताः अतिक्रान्ताः ॥ ३२ ॥

मरुतः शिवा नवतृणा जगतो
विमलं नभो रजसि बृष्टिरपाम् ।
गुणसम्पदानुगुणतां गमितः
कुरुतेऽस्य भक्तिमिव भूतगणः ॥ ३३ ॥
इतरेतरानभिभवेन मृगा-
स्तमुपासते गुरुमिवान्तसदः ।
विनमन्ति चास्य तरवः प्रचये
परवान् स तेन भवतेव नगः ॥ ३४ ॥
उरु सत्त्वमाह विपरिश्रमता
परमं वपुः प्रथयतीव जयम् ।
शमिनोऽपि तस्य नवसङ्गमने
विभुतानुषङ्गि भयमेति जनः ॥ ३५ ॥

अथ अस्य तपःसिद्धिं वर्णयति—मरुत इत्यादिना । मरुतः वाताः शिवाः सुखाः जगतो पृथ्वो नवतृणा शयनासनाद्यनुकूला इत्यर्थः । नभः विमलं नीहारादिरहितं, रजसि सति अपां वृष्टिः भवतीति शेषः । किं बहुना अस्य पुरुषस्य गुणसम्पदा अनुगुणताम् अनुकूलतां गमितः वशीकृतः इत्यर्थः । भूतगणः पृथिव्यादिपञ्चकं भक्तिं सेवां कुरुते इव इति उत्प्रेक्षा ॥ ३३ ॥

इतरेतरेति । किञ्च, मृगाः पशवः तम् अन्ते अन्तिके सीदन्ति इति अन्तसदः अन्तेवासिनः । "सत्सूद्विष" इति क्विप् । गुरुम् इव इतरेतरेषाम् अनभिभवेन अद्रोहेण उपासते सेवन्ते । प्रचये पुष्पावचये तरवः अस्य विनमन्ति करप्रचेयाः भवन्ति इत्यर्थः । अस्य इति सम्बन्धसामान्ये षष्ठी । किं बहुना । सः नगः इन्द्रकीलः भवता इव तेन पुरुषेण परवान् पराधीनः । सात्त्विकस्य अपि तव इव तस्य अतिशयः वर्त्तते इत्यर्थः ॥३४

उर्विति । किञ्च, विपरिश्रमता आयासे अपि श्रमराहित्यम् उरु महत् सत्त्वम् अन्तःसारम् आह, दुर्बलस्य श्रमजयासम्भवात् इति भावः । परमं वपुः जयं प्रथयति च आकारेण एव जिष्णुत्वं गम्यते इत्यर्थः । शमिनः शान्तस्य अपि तस्य नवसङ्गमने अपूर्वप्राप्तौ जनः विभुतायाः प्रभावस्य

ऋषिवंशजः स यदि दैत्यकुले
यदि वान्वये महति भूमिभृताम् ।
चरतस्तपस्तव वनेषु सहा
न वयं निरूपयितुमस्य गतिम् ॥ ३६ ॥
विगणय्य कारणमनेकगुणं
निजयाथवा कथितमल्पतया ।
असदप्यदः सहितुमर्हसि नः
क्व वनेचराः क्व निपुणा मतयः ॥ ३७ ॥
अधिगम्य गुह्यकगणादिति तत्
मनसः प्रियं प्रियसुतस्य तपः ।
निजुगोप हर्षमुदितं मघवा
नयवर्त्मगाः प्रभवतां हि धियः ॥ ३८ ॥

अनुषङ्गि व्यापकं, न तु हिंस्रकत्वानुषङ्गि इति भावः । भयम् एति शान्तोद्भवं पराभवं गमयतीति भावः ॥ ३५

अथ ईदृशः असौ क इति चेत् तत् न विद्मः इति आह—ऋषीति । सः पुरुषः ऋषिवंशजः वा इति शेषः काकुः वा । यदि वा दैत्यकुले, जात इति शेषः । यदि वा महति भूमिभृताम् अन्वये जातः । तव वनेषु तपः चरतः अस्य गतिं स्वरूपं निरूपयितुं वयं सहन्ते इति सहाः पचाद्यच् । न सहाः स्म इति शेषः ॥ ३६ ॥

अपृष्टपरिभाषणापराधं परिहरन्ति—विगणय्येति । अनेकगुणं बहुफलं इन्द्रत्वाद्यनेकफलसाधकत्वेन योग्यम् इत्यर्थः । कारणं तपोरूपं विगणय्य विचार्य अथवा निजया नैसर्गिक्या अल्पतया बालिश्येन वा कथितं नः अस्माकम् अदः इदं वचनम् इत्यर्थः । असत् असाधु अपि सहितुं सोढुम् । "तोषसह" इत्यादिना विकल्पात् इड़ागमः । अर्हसि योग्यः असि । तर्हि सदेव किं न उक्तं तत्र आहुः । वनेचराः क्व ? निपुणाः मतयः विवेकबुद्धयः क्व ? न उभयं सङ्गच्छते इत्यर्थः । अज्ञानेन न अपराध्यति इति भावः । अर्थान्तरन्यासः अलङ्कारः ॥ ३७ ॥

अधिगम्येति । मघवा इन्द्रः इति पूर्वोक्तगुह्यकगणात् तत् मनसः

प्रणिधाय चित्तमथ भक्तितया
विदितेऽप्यपूर्व इव तत्र हरिः ।
उपलब्धुमस्य नियमस्थिरतां
सुरसुन्दरीरिति वचोऽभिदधे ॥ ३९ ॥
सुकुमारमेकमणु मर्म्मभिदा-
मतिदूरगं युतममोघतया ।
अविपन्न[लक्ष्य]मस्त्रमपरं कतमद्
विजयाय यूयमिव चित्तभुवः ॥ ४० ॥

प्रियं प्रियसुतस्य अर्जुनस्य तपः अधिगम्य ज्ञात्वा । गुरुपेक्षया समानकर्तृकत्वात् क्त्वाल्यबनिर्देशः । उदितं तत् तपसः देवकार्य्यार्थत्वात् उत्पन्नं हर्षं निजुगोप गोपयामास । तथाहि—प्रभवतां प्रभूणां धियः नयवर्त्मगाः नीतिमार्गानुसारिण्यः हि । अन्यथा मन्त्रभेदे कार्य्यहानिः स्यादिति भावः ॥ ३८ ॥

प्रणिधायेति । अथ हरिः इन्द्रः चित्तं प्रणिधाय विषयान्तरपरिहारेण आत्मनि अवस्थाप्य तत्र तस्मिन् अर्जुने भक्तितया विदिते अपि । उपलक्षणे तृतीया । अपूर्व इव अविदित इव इत्यर्थः । "पूर्वादिभ्यो नवभ्यो वा" इति विकल्पात् न स्मिन्नादेशः । अस्य अर्जुनस्य नियमे स्थिरतां दार्ढ्यम् उपलब्धुं परीक्षितुम् इत्यर्थः । लोकप्रतीत्यर्थम् इति भावः । सुरसुन्दरीः इति वक्ष्यमाणप्रकारं वचः अभिदधे ॥ ३९ ॥

सुकुमारमिति । मर्म्मभिदां मर्म्मच्छेदिनाम् अस्त्रान्तराणां मध्ये इत्यर्थः । "यतश्च निर्द्धारणम्" इति षष्ठी । अपरम् अन्यत् कतमत् । "वा बहूनां जातिपरिप्रश्ने डतमच्।" यूयम् इव सुकुमारं कोमलं न तु कठिनम् । अन्यत् तु कठिनं भवति । तथा एकं न बहु तत् तु भवति । तथा अणु सूक्ष्मं न स्थूलम् अलक्ष्यलक्षप्रवेशित्वादिति भावः । तत् तु लक्ष्यलक्षप्रवेशि । तथा अतिदूरगं दूरलक्षभेदि तत् तु समीपलक्षभेदि । तथा अमोघतया अमोघत्वगुणेन युतं युक्तं, न कदाचित् व्यभिचरति इति भावः । अन्यत् तु कदाचित् अपि लक्ष्यात् अपराध्यति । तथा अविप[ल]क्ष्यम् असत्प्रतिकारम् । अन्यत् विद्यमानप्रतीकारम् अस्त्रं चित्तभुवः कामस्य । कर्त्तरि षष्ठी । विजयाय एतद्विशेषणविशिष्टमस्त्रम् अस्ति इति शेषः । न

भववीतये हृतबृहत्तमसाम्
अवबोधवारि रजसः शमनम् ।
परिपीयमानमिव वोऽसकलै-
रवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥
बहुधा गतां जगति भूतसृजा
कमनीयतां समभिहृत्य पुरा ।
उपपादिता विदधता भवतोः
सुरसङ्घयानसुमुखी जनता ॥ ४२ ॥
तदुपेत्य विघ्नयत तस्य तपः
कृतिभिः कलासु सहिताः सचिवैः ।
हृतवीतरागमनसां ननु वः
सुखसङ्गिनं प्रति सुखाबजितिः ॥ ४३ ॥

किञ्चित् अस्ति इत्यर्थः । अत्र उपमालङ्कारः । साभिप्रायविशेषणत्वात् परिकरालङ्कारश्च । तयोः उभयोः अङ्गाङ्गिभावेन सङ्करः ॥ ४० ॥

असामर्थ्यशङ्कां परिहरति—भवेति । भववीतये संसारनिवृत्तये हृतबृहत्तमसां निरस्तमहामोहानां योगिनां सम्बन्धि रजोगुणः रजोधूलिः इति श्लिष्टरूपकं, तस्य शमनं निवर्त्तकम् अवबोधः तत्त्वज्ञानम् एव वारि तत् वः युष्माकम् असकलैः असमग्रैः नयनानि एव अञ्जलयः तैः परिपीयमानम् इव इति उत्प्रेक्षा । अवसादं तपःक्षयम् एति । मुक्तान् अपि बध्नतीनां कथम् असामर्थ्यम् इति भावः । अत्र उत्प्रेक्षारूपकयोः सङ्करः ॥ ४१ ॥

बहुधेति । किञ्च पुरा जगति बहुधा गतां नानामुखेन विप्रकीर्णां कमनीयतां चन्द्राद्युपमानद्रव्यगतलावण्यं समभिहृत्य संगृह्य भवतोः विदधता सृजता भूतसृजा ब्रह्मणा जनता जनसमूहः । "ग्रामजन" इत्यादिना तल् । सुरसङ्घयानसुमुखी स्वर्लोकयात्राप्रवणा उपपादिता कृता । स्वर्गस्य अपि यत्प्रसादात् सर्वलोकश्लाघ्यत्वं तासां वः कथम् असामर्थ्यम् इति भावः । अत्र अप्सरसां प्रकीर्णलावण्यसंग्रहसम्बन्धेऽपि तत्सम्बन्धाभिधानात् अतिशयोक्तिः ॥ ४२ ॥

अविसृष्यमेतदभिलष्यति सः
द्विषतां वधेन विषयाभिरतिम् ।
भववीतये न हि तथा स विधिः
क्व शरासनं क्व च विमुक्तिपथः ॥ ४४ ॥
पृथुधाम्नि तत्र परिबोधि च मा
भवतीभिरन्यमुनिवद् विकृतिः ।
स्वयशांसि विक्रमवतामवतां
न वधूष्वघानि विसृषन्ति धियः ॥ ४५ ॥

अथ कार्य्यशक्तिमाह—तदिति । तत् तस्मात् समर्थत्वात् कलासु गीतवाद्यादिषु कृतिभिः कुशलैः सचिवैः गन्धर्वैः सहिताः उपेत्य गत्वा तस्य पुरुषस्य तपः विघ्नयत विघ्नवत् कुरुत विहत इत्यर्थः । विघ्न वच्छब्दात् मत्वन्तात् "तत्करोति" इति णिचि लोट् । णाविष्ठवद्भावात् मतुपः लुक् । न च अत्र असामर्थ्यशङ्का कार्य्या इति अर्थान्तरन्यासेनाह—हृतेति । ननु सम्बोधने हे अप्सरसः ! हृतानि वशीकृतानि वीतरागाणां निष्पृहाणां मुमुक्षूणां मनांसि चित्तानि याभिः तासां वः युष्माकम् अप्सरसां सुखसङ्गिनं पुरुषं प्रति सुखाभिलाषिणं प्रति अवजितिः विजयः सुखा सुखसाध्या न तु दुष्करा खलु । तेन अयं सुखार्थी न मुमुक्षुः इति उक्तम् । अर्थान्तरन्यासः ॥ ४३ ॥

अथ सुखसङ्गित्वमाह—अविसृष्येति । हे अप्सरसः ! सः पुरुषः द्विषतां शत्रूणां वधेन शत्रुहननद्वारा विषयाभिरतिं विषयसुखम् अभिलष्यति वाञ्छति । "वा भ्राश" इत्यादिना श्यन्प्रत्ययः । एतद्विषयासक्तत्वम् अविसृष्यम् अविचार्य्यम् । अविसृष्यम् असन्दिग्धम् । "ऋदुपधाच्चाक्लृपिचृतेः" इति क्यप् । भववीतये संसारमुक्तये न भवति । कुतः इति आह—शरासनं धनुः क्व ? विमुक्तेः पन्थाश्च क्व ? इयं परस्परं विरुद्धम् इत्यर्थः । न खलु हिंसासाध्या मुक्तिः इति भावः । अर्थान्तरन्यासः अलङ्कारः ॥४४॥

न च शापभयम् अपि सम्भाव्यम् यस्मात् इति आह—पृथ्विति । पृथुधाम्नि महातेजसि तत्र तस्मिन् पुरुषविषये अन्यमुनिवत् अन्यस्मिन् मुनौ इव । "तत्र तस्येव" इति वतिप्रत्ययः । विकृतिः कोपनविकारश्च भव-

आशंसितापचितिचारु पुरः सुराणा-
मादेशमित्यभिमुखं समवाप्य भर्त्तुः।
लेभे परां द्युतिममर्त्यवधूसमूहः
सम्भावना ह्यधिकृतस्य तनोति तेजः॥ ४६॥
प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः
स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः।
अचलनलिनलक्ष्मीहारि नालं बभूव
स्तिमितममरभर्त्तुर्द्रष्टुमच्छां सहस्रम्॥ ४७॥

इति श्रीभारविकृतौ किरातार्जुनीये महाकाव्ये
युवतिप्रस्थानं नाम षष्ठः सर्गः॥ ६॥

तोभिः मा परिबोधि मा विज्ञायि मा शङ्कि इति यावत्। बुध्यतेः कर्मणि लुङ् माङ्योगात् आशीरर्थे अडागमाभावश्च। तथाहि— स्वयशांसि अवतां रक्षतां यशोधनानाम् इत्यर्थः। विक्रमवतां धियः चित्तानि बधूषु स्त्रीविषयेषु अघानि व्यसनानि। "दुःखैनोव्यसनेष्वघम्" इति वैजयन्ती। न विमृषन्ति। अर्थान्तरन्यासः। स्त्रीहिंसायाः शूराणां यशोहानिकरत्वात् न सर्वथा वो ह्रिनस्ति स इत्यर्थः॥ ४५॥

आशंसितेति। अमर्त्यवधूसमूहः अप्सरसां गणः सुराणां पुरः अग्रे आशंसितापचितिभिः अपेक्षितसम्भावनाभिः चारु यथा तथा। "क्षयार्चयोरपचितिः" इत्यमरः। अभिमुखं समक्षं भर्त्तुः स्वामिनः इति पूर्वोक्तम् आदेशं नियोगं समवाप्य परां द्युतिं लेभे। तथाहि— अधिकृतस्य क्वचित् अधिकारे नियुक्तस्य सम्भावना स्वामिकृता पूजा तेजः कान्तिं तनोति॥ ४६॥

प्रणतिमिति। अथ प्रणतिं विधाय सद्मनः इन्द्रभवनात् प्रस्थिताः प्रचलिताः स्तनभरैः नमितानि अङ्गानि यासां ताः। "अङ्गगात्रकण्ठेभ्यो वक्तव्यम्" इति ङीष्। प्रीतिभाजः स्वामिसम्भावनया सन्तुष्टाः ताः अङ्गनाः अचलनलिनानां स्थिरकमलानां लक्ष्मीः हरति इति तत् तथोक्तम् तद्वत् मनोहरम् इत्यर्थः। कुतः? स्तिमितं विस्मयनिश्चलम् अमरभर्त्तुः

सप्तमः सर्गः ।

श्रीमद्भिः सरथगजैः सुराङ्गनानां
गुप्तानामथ सचिवैस्त्रिलोकभर्त्तुः ।
सम्मूर्च्छन्नलघुविमानरन्ध्रभिन्नः
प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥

सोत्कण्ठैरमरगणैरनुप्रकीर्णात्
निर्याय ज्वलितरुचः पुरात् मघोनः ।
रामाणामुपरि विवस्वतः स्थितानां
नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥

अक्ष्णां सहस्रं कर्त्तुं द्रष्टुम् अलं समर्थं न बभूव। तासां सौन्दर्य्यसागरस्य उद्वेलत्वात् इति भावः। अत्र उपमालङ्कारः ॥ ४७ ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां
षष्ठः सर्गः ॥ ५ ॥

श्रीमद्भिरिति। अथ प्रस्थानानन्तरं श्रीमद्भिः शोभावद्भिः सह रथगजैन सरथगजाः तैः। "तेन महेति तुल्ययोगे" इति बहुव्रीहिः। त्रयाणां लोकानां भर्त्तुः त्रिलोकभर्त्तुः इन्द्रस्य। "तद्धितार्थे" इत्यादिना उत्तरपदसमासः। सचिवैः गन्धर्वैः गुप्तानां सुराङ्गनानां प्रस्थानं गमनम् अलघुषु महत्सु विमानरन्ध्रेषु विमानानां कुक्षिकुहरेषु भिन्नः प्रतिध्वनैः अनेकीभूतः अतएव संमूर्च्छन् व्याप्नुवन् मृदङ्गनादः समभिदधे आचख्यौ। पौरेभ्यः इति शेषः। अस्मिन् सर्गे प्रहर्षिणीवृत्तम्। "म्रौ जौ गः त्रिदशयतिः प्रहर्षिणीयम्" इति लक्षणात् ॥ १ ॥

सोत्कण्ठैरिति। सोत्कण्ठैः अवेक्षणोत्सुकैः इत्यर्थः। अमरगणैः अनुप्रकीर्णात् आकीर्णात् ज्वलितरुचः दीप्तप्रभावात् मघोनः इन्द्रस्य पुरात् अमरावत्या निर्याय निर्गत्य। यातेः क्त्वो ल्यप्। विवस्वतः उपरिस्थितानां रामाणाम् आतपात्त्रायन्ते इति आतपत्रैः। "सुपि" इति

धूतानामभिमुखपातिभिः समीरैः
आयासादविशदलोचनोत्पलानाम्।
आनिन्ये मदजनितां श्रियं बधूनाम्
उष्णांशुद्युतिजनितः कपोलरागः॥ ३॥
तिष्ठद्भिः कथमपि देवतानुभावात्
आकृष्टैः प्रजविभिरायतं तुरङ्गैः।
नेमीनामसति विवर्त्तने रथौघैः
आसेदे नभसि विमानवत्प्रवृत्तिः॥ ४॥
कान्तानां क्रतपुलकः स्तनाङ्गरागे
वक्त्रेषु च्युततिलकेषु मौक्तिकाभः।

योगविभागात् कप्रत्ययः। चरितगुणत्वं न आसेदे न प्राप्ते। [आतपत्राणाम् आतपनिवारणाकरणात् इति भावः] तासां सूर्य्योपरिस्थितत्वात् आतपासम्भवादिति भावः॥ २॥

धूतानामिति। अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिः धूतानाम् इति दुर्निमित्तसूचनम्। आयासात् गतिप्रयासात् अविशदलोचनोत्पलानां बधूनाम् उष्णांशुद्युतिजनितः आतपकृतः कपोलानां रागः पाटलत्वं मदेन जनितां श्रियं तत्सदृशीं श्रियम् इत्यर्थः। अतएव निदर्शनालङ्कारः। आनिन्ये आनीतवान् बधूः इति शेषः। आङ्पूर्वात् नयतेः कर्त्तरि लिट्। ञकारानुबन्धत्वात् (पक्षे) आत्मनेपदम्॥ ३॥

तिष्ठद्भिरिति। कथम् अपि बाढ़म्। "कथमादौ तथाप्यन्ते यत्ने गौरवबाढ़योः" इति वैजयन्ती। देवतानाम् अनुभावात् तिष्ठद्भिः अपतद्भिः इत्यर्थः। रथविशेषणम् एतत्। प्रजविभिः वेगवद्भिः तुरङ्गैः आयतं दूरम् आकृष्टैः रथौघैः वियति आकाशे नेमीनां चक्रधाराणाम्। "चक्रधारा प्रधिर्नेमिः" इति यादवः। विवर्त्तने भ्रमणे असति विमानवत् विमानानाम् इव इति उपमा। "तत्र तस्येव" इति वतिप्रत्ययः। प्रवृत्तिः गतिः आसेदे प्राप्ता। सदेः कर्मणि लिट्॥ ४॥

कान्तानामिति। कान्तानां स्तनानाम् अङ्गरागे कृतपुलकः जनितोद्भेदः कृतरोमाञ्चः इत्यर्थः। च्युताः प्रभ्रष्टाः तिलकाः येषां तेषां तेषु

सम्पेदे श्रमसलिलोद्गमो विभूषा
रम्याणां विकृतिरपि श्रियं तनोति ॥ ५ ॥
राजद्भिः पथि मरुतामभिन्नरूपैः
उल्कार्चिःस्फुटगतिभिर्ध्वजांशुकानाम् ।
तेजोभिः कनकनिकाषराजिगौरैः
आयामः क्रियत इव स्म सातिरेकः ॥ ६ ॥
रामाणामवजितमाल्यसौकुमार्य्ये
सम्प्राप्ते वपुषि सहत्वमातपस्य ।
गन्धर्वैरधिगतविस्मयैः प्रतीये
कल्याणी विधिषु विचित्रता विधातुः ॥ ७ ॥

वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः स्वेदोद्भेदः विभूषा भूषणं सम्पेदे सम्पन्नः । कर्त्तरि लिट् । तथाहि—रम्याणां स्वभावसुन्दराणां विकृतिः अपि श्रियं तनोति । अतः स्वेदस्य अपि विभूषणत्वम् उपपद्यत इति भावः ॥ ५ ॥

राजद्भिरिति । मरुतां पथि आकाशे राजद्भिः दीप्यमानैः अभिन्नरूपैः अविच्छिन्नाकारैः अतएव उल्कानाम् अर्चींषि इव स्फुटगतीनि दीप्तमार्गाणि तैः कनकस्य निकाषः कषणं तस्य राजिः रेखा तद्वत् गौरैः अरुणैः । "गौरः पीतेऽरुणे श्वेते" इति विश्वः । ध्वजांशुकानां तेजोभिः पताकाकान्तिभिः आयामः तेषाम् एव दैर्घ्यं सातिरेकः सातिशयः क्रियते स्म इव कृतः इव दीर्घाः ध्वजपटाः स्वतेजःप्रसारेण दीर्घं तमा इव लक्ष्यन्ते इति उत्प्रेक्षा । सा च उल्काद्युपमानुप्राणिता ॥ ६ ॥

रामाणामिति । माला एव माल्यं तस्य सौकुमार्य्यम् अवजितं येन तस्मिन् कुसुमात् अपि मनोहरे इत्यर्थः । रामाणां वपुषि आतपस्य । क्रियोगे कर्मणि षष्ठी । सहते इति सहः क्षमः, पचाद्यच् । तस्य भावः सहत्वम् । तत् सम्प्राप्ते सति अधिगतविस्मयैः सम्प्राप्तार्थ्यैः गन्धर्वैः विधातुः विधिषु सृष्टिषु कल्याणी साध्वी प्रेयसी उपकारकत्वात् इति भावः । विचित्रता नानाविधत्वं प्रतीये अवगता ज्ञाता ; प्रतिपूर्वात् इणः कर्म्मणि लिट् ॥ ७ ॥

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः
स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः।
सादृश्यं ययुररुणांशुरागभिन्नै-
र्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः॥ ८॥
अत्यर्थं दुरुपसदादुपेत्य दूरं
पर्य्यन्ताद्हिममयूखमण्डलस्य।
आशानामुपरिचितामिवैकवेणीं
रम्योर्मिं त्रिदशनदीं ययुर्बलानि॥ ९॥
आमत्तभ्रमरकुलाकुलानि धुन्वन्
उद्भूतग्रथितरजांसि पङ्कजानि।
कान्तानां गगननदीतरङ्गशीतः
सन्तापं विरमयति स्म मातरिश्वा॥ १०॥

सिन्दूरैरिति। सिन्दूरैः नागसम्भवाख्यैः रागद्रव्यविशेषैः। "सिन्दूरं नागसम्भवम्" इत्यमरः। कृतरुचयः अलङ्कृता इत्यर्थः। सह हेम्नः कक्ष्याभिः मध्ये भवन्धनैः सहेमकक्ष्याः। "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः। "कक्ष्या प्रकोष्ठे इर्म्यादेः काञ्च्यां मध्ये भवन्धने" इत्यमरः। स्रोतोभिः सप्तभिः मदनाड़ीभिः। 'कराल्कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदच्युतिः" इति पालकाव्ये। करात् नासारन्ध्राभ्याम् इत्यर्थः। मदं क्षरन्तः वर्षन्तः त्रिदशगजाः अरुणस्य अर्कस्य अंशूनां रागेण आरुण्येन भिन्नैः संसृष्टैः वर्षद्भिः स्फुरितशतह्रदैः स्फुरिततड़ित्कैः पयोदैः सादृश्यं ययुः इति उपमालङ्कारः॥ ८॥

अत्यर्थमिति। बलानि सैन्यानि अत्यर्थं दुरुपसदात् दुःसहात् अहिममयूखमण्डलस्य सूर्य्यविम्बस्य पर्य्यन्तात् समीपात् दूरम् उपेत्य आगत्य आशानाम् उपरिचितां गुम्फिताम् एकवेणीम् इव स्थिताम् इत्युत्प्रेक्षा। रम्याः ऊर्मयः तरङ्गाः भङ्गश्च यस्याः तां त्रिदशनदीं मन्दाकिनीं ययुः प्रापुः॥ ९॥

आमत्तेति। आमत्तैः भ्रमरकुलैः आकुलानि उद्भूतानि उत्थापितानि

सम्भिन्नैरिभतुरगावगाहनेन
प्राप्योर्वीरनुपदवीं विमानपङ्क्तीः ।
तत्पूर्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्त्तनं पयोभिः ॥ ११ ॥
क्रान्तानां ग्रहचरितात् पथो रथाना-
मच्चायच्चतसुरवेश्मवेदिकानाम् ।
निःसङ्गं प्रधिभिरुपाददे विवृत्तिः
सम्पीड़च्युमितजलेषु तोयदेषु ॥ १२ ॥
तप्तानामुपदधिरे विषाणभिन्नाः
प्रह्लादं सुरकरिणां घनाः क्षरन्तः ।

ग्रथितानि अन्योऽन्यसम्बद्धानि च रजांसि येषु तानि पङ्कजानि धुन्वन् कम्पयन् सुरभिः इत्यर्थः । गगननदीतरङ्गैः शीतः मातरिश्वा वायुः कान्तानां सन्तापं विरमयति स्म शमयामास । मातरि अन्तरिक्षे श्वयति इति मातर्याश्वयतीति वेति नैरुक्ताः ॥ १० ॥

सम्भिन्नैरिति । इभतुरगावगाहनेन हस्त्यश्वावलोड़नेन सम्भिन्नैः संक्षुभितैः सुरापगाया पयोभिः कर्त्तृभिः पदवीम् अनु पदव्याम् इत्यर्थः । "लक्षणेत्थम्भूत" इत्यादिना कर्मप्रवचनीयत्वात् द्वितीया । उर्वीः विपुलाः विमानपङ्क्तीः प्राप्य तत् एव पूर्वं तत्पूर्वम् इदं प्रथमं यथा तथा आकाशगङ्गाया तटाभावात् इति भावः । वप्रान्तेषु रोधोभूमिषु स्खलितानि तैः विवर्त्तनं प्रत्यावृत्तिः वप्रान्तस्खलितविवर्त्तनं तटान्तस्खलनप्रतिवर्त्तनम् । "वप्रः पितरि केदारे वप्रः प्राकाररोधसोः" इति वैजयन्तो । प्रतिविदधे चक्रे इति अतिशयोक्तिः ॥ ११ ॥

क्रान्तानामिति । ग्रहैः सूर्य्यादिभिः चरितात् आश्रितात् । कर्मणि क्तः । पथः मार्गात् । क्रान्तानां निष्क्रान्तानाम् अच्चाः चक्रधराः दारुविशेषाः तेषाम् अग्रैः चताः दारिताः सुरवेश्मवेदिकाः यैः तेषां रथानां प्रधिभिः नेमिभिः चक्रान्तैः । चक्रं रथाङ्गं तस्यान्ते "नेमिः स्त्री स्यात् प्रधिः पुमान्" इत्यमरः । सम्पीड़ेन नोदनेन क्षुभितानि जलानि येषां तेषु तोयदेषु निःसङ्गम् अप्रतिघातं यथा तथा विवृत्तिः परिभ्रमणम् उपाददे स्वीकृता इति अतिशयोक्तिः स्वभावोक्त्या संसृज्यते ॥ १२ ॥

युक्तानां खलु महतां परोपकारे
कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥
संवाता मुहुरनिलेन नीयमाने
दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ।
पर्य्यस्यत्पृथुमणिमेखलांशुजालं
संजज्ञे युतकमिवान्तरीयमूर्वोः ॥ १४ ॥
प्रत्यार्द्रीकृततिलकास्तुषारपातैः
प्रह्लादं शमितपरिश्रमा दिशन्तः ।
कान्तानां बहुमतिमाययुः पयोदा
नाल्पीयान् बहु सुकृतं हिनस्ति दोषः ॥ १५ ॥

तप्तानामिति । विषाणभिन्नाः गजदन्तच्छताः । "विषाणं दन्तशृङ्ग्योः" इति हलायुधः । अतएव क्षरन्तः स्रवन्तः घनाः तप्तानां सुरकरिणां प्रह्लादम् उपदधिरे उपचक्रिरे । तथाहि—परोपकारे युक्तानाम् आसक्तानां महतां सतां रुजत्सु अपि पीड्यत्सु अपि विषये कल्याणी हितकारिणी खलु प्रवृत्तिः व्यापारः भवति इति अर्थान्तरन्यासः, अलङ्कारः । ततो युक्तं मेघानां गजदन्तच्छतानाम् अपि तदाह्लादकत्वम् इति भावः ॥ १३ ॥

संवातेति । संवाता संवहता । वातेर्गत्यर्थत्वात् शतृप्रत्ययः । अनिलेन कामिना इति भावः, दिव्यस्त्रीणां जघनेषु वरं श्रेष्ठं यत् अंशुकं तस्मिन् विवृत्तिम् अपसारं मुहुः नीयमाने सति पर्य्यस्यत् प्रसर्पत् पृथु विशालं मणिमेखलांशुजालम् ऊर्वोः युतकं चलनाख्यम् इव । "युतकं संशये युग्मे यौतके चलनेऽपि च" इति विश्वः । अन्तरे भवम् आन्तरीयम् अधोऽंशुकम् । "गहादिभ्यश्च" इति छप्रत्ययः । "अन्तरीयोपसंव्यानपरिधानान्यधोऽंशुके" इत्यमरः । संजज्ञे संजातम् । जनिधातोः कर्त्तरि लिट् । उत्प्रेक्षालङ्कारः ॥ १४ ॥

प्रतीति । तुषारपातैः शीकरवर्षैः । "तुषारो हिमशीकरौ" इति विश्वः । प्रत्यार्द्रीकृततिलकाः मार्जितविशेषकाः अपि शमितपरिश्रमाः प्रह्लादम् आनन्दं दिशन्तः पयोदाः कान्तानाम् । कर्त्तरि षष्ठी । बहुमतिं सम्मानम् आययुः । तथाहि—अल्पीयान् अल्पः दोषः बहु प्रसूतं सुकृतम् उपकारं न हिनस्ति न हन्ति । अर्थान्तरन्यासः अलङ्कारः ॥ १५

यातस्य ग्रथिततरङ्गसैकताभे
विच्छेदं विपयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां
सन्धानं सुरधनुषः प्रभा मणीनाम् ॥ १६ ॥
संसिद्धाविति करणीयसन्निबद्धै-
रालापैः पिपतिषतां विलङ्घ्य वीथीम् ।
आसेदे दशनलोचनध्वजिन्या
जीमूतैरपिहितसानुरिन्द्रकोलः ॥ १७ ॥
आक्रीर्णा मुखनलिनैर्विलासिनीनाम्
उद्भूतस्फुटविशदातपत्रफेना ।

यातस्येति । ग्रथिततरङ्गं बद्धोर्मि यत् सैकतं तस्य आभा इव आभा यस्य तस्मिन्, विगतानि पयांसि यस्मात् तस्मिन् निर्जले । "ग्रेषाद्विभाषा" इत्यादिना पाक्षिकत्वात् नञ्समासान्तः । उरःप्रभृतिपाठस्तु पयःशब्दस्य एकवचनान्तस्य एव इति न कश्चित् विरोधः । वारिवाहजाले मेघवृन्दे विच्छेदं त्रुटिं यातस्य सुरधनुषः इन्द्रचापस्य त्रिदशवधूजनाङ्गभाजां मणीनां तदङ्गसङ्गिविभूषामणीनाम् इत्यर्थः । प्रभाः कान्तयः सन्धानम् आतेनुः चक्रुः । अत्र आभरणप्रभाणाम् इन्द्रधनुःसन्धानासम्बन्धे अपि सम्बन्धाभिधानात् अतिशयोक्तिरलङ्कारः ॥ १६ ॥

संसिद्धाविति । संसिद्धो कार्यसिद्धिविषये इति इत्थं भाविना प्रकारेण कर्त्तव्यम् इति करणीयं तेन सन्निबद्धैः संयोजितैः इत्यर्थः । आलापैः आभाषणैः उपलक्षितया । "स्यादाभाषणमालापः" इत्यमरः । दशशतानि संख्या येषु तानि लोचनानि यस्य सः सहस्रलोचन इत्यर्थः, तस्य ध्वजिन्या सेनया पिपतिषतां पक्षिणां वीथीं मार्गम् । पित्सन्तो नभसङ्गमा" इत्यमरः । "तनिपति" इत्यादिना विकल्पात् इड़ागमः । विलङ्घ्य जीमूतैः जीवस्य उदकस्य सूतः पटबन्धः येषां ते तैः । पृषोदरादित्वात् साधुः । अपिहितसानुः आच्छादिततटः उन्नतः इत्यर्थः । इन्द्रकोलः आसेदे प्राप्तः । षदॢ विशरणगत्यवसादनेषु कर्मणि लिट् ॥ १७ ॥

सा तूर्य्यध्वनितगभीरमापतन्ती
भूभर्त्तुः शिरसि नभोनदीव रेजे ॥ १८ ॥
सेतुत्वं दधति पयोमुचां वितानै
संरम्भादभिपततो रथान् जवेन
आनिन्युर्नियमितरश्मिभुग्नघोणाः
कृच्छ्रेण क्षितिमवनामिनस्तुरङ्गाः ॥ १९ ॥
माहेन्द्रं नगमभितः करेणुवर्य्याः
पर्य्यन्तस्थितजलदा दिवः पतन्तः।
सादृश्यं निलयननिष्पकम्पपक्षैः
आजग्मुर्जलनिधिशायिभिर्नगेन्द्रैः ॥ २० ॥

आकीर्णेति। विलासिनोनां सुखनलिनैः। उपमितसमासः। आकीर्णा व्याप्ता उद्भूतानि ऊर्द्धम् उत्क्षिप्तानि स्फुटानि असङ्कुचितानि। विशदातपत्राणि श्वेतच्छत्राणि फेना इव यस्याः तथोक्ताः तूर्य्यध्वनितैः वाद्यघोषैः गभीरं यथा तथा भूभर्त्तुः इन्द्रकीलस्य शिरसि आपतन्ती सा सेना नभोनदी इव रेजे ॥ १८ ॥

सेतुत्वमिति। पयोमुचां वितानै सेतुत्वं दधति सति संरम्भात् आटोपात् जवेन अभिपततः मेघवृन्दम् अधरीकृत्य धावतः इत्यर्थः। तथाभूतान् रथान् नियमितैः आकृष्टैः रश्मिभिः प्रग्रहैः भुग्नाः आकुञ्चिताः घोणाः प्रोथाः येषां ते तथोक्ताः। "कुञ्चितं नतम्। आविद्धं कुटिलं भुग्नं वेल्लितं वक्रम्" इत्यमरः। "किरणप्रग्रहौ रश्मौ" इत्यमरः "घोणा तु प्रोथमस्त्रियाम्" इत्यमरः। अवनमन्ति इति अवनामिनः अवनतपूर्वकायाः तुरङ्गाः कृच्छ्रेण महता प्रयत्नेन क्षितिम् आनिन्युः इति स्वभावोक्तिः ॥ १९ ॥

माहेन्द्रमिति। माहेन्द्रं नगम् अभितः इन्द्रकीलाभिमुखम्। "अभितः परितः" इत्यादिना द्वितीया। दिवः अन्तरिक्षात् पतन्तः अवतरन्तः पर्य्यन्तस्थिताः पार्श्वस्था जलदाः येषां ते करेणुवर्य्याः करेणुषु वर्य्याः श्रेष्ठाः इत्यर्थः। "न निर्द्धारणे" इति षष्ठीसमासनिषेधात् "सप्तमी" इति योगविभागात् सप्तमीसमासः निलयने स्थाने निष्पकम्पपक्षैः निश्चलपक्षैः जलनिधिशायिभिः नगेन्द्रैः मैनाकादिभिः सादृश्यम् आजग्मुः इत्युपमा ॥ २० ॥

उत्सङ्गे समविषमे समं महाद्रेः
क्रान्तानां वियदभिपातलाघवेन ।
आमूलादुपनदि सैकतेषु लेभे
सामग्रो खुरपदवो तुरङ्गमाणाम् ॥ २१ ॥
साध्वानं निपतितनिर्झरासु मन्द्रैः
सम्मूर्च्छन् प्रतिनिनदैरधित्यकासु ।
उद्ग्रीवैर्घनरवशङ्कया मयूरैः
सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम् ॥ २२ ॥
सम्भिन्नामविरलपातिभिर्मयूखै-
र्नीलानां भृशमुपमेखलं मणीनाम् ।
विच्छिन्नामिव वनिता नभोऽन्तराले
वप्राभ्रःस्तुतिमवलोकयाम्बभूवुः ॥ २३ ॥

उत्सङ्ग इति । महाद्रेः उत्सङ्गे मूर्ध्नि विषये यत् समविषमं समं च विषमं च निम्नोन्नतं तस्मिन् । इन्द्रैकवद्भावः । वियदभिपातलाघवेन गगनसञ्चारपाटवेन समम् एकरूपम् आरोहावरोहरहितम् इत्यर्थः । क्रान्तानां गच्छतां तुरङ्गमाणां खुरपदवो खुरपङ्क्तिः उपनदि नदीसमीपे । "अव्ययीभावश्च" इति नपुंसकत्वात् ह्रस्वत्वम् । सैकतेषु आमूलात् मूलम् आरभ्य आदित आरभ्य इति यावत् । समग्रस्य भावः सामग्री साकल्यं भावे ष्यञ् ङीप् । लेभे । सैकतात् अन्यत्र निम्नेषु गगनचारेण समग्रदेशवत् विषमे खुरस्पर्शाभावात् विच्छिन्ना खुरसरणिः । सैकतेषु तु सर्वत्र समन्तात् अविच्छिन्ना इत्यर्थः ॥ २१ ॥

सध्वानमिति । सध्वानं सशब्दं निपतिताः निर्झराः प्रवाहाः यासु तासु । "प्रवाहो निर्झरो झरः" इत्यमरः । अधित्यकासु नगोर्ध्वभूमिषु । "भूमिरूर्ध्वमधित्यका" इत्यमरः । "उपाधिभ्याम्" इत्यादिना तयकन्प्रत्ययः । मन्द्रैः गम्भीरैः । "कलो मन्द्रस्तु गम्भीरे" इत्यमरः । प्रतिनिनदैः प्रतिध्वानैः सम्मूर्च्छन् वर्द्धमानः रथानां ध्वनिः घनरवशङ्कया मेघगर्जितभ्रमेण इति भ्रान्तिमदलङ्कारः । उद्ग्रीवैः मयूरैः सोत्कण्ठम् उपशुश्रुवे उपश्रुतः । शृणोतेः कर्मणि लिट् ॥ २२ ॥

आसन्नद्विपपदवीमदानिलाय
क्रुध्यन्तो धियमवमत्य धूर्गतानाम् ।
सव्याजं निजकरिणीभिरात्तचित्ताः
प्रस्थानं सुरकरिणः कथञ्चिदीषुः ॥ २४ ॥
नीरन्ध्रं पथिषु रजो रथाङ्गनुन्नं
पर्य्यस्यत् नवसलिलारुणं वहन्ती ।
आतेने वनगहनानि वाहिनी सा
घर्मान्तक्षुभितजलेव जह्नुकन्या ॥ २५ ॥

सन्निन्नामिति । अविरलपातिभिः निरन्तरप्रसारिभिः उपमेखलं मेखलातटेषु इत्यर्थः । "अथ मेखला श्रोणिस्थानेऽद्रिकटके कटिबन्धेऽसिबन्धने" इति यादवः । नोलानां मणीनां मयूखैः भृशं सन्निन्नाम् एकीभूताम् अतएव नभोऽन्तराले विच्छिन्नाम् इव स्थिताम् इति उत्प्रेक्षा । वप्राभ्रःस्रुतिं वप्रोदकधारां वनिताः अवलोकयाम्बभूवुः । वप्राभ्रःस्रुतेः स्वधवलिमत्यागेन इन्द्रनोलानां नोलिमखीकाररूपतद्गुणोत्यापिता विच्छेदोत्प्रेक्षा इति तयोः अङ्गाङ्गिभावेन सङ्करः । तेन च नैलप्रविच्छेदभ्रमरूपः भ्रान्तिमान् व्यज्यते ॥ २३

आसन्नेति । धुरं गताः तेषां धूर्गतानां नियन्तृणां धियम् अवमत्य अगणयित्वा अवज्ञाय इति यावत् आसन्नायां द्विपपदव्यां वनगजमार्गे यः मदानिलः तस्मै क्रुध्यन्तः तं प्रति कुप्यन्तः । "क्रुधद्रुह" इत्यादिना सम्प्रदानत्वात् चतुर्थी । सव्याजं सकपटं निजकरिणीभिः आत्तचित्ताः आकृष्टचित्ताः सुरकरिणः देवनागाः प्रस्थानं गमनं कथञ्चित् कष्टेन ईषुः अभिलेषुः ॥ २४ ॥

नीरन्ध्रमिति । नीरन्ध्रं सान्द्रं पथिषु रथाङ्गैः चक्रैः नुन्नं प्रेरितम् । "नुत्तनुन्नास्तनिष्टप्तविद्धत्तिप्तेरिताः समाः" इत्यमरः । पर्य्यस्यत् प्रसरत् नवसलिलम् इव अरुणं रजः वहन्ती सा वाहिनी सेना घर्मान्ते प्रावृषि क्षुभितजला कलुषोदका इत्यर्थः । जह्नुकन्या गङ्गा इव वनानि फलकुसुमप्रधानानि गहनानि जीर्णानि च तानि च तानि वनगहनानि आतेने व्यानशे । अत्र समासगतवाक्यगतोपमयोः अङ्गाङ्गिभावेन सङ्करः ॥ २५ ॥

सम्भोगचन्दनगहनामधोपगङ्गं
बिभ्राणां ज्वलितमणीनि सैकतानि ।
अध्यूषुश्च्युतकुसुमाचितां सहाया
वृत्रारेरविरलशाद्वलां धरित्रीम् ॥ २६ ॥
भूभर्त्तुः समधिकमादधे तदोर्व्याः
श्रीमत्तां हरिसखवाहिनीनिवेशः ।
संसक्तौ किममुलभं महोदयानाम्
उच्छ्रायं नयति यदृच्छयापि योगः ॥ २७ ॥
सामोदाः कुसुमतरुश्रियो विविक्ताः
सम्पत्तिः किसलयशालिनो लतानाम् ।

सम्भोगेति । अथ वृत्रारेः शक्रस्य सहायाः सचिवाः गन्धर्व्वाः उपगङ्गं गङ्गासमीपे । अव्ययीभावस्य नपुंसकत्वात् ह्रस्वत्वम् । सम्भोगचन्दनगहनाम् उपभोगयोग्यवनां ज्वलिताः मणयः येषु तानि सैकतानि बिभ्राणाम् । भृञः कर्त्तरि लटः शानच् । च्युतैः स्वयं पतितैः कुसुमैः आचितां व्याप्ताम् अविरलाः सान्द्राः शाद्वलाः शादप्रायप्रदेशाः यस्यां सा तां धरित्रीम् अध्यूषुः अधितस्थुः । वसतेर्यजादित्वात् सम्प्रसारणम् । अत्र धरित्रीविशेषणार्थानाम् अधिवासहेतुत्वात् अनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २६ ॥

भूभर्त्तुरिति । तदा हरिसखवाहिनीनिवेशः गन्धर्वसेनाशिविरम् । "निवेशः शिविरोद्वाहविन्यासेषु प्रकीर्त्तितः" इति शाश्वतः । भूभर्त्तुः पर्वतस्य उर्व्याः समधिकं पूर्वस्मात् अभ्यधिकं यथा तथा श्रीमत्तां श्रियम् इत्यर्थः । आदधे जनयामास । तथा—महोदयानां महात्मनां संसक्तौ सम्यक्सम्बन्धे "संभक्तौ" इति पाठे तु सम्यक्सेवायां किम् असुलभं ? न किञ्चित् दुर्लभम् इत्यर्थः । यतः यदृच्छया दैवात् योगः अपि उच्छ्रायम् उत्कर्षं नयति । अत्र प्रकृतयदृच्छया योगस्य उत्कर्षाभिधानादप्राकृतभक्तियोगस्य उत्कर्षाधायकत्वे कैमुतिकन्यायेन अर्थापत्तिरिति प्राकरणिकात् अप्राकरणिकरूपार्थापत्तिरलङ्कारः । तदुक्तम्—"एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा पतेत् । कैमुत्येन यतः सा स्यादर्थापत्तिरलङ्क्रिया ॥" इति ॥ २७ ॥

सामोदा इति । सामोदाः समीरभाः कुसुमप्रधानाः तरवः । शाक-

साफल्यं ययुरमराङ्गनोपभुक्ताः
सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥
क्लान्तोऽपि त्रिदशवधूजनः पुरस्ता-
ल्लीनाहिश्वसितविलोलपल्लवानाम् ।
सेव्यानां हतविनयैरिवाहृतानां
सम्पर्कं परिहरति स्म चन्दनानाम् ॥ २९ ॥
उत्सृष्टध्वजकुथकङ्कटा धरित्री-
मानीता विदितनयैः श्रमं विनेतुम् ।
आचित्रद्रुमगहना युगान्तवातैः
पर्य्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥

पार्थिवादिषु द्रष्टव्यः। तेषां श्रियः समृद्धयः विविक्ताः विजनप्रदेशाः। "विविक्तविजनच्छन्ननिःशलाकास्तथा रहः" इत्यमरः। किशलयशालिनो लतानां नवपल्लवयुतवल्लीनां सम्पत्तिः एताः अमराङ्गनोपभुक्ताः सत्यः साफल्यं ययुः। तथाहि—यया लक्ष्म्या करणेन परेषाम् उपकुरुते लक्ष्मीवान् इति शेषः। सा लक्ष्मीः नान्येति भावः। परेषामित्यत्र "अनुकरोति भगवतो नारायणस्य" इत्यादिवत् क्रियायोगे हि सम्बन्धसामान्ये षष्ठी ॥ २८ ॥

क्लान्त इति। क्लान्तः अपि त्रिदशवधूजनः पुरस्तात् अग्रे लीनानां संश्रितानाम् अहीनां श्वसितैः निःश्वासैः विलोलाः पल्लवाः येषां तेषां चन्दनानां सम्पर्कं, हतविनयैः दुर्जनैः खलैः आहृतानां संवृतानां सेव्यानां प्रभूणां सम्पर्कम् इव परिहरति स्म। दुष्टवद्दुष्टसंसृष्टाः गुणाढ्या अपि त्याज्या इति भावः ॥ २९ ॥

उत्सृष्टेति। उत्सृष्टाः आचित्राः ध्वजाः कुथाः आस्तरणानि कङ्कटाः तनुत्राणानि च येभ्यः ते। "प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः" इत्यमरः। विदितनयैः शिक्षाभिज्ञैः यन्तृभिः श्रमं विनेतुं क्लमम् अपनेतुं धरित्रीम् आनीताः निवेश्यमाना इत्यर्थः। द्विपाः युगान्तवातैः आचित्राणि उद्भतानि द्रुमाणां गहनानि वनानि येभ्यः ते पर्य्यस्ताः विपर्य्यासिताः गिरय इव विरेजुः शुशुभिरे ॥ ३० ॥

प्रस्थानश्रमजनितां विहाय निद्रा-
मासुक्ते गजपतिना सदानपङ्के ।
शय्यान्ते कुलमलिनां क्षणं विलीनं
संरम्भच्युतमिव शृङ्खलं चकाशे ॥ ३१ ॥
आयस्तः सुरसरिदोघरुद्धवर्त्मा
सम्प्राप्तुं वनगजदानगन्धि रोधः ।
मूर्द्धानं निहितशिताङ्कुशं विधुन्वन्
यन्तारं न विगणयाञ्चकार नागः ॥ ३२ ॥
आरोढुः समवनतस्य पीतशेषे
साशङ्कं पयसि समीरिते करेण ।
सम्मार्जन्नरुणमदस्रुती कपोलौ
सस्यन्दे मद इव शीकरः करेणोः ॥ ३३ ॥

प्रस्थानेति । गजपतिना प्रस्थानश्रमेण गमनक्लेशेन जनितां निद्रां विहाय आसुक्ते अतएव सदानपङ्के गजमदयुक्ते शय्यान्ते शयनीयप्रदेशे क्षणं विलीनं लग्नम् अलिनां कुलं संरम्भेण उत्थानसम्भ्रमेण च्युतं भ्रष्टं शृङ्खलं निगड़म् इव इत्युत्प्रेक्षा । "अथ शृङ्खले । अन्धुको निगड़ोऽस्त्री स्यात्" इत्यमरः । चकाशे शुशुभे ॥ ३१ ॥

आयस्त इति । वनगजदानस्य गन्धः अस्य अस्ति इति तथोक्तं रोधः परकूलमित्यर्थः । सम्प्राप्तुं गन्तुम् आयस्तः उत्सुकः प्रयत्नं कुर्वाणः इत्यर्थः । "यसु प्रयत्ने" इति धातोः कर्त्तरि क्तः । किन्तु सुरसरिदोघेण गङ्गाप्रवाहेण रुद्धं वर्त्म यस्य सः । नागः गजः; निहितः दत्तः शितः तीक्ष्णः अङ्कुशः यस्मिन् । "अङ्कुशोऽस्त्री स्त्रियां स्त्रियाम्" इत्यमरः । तं मूर्द्धानं विधुन्वन् रोषादिति भावः । यन्तारं न विगणयाञ्चकार न विगणयामास ॥ ३२ ॥

आरोढ़रिति । समवनतस्य जलपानार्थम् आनतपूर्वकायस्य करेणोः गजस्य । "करेणुरिभ्यां स्त्रो नेभे" इत्यमरः । करेण पीतस्य शेषे पयसि आरोढ़ुः हस्तिपकात् साशङ्कं सभयं समीरिते क्षिप्ते सति इत्यर्थः । शीकरः अम्बुकणः अरुणे मदस्रुती मदधारे ययोः तौ कपोलौ सम्मार्जन्

आघ्राय क्षणमतितृष्यतापि रोषा-
दुत्तीरं निहितविवृत्तलोचनेन।
सम्पृक्तं वनकरिणां मदाम्बुसेकै-
र्नाचेमे हिममपि वारि वारणेन ॥ ३४ ॥
प्रस्रोतन्मदसुरभौणि निम्नगायाः
क्रीड़न्तो गजपतयः पयांसि कृत्वा।
किञ्जल्कव्यवहिततास्रदानलेखै-
रुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ३५ ॥
आकीर्णं बलरजसा घनारुणेन
प्रक्षोभैः सपदि तरङ्गितं तटेषु।
मातङ्गोन्मथितसरोजरेणुपिङ्गं
माञ्जिष्ठं वसनमिवाम्बु निर्बभासे ॥ ३६ ॥

प्रमृजन्। "सृजेरजादौ संक्रमे विभाषाद्विर्वक्तव्या" इति द्वित्वः। मद इव सस्यन्दे सुस्राव। मदसम्पृक्तस्य मदसादृश्यात् मदोपमा ॥ ३३ ॥

आघ्रायेति। अतितृष्यता अपि अति पिपासता अपि क्षणम् आघ्राय रोषात् उत्तीरं परतीरे। विभक्त्यर्थे अव्ययीभावः। निहिते विवृत्ते घूर्णिते लोचने यस्य तेन प्रतिगजदिदृक्षया इति भावः। वारणेन हिमं शीतलम् अपि वनकरिणां मदाम्बुसेकैः दानधाराभिः सम्पृक्तं वारि न आचेमे न पीतम्। "चमु अदने" इति धातोः कर्मणि लिट्॥ ३४ ॥

प्रस्रोतदिति। क्रीड़न्तः विहरन्तः गजपतयः निम्नगायाः गङ्गायाः पयांसि प्रस्रोतद्भिः चरद्भिः मदैः सुरभौणि कृत्वा किञ्जल्कैः केसरैः व्यवहिताः तिरोहिताः ताम्राः ताम्रवर्णाः दानलेखाः मदराजयः येषु तैः अतएव सरसिजगन्धिभिः कपोलैः उपलक्षिताः सन्तः उत्तेरुः निर्जग्मुः। अत्र मदसरसिजगन्धयोः समयोः विनिमयोक्त्या समपरिवृत्तिरलङ्कारः। तेन च गजानां निम्नगायाश्च परिमलव्यत्ययान्तरसंरम्भो व्यज्यते ॥ ३५ ॥

आकीर्णमिति। घनारुणेन सान्द्रलोहितेन। विशेषणसमासः। बलरजसा सेनापरागेण आकीर्णं सपदि प्रक्षोभैः आलोड़नैः तटेषु तीरेषु तरङ्गितं सञ्जाततरङ्गम् तारकादित्वात् इतच्। यद्वा तरङ्गवत् कृतं मत्वन्तात् "तत्करोति" इति णिचि कर्मणि क्तः, णाविष्ठवद्भावात् मतुपो

श्रीमद्भिर्नियमितकन्धरापरान्तैः
संसक्तैरगुरुवनेषु साङ्गहारम् ।
सम्प्रापे निसृतमदाम्बुभिर्गजेन्द्रैः
प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ ३७ ॥
निःशेषं प्रशमितरेणु वारणानां
स्रोतोभिर्मदजलमुज्झतामजस्रम् ।
आमोदं व्यवहितभूरिपुष्पगन्धो
भिन्नैलासुरभिमुवाह गन्धवाहः ॥ ३८ ॥
सादृश्यं दधति गभीरमेघघोषै-
रुन्निद्रक्षुभितमृगाधिपश्रुतानि ।

लुक् । तथा मातङ्गैः उन्मथितानां लुलितानां सरोजानां रेणुभिः पिङ्गं पिशङ्गम् अम्बु माञ्जिष्ठेन महारङ्गेन आरक्तं माञ्जिष्ठं वसनम् इव निर्बभासे । "तेन रक्तम्" इति अण् । "माञ्जिष्ठम्" इत्यत्र "कौशेयम्" इति वा पाठे 'कोशाड्ढञ्' इति कोशशब्दात् ढञ् । "कौशेयं कृमिकोशोत्थम्" इत्यमरः ॥ ३६ ॥

श्रीमद्भिरिति । श्रीमद्भिः शोभावद्भिः नियमिताः कन्धराः अपरान्ताः चरमपादाग्राणि च येषां तैः । "अपरः पश्चिमः पादः" इति वैजयन्ती । अगुरुवनेषु साङ्गहारं साङ्गविक्षेपं यथा तथा संसक्तैः निःसृतानि प्रसृतानि मदाम्बूनि येषां तैः गजेन्द्रैः प्रस्यन्दिनः जलस्राविनः प्रचलिताः ये गण्डशैलाः च्युतोपलाः तेषां शोभा सम्प्रापे प्राप्ता । कर्मणि लिट् । "गण्डशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः । अत्र अन्यस्य अन्यशोभाप्राप्यसम्भवात् तत्सदृशी शोभा इति प्रतिबिम्बत्वाक्षेपात् निदर्शनालङ्कारः ॥ ३७ ॥

निःशेषमिति । गन्धं वहति इति गन्धवाहः वायुः । कर्मण्यण् । निःशेषं यथा तथा प्रशमितः रेणुः येन तत् मदजलं स्रोतोभिः मदनाडीभिः अजस्रम् उज्झतां वर्षतां वारणानां सम्बन्धिनं व्यवहितः तिरस्कृतः भूरिः बहुलः पुष्पगन्धः येन सः भिन्नाः फुल्लाः एलाः लताविशेषाः । "पृथ्वीका चन्द्रबालैला" इत्यमरः । तत्पुष्पाणि च एलाः । "पुष्पे जातीप्रभृतयः स्वलिङ्गा ह्रीबयः फले" इत्यमरः । भिन्नैलावत् सुरभिं सुगन्धिं घ्राणेन्द्रियतर्पणम् इत्युपमा । आमोदं परिमलम् उवाह वहति स्म ॥ ३८ ॥

आतेनुश्चकितचकोरनीलकण्ठान्
कच्छान्तानमरमहेभहृंहितानि ॥ ३९ ॥
शाखावसक्तकमनीयपरिच्छदाना-
मध्वश्रमातुरबधूजनसेवितानाम् ।
जज्ञे निवेशनविभागपरिष्कृतानां
लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥ ४० ॥

इति * * * किरातार्जुनीये महाकाव्ये
सप्तमः सर्गः ॥ ७ ॥

सादृश्यमिति। गभीरैः मेघघोषैः सान्द्रगर्जितैः सादृश्यं दधति इत्युपमा। दधातेः शतृप्रत्ययः "वा नपुंसकस्य" इति विकल्पान्नुमभावः। उन्निद्राः हृंहित श्रवणात् एव प्रबुद्धाः क्षुभिताः संरब्धाश्च ये मृगाधिपाः तैः श्रुतानि आकर्णितानि न तु प्रबुद्धानि इति भावः। अमरमहेभहृंहितानि महान्तश्च ते इभाः गजाश्च इति महेभाः अमराणां महेभाः तेषां हृंहितानि सुरगजगर्जितानि कच्छान्तान् अनूपप्रदेशान्। "जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः" इत्यमरः। चकिताः गर्जितशङ्कया सम्भ्रान्ताः चकोराः पक्षिविशेषाः नीलकण्ठाः मयूराश्च येषु तान् तथाभूतान् आतेनुः। भ्रान्तिमदलङ्कारः ॥ ३९

शाखेति। परिच्छाद्यते अनेन इति परिच्छदः परिकरः वसनाभरणादिः। "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्ययः, "छादेर्घेर्द्व्युपसर्गस्य" इति ह्रस्वत्वम्। शाखासु अवसक्ताः कमनीयाः परिच्छदाः येषां तेषाम् अध्वनि श्रमः तेन आतुरैः पीडितैः बधूजनैः सेवितानां निवेशनविभागैः आवसतिकावच्छेदैः परिष्कृतानाम् अलङ्कृतानाम्। "संपर्य्युपेभ्यः" इत्यादिना सुट्। वनपादपानाम् अरण्यवृक्षाणाम् पुरे यत् उपवनं कृत्रिमवनं तत्र जाता पुरोपवनजा लक्ष्मीः शोभा जज्ञे जाता। अत्र अन्योन्यलक्ष्मीसम्बन्धासम्भवात् तत्सदृशी इति सादृश्याक्षेपात् असम्भवे तद्वस्तुसम्बन्धा इयं निदर्शना। वसन्ततिलकावृत्तम्। "उक्ता वसन्ततिलका तभजा जगौ गः" इति लक्षणात् ॥ ४० ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायां सप्तमः सर्गः ॥ ७ ॥

———

अष्टमः सर्गः ।

—:*:—

अथ स्वमायाकृतमन्दिरोज्ज्वलं
ज्वलन्मणि व्योमसदां सनातनम् ।
सुराङ्गना गोपतिचापगोपुरं
पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥
यथायथं ताः सहिता नभश्चरैः
प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विश्रन्त्यो वनजायतेक्षणाः
क्षणद्युतीनां दधुरेकरूपताम् ॥ २ ॥

अथेति । अथ निवेशनानन्तरं सुराङ्गनाः अप्सरसः स्वमायया स्वेच्छाविशेषेण कृतैः निर्मितैः मन्दिरैः उज्ज्वलं दीप्तं, ज्वलन्तः मणयः यस्मिन् तत् व्योमसदां गन्धर्वाणां सनातनं सदातनम् । "सायं चिरम्" इत्यादिना भावार्थे ट्युप्रत्ययः । गौः वज्रं तत्पतिः इन्द्रः तच्चापवर्णानि गोपुराणि यस्य तत् तथोक्तम् इत्युपमा । पुरं नगरं वनानां विजिहीर्षया वनानि विहर्त्तुम् इच्छया । कर्मणि षष्ठी । जहुः तत्यजुः । जहातेर्लिट् । अत्र ज्वलं ज्वलत् इति पुरं पुरम् इति च असकृदव्यञ्जनद्वयावृत्त्या छेकानुप्रासः । अन्यत् तदङ्गैपरीत्यात् वृत्त्यनुप्रासः इति तयोः उपमायाश्च संसृष्टिः । अस्मिन् सर्गे वंशस्थं वृत्तम् । "जतौ तु वंशस्थमुदीरितं जरौ" इति लक्षणात् ॥ १ ॥

यथायथमिति। यथायथं यथास्वं स्वकीयम् अनतिक्रम्य इत्यर्थः । "यथास्वं तु यथायथम्" इत्यमरः । नपुंसकनिपातनन्तु ङस्यर्थम् । नभश्चरैः गन्धर्वैः मेघैश्च सहिताः प्रभाभिः स्वदीप्तिभिः उद्भासिताः शैलवीरुधः याभिः ताः पूर्वोक्ताः वनजायतेक्षणाः पद्मलोचनाः स्त्रियः वनं विश्रन्त्यः क्षणं द्युतिः यासां तासां क्षणद्युतीनां विद्युताम् एकरूपतां समानरूपतां दधुः । मुहुः मुहुरन्तराले तासां स्फुरणस्य क्षणिकत्वादिति भावः । श्लेषानुप्राणिता इयम् उपमा, श्लेषत्वमिति केचित् । उभयथा अपि अनुप्रासेन संसर्गः ॥२॥

निवृत्तवृत्तोरुपयोधरक्रमः
प्रवृत्तनिर्झादिविभूषणारवः।
नितम्बिनीनां भृशमादधे धृतिं
नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥
घनानि कामं कुसुमानि बिभ्रतः
करप्रचेयान्यपहाय शाखिनः।
पुरोऽभिसस्रे सुरसुन्दरीजनै-
र्यथोत्तरेच्छा हि गुणेषु कामिनः ॥ ४ ॥
तनूरलक्तारुणपाणिपल्लवाः
स्फुरन्नखांशूत्करमञ्जरीभृतः।
विलासिनीबाहुलता वनालयो
विलेपनामोदहृताः सिषेविरे ॥ ५ ॥

निवृत्तेति। निवृत्तः गतः वृत्तस्य वर्तुलस्य उरुपयोधरस्य क्रमः यस्मिन् सः पादप्रचेपेषु विश्रान्तिसम्भवादिति भावः। किञ्च,प्रवृत्तः जातः निर्झादिविभूषणानां नूपुरादीनाम् आरवः यस्मिन् सः। अवनौ पृथिव्यां परिक्रमः सञ्चारः नितम्बिनीनां नभःप्रयाणात् भृशम् अधिकम्। "पञ्चमी विभक्ते" इति पञ्चमी। धृतिं सन्तोषम् आदधे। अत्र विशिष्टपरिक्रमस्य धृत्यादानहेतुत्वात् काव्यलिङ्गम् अलङ्कारः ॥ ३ ॥

घनानीति। घनानि सान्द्राणि न तु विरलानि करप्रचेयानि हस्तग्राह्याणि अनुच्चानि। "क्त्यैरधिकार्थवचने" इति तृतीयासमासः। कामं कुसुमानि बिभ्रतः नवकुसुमितान् शाखिनः तरून् अपहाय सुरसुन्दरीजनैः पुरः अग्रे अभिसस्रे अभिसृतम्। भावे लिट्। तथाहि—कामिनः गुणेषु अतिशयेषु विषये उत्तरम् उत्तरम्। वीप्सार्थे अव्ययीभावः। यथोत्तरम् इच्छा येषां ते यथोत्तरेच्छाः उत्तरोत्तराभिलाषुकाः हि। अत्र परिकरोत्थापितः अर्थान्तरन्यासः अलङ्कारः ॥ ४ ॥

तनूरिति। विलेपनामोदे: हृताः आकृष्टाः वनालयः वनभृङ्गाः तनूः क्षीणाः अलक्तैः अरुणाः पाणय एव पल्लवाः यासां ताः स्फुरन्तः नखांशूनाम् उत्कराः पुञ्जा एव मञ्जर्यः ताः बिभ्रति इति तथोक्ताः। क्विप्।

निपीयमानस्तवका शिलीमुखै-
रशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे बधूजनै-
रमन्ददष्टौष्ठकरावधूननम् ॥ ६ ॥
करौ धुनाना नवपल्लवाकृती
वृथा कृथा मानिनि मा परिश्रमम् ।
उपेयुषो कल्पलताभिशङ्कया
कथं न्वितस्त्रस्यति षट्पदावलिः ॥ ७ ॥

विलासिनीनां बाहव एव लताः, ताः सिषेविरे । अत्र समस्तवस्तुविषय-रूपकालङ्कारः, बाह्वयवानां लतावयवानां पल्लवादीनाम् अपि निरूपणात् इति ॥ ५ ॥

निपीयमानेति । शिलीमुखैः अलिभिः । "अलिबाणौ शिलीमुखौ" इत्यमरः । निपीयमानः स्तवकः गुच्छः यस्याः सा, चलाः बालपल्लवाः यस्याः सा अतएव अमन्दं दृढं दष्टः ओष्ठः यस्मिन् तं करावधूननं करकम्पनं तत् विडम्बयन्ती । स्तवकपानेन ओष्ठदंशनं पल्लवचलनेन करावधूननं च अनुकुर्वती इत्यर्थः । धूञः ल्यन्तात् ल्युट् । णिचि धूञ्-प्रीञोर्नुम् वक्तव्यः । अशोकयष्टिः अशोकशाखा इत्यर्थः, बधूजनैः दृष्टा । अत्र विडम्बयन्ती इति प्रस्तुताशोकशाखाविशेषणभूतोपमामहिम्ना अप्रस्तुतनायिकाप्रतीतेः समासोक्तिः उत्तिष्ठमानया एव उपमया अङ्गाङ्गिभावेन सङ्कीर्यते ॥ ६ ॥

अथ कश्चित् मधुकराक्रान्तां काश्चिदाह—करावितिं । मानपरिहारेण मधुपाश्रयणे तु न कश्चित् बाधः इति आशयेन सम्बोधयति—हे मानिनीति । नवपल्लवस्य आकृतिः इव आकृतिः ययोः इत्युपमा, तौ करौ धुनाना धूञः क्र्यादिकात् कर्त्तरि लटः शानच् । वृथा व्यर्थं परिश्रमं मा कृथा मा कुरुष्व । करोतेः आशीरर्थे माङि लुङ् । वृथात्वे हेतुम् आह—कल्पलताभिशङ्कया कल्पवल्लीभ्रमेण इति भ्रान्तिमदलङ्कारः । उपेयुषी उपगता षट्पदावलिः कथं नु इतः त्रस्यति बिभेति न त्रस्यति इव इत्यर्थः । "वा भ्राश" इत्यादिना विकल्पेन श्यन्प्रत्ययः । अत्र कान्तापरिश्रमवैयर्थ्यरूपकार्य्यस्य षट्पदावलेः कल्पवल्लीभ्रमनिबन्धनत्रासरूपकारणसमर्थनात् कारणेन कार्य्यसमर्थनरूपः अर्थान्तरन्यासः भ्रान्तिमता अङ्गाङ्गिभावेन सङ्कीर्णः सन् उपमया संसृज्यते ॥ ७ ॥

जहीहि कोपं दयितोऽनुगम्यतां
पुरानुशेते तव चञ्चलं मनः।
इति प्रियं काञ्चिदुपैतुमिच्छतीं
पुरोऽनुनिन्ये निपुणः सखीजनः॥ ८॥
समुन्नतैः काशदुकूलशालिभिः
परिक्वणत्सारसपङ्क्तिमेखलैः।
प्रतीरदेशैः स्वकलत्रचारुभि-
र्विभूषिताः कुञ्जसमुद्रयोषितः॥ ९॥
विदूरपातेन भिदामुपेयुष-
श्चुताः प्रवाहादभितः प्रसारिणः।
प्रियाङ्कशौताः शुचिमौक्तिकत्विषो
वनप्रहासा इव वारिबिन्दवः॥ १०॥

अथ काचित् सखी काञ्चित् प्रणयकुपिताम् आह—जहीहीति। प्रियम् उपैतुं स्वयम् एव अनुसर्त्तुम् इच्छतीम्। "आच्छीनद्योर्नुम्" इति विकल्पात् नुमभावः। काञ्चित् नायिकां निपुणः चित्तज्ञः सखीजनः कोपं जहीहि त्यज। "आ च हौ" इति विकल्पात् इकारादेशः। दयितः अनुगम्यताम् अनुस्त्रियताम्। उभयथापि प्रार्थनायां लोट्। अन्यथा चञ्चलम् अस्थिरं तव मनः पुरा अनुशेते अग्रे अनुशयिष्यते अनुतप्स्यते इत्यर्थः। "यावत् पुरानिपातयोर्लट्" इति लट्। इति अनेन प्रकारेण पुरः पूर्वम् एव अनुनिन्ये प्रसादयामास॥ ८॥

अथ चतुर्भिः श्लोकैः कलापकम् आह—समुन्नतैरिति। समुन्नतैः काशानि अश्ववालकुसुमानि तानि दुकूलानि इव तैः शालन्ते इति तथोक्तैः। सारसपङ्क्तयः मेखलाः इव ताः परिक्वणन्त्यः येषु ते तैः स्वेषां कलत्राणि स्त्रीणां तद्वत् चारवः तैः। "कलत्रं स्त्रीणिभार्य्ययोः" इत्यमरः। प्रतीरदेशैः विभूषिताः तटप्रदेशैः भूषिताः कुञ्जसमुद्रयोषितः वननद्यः इत्यर्थः। अत्र तीरादीनां कलत्राद्युपम्योपमेयत्वात् योषिच्छब्दसामर्थ्याच्च नदीनां योषिदौपम्यं गम्यते॥ ९॥

विदूरेति। विदूरपातेन भिदां भेदम्। "षिद्भिदादिभ्योऽङ्"।

सखीजनं प्रेमगुरुकृतादरं
निरीक्षमाणा इव नम्रमूर्त्तयः ।
स्थिरद्विरेफाञ्जनशारितोदरै-
र्विसारिभिः पुष्पविलोचनैर्लताः ॥ ११ ॥
उपेयुषीणां वृहतीरधित्यकां
मनांसि जह्रुः सुरराजयोषिताम् ।
कपोलकाषैः करिणां मदारुणै-
रुपाहितश्यामरुचश्च चन्दनाः ॥ १२ ॥
॥ कलापकम् ॥
स्वगोचरे सत्यपि चित्तहारिणां
विलोभ्यमानाः प्रसवेन शाखिनाम् ।

उपेयुषः उपगतात् प्रवाहात् च्युताः, अत एव अभितः प्रसारिणः प्रसर्पन्तः इति प्रियायाः अङ्गः उत्सङ्गः इव शीताः शीतलाः शुचीनां मौक्तिकानां त्विष इव त्विषः येषां ते। किञ्च वनस्य प्रहासा इव स्थिता इत्युत्प्रेक्षा। वारिबिन्दवश्च। अत्र उपमयोः उभयोः उत्प्रेक्षायाश्च संसृष्टिः ॥१०

सखीति। द्वौ रेफौ वर्णविशेषौ येषां ते द्विरेफाः भ्रमरशब्देन तदर्थो लक्ष्यते। "द्व्यचरं मासमिति विदधाति" इति भाष्यकारः। स्थिराः निश्चलाः द्विरेफा एव अञ्जनानि तैः, शारितानि शबलीकृतानि उदराणि येषां तैः। "शारः शबलवातयोः" इति विश्वः। विसारिभिः विस्तृतैः पुष्पाणि एव विलोचनानि तैः प्रेम्णा गुरुकृतः आदरो यस्मिन् कर्मणि तत्। तथा सखीजनं निरीक्षमाणाः पश्यन्त इव स्थिताः। कुतः? नम्रमूर्त्तयः अवनताङ्ग्यः लताश्च। अत्र रूपकोत्प्रेक्षयोः सङ्करः ॥ ११ ॥

उपेयुषीणामिति। मदेन अरुणैः अव्यक्तरागैः। "अव्यक्तरागस्त्वरुणः" इत्यमरः। करिणां कपोलानां काषैः कषणैः उपाहितश्यामरुचः जनितकृष्णवर्णा इति तद्भूषणालङ्कारः। चन्दनाः मलयजाः "गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः। वृहतीः अधित्यकाः जङ्घाभूमीः उपेयुषीणां सुरराजयोषितां मनांसि जह्रुः। अत्र चतुःश्लोक्यां नद्यादीनां विशिष्टानाम् एव अप्सरोमनोहरणहेतुत्वोक्त्या काव्यलिङ्गम् उन्नेयम् ॥ १२ ॥

नभश्चराणामुपकर्त्तुमिच्छतां
प्रियाणि चक्रुः प्रणयेन योषितः ॥ १३ ॥
प्रयच्छतोच्चैः कुसुमानि मानिनो
विपक्षगोत्रं दयितेन लम्भिता।
न किञ्चिदूचे चरणेन केवलं
लिलेख बाष्पाकुललोचना भुवम् ॥ १४ ॥
प्रियेऽपरा यच्छति वाचमुन्मुखी
निबद्धदृष्टिः शिथिलाकुलोच्चया।
समादधे नांशुकमाहितं वृथा
विवेद पुष्पेषु न पाणिपल्लवम् ॥ १५ ॥

स्वगोचर इति। चित्तहारिणा मनोहरेण शाखिनां प्रसवेन पुष्पजातेन विलोभ्यमानाः आकृष्यमाणाः योषितः स्वगोचरे स्वविषये। स्वकरप्रचये सति अपि इत्यर्थः। प्रसवे इति शेषः। उपकर्त्तुम् परिचरितुम् इच्छतां नभश्चराणां गन्धर्वाणां प्रणयेन सहायहेतुना प्रियाणि चक्रुः। स्वकरग्राह्यम् अपि प्रसवं स्वकान्तप्रियार्थं तद्दीयमानम् एव अग्रहीषुः इत्यर्थः ॥ १३ ॥

प्रयच्छतेति। कुसुमानि प्रयच्छता ददता दयितेन उच्चैः उच्चैस्तरां विपक्षगोत्रं सपत्नीनामधेयं लम्भिता प्रापिता तत्रान्या आकृता इत्यर्थः। "नाम गोत्रं कुलं गोत्रम्" इति शाश्वतः। मानिनी अत एव न किञ्चित् ऊचे। कर्त्तरि लिट्। किन्तु केवलं बाष्पाकुललोचना सती चरणेन भुवं लिलेख। गोत्रस्खलनजनितेर्ष्यानिमित्तनिर्व्वेदादिति भावः। मानिनी अत एव न किञ्चित् ऊचे इति उक्तम्। तदुक्तं दशरूपके—तत्वाज्ञानापदोर्ष्यादेर्निर्वेदः स्वावमानना। तत्र चिन्ताश्रुनिश्वासवैवर्ण्येच्छासदीनता" इति ॥ १४ ॥

प्रिय इति। वाचं यच्छति ददति समालपति इत्यर्थः। दाणः शतृप्रत्ययः। "पाघ्रा" इत्यादिना यच्छादेशः। प्रिये निबद्धदृष्टिः अत एव उन्मुखी शिथिलः स्रथः आकुलः चलितश्च तादृशः उच्चयो नीविबन्धः यस्याः सा। "नारीकट्यंशुकग्रन्थौ नीविः स्यादुच्चयोऽस्त्रियाम्" इति मार्त्तण्डः। अपरा अन्या स्त्री अंशुकं न समादधे न बबन्ध। रागपारवश्यादिति भावः। पुष्पेषु वृथा व्यर्थम्। आहितम् आरोपितम् अस्थाने

सलीलमासक्तलतान्तभूषणं
समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीड़ं नुनुदे नितम्बिना
घनेन कश्चिज्जघनेन कान्तता ॥ १६ ॥
कलत्रभारेण विलोलनीविना
गलद्दुकूलस्तनशालिनोरसा ।
बलिव्यपायस्फुटरोमराजिना
निरायतत्वादुदरेण ताम्यता ॥ १७ ॥
विलम्बमानाकुलकेशपाशया
कयाचिदाविष्कृतबाहुमूलया ।

प्रसारितम् इत्यर्थः । पाणिपल्लवं च न विवेद । प्रियासक्तचित्तत्वात् इति भावः । एषा च प्रगल्भा नायिका । "पाणिपल्लवम्" इत्यत्र अन्यतरसाधकप्रमाणाभावात् उपमारूपकयोः सन्देहसङ्करः ॥ १५ ॥

सलीलमिति । आसक्ताः लताः पल्लवाः भूषणं यस्य तत् पल्लवैः सह ग्रथितम् इत्यर्थः । कुसुमावतंसकं पुष्पशेखरं कान्तदत्तम् इति भावः । सलीलं सविलासं समासजन्त्याः शिरसि प्रणिदधत्या । "दंशसञ्जस्वञ्जां शपि" इति नलोपः । कान्तया कश्चित् स्तनाभ्याम् उपपीड्य इति स्तनोपपीड़म् । "समस्याच्च" इत्यादिना णमुल्प्रत्ययः । नितम्बिना । प्रशंसायाम् इनिः । घनेन निविड़ेन जघनेन । "पश्चान्नितम्बः स्त्रीकट्याः श्रोणौ तु जघनं पुरः" इत्यमरः नुनुदे नुन्नः अंशुकातिरेकादिति भावः । एषा च प्रगल्भा एव ॥ १६ ॥

अथ युग्मेन आह—कलत्रेति । विलोलनीविना गात्रोन्नमनात् विश्लिष्टवस्त्रग्रन्थिना कलत्रभारेण श्रोणिभारेण "कलत्रं श्रोणिभार्ययोः" इत्यमरः । तथा गलत् स्रंसमानं दुकूलं याभ्यां ताभ्यां स्तनाभ्यां शालते इति तथोक्तेन उरसा । तथा वलिव्यपायेन भङ्गिनिवृत्त्या स्फुटा रोमराजिः यस्मिन् तेन निरायतत्वात् अपसारितत्वात् ताम्यता तनूभवता उदरेण च उपलक्षितया स्वभावोक्तिरलङ्कारः ॥ १७ ॥

विलम्बमानेति । विलम्बमानः विस्रंसमानः आकुलः विलुलितश्च

तरुप्रसूनान्यपदिश्य सादरं
मनोऽधिनाथस्य मनः समाददे ॥ १८ ॥
॥ युग्मम् ॥
व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ॥ १९ ॥
इमान्यमूनीत्यपवर्जिते शनै-
र्यथाभिरामं कुसुमाग्रपल्लवे ।
विहाय निःसारतयेव भूरुहान्
पदं वनश्रीर्वनितासु सन्दधे ॥ २० ॥

केशपाशः यस्याः तया आविष्कृतबाहुमूलया दर्शितकक्षप्रदेशया कयाचित् कान्तया तरुप्रसूनानि अपदिश्य प्रसूनग्रहणं व्याजीकृत्य इत्यर्थः "व्याजोपदेशो लक्ष्यं च" इत्यमरः । सादरं साभिलाषं मनोऽधिनाथस्य प्रियस्य मनः समाददे आचकर्षे । कर्मणि लिट् । सर्वाङ्गसौष्ठवदर्शनात् सद्योलग्नं प्रियमनः तत्र इति भावः । अत्र प्रियमनोहरणहेतुभिः कान्ताविशेषणपदार्थैः काव्यलिङ्गम् उत्तिष्ठमानं स्वभावोक्त्या सह अङ्गाङ्गिभावेन सङ्कीर्यते ॥ १८ ॥

व्यपोहितुमिति । उन्नतौ च पीवरौ च स्तनौ यस्याः सा उन्नतपीवरस्तनी । "स्वाङ्गाच्च" इत्यादिना ङीष् । काचित् लोचनतः स्वनेत्रात् पुष्पजं रजः परागं मुखानिलैः फूत्कारमारुतैः व्यपोहितुम् अपनेतुं अपारयन्तं किल अशक्नुवन्तं किल इति अलीके । वस्तुतः तदास्यसौरभलोभात् अपारयन्तम् इत्यर्थः । प्रियम् उन्मनाः उत्सुका सती अत एव पयोधरेण उरसि जघान । तत्कपटपरिज्ञानजन्यात् औत्सुक्यादिति भावः । हननस्थानत्वात् उरसि इति सप्तमी । इयञ्च प्रगल्भा एव ॥१९॥

इमानीति । यथाभिरामम् । वीप्सायाम् अव्ययीभावः । कुसुमानि अग्रपल्लवानि च कुसुमाग्रपल्लवं तस्मिन् । 'जातिः अप्राणिनाम्' इत्येकवद्भावात् नपुंसकत्वम् । इमानि अमूनि इति इत्थं निर्देशपूर्वकम् इत्यर्थः । इदमदसो सन्निकृष्टविप्रकृष्टार्थे । शनैः अपवर्जिते अपचिते सति वनश्रीः निःसारतया एव इति हेतूत्प्रेक्षा । भूरुहान् तरून् विहाय

प्रवालभङ्गारुणपाणिपल्लवः
परागपाण्डूकृतपीवरस्तनः ।
महीरुहः पुष्पसुगन्धिराददे
वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ २१ ॥
वरोरुभिर्वारणहस्तपीवरै-
श्चिराय खिन्नान् नवपल्लवश्रियः ।
समेऽपि यातुं चरणाननीश्वरा-
न्मदादिव प्रस्खलतः पदे पदे ॥ २२ ॥
विसारिकाञ्चीमणिरश्मिलब्धया
मनोहरोच्छ्रायनितम्बशोभया ।

वनितासु पदं सन्दधे । अत्र वनितागतायाः पुष्पप्रसाधनसभाव्यमानायाः लक्ष्म्याः विषयभूतायाः निगरणेन विषयेण वनश्रियः वनितागतत्वोत्प्रेक्षया सम्बन्धे असम्बन्धरूपा भेदेऽभेदरूपा वा अतिशयोक्तिरलङ्कारः । "विषयस्यानुपादानात् विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात् कविप्रौढोक्तिजीविता ॥" इति लक्षणात् उत्प्रेक्षाङ्गत्वमस्याः ॥ २० ॥

प्रवालेति । प्रवालभङ्गेन पल्लववलयेन अरुणः पाणिपल्लवः यस्य तद्वरस्रक्त्वनात् इत्यर्थः । परागेण पुष्परजसा पाण्डूकृतौ पीवरौ स्तनौ यस्य सः पुष्पैः सुगन्धिः सुरभिः अङ्गनाजनः महीरुहः वृक्षजातात् वपुर्गुणस्य स्वदेहगुणस्य उच्छ्रायः पाणिपल्लवारुण्यादेः यः उत्कर्षः तम् आददे लब्धवान् इव इति उत्प्रेक्षा । वस्तुतस्तु स्वाभाविक एव प्रवालभङ्गादिभिः अभिव्यज्यते इति भावः । उत्कृष्टः आय "उच्छ्राये" इति घञन्तेन प्रादिसमासः । न तु उपसृष्टात् घञ्प्रत्ययः, "श्रिणीभुवोऽनुपसर्गे" इति प्रतिषेधात् ॥ २१ ॥

पञ्चभिः कुलकम् आह—वरोरुभिरित्यादिभिः । अनुसानु सानुषु यत् वर्त्म ततः सकाशात् गुरुणा खेदेन मन्थरम् अलसं विनियंतोनां निर्गच्छन्तोनां सुराङ्गनानां सम्बन्धिभिः वारणहस्तपीवरैः करिकरस्थूलैः वरारुभ ते ऊरवश्च इति तैः चिराय खिन्नान् । किञ्च नवपल्लवानां श्रीः इव श्रीः येषां तान् तद्वत् मृदून् इत्यर्थः । अत एव समे समस्थले अपि किं विषम इति भावः । यातुं गन्तुम् अनीश्वरान् अशक्तान् अत एव मदात् इव पदे पदे । वीप्सायां द्विर्भावः । प्रस्खलतः चरणान् । मदात् इव इति उपमा ॥ २२ ॥

स्थितानि जित्वा नवसैकतद्युतिं
श्रमातिरिक्तैर्जघनानि गौरवैः ॥ २३ ॥
समुच्छ्वसत्पङ्कजकोशकोमलै-
रुपाहितश्रोणिपनोवि नाभिभिः।
दधन्ति मध्येषु वलीविभङ्गिषु
स्तनातिभारादुदराणि नम्रताम् ॥ २४ ॥
समानकान्तीनि तुषारभूषणैः
सरोरुहैरस्फुटपत्रपङ्क्तिभिः।
चितानि घर्माम्बुकणैः समन्ततो
मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥

विसारोति। विसारिभिः काञ्चीमणिरश्मिभिः लब्धया तज्जनितया इत्यर्थः, मनोहरः उच्छ्रायः उत्सेधः येषां तेषां नितम्बानां शोभया करणेन नवसैकतानां द्युतिं शोभां जित्वा स्थितानि तत्तुल्यानि इत्यर्थः। अत एव उपमालङ्कारः। क्रमेण अतिरिक्तैः अतिशयितैः गौरवैः गुरुत्वैः उपलक्षितानि नितरां भारायमाणानि इत्यर्थः। जघनानि च। उच्छ्रायः व्याख्यातः ॥ २३ ॥

समुच्छ्वसदिति। समुच्छ्वसत्पङ्कजकोशकोमलैः उल्लसत्कमलमुकुलैः इव मुग्धैः इति उपमा। नाभिभिः प्रतारिकाख्यैः। "अथ नाभिस्तु जन्तूनां यस्य संज्ञा प्रतारिका" इति केशवः। पुंलिङ्गतायां तु कविः एव प्रमाणम्। उपनोवि नोविसमीपे उपाहितश्रोणि जनितशोभानि तथा वलीविभङ्गिषु ऊर्मिमत्सु मध्येषु जघनस्थलेषु स्तनातिभारात् नम्रतां दधन्ति विभ्राणानि। "वा नपुंसकस्य" इति विकल्पे नुमागमः। उदराणि च ॥ २४ ॥

समानेति। किञ्च घर्माम्बुकणैः स्वेदोदकबिन्दुभिः समन्ततः चितानि व्याप्तानि अनुत्फुल्लविलोचनानि अविकसदक्षीणि अत एव तुषारभूषणैः शीकरपरिहृतैः। "तुषारो हिमशीकरौ" इत्यमरः। अस्फुटपत्रपङ्क्तिभिः अविकचदलावलिभिः। "व्याकोशविकचस्फुटाः" इत्यमरः। सरोरुहैः समानकान्तीनि। इति उपमा। मुखानि च ॥ २५ ॥

विनिर्य्यतीनां गुरुखेदमन्थरं
सुराङ्गनानामनुसानु वर्त्मनः ।
सविस्मयं रूपयतो नभश्चरान्
विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥

॥ कुलकम् ॥

अथ स्फुरन्मीनविधूतपङ्कजा
विपङ्कतीरस्खलितोर्म्मिसंहतिः ।
पयोऽवगाढुं कलहंसनादिनी
समाजुहावेव बधूः सुरापगा ॥ २७ ॥
प्रशान्तघर्माभिभवः शनैर्वि वान्
विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकर-
स्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥

विनिर्य्यतीनामिति । सविस्मयं रूपयतः पूर्वोक्तचरणादीनि वर्णयतः नभश्चरान् गन्धर्वान् तत् पूर्वम् इव तत् तव प्रथमं यथा इति उत्प्रेक्षा । ईक्षणादरः आलोकनकौतुकं विवेश । पूर्वार्द्धं व्याख्यातम् । अत्र कुलके स्वभावोक्तिः उत्प्रेक्षाङ्गम् ॥ २६ ॥

सम्प्रति सलिलक्रीड़ावर्णनम् आरभते—अथेति । अथ पुष्पावचयानन्तरं स्फुरद्भिः चलद्भिः मीनैः विधूतपङ्कजा इति सदृशत्वात् मुखवीक्षणोक्तिः । विपङ्कं पङ्करहितं विहारयोग्यम् इति यावत् । तत्र तीरे स्खलिता विचलिता ऊर्मिसंहतिः यस्याः सा इति हस्तसंज्ञोक्तिः । कलहंसनादिनी कादम्बशब्दवती इति वाग्व्यापारोक्तिः । अत एव सुरापगा गङ्गा बधूः अप्सरसः पयः अवगाढुम् अवगाहितुम् । गाहेः उदित्त्वात् इडिकल्पः । समाजुहाव इव आकारयामास इव इति उत्प्रेक्षा । "ह्वृतिराकारणाह्वानम्" इत्यमरः । ह्वयतेर्लिट् । "अभ्यस्तस्य च" इति सम्प्रसारणम् ॥ २७ ॥

प्रशान्तेति । प्रशान्तघर्माभिभवः प्रशान्तोष्णबाधः । "वा दान्तशान्त" इत्यादिना निपातनात् साधुः । शनैः विवान् मन्दं वहन् । वातेः शतृ-

गतैः सहावैः कलहंसविक्रमं
कलत्रभारैः पुलिनं नितम्बिभिः।
मुखैः सरोजानि च दीर्घलोचनैः
सुरस्त्रियः साम्यगुणान्निरासिरे ॥२९॥
विभिन्नपर्य्यन्तगमीनषङ्क्त्रयः
पुरो विगाढ़ाः सखिभिर्मरुत्वतः।
कथञ्चिदापः सुरसुन्दरीजनैः
सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥३०॥
विगाढमात्रे रमणीभिरम्भसि
प्रयत्नसंवाहितपीवरोरुभिः।

प्रत्ययः। परिमृष्टपङ्कजः। पद्मगन्धी इत्यर्थः। आत्तप्रोकरः। कृतः? तरङ्गमालानाम् अन्तरे मध्ये गोचरः स्थानं यस्य सः अनिलः विलासिनीभ्यः भुजावलम्बनं दत्तो इव इति उत्प्रेक्षा। विग्निष्टवायु-सम्पर्कात् तथा उच्छ्वसुः इत्यर्थः ॥ २८ ॥

गतैरिति। सुरस्त्रियः अप्सरसः सहावैः सविलासैः गतैः गतिभिः। नपुंसके भावे क्तः। कलहंसानां विक्रमं गतिं, विलासविधुरम् इति शेषः। तथा नितम्बिभिः प्रशस्तनितम्बैः कलत्रभारैः जघनभारैः पुलिनं नितम्बभारशून्यम् इत्यर्थः, तथा दीर्घलोचनैः मुखैः सरोजानि च अलोचनानि इति शेषः। साम्यगुणात् समानगुणत्वात् निरासिरे निरस्तवत्यः। गुणवद्गुणयोः कृतः साम्यम् इति भावः। अस्यतेः कर्त्तरि लिट्। "उपसर्गादस्त्यूह्योर्वा" इति विकल्पात् आत्मनेपदम् ॥२९॥

विभिन्न इति। विभिन्नाः विच्युतसङ्घाताः पर्य्यन्तगाः प्रान्तगताः मीनानां षङ्क्त्रयः यासां ताः। कृतः? मरुत्वतः सखिभिः इन्द्रस्य सखिभिः गन्धर्वैः पुरः पूर्व्वं विगाढ़ाः प्रविष्टाः, तासां विश्वासार्थं गर्त्त-ग्राहादिपरीक्षार्थं च इति भावः। सभीतिभिः अप्रविष्टविषयत्वात् सभयैः। "विषादिभिः" इति पाठे अपि अयम् एव अर्थो लक्ष्यः। सुरसुन्दरीजनैः तदेव अवगाहनं प्रथमं यथा तथा अतएव कथञ्चित् भयात् कृच्छ्रेण आपः प्रपेदिरे जगाहिरे ॥ ३० ॥

विभिद्यमाना विससाद सारसान्
उदस्य तोरेषु तरङ्गसंहतिः ॥३१॥
शिलाघनैर्नाकसदामुरःस्थले-
र्दृढन्निवेशैश्च बधूपयोधरैः ।
तटाभिनीतेन विभिन्नवीचिना
रुषेव भेजे कलुषत्वमम्भसा ॥३२॥
विधूतकेशाः परिलोलितस्रजः
सुराङ्गनानां प्रविलुप्तचन्दनाः ।
अतिप्रसङ्गाद्विहितागसो मुहुः
प्रकम्पमोयुः सभया दृवोर्मयः ॥३३॥

विगाढ़ेति । प्रयत्नेन संवाहिताः संचारिताः पीवराः स्थूलाः जवः याभिः ताभिः रमणीभिः अम्भसि विगाढ़मात्रे प्रविष्टे एव सति । सुप्सुपा इति समासः । "मात्रं कात्स्न्र्ये ऽवधारणे" इत्यमरः । विभिद्यमाना स्वयं विशीर्यमाणा । कर्मकर्तरि शानच् । तरङ्गसंहतिः तोरेषु सारसान् पक्षिविशेषान् । "सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः" इति यादवः । यद्वा सारसान् हंसान् । "चक्राङ्गः सारसो हंसः" इति शब्दार्णवे । उदस्य उत्सार्य्य विससार वितस्तार ॥ ३१ ॥

शिलेति । शिलावद्घनैः कठिनैः नाकसदां गन्धर्वाणाम् उरःस्थलैः दृढन्निवेशैः महासंस्थानैः अतिस्थूलैः इत्यर्थः । बधूपयोधरैश्च तटम् अभितः नीतेन प्रापितेन अतएव विभिन्नवीचिना भग्नोर्मिणा अम्भसा कर्त्रा रुषा इव । इति हेतूत्प्रेक्षा । कलुषत्वम् आविलत्वम्, अन्तःक्षोभश्च ध्वन्यते भेजे । कर्मणि लिट् । यथा कश्चित् मृदुस्वभावः केनचित् कठिनादिना साङ्गभङ्गं ताड़यित्वा निष्कासितः क्षुभ्यति तद्वदिति भावः । कलुषत्वम् इत्यत्र वाच्यप्रतीयमानयोरभेदाध्यवसायः । अन्यथा शुद्धवाच्यस्य आविलत्वस्य रोषहेतुकत्वात् उत्प्रेक्षानुविधानादिति ॥ ३२ ॥

विधूतेति । विधूताः विक्षिप्ताः केशाः यैः ते परिलोलिताः विलोलिताः स्रजः यैः ते प्रविलुप्तचन्दनाः प्रमृष्टाङ्गरागाः अतिप्रसङ्गात् अविच्छेदसङ्गात् सुराङ्गनानां विहितागसः कृतमण्डनखण्डनरूपापराधाः अतएव अभयः

विपक्षचित्तोन्मथना नखव्रणा-
स्तिरोहिता विभ्रममण्डनेन ये।
हृतस्य शेषानिव कुङ्कुमस्य तान्
विकत्थनीयान् दधुरन्यथा स्त्रियः ॥३४॥
सरोजपत्रे नु विलीनषट्पदे
विलोलदृष्टेः खिदमू विलोचने।
शिरोरुहाः स्वित् नतपक्ष्मसन्तते-
र्द्विरेफवृन्दं नु निःशब्दनिश्चलम् ॥३५॥
अगूढहासस्फुटदन्तकेसरं
मुखं खिदेतद् विकसत् नु पङ्कजम्।

तरङ्गाः। सभया इव स्त्रीभ्यः भीता इव मुहुः प्रकम्पम् ईयुः। स्वाभाविकस्य कम्पस्य भयहेतुकत्वम् उत्प्रेक्ष्यते। यद्वा सुराङ्गनानां विधूनकेया इत्यादियोजना। सापेक्षत्वेऽपि गमकत्वात् समासः। स्त्रीसङ्गदर्शनासङ्गम् अपराधः भयं तु राजादिभ्य इति ॥ ३३ ॥

विपक्षेति। विपक्षस्य सपत्नीजनस्य चित्तानाम् उन्मथनाः व्यथकाः इत्यर्थः। बहुलग्रहणात् कर्त्तरि ल्युट्। ये नखव्रणाः नखक्षतानि। "व्रणोऽस्त्रियाम्" इत्यमरः। विभ्रमस्य सौन्दर्य्यस्य मण्डनम्। तादर्थ्ये अपि अश्वघासादिवत् षष्ठीसमासः, न तु चतुर्थीसमासः, यूपदार्वादिवत् प्रकृतिविकाराभावादिति। तेन कुङ्कुमलेपादिना तिरोहिताः छन्नाः हृतस्य क्षालितस्य कुङ्कुमस्य व्यञ्जकत्वेन शेषान् इव अवशिष्टलेखान् इव स्थितान् इति उत्प्रेक्षा। विकत्थनीयान् भर्त्तृवाक्यस्य व्यञ्जकत्वेन श्लाघनीयान् तान् नखव्रणान् स्त्रियः अन्यथा दधुः प्रकाशं दधुः इत्यर्थः ॥ ३४ ॥

अथ युग्मेन आह—सरोजेत्यादिना। अमू पुरोवर्त्तिनौ विलीनषट्पदे संसक्तभृङ्गे सकनीनिकत्वम् अक्ष्णोः अर्थसिद्धम् इति उपमानं विशिष्यते। सरोजपत्रे नु। यद्वा विलोलदृष्टेः चञ्चलाक्ष्याः विलोचने खित्। नुखिच्छब्दौ वितर्के। किञ्च नतपक्ष्मसन्ततेः चञ्चलाक्ष्याः शिरोरुहाः खित् निःशब्दं नीरवं च तत् निश्चलं च तत् द्विरेफवृन्दं नु ॥३५॥

अगूढेति। किञ्च अगूढहासं व्यक्तस्मितं तेन स्फुटाः दन्ताः केसरा इव दन्तकेसराः यस्य तत् मुखं खित्? यद्वा विकसत्पङ्कजं नु!

इति प्रलीनां नलिनीवने सखीं
विदाम्बभूवुः सुचिरेण योषितः ॥३६॥

॥ युग्मम् ॥

प्रियेण संग्रथ्य विपक्षसन्निधा-
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥३७॥

असंशयं न्यस्तमुपान्तरक्ततां
यदेव रोद्धुं रमणीभिरञ्जनम् ।
हृतेऽपि तस्मिन् सलिलेन शुक्लतां
निरास रागो नयनेषु न श्रियम् ॥३८॥

इति इत्थम् संग्रथ्येन इति शेषः । नलिनीवने प्रलीनां निगूढां सखीं योषितः सुचिरेण अतिविलम्ब्य विदाम्बभूवुः विविदुः निश्चिक्युः इत्यर्थः । "उषविदजागृभ्योऽन्यतरस्याम्" इति विकल्पात् आम्प्रत्ययः । अत्र युग्मे निश्चयान्तसन्देहालङ्कारः ॥ ३६ ॥

प्रियेणेति । काचित् प्रियेण सङ्ग्रथ्य स्वयम् एव रचयित्वा विपक्षसन्निधौ सपत्नीजनसमक्षं पीवरस्तने वक्षसि उपाहितां स्रजं मालां जलाविलाम् मृदिताम् अपि इत्यर्थः । तां न विजहौ न तत्याज । न च निर्गुणायां तत्र का प्रीतिः ? इति वाच्यम् इति अर्थान्तरन्यासेन आह । गुणाः प्रेम्णि वसन्ति, वस्तुनि न वसन्ति हि । यत् प्रेमास्पदं तत् एव गुणवत् अन्यत् तु गुणवत् अपि निर्गुणम् एव । प्रेम तु न वस्तुपरीक्षाम् अपेक्षते इति भावः ॥३७॥

असंशयमिति । स्त्रीणां नेत्रशोभार्थम् अञ्जनधारणम् अम्बुविप्रुषोपगमात् रक्तवर्णत्वं च अक्ष्णां, ततः शुक्लत्वतिरोधानं च निश्चितम् इति उत्प्रेक्षते । रमणीभिः यत् अञ्जनं न्यस्तं तत् इति शेषः । यत्तदोर्नित्यसम्बन्धात् । तत् अञ्जनम् उपान्तयोः रक्ततां रोद्धुं प्रतिबद्धुम् एव न्यस्तं न तु शोभार्थम् इत्यर्थः । अन्यथा रागाभिव्याप्त्या शुक्लत्वतिरोधानं स्यादित्यर्थः । असंशयम् इति

द्युतिं वहन्तो वनितावतंसका
हृताः प्रलोभादिव वेगिभिर्जलैः ।
उपप्लुतास्तत्क्षणशोचनीयतां
च्युताधिकाराः सचिवा इवाययुः ॥३९॥
विपत्रलेखा निरलक्तकाधराः
निरञ्जनाश्चोरपि बिभ्रतीः श्रियम् ।
निरीक्ष्य रामा बुबुधे नभश्चरै-
रलङ्कृतं तद्वपुषैव मण्डनम् ॥४०॥

उत्प्रेक्षाव्यञ्जकं, संशयस्यापि अभावः न अत्र संशयः अस्ति इत्यर्थः । अर्थाभावे अव्ययीभावः । कुतः एतत् इति चेत् ? यतः तस्मिन् अञ्जने मलिनेन हृते चालिते सति अपि रागः पूर्वोक्त एव उपान्तरक्तता किन्तु प्रतिबन्धाभावात् अभितः व्याप्य इति आशयः । नयनेषु शुक्लतां निरास निरस्तवान् । अस्यतेः लिट् । श्रियं शोभां तु न निरास अतः शुक्लत्व-विरोधिरागनिरोधार्थम् एव इदम् अञ्जनं स्यात्, न तु शोभार्थं, तस्याः तदभावे अपि सद्भावात् इत्यर्थः । अञ्जनापगमे अपि तन्नयनानां राग एव अलङ्कारः अभूत् इति भावः । अत्र अञ्जनन्यासम् अनूद्य तस्य शोभा-र्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणमुदितम् । उत्तरार्द्धे तस्य एव समर्थनात् । एवमुपान्तरक्ततां रोद्धुं यत् अञ्जनं न्यस्तम् इति एकान्वये विध्यनुवादविरोधः स्यात् ॥ ३८ ॥

द्युतिमिति । द्युतिं शोभां तेजश्च वहन्तः वेगिभिः जविभिः जलैः जडैः अम्भैश्च उभयोरभेदात् । "जलं गोकवले नीरे क्लीवेरे च जडे ऽन्यवत्" इति विश्वः । प्रलोभात् मोहात् । हृताः गृहीताः उपप्लुताः मृदिताः । यद्वा कर्त्तरि क्तः । प्लवमाना इत्यर्थः । अन्यत्र धनग्रहणबन्धनादिना पीडिताः वनितावतंसकाः च्युताधिकाराः भ्रष्टाधिकाराः सचिवा इव तत्क्षणं शोचनीयताम् आययुः प्रापुः ॥ ३९ ॥

विपत्रेति । विगताः पत्रलेखाः तिलकविशेषाः यासां ताः विपत्र-लेखाः, निरलक्तकाः चालितरागाः अधराः यासां ताः । निरञ्जनानि अञ्चोणि यासां ताः, निरञ्जनाच्चोः अपि । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् प्रच् "षिदगौरादिभ्यश्च" इति ङीप् । तथापि श्रियं बिभ्रतीः, शोभा-

तथा न पूर्व्वं कृतभूषणादरः
प्रियानुरागेण विलासिनोजनः ।
यथा जलार्द्रो नखमण्डनश्रिया
ददाह दृष्टीश्च विपत्नयोषिताम् ॥४१॥
शुभाननाः साम्बुरुहेषु भोरवो
विलोलहाराश्चलफेनपङ्क्तिषु ।
नितान्तगौर्य्यो हृतकुङ्कुमेष्वलं
न लेभिरे ताः परभागमूर्मिषु ॥४२॥

कारणाभावे अपि शोभमाना इति । विभावनालङ्कारः । रामाः निरीक्ष्य नभश्चरैः गन्धर्वैः तासां वपुषा एव मण्डनम् अलङ्कृतं, न तु मण्डनेन तद्वपुः इति अक्षरार्थः । इति बुबुधे ज्ञातम् । कर्मणि लिट् । स्वभावरमणीयानां किम् अलङ्करणैः ? इति भावः ॥ ४० ॥

तथेति । विलासिनोजनः पूर्व्वं जलविहारात् प्राक् प्रियानुरागेण कृतः भूषणेषु आदरः आसक्तिः येन सः अनुरक्तप्रियत्वात् सम्यक् प्रमाधितः सन् अपि इत्यर्थः । प्रियस्य अनुरागेण च विपत्नयोषितां सपत्नीनां दृष्टीः चक्षूंषि तथा न ददाह न दुःखोचकार । यथा जलार्द्रः सन् नखशब्देन नखक्षतानि लक्ष्यन्ते, तानि एव मण्डनं तस्य श्रिया तत्कृतशोभया इत्यर्थः । विपत्नयोषितां सपत्नीनां दृष्टीः चक्षूंषि यथा ददाह तापयामास । मण्डनान्तरात् अपि नखमण्डनानुरागात् अपि च तदनुभाव एव सपत्नीनां दुःखहेतुरिति भावः । जलार्द्रः ददाह इति विरुद्धकार्य्योत्पत्तिरूपः विषमालङ्कारः । "विरुद्धकार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना वा स्याद् विषमालङ्कृतिस्त्रिधा" इति लक्षणात् ॥ ४१ ॥

शुभेति । शुभाननाः विलोलहाराः नितान्तगौर्य्यः अरुणाङ्गयः "गौरोऽरुणे सिते पीते" इति वैजयन्ती । भोरवः ताः स्त्रियः साम्बुरुहेषु चलाः फेनपङ्क्तयः येषु तेषु हृतानि कुङ्कुमानि यैः तेषु कुङ्कुमसङ्गारुणेषु इत्यर्थः । ऊर्मिषु विषयेषु अलम् अत्यर्थं परभागं गुणोत्कर्षं लेभिरे । 'परभागो गुणोत्कर्षः' इति यादवः । तासाम् ऊर्मीणां च अरुणत्वादिगुणसाम्यात् न कश्चित् विशेषः लक्ष्यते इत्यर्थः । अतएव सामान्यालङ्कारः । "सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता" इति लक्षणात् । शुभाननत्वसाम्बुरुहत्वाद्यभयविशेषणानां क्रमेण उभयस्मिन्

क्वदाम्भसि व्यस्तवधूकराहते
रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुः स्तनैस्तालसमं समाददे
मनोरमं नृत्यमिव प्रवेपितम् ॥४३॥
श्रिया हसद्भिः कमलानि सस्मितै-
रलङ्कृताम्बुः प्रतिमागतैर्मुखैः ।
कृतानुकूलया सुरराजयोषितां
प्रसादसाफल्यमवाप जाह्नवी ॥४४॥

समन्वयात्, यथासंख्यालङ्कारश्च। "यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयात्" इति काव्यप्रकाशे लक्षणात्। अनयोः अङ्गाङ्गिभावेन सङ्करः ॥ ४२ ॥

क्वदेति। व्यस्ताभ्यां विपर्य्यासिताभ्यां वधूकराभ्याम् आहते, एकेन करेण उत्साद्य अन्येन ताडिते इत्यर्थः। क्वदाम्भसि मृदङ्गध्वनिवत् धीरं गम्भीरं रवम् उज्झति सति तथा ध्वनति सति इत्यर्थः। मुहुः स्तनैः तालः गीतवाद्यनृत्यानां कालपरिच्छेदः। "तालः कालक्रियामानम्" इत्यमरः। तस्य समम् अनुरूपं मनोरमं नृत्यम् इव प्रवेपितं प्रकम्पितम्। भावे क्तः। समाददे स्वीकृतम्। उपमालङ्कारः ॥४३॥

श्रियेति। श्रिया शोभया कमलानि हसद्भिः कमलसदृशैः इत्यर्थः। "हसतोर्ध्यत्यसूयति" इति दर्शनात् सदृशपर्य्यायपरा उक्तिः। सस्मितैः प्रतिमागतैः प्रतिबिम्बगतैः इत्यर्थः। "प्रतिमानं प्रतिबिम्बं प्रतिमा" इत्यमरः। मुखैः अलङ्कृतानि अम्बूनि यस्याः सा। किञ्च, सुरराजयोषितां कृतम् आनुकूल्यं विहारादुपकारः यया सा, इत्थं योषिद्भिः उपकृता स्वयं च तासाम् उपकारिणी जाह्नवी गङ्गा प्रसादस्य स्वच्छत्वस्य साफल्यम्। अर्थगौरवात् षष्ठीसमासनिर्वाहः। अवाप, अप्रसन्नाम्भसि विहारविम्बग्रहणयोरसम्भवात् इत्यर्थः। स्वच्छा एव हि परैः उपक्रियन्ते स्वयं च उपकुर्वते तेषाम् इति भावः। "कृतानुकारा" इति पाठे अनुकारः अनुकूलकरणम् उपकारः इत्येवं व्याख्येयम्। अत्र जाह्नवीविशेषपदार्थस्य साफल्यं प्रति हेतुत्वात् काव्यलिङ्गमलङ्कारः ॥४४॥

परिस्फुरन्मौनविघट्टितोरवः
सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः
सखीजनस्यापि विलोकनीयताम् ॥४५॥
भयादिवाश्लिष्य झषाहतेऽम्भसि
प्रियं मुदानन्दयति स्म मानिनी ।
अकृत्रिमप्रेमरसाहितैर्मनो
हरन्ति रामाः कृतकैरपीहितैः ॥४६॥
तिरोहितान्तानि नितान्तमाकुलै-
रपां विगाहादलकैः प्रसारिभिः ।
ययुर्बधूनां वदनानि तुल्यतां
द्विरेफवृन्दान्तरितैः सरोरुहैः ॥४७॥

परीति । परितः स्फुरद्भिः विवर्त्तमानैः मौनैः विघट्टिताः जरवो यासां ताः, अतएव त्रासविलोलदृष्टयः भयविकसन्नेत्राः कम्पितपाणिपल्लवाश्च सुराङ्गनाः सखीजनस्य अपि विलोकनीयताम् उपाययुः । किमुत प्रियजनस्य इति भावः । स्वभावोक्तिरलङ्कारः ॥ ४५ ॥

भयादिति । मानिनो दुर्लभस्वयंग्रहणा इति भावः । अम्भसि जले झषेण मत्स्येन आहते सति । "पृथुरोमा झषो मत्स्यः" इत्यमरः । भयात् इव वस्तुतस्तु न तथा इति भावः । किन्तु मुदा औत्सुक्येन एव आश्लिष्य प्रियम् आनन्दयति स्म । तथाहि—रामाः स्त्रियः अकृत्रिमः अनारोपितः यः प्रेम एव रसः तेन आहितैः जनितैः कृतकैः कृत्रिमैः अपि इत्यर्थः । ईहितैः चेष्टितैः मनः हरन्ति । आरोपितम् अपि भयं प्रेममूलत्वात् मनोहरं बभूव इत्यर्थः । अत्र अल्पानुभावेन भयेन सहजरागनिगूहनात् मीलनालङ्कारः । "मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्" इति लक्षणान्तरसम्भवात् अर्थान्तरन्यासेन संसृज्यते ॥४६॥

तिरोहितेति । अपां विगाहात् नितान्तम् आकुलैः विक्षोभैः प्रसारिभिः आयतैः अलकैः केशैः तिरोहितान्तानि छन्नप्रान्तानि बधूनां वदनानि द्विरेफ-

करौ धुनाना नवपल्लवाकृती
पयस्यगाधे किल जातसम्भ्रमा ।
सखीषु निर्वाच्यमधार्ष्ट्यदूषितं
प्रियाङ्गसंश्लेषमवाप मानिनी ॥ ४८ ॥

प्रियैः सलीलं करवारिवारितः
प्रवृद्धनिःश्वासविकम्पितस्तनः ।
सविभ्रमाधूतकराग्रपल्लवो
यथार्थतामाप विलासिनीजनः ॥ ४९ ॥

वृन्दैः अन्तरितानि छन्नानि सरोरुहाणि तैः सरोरुहैः तुल्यतां ययुः इति उपमालङ्कारः ॥ ४७ ॥

करावितिं । मानिनी पयसि अगाधे सति किल इति अलीके, मज्जनभयात् इव इत्यर्थः । जातसम्भ्रमा उत्पन्नभया अतएव नवपल्लवाकृती करौ धुनाना कम्पयन्ती । धुनोतेः क्रयादिकात् कर्त्तरि लटः शानच् । सखीषु विषये निर्वाच्यम् अवाच्यम् अनिन्द्यम् इत्यर्थः । धार्ष्ट्यदूषितश्च न भवति इति अधार्ष्ट्यदूषितः, वस्तुतः रागमूलम् अपि भयमूलत्वारोपात् इति भावः । प्रियाङ्गसंश्लेषम् अवाप । अत्रापि तुल्याङ्गेन भयेन आगन्तुकेन सहजानुरागनिगूहनात् मीलनालङ्कारः । तदुक्तं काव्यप्रकाशे—"समानलक्षणं वस्तु वस्तुना यन्निगूह्यते । निजेनागन्तुना वापि तन्मीलनमुदाहृतम्" ॥ ४८ ॥

प्रियैरितिं । प्रियैः कामिभिः सलीलं करवारिभिः अञ्जलिजलैः वारितः अवरुद्धः सिक्त इत्यर्थः । प्रवृद्धैः सन्ततैः निःश्वासैः विकम्पितौ कम्पितौ स्तनौ यस्य सः । सविभ्रमं सविलासम् आधूतानि कराग्रपल्लवानि पाणिपल्लवानि येन सः । विलसनशीला विलासिनी । "वौ कषलसकत्यस्नभ्रः" इति विन् णप्रत्ययः । सा एव जनः । जातौ एकवचनम् । यथार्थताम् आप उक्तरीत्या अनेकविलासवत्तया यथार्थनामकत्वम् अवाप इत्यर्थः । क्वचित् गम्यमानार्थस्य नाम्नः न प्रयोगः । यथा माघे—"चिराय याथार्थ्यमलम्भि दिग्गजैः" इति । क्वचित् प्रयुज्यते च, यथा रघुवंशे—"परन्तपो नाम यथार्थनामा" इति । नैषधेऽपि—"स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः" इति । स्वभावोक्तिरलङ्कारः ॥ ४८ ॥

उदस्य धैर्य्यं दयितेन सादरं
प्रसादितायाः करवारिवारितम् ।
मुखं निमीलन्नयनं नतभ्रुवः
श्रियं सपत्नीवदनादिवाददे ॥ ५० ॥
विहस्य पाणौ विधृते धृताम्भसि
प्रियेण बध्वा मदनार्द्रचेतसः ।
सखीव काञ्ची पयसा घनीकृता
बभार वीतोच्चयबन्धमंशुकम् ॥ ५१ ॥
निरञ्जने साचिविलोकितं दृशा-
वयावकं वेपथुरोष्ठपल्लवम् ।
नतभ्रुवो मण्डयति स्म विग्रहे
बलिक्रिया चातिलकं तदास्पदम् ॥५२॥

उदस्येति । दयितेन धैर्य्यं काठिन्यम् उदस्य अपनीय अनुनीय इत्यर्थः । सादरं यथा तथा प्रसादितायाः सौमनस्यं गमितायाः नतभ्रुवः स्त्रियाः सम्बन्धि करवारिभिः वारितम् अवरुद्धम् अतएव निमीलिते नयने यस्य तन्मुखं सपत्नीवदनात् इव श्रियम् आददे जग्राह । तदानीं तद्वदनस्य निःशोकत्वात् तदीयशोभाग्रहणम् उत्प्रेक्ष्यते ॥ ५० ॥

विहस्येति । धृताम्भसि प्रियसेचनार्थं गृहीतजले पाणौ अञ्जलौ इत्यर्थः । प्रियेण विहस्य विधृते अवलम्बिते सति अतएव मदनार्द्रचेतसः मदनपरवशाया इत्यर्थः । बध्वाः सम्बन्धि वीतोच्चयबन्धं मुक्तनीविग्रन्थि स्रंसमानम् इत्यर्थः । अंशुकं पयसा घनीकृता काञ्ची सखी इव बभार जग्राह । स्त्रीणां किल स्त्रीषु एव आयत्तं लज्जारक्षणम् इति भावः ॥५१॥

निरञ्जने इति । नतभ्रुवः अङ्गनायाः विग्रहे वपुषि निरञ्जने निर्धौतकज्जले दृशौ विलोचने कर्म्म, साचिविलोकितं तिर्य्यक् ईक्षणं कर्तृ मण्डयति स्म । "तिर्य्यगर्थं साचि तिरः" इत्यमरः । अयावकं क्षालितलाक्षारागम् ओष्ठपल्लवं वेपथुः कम्पः मण्डयति स्म । "टित्वोऽथुच्" इति अथुच्प्रत्ययः । अतिलकं तिलकरहितं तदास्पदं तिलकस्थानं

निमीलदाकैकरलोलचक्षुषां
प्रियोपकण्ठं कृतगात्रवेपथुः।
निमज्जतीनां श्वसितोद्वतस्तनः
श्रमो नु तासां मदनो नु पप्रथे ॥ ५३ ॥
प्रियेण सिक्ता चरमं विपक्षत-
श्चुकोप काचित् न तुतोष सान्त्वनैः।
जनस्य रूढ़प्रणयस्य चेतसः
किमप्यमर्षोऽनुनये भृशायते ॥ ५४ ॥
इत्थं विहृत्य वनिताभिरुदस्यमानं
पीनस्तनोरुजघनस्थलशालिनीभिः।

ललाटम्। "आस्पदं प्रतिष्ठायाम्" इति निपातः। बलिक्रिया रेखाबन्धञ्च मण्डयति स्म। तदा निरलङ्कारस्य अङ्गनाशरीरस्य तच्छरीरविकारैः एव अलङ्कारः समजनि इत्यर्थः ॥ ५२ ॥

निमीलदिति। प्रियोपकण्ठं प्रियसमीपे। अत्यन्तसंयोगे द्वितीया। निमज्जतीनां विगाहमानानाम् अतएव निमीलन्ति निमिषन्ति आकैकराणि आकैकरवन्ति लोलानि चक्षूंषि यासां तासाम्। आकैकरलक्षणं तु नृत्यविलासे—"दृष्टिराकैकरा किञ्चित् स्फुटापाङ्गे प्रसारिता। मीलितार्द्धपुटा लोके ताराव्यावर्त्तनोत्तरा" इति। तासां स्त्रीणां कृतः गात्राणां वेपथुः कम्पः येन सः श्वसितैः निःश्वासैः उद्वतौ उत्पतितौ स्तनौ येन सः श्रमः खेदः नु मदनः नु पप्रथे प्रादुर्बभूव? निमज्जनप्रियसन्निधानरूपोभयकारणसम्भवात् नेत्रनिमीलनगात्रकम्पनिःश्वासधारणाच्च सन्देहः, स एव अलङ्कारः ॥ ५३ ॥

प्रियेणेति। काचित् प्रियेण विपक्षतः सपत्नीतः चरमं पश्चात् सिक्ता सती चुकोप। "पृष्ठन्तु चरमं तनोः" इत्यमरः। सान्त्वनैः अनुनयैः न तुतोष। तथाहि—रूढ़प्रणयस्य गाढ़प्रेमणः जनस्य सम्बन्धो चेतसः मनसः अमर्षः प्रकोपः किम् अपि कुतः अपि हेतोः अनुनये सति भृशायते गाढ़ो भवति। "भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः" इति क्यङ्। अन्यत्र शान्तिहेतुः अनुनयः अत्र प्रकोपाय एव भवति, तत्र कारणं तु न ज्ञायते इत्यर्थः ॥ ५४ ॥

उत्सर्पितोर्मिचयलङ्घिततीरदेश-
मौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥५५॥
तीरान्तराणि मिथुनानि रथाङ्गनाम्नां
नीत्वा विलोलितसरोजवनश्रियस्ताः ।
संरेजिरे सुरसरिज्जलधौतहारा-
स्तारावितानतरला इव यामवत्यः ॥५६॥
संक्रान्तचन्दनरसाहितवर्णभेदं
विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ।
वङ्गोर्मि नाकवनितापरिभुक्तमुक्तं
सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ॥५७॥

इति श्रीमहामहोपाध्यायभारविकृतौ किरातार्जुनीये महाकाव्ये सुराङ्गनाविहारो नामाष्टमः सर्गः ॥ ८ ॥

इत्थमिति । पीनैः स्तनैः ऊरुभिः जघनस्थलैश्च शालन्ते इति तथोक्ताभिः इति सलिलनोदनसामर्थ्योक्तिः । स्थलस्य साक्षात् अप्राण्यङ्गत्वात् न इन्द्वैकवद्भावः । वनिताभिः इत्थं विहृत्य उदस्यमानं नुद्यमानम् उत्सर्पिभिः उपरिभावं प्रापितैः ऊर्मिचयैः लङ्घितः तीरदेशः येन तत् वारि । औत्सुक्यं विहारासहिष्णुत्वं तेन नुन्नं प्रेरितम् इव इति उत्प्रेक्षा । "नुदविद" इत्यादिना निष्ठानत्वम् । पुरः अग्रे प्रतस्थे स्वजनवत् इति भावः ॥ ५५ ॥

तीरान्तराणीति । रथाङ्गनाम्नां मिथुनानि चक्रवाकद्वन्द्वानि अन्यानि तीराणि तीरान्तराणि नीत्वा नियोज्य इत्यर्थः । अविहितलक्षणः तत्पुरुषः मयूरव्यंसकादिषु द्रष्टव्यः । विलोलिताः विलुलिताः सरोजवनश्रियः याभिः ताः सुरसरिज्जलैः धौतहाराः चालितमुक्तावलयः ताः स्त्रियः तारावितानैः उडुगणैः तरलाः भासुराः । "तरलो भासुरे हारे चञ्चलेऽपि" इति वैजयन्ती । यामवत्यः रात्रयः इव संरेजिरे शुशुभिरे ॥ ५६ ॥

संक्रान्तेति । संक्रान्तैः चन्दनरसैः मलयजद्रवैः आहितः वर्णभेदः रूपान्तरं यस्य तत् । विच्छिन्नानि त्रुटितानि यानि विभूषणानि तेषां ये

नवमः सर्गः ।

वीच्य रन्तुमनसः सुरनारीः
आत्तचित्रपरिधानविभूषाः ।
तत्प्रियार्थमिव यातुमथास्तं
भानुमानुपपयोधि ललम्बे ॥ १ ॥
मध्यमोपलनिभे लसदंशौ
एकतश्च्युतिमुपेयुषि भानौ ।

मणिप्रकराः मणिगणाः तेषाम् अंशुभिः चित्रं नानावर्णम् बह्वीर्मितरलं तरङ्गितं नाकवनिताभिः परिभुक्तमुक्तं पूर्वं परिभुक्तं पश्चात् मुक्तम् । "पूर्वकाल" इत्यादिना तत्पुरुषः । सिन्धोः गङ्गायाः सलिलम् । शेरते अत्र इति शयनीयं तल्पम् । बहुलग्रहणात् साधु । तस्य लक्ष्मीं बभार । अतएव निदर्शनालङ्कारः । लक्षणं तु उक्तम् ॥ ५७ ॥

इति श्रीमद्दामोदरोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायाम्
अष्टमः सर्गः ॥ ८ ॥

वीच्येति । अथ जलक्रीडानन्तरं भानुमान् अंशुमान् सूर्यः आत्तचित्रपरिधानविभूषाः स्वीकृतविविधवस्त्राभरणाः सुरतसन्नाहं वहतोः इत्यर्थः । अतएव रन्तुमनसः । "समानकर्तृकेषु तुमुन्" । "लुम्मेदवश्यं मः क्त्वे तुम् काममनसोरपि" इति मकारलोपः । सुरनारीः वीच्य । तासां प्रियार्थं तत्प्रियार्थम् इव अवसरदानरूपं प्रियं कर्तुम् इव इत्यर्थः । फलोत्प्रेक्षा इयम् । अस्तम् अदर्शनम् मकारान्तम् अव्ययम् एतत् । यातुं प्राप्तुम् उपपयोधि पयोधिसमीपे ललम्बे सस्रंसे । अस्मिन् सर्गे स्वागतावृत्तम् । "स्वागतेति रनभाद् गुरुयुग्मम्" इति लक्षणात् ॥ १

द्यौरुवाह परिवृत्तिविलोलां
हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥
अंशुपाणिभिरतीव पिपासुः
पद्मजं मधु भृशं रसयित्वा ।
चौबतामिव गतः क्षितिमेष्यन्
लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥
गम्यतामुपगते नयनानां
लोहितायति सहस्रमरीचौ ।
आससाद विरहय्य धरित्रीं
चक्रवाकहृदयान्यभितापः ॥ ४ ॥

मध्येति । मध्यमोपलनिभे नायकमणिसदृशे । "निभसङ्काशनीकाश प्रतिरूपोपमादयः" इत्यमरः "शर्करायां दृषत्पुत्रे [स्त्रियां प्रोक्तः] पुंस्यश्मन्यु पलो मणौ" इति वैजयन्तौ । लसदंशौ प्रसरदश्मौ भानौ एकतः एकस्मिन् भागे च्युतिं स्रस्तताम् उपेयुषि प्राप्ते सति द्यौः परिवृत्त्या मध्याह्नातिक्रमेण विलोलां गत्वरीम् अन्यत्र गात्रस्य तिर्यक् आवृत्त्या मुहुः चलन्तीं वासरलक्ष्मीं हारयष्टिं मुक्तावलीम् इव उवाह वहति स्म ॥ २ ॥

अंशुपाणिभिरिति । पतङ्गः सूर्यः । "पतङ्गः पक्षिसूर्ययोः" इत्यमरः । अतीव निर्भरम् । "अत्यतीव च निर्भरे" इत्यमरः । पातुम् इच्छुः पिपासुः तृषितः सन् । पिबतेः सन्नन्तात् उप्रत्ययः । अंशवः एव पाणयः तैः पद्मेषु जातं पद्मजं मधु मध्वेव । मध्विति श्लिष्टं रूपकम् । मकरन्दमयम् इत्यर्थः । "मधु मद्ये पुष्परसे" इत्यमरः । भृशम् अत्यन्तं रसयित्वा आस्वाद्य चौबतां मत्तत्वं गते इव इति उत्प्रेक्षा । "मत्ते शौण्डोत्कटचौबाः" इत्यमरः । क्षितिम् एष्यन् गमिष्यन् लोहितं रक्तं वपुः उवाह । यथा मत्तः चौवतया क्षितौ लुण्ठति रज्यते च तद्वदिति भावः । सूर्यस्य क्षितिविलयनम् अस्तमयः इति आगमः । अत्र रूपकोत्प्रेक्षयोः सापेक्षत्वात् अङ्गाङ्गिभावेन सङ्करः ॥ ३ ॥

गम्यतामिति । सहस्रमरीचौ सूर्ये । लोहितो भवतीति लोहितायति । "लोहितादिडाज्भ्यः क्यष् ।" "वा क्यषः" इति परस्मैपदे शतृ-

मुक्तमूललघुरुज्झितपूर्वः
पश्चिमे नभसि सम्भृतसान्द्रः।
सामि मज्जति रवौ न विरेजे
खिन्नजिह्म इव रश्मिसमूहः ॥५॥
कान्तटूत्य इव कुङ्कुमताम्राः
सायमण्डलमभि त्वरयन्त्यः।
सादरं ददृशिरे वनिताभिः
सौधजालपतिता रविभासः ॥६॥

प्रत्ययः। अतएव नयनानां गम्यताम् उपगते दर्शनीयतां प्राप्ते सति अभितापः धरित्रीं विरहय्य विहाय। "ल्यपि लघुपूर्व्वात्" इति अयादेशः। चक्रवाकहृदयानि आससाद प्राप। अत्र धरित्र्याः यादृशः तीव्रार्ककरकृतसन्तापः तादृक्चक्रवाकहृदयेषु विरहसन्तापः सञ्जात इति परमार्थः। परन्तु तदुपक्रमानन्तरम् एतस्याविर्भावात् स एव अत्र संक्रान्त इति अभेदाध्यवसायेन उपदेशः। अतएव भेदे अभेदरूपातिशयोक्तिः अलङ्कारः ॥ ४ ॥

मुक्तेति। रवौ सामि मज्जति अर्द्धास्तमिते सति। "सामि त्वर्द्धे जुगुप्सायाम्" इत्यमरः। मुक्तं त्यक्तप्रायं मूलम् आश्रयभूतः रविः। अन्यत्र स्वामी येन सः अतएव लघुः अल्पकश्च मुक्तमूललघुः उज्झितपूर्वः त्यक्तपूर्वदिक्कः। अन्यत्र त्यक्तपूर्वजनः। पश्चिमे नभसि पश्चिमनभोभागे। अन्यत्र क्वचित् नोचस्थले। सम्भृतः संहतः सन् अतएव सान्द्रश्च रश्मिसमूहः आश्रितजनश्च ध्वन्यते। दुःखेन खिन्नश्वासौ जिह्मश्च खिन्नेन दुःखेन जिह्मो वा दीनः इव न विरेजे। अत्र मुक्तत्वादिप्रस्तुतविशेषणसाम्यात् अप्रस्ताश्रितजनप्रतीतेः समासोक्तिः। तत्र वाच्यस्य रश्मिसमूहस्य अचेतनस्यापि प्रतीयमानेन चेतनेन अभेदाभिधानात् दुःखितत्वाद्युत्प्रेक्षा इति तयोः अङ्गाङ्गिभावेन सङ्करः ॥ ५ ॥

कान्तेति। कुङ्कुमवत् कुङ्कुमेन वा ताम्राः सायस्य सायंकालस्य। "सायं साये प्रगे प्रातः" इत्यमरः। यत् मण्डनं तत् अभि तत् उद्दिश्य त्वरयन्त्यः त्वरां कारयन्त्यः सौधानां जालैः गवाक्षैः पतिताः प्रविष्टाः। "जालं गवाक्ष आनाय" इति वैजयन्ती। रविभासः सूर्यरश्मयः कान्तानां

अग्रसानुषु नितान्तपिशङ्गै-
र्भूरुहाम् मृदुकरैरवलम्ब्य ।
अस्तशैलगहनं नु विवस्वान्
आविवेश जलधिं नु महीं नु ॥७॥
आकुलश्चलपतत्रिकुलानाम्
आरवैरनुदितोषसरागः ।
आययावहरिदश्वविपाण्डु-
स्तुल्यतां दिनमुखेन दिनान्तः ॥८॥

प्रेयसां दूत्य इव वनिताभिः सादरं यथा तथा दृष्टग्गिरे दृष्टाः । सायन्तनार्कभासां प्रियसमागमसूचकत्वादेव दूत्य इव तासु स्त्रीणामादरोऽभवदित्यर्थः ॥ ६ ॥

अग्रेति । विवस्वान् सूर्यः अग्रे अस्तशैलशिखरे ये सानवः तेषु ये भूरुहाः तान् नितान्तपिशङ्गैः अत्यन्तारुणैः मृदुभिः करैः इव करैः अंशुहस्तैः इति श्लिष्टरूपकम् । "बलिहस्तांशवः कराः" इत्यमरः । यद्वा करैः मृदु श्लथम् अवलम्ब्य अस्तः इति सैलः अस्तशैलः । "अस्तस्तु चरमश्चाभृत्" इत्यमरः । तस्य गहनं काननं नु, आविवेश । तपनस्य पतनसन्देह एव दृष्टः । पतनं तु क्व च अस्य तत् न ज्ञायते शीघ्रगमनात् इत्यर्थः । अत्र तपने तपनस्य आरोप्यमाणस्य गहनाद्यनेकविषयत्वेन सन्देहालङ्कारः । उत्प्रेक्षा इति केचित् ॥ ७ ॥

आकुल इति । चलानां कुलायेभ्यः कुलायान् प्रति चलतां पतत्रिकुलानाम् आरवैः शब्दैः आकुलः व्याप्तः । अनुदितशब्देन अभावमात्रम्, उषःशब्देन सन्ध्यामात्रं च विवक्षति उषसि भवः औषसः । "सन्धिवेला" इत्यादिना योगविभागात् अण्प्रत्ययः, अन्यथा कालात् ठञ् स्यात् । तथा च अनुदितौषसराग इति अविद्यमानसन्ध्याराग इत्यर्थः । एकत्र अपगमात् अन्यत्र अनुदयात् च इति भावः । अहरिदश्वः अविद्यमानसूर्यः एकत्र अनुदयात् अन्यत्र अस्तमयात् च इति भावः । अतएव विपाण्डुः तिमिरानुदयात् इति शेषः । दिनान्तः सायंकालः दिनमुखेन प्रातःकालेन तुल्यताम् आययौ तदृत् बभूव इत्यर्थः । अतएव उपमालङ्कारः ॥ ८ ॥

आस्थितः स्थगितवारिदपङ्क्त्या
सन्ध्यया गगनपश्चिमभागः।
सोर्मिविद्रुमवितानविभासा
रञ्जितस्य जलधेः श्रियमूहे ॥ ९ ॥
प्राञ्जलावपि जने नतमूर्ध्नि
प्रेम तत्प्रवणचेतसि हित्वा।
सन्ध्ययानुविदधे विरमन्त्या
चापलेन सुजनेतरमैत्री ॥ १० ॥
औषसातपभयादपलीनं
वासरक्षविविरामपटीयः।
सन्निपत्य शनकैरिव निम्नात्
अन्धकारमुदवाप समानि ॥ ११ ॥

आस्थित इति। स्थगितवारिदपङ्क्त्या पिहितमेघवृन्दया सन्ध्यया आस्थितः आक्रान्तः व्याप्तः गगनपश्चिमभागः। सोर्मिः ऊर्मिसंक्रान्ता इत्यर्थः तया विद्रुमवितानविभासा प्रवालप्रकरकान्त्या रञ्जितस्य स्वसावर्ण्यम् आपादितस्य जलधेः श्रियम् ऊहे सन्ध्याया रक्तवर्णत्वादिति भावः। वहतेः कर्त्तरि लिट्। तत्सदृशीं श्रियमुवाहेत्यर्थः। अतएव निदर्शनालङ्कारः॥९

प्राञ्जलाविति। प्रवद्धः अञ्जलिः येन तस्मिन् प्राञ्जलौ बद्धाञ्जली। "तौ युतावञ्जलिः पुमान्" इत्यमरः। प्रादिभ्यो धातुजस्य बहुव्रीहिर्वाच्यः वोत्तरपदलोपश्च। नतमूर्ध्नि नमस्कुर्वाणे तत्प्रवणं तत्र सन्ध्यायामेव आहितं चेतः यस्य तस्मिन् एवंविधे अपि जने विषये प्रेम हित्वा विहाय विरमन्त्या निवर्त्तमानया। "व्याङ्परिभ्यो रमः" इति परस्मैपदम्। सन्ध्यया चापलेन अस्थैर्येण। युवादित्वात् अण्प्रत्ययः। सुजनात् इतरः दुर्जनः तस्य मैत्री सख्यम् अनुविदधे अनुचक्रे। कर्मणि लिट्। यथा दुर्जनमैत्री स्निह्यन्तमपि जहाति तद्वत् सन्ध्यापि सेवमानं जनम् अहासीत् इत्यर्थः। मित्रस्य कर्म मैत्री। अणन्तात् ङीप्। अत्र सन्ध्यादुर्जनमैत्र्योः चापलं समानधर्मः अनुविधानम्। अतएव अर्थरूपेण इयमुपमा ॥ १०

औषसेति। औषसात् प्राभातिकात् आतपात् भयं तस्मात् इव इति

एकतामिव गतस्य विवेकः
कस्यचिन्न महतोऽप्युपलेभे ।
भास्वता निदधिरे भुवनानाम्
आत्मनीव पतितेन विशेषाः ॥ १२ ॥
इच्छतां सह बधूभिरभेदं
यामिनीविरहिणां विहगानाम् ।
आपुरेव मिथुनानि वियोगं
लङ्घते न खलु कालनियोगः ॥ १३ ॥
यच्छति प्रतिमुखं दयितायै
वाचमन्तिकगतेऽपि शकुन्तौ ।

उत्प्रेक्षा । अपलीनं क्वचिद् गूढं वासरच्छवेः आतपस्य विरामात् हेतोः पटीयः प्रभविष्णुतरम् अन्धं करोति इति अन्धकारं ध्वान्तम् । "अन्धकारोऽस्त्रियां ध्वान्तम्" इत्यमरः । अथ सन्ध्यापगमनानन्तरं शनकैः मन्दं मन्दं निम्नात् सन्निपत्य आगत्य समानि समस्थलानि उदवाप व्यानशे । अत्र प्रस्तुतान्धकारविशेषणसाम्यात् अप्रस्तुतार्थं प्रतीतेः समासोक्तिरलङ्कारः । उत्प्रेक्षात्वङ्गतः स्यात् ॥ ११

एकतामिति । एकताम् अभेदं गतस्य इव तमोव्याप्तया तथा प्रतीतेः दृश्यम् उत्प्रेक्षा । महतः शैलादेः अपि कस्यचित् कस्यापि पदार्थस्य विवेकः भेदः न उपलेभे न गृहीतः । अतएव उत्प्रेक्ष्यते पतितेन अस्तमितेन भास्वता सूर्येण । "भास्वद्दिवस्वत्सप्ताश्व" इत्यमरः । भुवनानां भुवनस्थपदार्थानामित्यर्थः । विशेषाः भूधरादिभेदाः आत्मनि स्वस्मिन् एव निदधिरे इव निहिता इव । कथमन्यथा न उपलभ्येरन् इत्यर्थः । अत्र उत्प्रेक्षयोः सजातीययोः सापेक्षत्वात् अङ्गाङ्गिभावेन सङ्करः ॥ १२

इच्छतामिति । बधूभिः स्वकामिनीभिः सह अभेदम् अवियोगम् इच्छतां तथा सङ्कल्पवतामपीत्यर्थः । यामिनीषु विरहिणां नियतवियोगानामित्यर्थः । रहतेः आवश्यके अर्थे णिनिः, यद्वा निन्दायाम् इनिः । तेषां विहगानां चक्रवाकाणामित्यर्थः । मिथुनानि वियोगम् आपुः एव । न तु न आपुः । इति अयोगव्यवच्छेदः तथाहि कालनियोगो दैवाज्ञा न लङ्घते खलु । दुर्वार इत्यर्थः ॥ १३

नीयते स्म नतिमुज्झितहर्षं
पङ्कजं मुखमिवाम्बु रुहिण्या ॥ १४ ॥
रञ्जिता नु विविधास्तरुशैलाः
नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री
संवृता नु ककुभस्तिमिरेण ॥ १५ ॥

यच्छतीति । शकुन्तौ चक्रवाकपक्षिणि सामान्यस्य प्राकरणिकविशेषपर्य्यवसानात् । "शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः" इत्यमरः । अन्तिकगते समीपस्थे अपि दयिताये चक्रवाक्यै प्रतिमुखम् अभिमुखं यथा तथा वाचं यच्छति वाचम् एव ददाने सति न तु सङ्कल्पमाने सति इत्यर्थः । "पाघ्राध्मा" इत्यादिना दाणः यच्छादेशः । अम्बु रुहिण्या नलिन्या उज्झितहर्षं चक्रवाकदुर्दर्शनादिव त्यक्तविकासं पङ्कजं मुखमिव नतिं नम्रत्वं नीयते स्म नीतम् । "प्रधानकर्मण्याख्येये लादीनाङ्हिकर्मणाम्" इति नयतेः द्विकर्मकत्वात् प्रधाने कर्मणि लिट् । प्रायेण दुःखदर्शनात् स्त्रियः खिद्यन्ते विशेषेण विरहदर्शनात् इति भावः । अत्र पङ्कजावनतेः चक्रवाकविक्रोशानन्तर्य्यात् तद्धेतुकत्वम् उत्प्रेक्ष्यते । तच्च मुखोपमा इयम् अम्बु रुहिण्या कामिनीसाम्यं गमयन्त्या निरूह्यत इति उपमोत्प्रेक्षयोः अङ्गाङ्गिभावेन सङ्करः । व्यञ्जकाद्यप्रयोगात् प्रतीयमानोत्प्रेक्षा ॥ १४ ॥

रञ्जिता इति । तिमिरेण अन्धकारेण विविधाः तरवः शैलाश्च रञ्जिताः स्वसावर्ण्यम् आपादिताः नु ? अन्यथा कथमेषां नीलाद्यत्वमिति भावः । तथा गगनं नामितं नु ? आभूतलात् इति शेषः । "मितां ह्रस्वः" इत्यत्र वाग्रहणानुवृत्त्या व्यवस्थितविभाषाश्रयणात् न ह्रस्वः । यद्वा, गगनं स्थगितम् आच्छादितं नु ? उभयत्र अपि तमसावृतत्वात् न दृश्यते इति भावः । तथा धरित्री विषमेषु निम्नोन्नतेषु पूरिता समीकृता नु ? अन्यथा तद्विवेकः कथं न स्यात् ? इति भावः । ककुभः दिशश्च संवृताः नु लुप्ताः किम् ? "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः । कथम् अन्यथा न दृश्यन्ते इति भावः । अत्र तिमिरे तरुशैलाद्यनेकविषयरञ्जकत्वादिकम् आरोप्य सन्दिग्ध इति सन्देहालङ्कारः । अनेन नुशब्दस्य सम्भावनाद्योतकत्वम् अत्रोत्प्रेक्षालङ्कारइति अलङ्कारसर्वस्वकारः ॥१५॥

रात्रिरागमलिनानि विकाशं
पङ्कजानि रहयन्ति विहाय ।
स्पष्टतारकमियाय नभःश्रीः
वस्तुमिच्छति निरापदि सर्वः ॥ १६ ॥
व्यानशे शशधरेण विमुक्तः
केतकी कुसुमकेसरपाण्डुः ।
चूर्णमुष्टिरिव लम्भितकान्तिः
वासवस्य दिशमंशुसमूहः ॥ १७ ॥
उज्झती शुचमिवाशु तमिस्राम्
अन्तिकं व्रजति तारकराजे ।
दिक्प्रसादगुणमण्डनमूहे
रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥

रात्रेति । श्रीः शोभा कर्त्री रात्रेः सन्ध्यायाः रागेण स्वच्छायोपरञ्जनेन मलिनानि अतएव विकाशं रहयन्ति त्यजन्ति । रहयतेः त्यागार्थात् शतृप्रत्ययः । पङ्कजानि विहाय त्यक्त्वा स्पष्टतारकं नभः खम् इयाय प्राप तथाहि सर्वः जनः निरापदि निर्बाधस्थले वस्तुं स्थातुम् । "एकाच उपदेशेऽनुदात्तात्" इति इट् प्रतिषेधः । घसिभ्स सान्तेषु वसिः प्रसारिणीति वचनात् । इच्छति ॥ १६ ॥

अस्तादिसन्ध्यान्तं वर्णयित्वा चन्द्रोदयवर्णनम् आरभते । व्यानशे इति । शशधरेण चन्द्रेण विमुक्तः त्यक्तः केतकीकुसुमकेसरः इव पाण्डुः लम्भिता प्रापिता कान्तिः यस्य सः अंशुसमूहः रश्मिसमूहः चूर्णस्य कर्पूरचोदस्य मुष्टिः इव । मुष्टिशब्दस्य स्त्रिलिङ्गत्वे अपि अत्र पुंलिङ्गता एव ग्राह्या । उपमेयानुसारात् वासवस्य इन्द्रस्य दिशं प्राचीं व्यानशे व्याप । अनेन निशानिशाकरयोः नायिकानायकौपम्यं गम्यते ॥ १७ ॥

उज्झतीति । इन्द्रस्य इयम् ऐन्द्री दिक् प्राची तारकराजे नक्षत्रनाथे । "कनीनिकायां नक्षत्रे तारकं तारकापि च" इति विश्वः । अन्तिकं समीपं व्रजति सति । आशु तमिस्राम् अन्धतमसम् । "तमिस्रा स्त्री ध्वान्तनिशि निश्यन्धतमसे न ना" इति वैजयन्ती । शुचम् इव विरह-

नीलनीरजनिभे हिमगौरं
शैलरुङ्नवपुषः शितरश्मेः ।
खे रराज निपतत्करजालं
वारिधेः पयसि गाङ्गमिवाम्भः ॥ १९ ॥
द्यां निरुन्धदतिनीलघनाभं
ध्वान्तमुद्यतकरेण पुरस्तात् ।
क्षिप्यमाणमसितेतरभासा
शम्भुनेव करिचर्म चकासे ॥ २० ॥
अन्तिकान्तिकगतेन्दुविसृष्टे
जिह्मतां जहति दोधितिजाले ।
निःसृतस्तिमिरभारनिरोधात्
उच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥

दुःखमिव इत्यर्थः । उज्झतो विजहतो प्रसादः नैर्मल्यम् एव गुणः सः एवं मण्डनं यस्य तत् । रश्मयः हास इव तेन विशदं सुखम् इवं सुखम् अग्रभागम् । श्लिष्टोपमेयम् । जहे वहति स्म । अत्र दिक्चन्द्रयोः नायिकानायकौपम्यं गम्यते ॥ १८ ॥

नीलेति । शैलरुङ्नवपुषः उदयगिरितिरोहितमण्डलस्य सितरश्मेः इन्दोः सम्बन्धि नीलनीरजनिभे श्यामकमलतुल्ये खे आकाशे निपतत् प्रसरत् । हिमवत् गौरं शुभ्रं करजालं अंशुसमूहः वारिधेः पयसि निपतत् गाङ्गम् अम्भ इव रराज । उपमाने अपि विशेषणं योज्यम् ॥ १९ ॥

द्यामिति । द्यां निरुन्धत् आकाशम् आवृण्वत् अतिनीलघनाभं मेचकम् । उद्यताः कराः अंशवः हस्ताश्च यस्य तेन । असिताभ्य इतराः शुभ्राः भासः यस्य तेन चन्द्रेण पुरस्तात् प्राच्याम् अग्रे च क्षिप्यमाणं नुद्यमानं ध्वान्तं शम्भुना क्षिप्यमाणं करिचर्म इव चकासे । उपमाने अपि विशेषणानि योज्यानि ॥ २० ॥

अन्तिकेति । अन्तिकान्तिके अतिसमीपे । "प्रकारे गुणवचनस्य" इति द्विर्भावः । कर्मधारयवद्भावात् सुपः लुक् । अन्तिकान्तिकगतेन इन्दुना विसृष्टे मुक्ते दोधितिजाले किरणसमूहे जिह्मतां सङ्कोचं जहति

लेखया विमलविद्रुमभासा
सन्ततं तिमिरमिन्दुरुदासे ।
दंष्ट्रया कनकटङ्कपिशङ्गया
मण्डलम्भ्व इवादिवराहः ॥ २२ ॥
दीपयन्नथ नभः किरणौघैः
कुङ्कुमारुणपयोधरगौरः ।
हेमकुम्भ इव पूर्वपयोधेः
उन्ममज्ज शनकैस्तुहिनांशुः ॥ २३ ॥
उद्गतेन्दुमविभिन्नतमिस्रां
पश्यति स्म रजनीमवितृप्तः ।
व्यंशुकस्फुटमुखीमतिजिह्मां
व्रीड़या नवबधूमिव लोकः ॥ २४ ॥

तत्रति सति तिमिरभारैः तमःस्तोमैः निरोधात् उपरोधात् निःसृतः निर्गतः दिगन्तः उच्छ्वसन् प्राणन् एव रराज इति उत्प्रेक्षालङ्कारः ॥२१

लेखयेति । इन्दुः विमलविद्रुमभासा स्वच्छप्रवालसवर्णया लेखया कलया सन्ततं सान्द्रं तिमिरम् आदिवराहः कनकस्य टङ्कः शिलाभेदकं शस्त्रम् । "टङ्कः पाषाणदारणः" इत्यमरः । तद्वत् पिशङ्गया लोहितवर्णया । पिशङ्गादुपसंख्यानम्" इति ङीप् । दंष्ट्रया भुवः मण्डलम् इव उदासे उच्चिक्षिपे । अस्यतेः कर्त्तरि लिट् । सोपसर्गात् अस्यतेः आत्मनेपदं विकल्पात् ॥ २२ ॥

दीपयन्निति । अथ उदयानन्तरं किरणौघैः नभः दीपयन् प्रकाशयन् कुङ्कुमेन अरुणः यः पयोधरः कुचः तद्वत् गौरः अरुणः उदयरागात् इति भावः । तुहिनांशुः इन्दुः शनकैः पूर्वपयोधेः पूर्वसागरात् हेम्नः कुम्भ इव उन्ममज्ज उज्जगाम इति उत्प्रेक्षा ॥ २३ ॥

उद्गतेन्दुमिति । लोकः जनः । "लोकस्तु भुवने जने" इत्यमरः । उद्गतेन्दुम् उदितचन्द्राम् अविभिन्नतमिस्राम् अनिःप्रेषितध्वान्तां रजनीं व्यंशुकम् अपनीतावगुण्ठनम् अतएव स्फुटं दृश्यमानं मुखं यस्याः सा तां तथापि व्रीड़या अतिजिह्मां वक्रां नवबधूं नवोढ़ाम् । "बधुर्-

न प्रसादमुचितं गमिता द्यौः
नोद्धृतं तिमिरमद्रिवनेभ्यः ।
दिग्मुखेषु न च धाम विकीर्णं
भूषितैव रजनी हिमभासा ॥ २५ ॥
मानिनीजनविलोचनपातान्
उष्णवाष्पकलुषान् प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं
भीत भीत इव शीतमयूखः ॥ २६ ॥
श्लिष्यतः प्रियवधूरुपकण्ठं
तारकास्ततकरस्य हिमांशोः ।
उद्गमन्नभिरराज समन्तात्
अङ्गराग इव लोहितरागः ॥ २७ ॥

वोढ्योषायां स्नुषाभार्य्याङ्गनासु च" इति धरणिः । स्त्रियम् इव अविलम्बः सन् पश्यति स्म ॥ २४ ॥

नेति । हिमभासा चन्द्रेण द्यौः आकाशम् उचितं योग्यं प्रसादं न गमिता । अद्रयः वनानि च तेभ्यः तिमिरं न उद्धृतं न उत्सारितं, दिग्मुखेषु धाम तेजश्च न विकीर्णं न पर्य्यस्तं । तथापि रजनी भूषिता एव किमुत उक्तगुणसम्पन्ना इति भावः । अत्र प्रसाधनकारणाभावे अपि तत्कार्य्यभूषणोक्त्या विभावनालङ्कारः ॥ २५ ॥

मानिनीति । उदितः शीतमयूखः उष्णेन विरहतप्तेन बाष्पेण कलुषान् आविलान् मानिनीजनस्य कलहान्तरितनायिकाजनस्य विलोचनपातान् मानभङ्गजनितरोषेण भीषणान् इति भावः । "कोपात् कान्तं पराणुद्य पश्चात्तापसमन्विता । कलहान्तरिता प्रोक्ता नायिका नयशालिभिः ॥" इति दशरूपके । प्रतिगृह्णन् स्वीकुर्वन् अपराधस्य अपरिहार्य्यत्वात् इति भावः । अतएव भीतभीतः भीतप्रकारः इव इति उत्प्रेक्षा । मन्दमन्दं मन्दप्रकारम् उभयत्रापि "प्रकारे गुणवचनस्य" इति द्विर्भावे कर्मधारयवद्भावात् सुलोपः । खम् आकाशं प्रययौ ॥ २६ ॥

श्लिष्यत इति । ततः प्रसारिताः कराः एव कराः अंशुहस्ता येन

प्रेरितः शशधरेण करौघः
संहतान्यपि नुनोद तमांसि ।
क्षीरसिन्धुरिव मन्दरभिन्नः
काननान्यविरलोच्चतरूणि ॥ २८ ॥
शारतां गमितया शशिपादैः
क्षायया विटपिनां प्रतिपेदे ।
न्यस्तशुक्लबलिचित्रतलाभिः
तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥
आतपे धृतिमता सह बध्वा
यामिनीविरहिणा विहगेन ।

तस्य तत्करस्य तारका एव प्रियबधूः उपकण्ठम् अन्तिके कण्ठे वा । अत्यन्तसंयोगे द्वितीया । विभक्त्यर्थे अव्ययीभावः । श्लिष्यतः प्रत्यासीदतः आलिङ्गतश्च हिमांशोः सम्बन्धो समन्तात् उद्गमन् उत्सर्पन् अर्थान्तरत्वात् अकर्मकत्वम् । "धातोरर्थान्तरे वृत्ते" इति वचनात् । लोहितरागः अरुणप्रभः अङ्गराग इव अभिरराज । आलिङ्गनात् रागः गलति इति प्रसिद्धिः । अत्र रूपकोपमयोरङ्गाङ्गिभावेन सङ्करः ॥ २७ ॥

प्रेरित इति । शशधरेण चन्द्रेण प्रेरितः, विसृष्टः करौघः संहतानि सान्द्राणि अपि तमांसि मन्दरेण मन्दराचलेन भिन्नः नुन्नः क्षीरसिन्धुः अविरलाः सान्द्राः उच्चाः उन्नताश्च तरवः येषु तानि काननानि इव नुनोद चिक्षेप दूरोचकार ॥ २८ ॥

शारतामिति । शशिपादैः चन्द्ररश्मिभिः । "पादा रश्म्यङ्घ्रि-तुर्य्यांशाः" इत्यमरः । शारतां शबलतां गमितया । "शारः शबलपोतयोः" इति विश्वः । विटपिनां तरूणां क्षायया न्यस्तैः निक्षिप्तैः शुक्लबलिभिः श्वेतपुष्पाद्युपहारैः चित्राणि तलाणि उपरिभागाः यासां ताभिः । "करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्" इत्यमरः । वसतिवेश्म-महीभिः निवासगृहभूमिभिः तुल्यता साम्यं प्रतिपेदे प्राप्ता । कर्म्मणि लिट् । आर्थीयमुपमा ॥ २८ ॥

आतपे इति । आतपे दुःखकरे अपि इति भावः । बध्वा चक्रवाक्या

सेहिरे न किरणा हिमरश्मे-
र्दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥
गन्धमुद्वहतरजः कणवाही
विक्षिपन् विकसतां कुमुदानाम् ।
आदुधाव परिलीनविहङ्गा
यामिनीमरुदपां वनराजीः ॥ ३१ ॥
संविधातुमभिषेकमुदासे
मन्मथस्य लसदंशुजलौघः ।
यामिनीवनितया ततचिह्नः
सोत्पलो रजतकुम्भ इवेन्दुः ॥ ३२ ॥

सह अतएव धृतिमता सन्तोषवता यामिनीषु विरहिणा नियतविरहेण अतएव विहगेन चक्रवाकेण हिमरश्मेः चन्द्रस्य किरणा न सेहिरे। तथाहि—दुःखिते सञ्जातदुःखे मनसि सर्वं मनोहरम् अपीति भावः। असह्यं सोढुम् अशक्यम्। "शकिसहोश्च" इति यत्प्रत्ययः। पूर्वं तु "आतपाः" इति पेठुः। तत्र बध्वा सह आतपाः अपि सेहिरे। तद्विरहिणा तु शशिकिरणाः अपि न सेहिरे इति योज्यम्। फलन्तु समानम् ॥ ३० ॥

गन्धमिति। अपां कणवाही। योग्यान्वये व्यवधानम् अपि सोढव्यम्। विकसतां कुमुदानां गन्धं सौरभम् उद्वहतं रजः परागः यस्मिन् कर्मणि तत् यथा तथा। "शेषाद्विभाषा" इति विकल्पात् न कप्। विक्षिपन् विकिरन् इत्थं शशिरः सुरभिः यामिनीमरुत् रात्रिवायुः परितः लीनाः शयिताः विहङ्गाः यासु ताः वनराजीः आदुधाव ईषत् कम्पयामास। विहङ्गशयनाविरोधेन वनराजिः किञ्चित् कम्पिता इत्यर्थः। "आङोऽपदर्थेऽभिव्याप्तौ" इत्यमरः। यथा कश्चित् कामिनीं गन्धोदकादिना सिञ्चन् आकर्षति तद्वदिति भावः ॥ ३१ ॥

संविधातुमिति। यामिनो वनिता इव तया रात्रिरूपया कान्तया मन्मथस्य अभिषेकं त्रिभुवनजैत्रयात्राभिषेकं संविधातुं सम्यक् कर्तुम् अंशवः जलानीव तेषाम् ओघः पूरः लसन् यस्मिन् सः। ततचिह्नः स्फुट-लाञ्छनः इन्दुः सोत्पलः रजतकुम्भ इव उदासे उत्क्षिप्तः। असतेः कर्मणि

ओजसापि खलु नूनमनूनं
नासहायमुपयाति जयश्रीः ।
यद्विभुः शशिमयूखसखः स-
न्नाददे विजयि चापमनङ्गः ॥ ३३ ॥
सङ्गनां विरचनाहितशोभै-
रागतप्रियकथैरपि दूत्यम् ।
सन्निकृष्टरतिभिः सुरदारै-
र्भूषितैरपि विभूषणमीषे ॥ ३४ ॥
न स्रजो रुरुचिरे रमणीभ्य-
श्चन्दनानि विरहे मदिरा वा ।
साधनेषु हि रतेरुपधत्ते
रम्यतां प्रियसमागम एव ॥ ३५ ॥

लिट् । अत्र संविधातुम् इति तुमुना प्रतीयमानोत्प्रेक्षया अनुप्राणितः अयमुपमोत्प्रेक्षयोः सङ्करः ॥ ३२ ॥

ओजसेति । ओजसा अनूनं सम्पूर्णम् अपि असहायं सहायरहितं पुरुषम् इति शेषः । जयश्रीः न उपयाति खलु नूनम् । कुतः ? यदि अस्मात् विभुः समर्थः अपि अनङ्गः शशिमयूखानां सखा सहचरः तथोक्तः ससहायः सन् इत्यर्थः । विजयि विजयशीलम् । "जिदृचि" इत्यादिना इन्प्रत्ययः । चापम् आददे । विशेषेण सामान्यसमर्थनरूपः अर्थान्तरन्यासः ॥ ३३ ॥

इत्थम् उद्दीपनसामग्रीम् उपवर्ण्य संप्रति तत्कार्य्यभूतं रतिवर्णनम् आरभते—सङ्गनामित्यादि । सन्निकृष्टरतिभिः आसन्नसुरतोत्सवैः अतएव सुरदारैः सुरवधूभिः आहितशोभैः प्रागेव विहितकेलिगृहमण्डनैः अपि पुनः सङ्गनां केलिगृहाणां विरचना मण्डनम् ईषे अभिलषेः । ईषेः कर्मणि लिट् । आगतप्रियकथैः प्राप्तप्रियजनवृत्तान्तैः अपि दूतस्य कर्म दूत्यं दूतो-व्यापारः ईषे । "वा दूतवणिग्भ्याञ्च" इति दूतस्य भावकर्मणोर्यप्रत्ययः । तथा भूषितैः अपि विभूषणं प्रसाधनम् ईषे । औत्सुक्यातिरेकादिति भावः ॥ ३४ ॥

नेति । विरहे वियोगावस्थायां स्रजः माल्यानि चन्दनानि गन्धाः मदिराः मद्यानि वा रमणीभ्यः । "कृत्यर्थानां प्रीयमाणः" इति सम्प्रदान-

प्रस्थिताभिरधिनाथनिवासं
ध्वंसितप्रियसखीवचनाभिः।
मानिनीभिरपहस्तितधैर्य्यः
सादयन्नपि मदोऽवललम्बे ॥ ३६ ॥
कान्तवेश्म बहु सन्दिशतीभि-
र्यातमेव रतये रमणीभिः।
मन्मथेन परिलुप्तमतीनां
प्रायशः स्खलितमप्युपकारि ॥ ३७ ॥
आशु कान्तमभिसारितवत्या
योषितः पुलकरुद्धकपोलम्।

त्वात् चतुर्थी। न रुरुचिरे न रोचन्ते स्म। हि यस्मात् प्रियसमागम एव रतेः साधनेषु स्रगादिषु रम्यतां मनोहरत्वं रुचिकरत्वमिति यावत् उपधत्ते आधत्ते। तदभावात् अरुचिः युक्तैवेत्यर्थः। अतएव वैधर्म्यात् कारणेन कार्य्यसमर्थनरूपः अर्थान्तरन्यासः। रम्यन्ते एष्विति रम्याणि। "पोरदुपधात्" इति यत्प्रत्ययः। "क्त्यल्युटो बहुलम्" इति बहुलग्रहणात् अधिकरणार्थः ॥ ३५ ॥

प्रस्थिताभिरिति। अधिनाथनिवासं प्रियगृहं प्रति प्रस्थिताभिः प्रचलिताभिः ध्वंसितानि खण्डितानि प्रियसखीवचनानि, स्वयं प्रस्थानं लाघवाय, इत्येवं रूपाणि याभिः ताभिः मानिनीभिः कोपनाभिः। "स्त्रीणामीर्षाकृतः कोपो मानोऽन्यासङ्गिनि प्रिये" इति लक्षणात्। अपहस्तितं निरस्तं धैर्य्यं येन सः तथा सादयन् मानं शरीरञ्च कर्षयन् अपि सदोषः अपीत्यर्थः। मदः अवललम्बे स्वीकृतः। अज्ञानव्याजेन लाघवापक्वसीकर्य्यादिति भावः ॥ ३६ ॥

कान्तेति। रतये सुरताय बहु सन्दिशतीभिः अनेकं वाचिकं कथयन्तीभिः सन्देशव्यसनात् गन्तव्यम् अपि अजानतीभिरित्यर्थः। रमणीभिः कान्तवेश्म यातं प्राप्तमेव न तु मध्ये मार्गात् निवृत्तम् इत्यर्थः। तथाहि —मन्मथेन परिलुप्तमतीनां स्खलितं विरुद्धाचरणमपि प्रायशः उपकारि भवति ॥ ३७ ॥

आशिति। आशु कान्तम् अभिसारितवत्याः अभिगतवत्याः। स्वार्थ

निर्जिगाय मुखमिन्दुमखण्डं
खण्डपत्रतिलकाकृति कान्त्या ॥ ३८ ॥
उच्यतां स वचनीयमशेषं
नेश्वरे परुषता सखि ! साध्वी ।
आनयैनमनुनीय कथं वा
विप्रियाणि जनयन्ननुनेयः ॥ ३९ ॥
किं गतेन न हि युक्तमुपैतुं
कः प्रिये सुभगमानिनि ! मानः ।
योषितामिति कथासु समेतैः
कामिभिर्भ्रुरसा धृतिरूहे ॥ ४० ॥

॥ युग्मकम् ॥

णिच् । योषितः सम्बन्धि पुलकैः रुद्धो आवृतो कपोलो यस्य तत् । खण्डा प्रमृष्टा पत्राणां पत्रलेखानां तिलकस्य च आकृतिः सन्निवेशः यस्य तत्, तथोक्तं मुखं कान्त्या अखण्डं पूर्णमिन्दुं निर्जिगाय जयति स्म । आर्थीय-मुपमा । "जयति ह्रेष्टि" इति दण्डिना साट्श्यार्थेषु गणनात् ॥ ३८ ॥

अथ युग्मेन सखीनायिकासंवादमाह—उच्यतामिति । तत्र नायिका आह—स धूर्त्तः अशेषम् अखिलं वचनीयं वक्तव्यम् उच्यतां, निःशङ्कम् उपालभ्यताम् इत्यर्थः । ब्रूञो दुहादित्वात् अप्रधाने कर्मणि लोट् । अथ सखी आह—हे सखि ! ईश्वरे भर्त्तरि नायके विषये परुषता पारुष्यं न साध्वी न हिता । अथ नायिका आह—हे सखि ! तर्हि एनम् अनुनीय सान्त्वयित्वा आनय । पुनः सखी आह—विप्रियाणि जनयन् अप्रियाणि कुर्वन् स कथं वा अनुनेयः अनुनयार्हः ॥ ३९ ॥

किमिति । पुनर्नायिका आह—तर्हि गतेन तं प्रति गमनेन किं कः अर्थ इत्यर्थः । कुतः ? उपैतुं गन्तुं न युक्तं हि । पुनः सखी आह—हे सुभगमानिनि ! सौन्दर्य्यमानिनि ! सुभगम् आत्मानं मन्यते इति "आत्ममाने खश्च" इति चकारात् णिनिप्रत्ययः । तस्मिन् प्रिये विषये कः मानः ? मानो न कर्त्तव्य इत्यर्थः । यद्वा नहि इत्यादि सखीवाक्यम् । तत्र न हि इत्येकं वाक्यं, तद्युक्तं सखीत्यर्थः । हे सखि ! किन्तु उपैतुं

योषितः पुलकरोधि दधत्या
घर्मवारि नवसङ्गमजन्म ।
कान्तवक्षसि बभूव पतन्त्या
मण्डनं ललितमण्डनतैव ॥ ४१ ॥
शीधुपानविधुरासु निगृह्णन्
मानमाशु शिथिलीकृतलज्जः ।
सङ्गतासु दयितैरुपलेभे
कामिनीषु मदनो नु मदो नु ॥ ४२ ॥
द्वारि चक्षुरधिपाणि कपोलौ
जीवितं त्वयि कुतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं
प्रीतये नवनवत्वमियाय ॥ ४३ ॥

युक्तम् । कुतः ? सुभगमानिनि प्रिये कः मानः तादृग्जनस्य दुर्लभत्वादिति भावः । इत्येवंरूपासु योषितां कथासु विषये समेतैः समीपम् आगत्य आकर्णयद्भिरित्यर्थः । कामिभिः बहुरसा अनेकस्वादा धृतिः सन्तोषः जहे जढ़ा । अत्र रौद्यौत्सुक्यनिर्वेदादयनेकभावशाबल्यपरिपूर्णकान्ताकथाकर्णनात् उत्तरोत्तरम् अपूर्वहृदयानन्दनिष्यन्दम् आनन्दसन्दोहम् अविन्दन् इत्यर्थः । प्रायेण अत्र प्रौढ़ाः कलहान्तरिताश्च नायिकाः ॥ ४० ॥

योषित इति । पुलकरोधि रोमाञ्चव्याप्ति नवसङ्गमेन जन्म यस्य तत् घर्मवारि स्वेदोदकं दधत्या इति सात्त्विकोक्तिः । कान्तवक्षसि पतन्त्याः इति औत्सुक्योक्तिः । योषितः या ललितमण्डनता उत्सृष्टप्रसाधनत्वम् । भावे तल् । सैव मण्डनं बभूव । तादृशफलत्वात् तस्येति भावः ॥ ४१ ॥

शीध्विति । शेरते अनेन इति शीधुः पक्वे क्षुरसविकारः मद्यविशेषः तस्य पानेन विधुरासु विमूढ़ासु तथा दयितैः सङ्गतासु स्वयंप्राप्तासु च कामिनीषु अतिमानवतीषु आशु मानं कोपं निगृह्णन् निवर्त्तयन् शिथिलीकृता लज्जा येन स मदनः नु ? मदः नु उपलेभे लक्ष्यते स्म इत्यर्थः । प्रियसमागमशीधुपानरूपोभयकारणाभङ्गात् उभयथा माननिग्रहाद्यनुभावसाधारण्याच्च सन्देहः स एव अलङ्कारः ॥ ४२ ॥

साचि लोचनयुगं नमयन्ती
रुन्धती दयितवक्त्रसि पातम् ।
सुभ्रुवो जनयति स्म विभूषां
सङ्गतावुपरराम च लज्जा ॥ ४४ ॥
सव्यलोकमवधीरितखिन्नं
प्रस्थितं सपदि कोपपदेन ।
योषितः सुहृदिव स्म रुणद्धि
प्राणनाथमभिबाष्पनिपातः ॥ ४५ ॥
शङ्किताय कृतबाष्पनिपाताम्
ईर्ष्यया विमुखितां दयिताय ।

हारीति । हारि त्वदागमनमार्गं एव चक्षुरिति प्रीत्युक्तिः । अधिपाणि पाणौ करे कपोलौ इति चिन्तोक्तिः । किं बहुना, जीवितं त्वयि त्वदधीनं, त्वां विना न जीवति इत्यर्थः । इति गाढानुरागोक्तिः । अतोऽस्याः कलहः विग्रहः कृतः ? इत्येवं कामिनीनां प्रीतये पुनरुक्तं पुनःपुनः उच्यमानं वचः दूतीवाक्यं नवनवत्वं नवप्रकारत्वम् अपूर्ववद्भावम् इयाय । प्रकारार्थे द्विर्भावः कर्मधारयवद्भावात् सुपो लुक् । कान्तानुरागप्रकटनात् कामिनः प्रहृष्यन्ति इति भावः । कलहान्तरितेयम् ॥ ४३ ॥

साचीति । लोचनयुगं साचि तिर्यक् नमयन्ती प्रिये तिर्यक् पातयन्ती न तु क्रिया इत्यर्थः । दयितवक्त्रसि पातं रुन्धतो इष्टम् अपि प्रतिबध्नतो लज्जा सुभ्रुवः नायिकायाः विभूषां शोभां जनयति स्म । सङ्गतौ सुरतप्रसङ्गे सति उपरराम च । एवं यतः तदा चाभूषणं [न दूषणम्] एवेति भावः । "विभाषाकर्मकात्" इति परस्मैपदम् ॥ ४४ ॥

सव्यलोकमिति । सव्यलोकं सापराधम् अतएव अवधीरितः अवज्ञातः सन् खिन्नः तम् । "पूर्वकाल" इत्यादिना तत्पुरुषः । सपदि कोपस्य पदेन व्याजेन प्रस्थितं निर्गच्छन्तं प्राणनाथं प्रियं योषितः सम्बन्धि अभिबाष्पनिपातः आभिमुख्येन अश्रुमोचः सुहृत् इव रुणद्धि स्म रुरोध । बाष्पपातस्य मन्युमोचलिङ्गतया प्रस्थानप्रतिबन्धकत्वात् सुहृदौपम्यम् । इयम् अधीरा खण्डिता । "ज्ञातेऽन्यासङ्गिनि पत्यौ खण्डितेर्ष्याकषायिता । अधीराश्रु विमुञ्चन्ती विज्ञेया चात्र नायिका ॥" इति दशरूपके ॥ ४५ ॥

मानिनीमभिमुखाहितचित्तां
शंसति स्म घनरोमविभेदः ॥ ४६ ॥
लोलदृष्टि वदनं दयिताया-
श्चुम्बति प्रियतमे रभसेन।
व्रीड़या सह विनीवि नितम्बा-
दंशुकं शिथिलतामुपपेदे ॥ ४७ ॥
क्रीतया गलितनीवि निरस्यन्
अन्तरीयमवलम्बितकाञ्चि।
मण्डलीकृतपृथुस्तनभारं
सस्वजे दयितया हृदयेशः ॥ ४८ ॥

शङ्कितायेति। शङ्किताय नायकाय अविश्वस्ताय दयिताय ईर्ष्यं या विमुखितां विमुखीकृताम् अतएव कृतबाष्पनिपातां मानिनीं घनरोमविभेदः सान्द्रपुलकोदयः अभिमुखम् आहितं चित्तं यया तां निष्कोपामित्यर्थः। शंसति स्म व्यनक्ति स्म इत्यर्थः। अन्यथा सात्त्विकानुदयादिति भावः। अत्रापि पूर्वोक्तैव नायिका ॥ ४६ ॥

अथ सम्भोगशृङ्गारमाह—स आन्तरः बाह्यश्च, तत्रापि बाह्यरतमाह—लोलेति। प्रियतमे लोलदृष्टि चञ्चलेक्षणं दयितायाः वदनं रभसेन बलात्कारेण चुम्बति सति विनीवि निर्गतबन्धनम् अंशुकं नितम्बाद् व्रीड़या सह शिथिलताम् उपपेदे उभयम् अपि शिथिलम् आसीत् इत्यर्थः। अत्र व्रीड़ांशुकरूप-सम्बन्धिभेदभिन्नवृत्तिस्त्रंसनरूपशैथिल्यस्य अभेदाध्यवसायनिबन्धनातिशयोक्तिमूलः सहोक्तिविशेषोऽलङ्कारः। अतएव व्रीड़ांशुकोपम्यञ्च कल्प्यम्। अत्र वात्स्यायनः—"बाह्यमाभ्यन्तरं चेति द्विविधं रतमुच्यते। तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम्। द्वितीयं सुरतं साक्षाद्यानाकारेण कल्पितम्।" इति ॥ ४७ ॥

क्रीतयेति। गलितनीवि गलितबन्धनं तथापि अवलम्बिता काञ्ची येन तत् काञ्चीलग्नमित्यर्थः। तदन्तरीयम् अधोऽंशुकम्। "अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके" इत्यमरः। निरस्यन् आच्छिपन् हृदयेशः प्रियः क्रीतया वस्त्रापगमात् लज्जितया। क्रीधातोः कर्त्तरि क्तः। दयितया

आहता नखपदैः परिरम्भा-
श्चुम्बितानि घनदन्तनिपातैः ।
सौकुमार्य्यगुणसम्भृतकीर्त्ति-
र्वाम एव सुरतेष्वपि कामः ॥ ४९ ॥
पाणिपल्लवविधूननमन्तः
सीत्कृतानि नयनार्द्धनिमेषाः ।
योषितां रहसि गद्गदवाचा-
मस्रतामुपययुर्मदनस्य ॥ ५० ॥

मण्डलीकृतः वर्त्तुलीकृतः पृथुः स्तनभारः यस्मिन् कर्मणि तत् यथातथा गाढ़म् इत्यर्थः । सस्वजे आश्लिष्टः, प्रियदृष्टेः प्रतिबन्धार्थमित्यर्थः ॥४८॥

आहता इति । परिरम्भा आलिङ्गनानि नखपदैर्हेतुभिः आहता अभिमताः । हेतौ इति तृतीया । तथा चुम्बितानि चुम्बनानि घनदन्तनिपातैः गाढ़दन्तक्षतैः हेतुभिः आहतानि इति लिङ्गविपरिणामः । सुरतसुखोद्दीपकत्वात् नखदन्तक्षतपूर्वकेषु आलिङ्गनचुम्बनेषु आदरः संवृत्त इत्यर्थः । ननु सुकुमारे कामतन्त्रे कथं पीड़ाकरेषु आदर इति न वाच्यम्, इति आह—सौकुमार्य्यम् एव गुणः तेन सम्भृतकीर्त्तिः लब्धयशाः कामः सुरतेषु सम्भोगेषु अपि न केवलं विप्रलम्भेषु इति भावः । वामः क्रूर एव सुकुमारः काम इति वादमात्रम् । वस्तुतस्तु पीड़यन् एव सुखम् आवहति इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४९ ॥

अथ आभ्यन्तरं रतमाह—पाणीति । रहसि एकान्ते इति विश्वासातिशययोक्तिः । गद्गदवाचां स्खलद्गिरां योषितां सम्बन्धीनि पाणिपल्लवयोर्विधूननं कम्पनम् अन्तःसीत्कृतानि सीत्काराः । एतेन कुट्टमिताख्यो भाव उक्तः । "अधरपीड़नादौ सुखेऽपि दुःखदुपचारः कुट्टमितम्" इति लक्षणात् । नयनानाम् अर्द्धनिमेषाः अर्द्धनिमीलितानि । रहसि एकान्ते गद्गदवाचां योषितामिति विशेषणसामर्थ्यात् गद्गदकण्ठत्वं च इति, एतानि मदनस्य अस्रताम् उपययुः अस्रवत् पुंसाम् उद्दीपनानि आसन् इत्यर्थः । अत्र सीत्काराद्धनिमेषादिना सुखपारवश्यं व्यज्यते । तदुक्तं रतिरहस्ये—"स्रस्तता वपुषि मोलनं दृशोर्मूर्च्छना च रतिलाभलक्षणम् । श्लेषयेत् स्वजघनं मुहुर्मुहुः सीत्करोति गतलज्जिताकुला ॥" इति ॥ ५० ॥

पातुमाहितरतौन्यभिलेषु-
स्तर्षयन्त्यपुनरुक्तरसानि ।
सस्मितानि वदनानि बधूनां
सोत्पलानि च मधूनि युवानः ॥ ५१ ॥
कान्तसङ्गमपराजितमन्यौ
वारुणीरसनशान्तविवादे ।
मानिनीजन उपाहितसन्धौ
सन्दधे धनुषि नेषुमनङ्गः ॥ ५२ ॥
कुप्यताशु भवतानतचित्ताः
कोपितांश्च वरिवस्यत यूनः ।
इत्यनेक उपदेश इव स्म
स्वाद्यते युवतिभिर्मधुवारः ॥ ५३ ॥
भर्तृभिः प्रणयसम्भ्रमदत्तां
वारुणीमतिरसां रसयित्वा ।

अथ मधुपानवर्णनमारभते—पातुमित्यादिना। युवानः आहित-रतोनि वर्द्धितरागाणि अतएव अपुनरुक्तरसानि पुनःपुनः पानेनापि अपूर्वस्वादानि अतएव तर्षयन्ति तृष्णोत्पादकानि अतृप्तिकराणीत्यर्थः। सस्मितानि बधूनां वदनानि सोत्पलानि मधूनि च पातुमभिलेषुः इच्छन्ति स्म। अत्र प्रसुतानामिव वदनानां मधूनां च पानक्रियौपम्यस्य गम्यत्वात् केवलं प्राकरणिकविषयतया तुल्ययोगितालङ्कारः। "प्रसुतानां तथान्येषां केवलं तुल्यधर्मतः। औपम्यं गम्यते यत्र सा मता तुल्य-योगिता ॥" इति लक्षणात् ॥ ५१ ॥

कान्तेति। कान्तसङ्गमेन पराजितमन्यौ त्यक्तरोषे तदवधिकत्वात् तस्येति भावः। किञ्च, वारुणीरसनेन मध्वाख्यादेन शान्तः विवादः वाक्कल-हादिः यस्य तस्मिन्, अतः उपाहितसन्धौ प्रियैः सह कृतसन्धाने मानिनीजने विषये अनङ्गः धनुषि इषुं न सन्दधे सन्धानं नाकरोत्। सिद्धसाध्ये साधनवैयर्थ्यादिति भावः ॥ ५२ ॥

कुप्यतेति। यूनः प्रियान् कुप्यत यूनां कोपं जनयत। नात्र "क्रुधद्रुहे" इत्यादिना यूनां सम्प्रदानत्वे चतुर्थी, तस्य "यं प्रति

क्रौविमोहविरहादुपलेभे
पाटवं नु हृदयं नु बधूभिः ॥ ५४ ॥
स्वादितः स्वयमथैधितमानं
लम्भितः प्रियतमैः सह पीतः ।
आसवः प्रतिपदं प्रमदानां
नैकरूपरसतामिव भेजे ॥ ५५ ॥

कोपः" इति नियमात् । अत्र कोपस्तावत् कृत्रिम इति । आशु आनतचित्ताः अनुकूलचित्ताः भवत । किञ्च, कोपितास्तान् वरिवस्यत परिचरत । "नमोवरिवश्चित्रङः क्यच्" इति क्यच् । वरिवसःपरिचर्य्यायामित्यर्थे तस्य नियमस्य । इत्येवम् अनेकः अनेकप्रकारः यः उपदेशः प्रवर्त्तकवाक्यं स इव मधुवारः मधुपानावृत्तिः । "मधुवारा मधुक्रमा" इत्यमरः । युवतिभिः स्वाद्यते स्म । मधुवारस्य कोपादिकार्य्यप्रवर्त्तकत्वसाम्यात् उपदेश इवेति उत्प्रेक्षा । अनियताः खलु मत्तचेष्टा इति भावः ॥ ५३ ॥

भर्त्तृभिरिति । भर्त्तृभिः प्रणयसम्भ्रमाभ्यां प्रेमादराभ्यां दत्ताम् । "संभ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि" इति विश्वः । अतएव अतिरसाम् अधिकस्वादां वारुणीं वरुणात्मजाम् । "सुरा क्लिप्रिया हाला परिस्रुद्वरुणात्मजा" इत्यमरः । रमयित्वा आस्वाद्य बधूभिः क्रौविमोहविरहात् मदेन लज्जाजाड्यापगमात् हेतोः पाटवं पटुत्वं नु हृदयं ज्ञानविशेषं नु उपलेभे ? अतएव हृदयस्य तत्कार्य्यज्ञानसामर्थ्यात् हृदयमेव प्रागमत् पश्चात् लब्धमिति सन्देहः । अन्यथा कथं प्रियं प्रति वक्रोक्त्यादयेषु प्रवृत्तिरिति भावः । सन्देहालङ्कारः ॥ ५४ ॥

स्वादित इति । स्वयं स्वादितः आदौ स्वयमेव आदाय पीतः, अथ अनन्तरं प्रियतमैः एधितमानं वर्द्धितबहुसम्मानं यथा तथा लम्भितः ग्राहितः स्वहस्तेन प्रापित इत्यर्थः । ततः प्रियतमैः सह पीतः, युगपदेकपात्रेण पीत इत्यर्थः । आसवः प्रमदानां प्रतिपदं प्रतिक्षणं न एकरूपरसतामनेकविधस्वादुत्वम् । नञर्थस्य नञ्शब्दस्य सुप पेति समासः । नञ्समासे नलोपः स्यात् । भेजे इव प्राप इव । प्रायेण उपचारविशेषाद् भोज्येषु रसविशेषः स्यादिति भावः । आस्वादनादिपदार्थानाम् अनेक-

भ्रूविलाससुभगाननुकर्त्तुं
विभ्रमानिव बधूनयनानाम्।
आददे मृदुविलोलपलाशै-
रुत्पलैश्चषकवीचिषु कम्पः॥ ५६॥
ओष्ठपल्लवविदंशरुचीनां
हृद्यतामुपययौ रमणानाम्।
फुल्ललोचनविलोलसरोजै-
रङ्गनास्यचषकैर्मधुवारः॥ ५७॥
प्राप्यते गुणवतापि गुणानां
व्यक्तमाश्रयवशेन विशेषः।
तत्तथा हि दयितानन दत्तं
व्यानशे मधु रसातिशयेन॥ ५८॥

रसताप्राप्तिहेतुत्वात् काव्यलिङ्गं तावदेकं स्वादनादीनाम् अनेकधर्माणाम् एकस्मिन् एव सर्वक्रमेण सम्बन्धात् पर्य्यायभेदश्च, तयोश्च संसृष्टयोः अनेकरसत्वोत्प्रेक्षाबीजत्वात् तया सह अङ्गाङ्गिभावेन सङ्करः॥ ५५॥

भ्रूविलासेति। भ्रूविलासैः सुभगान् सुन्दरान् बधूनयनानां विभ्रमान् अनुकर्त्तुं तैः आत्मानं समीकर्त्तुमिवेति फलोत्प्रेक्षार्थत्वात्। मृदुविलोलपलाशैः ईषच्चञ्चलदलैः उत्पलैः चषकेषु याः वीचयः मधूर्मयः तासु यः कम्पः सः आददे स्वीकृतः न तु स्वकम्पः तस्य विलोलविशेषणेनैव उक्तत्वात् तत्स्वीकारश्च तद्योग एव। पूर्वं नेत्रमात्रसाम्यभाजाम् उत्पलानां कम्पमानवीचियोगात् सभ्रूविलासनेत्रसाम्यं जातमित्यर्थः॥५६॥

ओष्ठेति। ओष्ठ एव पल्लवः तस्य विदंशे दंशने रुचिः अभिलाषः येषां तेषां, सुखसुरापानमिषेण अधरं पिपासतामित्यर्थः। रमणानां फुल्लानि लोचनानि एव विलोलसरोजानि येषु तैः, अङ्गनास्यानि एव चषकाणि पानपात्राणि। "चषकोऽस्त्री पानपात्रम्" इत्यमरः। तैः मधुवारः मधुपानाद्वृत्तिः हृद्यतां हृदयप्रियतां उपययौ। "हृदयस्य प्रियः" इति यत्प्रत्ययः। "हृदयस्य हृल्लेखयदण्लासेषु" इति हृद्भावः। रमणविशेषणार्थं हेतुककाव्यलिङ्गसङ्कीर्णं रूपकालङ्कारः॥ ५७॥

वोच्य रत्नचषकेष्वतिरिक्तां
कान्तदन्तपदमण्डनलक्ष्मीम् ।
जज्ञिरे बहुमताः प्रमदाना-
मोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥
लोचनाधरकृताहृतरागा
वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां
व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

प्राप्यत इति । गुणवतापि आश्रयवशेन गुणानां विशेषः प्रकर्षः प्राप्यते व्यक्तं तत् तथा यदुक्तं तथैवेत्यर्थः । हि यस्मात् दयितायाः आननेन करणेन दत्तं मधु रसातिशयेन स्वादुप्रकर्षेण कर्त्रा व्याप्तम् । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५८ ॥

वोच्येति । रत्नचषकेषु स्फटिकादिमणिपात्रेषु अतिरिक्तां यावकापगमात् पूर्वाभ्यधिकां कान्तस्य यत् दन्तपदमण्डनं तस्य लक्ष्मीं शोभां प्रतिबिम्बतामिति शेषः । वोच्य ओष्ठयावकनुदः अधरलाक्षारागहारिणः मधुवाराः मधुपानाभ्यासाः प्रमदानां बहुमताः अभिमताः । वर्त्तमाने क्तः तद्योगात् षष्ठी । जज्ञिरे जाताः । तेषां प्रियानुरागचिह्नप्रकाशकत्वादिति भावः ॥ ५९ ॥

मधुपानात् विलोचनेषु रागोत्पत्तिः अधरेभ्यश्च लाक्षारागनिवृत्तिः मध्याननयोश्च अन्योन्यगन्धसंक्रान्तिरिति स्थिते सति उत्प्रेक्षते—लोचनेति । लोचने च अधरश्च लोचनाधरम् । "समुद्राभ्राद्रः" इति व्यभिचारज्ञापकात् नात्राधरशब्दस्य पूर्वनिपातः । कृतश्चासौ आहृतश्च इति विशेषणसमासः । लोचनाधरस्य कृताहृतः रागः यया सा तथोक्ता । लोचनयोः कृतरागा अधरात् आसमन्तत् हृतरागा चेत्यर्थः । षष्ठ्याश्च अर्थसम्बन्धात् सामान्यस्य योग्यविशेषे पर्य्यवसाननियमेन अधिकरणापादानार्थं योराक्षेपात् । तथाच अधरलोचनगुणयोः रागतद्विरहयोः स्थानपरिवृत्तिं कृतवतीत्यर्थः । तथा वासितेन स्वगन्धसंक्रान्तिसुरभितेन आननेन विशेषितः अतिशयितः गन्धो यस्याः सा । यद्वा वासिताननात्रासौ अर्थात् आननेनैव विशेषितगन्धा चेति कृतबहु-

तुल्यरूपमसितोत्पलमक्ष्णोः
कर्णगं निरुपकारि विदित्वा ।
योषितः सुहृदिव प्रविभेजे
लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥
क्षौणयावकरसोऽप्यतिपानैः
कान्तदन्तपदसम्भृत[लम्भित]शोभः ।

व्रीहिविशेषणसमासः । उभयथापि आननसंक्रान्तस्वगन्धा स्वसंक्रान्तानन-गन्धा चेत्यर्थः । एवम्भूता वारुणी मदिरा परगुणात्मगुणानां परयोः लोचनाधरयोः गुणौ च परस्य आननस्य गुणः आत्मनः वारुण्याः गुणस्य परगुणात्मगुणाः तेषां परगुणात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने विस्तारयामास । चित्तेन प्रामादिकौ वस्तुपरिवृत्तिव्यत्ययः । बुद्धिपूर्व्वा वस्तुपरिवृत्तिस्तु विनिमयः । अत्र तन्त्रोच्चरितस्य परगुणशब्दस्य आवृत्त्या परगुणो च परगुणात्मगुणो चेति विग्रहः कथञ्चित् भगत्या सोढव्यः । उपमानपूर्वपदबहुव्रीहिवत् । तथाचायमर्थः—परगुणयोः अधरलोचनगुणयोः रागतद्विरहयोर्व्यत्ययं नु विनिमयं नु वितेने ? तथा परगुणात्मगुणयोराननगन्धात्मगन्धयोश्च व्यत्ययं नु विनिमयं नु वितेने ? अन्यथा कथम् अन्यस्मिन् अन्यधर्म्मोपलब्धः सम्भवतीति भावः । अत्र लोचनाधररागयोस्तदभावयोर्वा भेदे अपि अभेदाध्यवसायात् एकत्ववाचो युक्तिः, तस्मात् तन्मूलातिशयोक्त्यनुप्राणिता चेयं व्यत्ययविनिमययो-रन्यतरकरणोत्प्रेक्षा इति संक्षेपः । सा च प्रतीयमाना व्यञ्जकाप्र-योगात् । नुशब्दस्तु संशये ॥ ६० ॥

तुल्येति । अक्ष्णोस्तुल्यरूपम् अक्षितुल्याकृति योषितः कर्णगं कर्णावतंसोकृतम् असितोत्पलं निरुपकारि अनुपकारकं विदित्वा ज्ञात्वा तत्कार्य्यं शोभायाः कर्णान्तविश्रान्तेन अक्ष्णा एव कृतत्वादिति भावः । मदरागः सुहृत् इव उत्पलस्य बन्धुरिव अनिष्टवारकत्वादिति भावः । लम्भितेक्षणरुचिः आहितनयनकान्तिः सन् प्रविभेजे वर्णान्तरापादनेन प्रविभक्तवान् । अवैलक्षण्यकरात् अक्ष्णः व्यावर्त्तयामास । ततः विच्छित्तिकरत्वादिति भावः ॥ ५१ ॥

आययावतितरामिव बध्वाः
सान्द्रतामधरपल्लवरागः ॥ ६२ ॥
रागकान्तनयनेषु नितान्तं
विद्रुमारुणकपोलतलेषु ।
सर्वगापि दृष्टशे वनितानां
दर्पणेष्विव मुखेषु मदश्रीः ॥ ६३ ॥
बङ्क्वकोपविकृतीरपि रामा-
श्चारुताभिमततामुपनिन्ये ।
वश्यतां मधुमदो दयिताना-
मात्मवर्गहितमिच्छति सर्वः ॥ ६४ ॥

क्षीणेति । अतिपानैः क्षीणयावकरसः क्षीणलाक्षारागोऽपि कान्तस्य दयितस्य दन्तपदेन दन्तक्षतेन सम्भृता शोभा यस्य सः बध्वा अधरपल्लवरागः अतितराम् अतिमात्रम् । अतिशब्दात् तरप् प्रत्यये "किमेत्तिङव्यय" इत्यादिना आम्प्रत्ययः । "तद्धितश्चासर्वविभक्तिः" इति अव्ययसंज्ञा । सान्द्रतां घनत्वम् आययौ इव । प्रियोपभोगचिह्नमण्डितानां कामिन्यवयवानां किम् अन्यैः मण्डनैरिति भावः । तत्र क्षीणस्यापि सान्द्रता इति विरोधात् कान्तदन्तेत्यादिविशेषणगत्या सान्द्रत्वे हेतूक्त्या काव्यलिङ्गं तत्सङ्कीर्णा उत्प्रेक्षा ॥ ५२ ॥

रागेति । वनितानां सर्वगा अपि सर्वाङ्गगता अपि । "अन्तात्यन्त" इत्यादिना डः । मदश्रीः रागेण कान्तानि नयनानि येषु तेषु विद्रुमवत् अरुणानि कपोलतलानि येषु तेषु मुखेषु दर्पणेषु इव नितान्तं दृष्टशे, तेषां नयनादिनैर्मल्येन रागाभिव्यक्तिसम्भवादिति भावः । अत्र मदश्रीः सर्वगतापि मुखेषु इव दृष्टशे इति विरोधः । तस्य मुखविशेषणैः समाधानात् काव्यलिङ्गानुप्राणितो विरोधवदाभासोऽलङ्कारः । स च उपमया संसृज्यते ॥ ६३ ॥

बङ्क्वेति । बङ्क्वा केपेन विकृतिः याभिः ताः तथाभूताः अपि रामाः कर्म्मचारुता तासां सौन्दर्य्यं कर्त्रा अभिमततां प्रियवल्लभ्यम् उपनिन्ये । सौन्दर्य्यं हि विकृतिम् अपि रोचयते इति भावः । मधुमदः दयितानां वश्यतां विधेयत्वम् उपनिन्ये । तथाहि—

वाससां शिथिलतामुपनाभि
क्ष्वीनिरासमपदे कुपितानि ।
योषितां विदधतौ गुणपक्षे
निर्ममार्ज मदिरा वचनीयम् ॥ ६५ ॥
भर्तृषूपसखि निक्षिपतीना-
मात्मनो मधुमदोद्यमितानाम् ।
व्रीड़या विफलता वनितानां
न स्थितं न विगतं हृदयेषु ॥ ६६ ॥
रुन्धतौ नयनवाक्यविकाशं
सादितोभयकरा परिरम्भे ।

सर्वः आत्मवर्गहितम् इच्छति अतः चारुता स्त्रीत्वात् स्त्रीणाम् उपचकार । मधुमदस्तु पुंस्त्वात् पुंसाम् इति युक्तमित्यर्थः । अत्र विकृता अपि अभिमताः कुपिताः अपि वश्याः इति विरोधस्य चारुतामदाभ्यां समाधानात् उभयथापि विरोधाभासो भवन् अर्थान्तरन्यासेन संसृज्यते ॥६४

वाससामिति । उपनाभि नाभिसमीपे वाससां शिथिलतां क्ष्वीनिरासं लज्जात्यागम् अपदे कुपितानि अस्थानकोपांश्च गुणपक्षे गुणकोटौ विदधतौ निवेशयन्तौ, दोषान् अपि एतान् गुणान् कुर्वतीत्यर्थः । मदिरा अपि योषितां वचनीयम् । "न नाभिं दर्शयेत्" इति शास्त्रनिषिद्धाचरणनिन्दां निर्ममार्ज । तथा दोषाणामपि वस्त्रशैथिल्यादीनां तदानीं गुणत्वात् न कश्चित् वचनीयावकाश इत्यर्थः ॥ ६५ ॥

भर्तृष्विति । उपसखि सखीसमीपे । समीपार्थे अव्ययीभावः । आत्मनः स्वदेहान् । "आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि" इति वैजयन्ती । भर्तृषु निक्षिपतीनां निपातयन्तीनां भर्तॄणामुपरि पतन्तीनामित्यर्थः । "आच्छीनद्योर्नुम्" इति विकल्पात् नुमभावः । कुतः ? मधुमदेन उद्यमितानां प्रेरितानां न तु स्वेच्छया इति भावः । वनितानाम् अनुरक्तस्त्रीणाम् । "वनिता जनितानुरागायां च योषिति" इति विश्वः । हृदयेषु विफलया, अनुचिताचरणादिति भावः । व्रीड़या न स्थितं न विगतम् । वैफल्यात् तस्याः मदोपाधिकत्वाच्चेति भावः । व्रीड़या न स्थितं न विगतम् । वैफल्यात् तस्याः मदोपाधिकत्वाच्चेति भावः । अतएव न उभयनिषेधविरोधः ॥ ६६ ॥

व्रीड़ितस्य ललितं युवतीनां
च्चोबता बहुगुणैरनुजह्रे ॥ ६७ ॥
योषिदुद्धतमनोभवरागा
मानवत्यपि ययौ दयिताङ्कम् ।
कारयत्यनिभृता गुणदोषे
वारुणी खलु रहस्यविभेदम् ॥ ६८ ॥
आहिते नु मधुना मधुरत्वे
चेष्टितस्य गमिते नु विकाशम् ।
आबभौ नव इवोद्धतरागः
कामिनीष्ववसरः कुसुमेषोः ॥ ६९ ॥

रुन्धतीति । नयनानां वाक्यानां च विकाशं प्रागल्भ्यं रुन्धतो प्रतिबध्नतो । तथा परिरम्भे आलिङ्गने सादितौ स्रस्तिभितौ उभौ करौ यया सा युवतीनां सम्बन्धिनी च्चोबता मत्तता । कर्त्तरि क्तः । अनुपसर्गात् "फुल्लच्चोबक्लथोल्लाघा" इति निपातनात् साधुः । च्चोबा मत्ता तस्याः भावः च्चोबता । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । बहुगुणै र्दृष्टिसङ्कोचादिभिः व्रीड़ितस्य व्रीड़ायाः । भावे क्तः । ललितं विलासम् अनुजह्रे अनुचक्रे । कर्त्तरि लिट् । व्रीड़ाकार्य्यकरत्वात् व्रीड़ानुकरणम् इति उपमालङ्कारः ॥ ६७ ॥

योषिदिति । उद्धतः उत्कटः मनोभवेन यो रागः प्रीतिः सः यस्याः सा योषित् मानवती अपि दयितस्य अङ्कं ययौ । यतः मानात् रागः बलीयान् इति भावः । लाघवदोषं परिहरति—कारयतीति । अनिभृता चपला न कार्य्यकारिणीत्यर्थः । वारुणी मदिरा गुणेषु दोषेषु च विषये । सर्वोऽपि इन्द्वः विभाषया एकवद् भवति । रहस्यविभेदं रहस्यभङ्गं कारयति खलु । बलात् निगूहितौ अपि गुणदोषौ प्रकाशयतीत्यर्थः यतोऽतिगूढ़रागप्रकटनं प्रकटमानतरागस्य प्रमत्तायाः न लाघवम् आवहति, अबुद्धिपूर्व्वकत्वादिति भावः ॥ ६८ ॥

आहित इति । मधुना मद्येन चेष्टितस्य रतिव्यापारस्य मधुरत्वे माधुर्य्ये आहिते नु ? सम्पादिते नु ? प्रागसतेव मनोहरत्वे सम्पति उत्पादिते वा । विकाशं गमिते नु प्राक् सतेव माधुर्य्ये प्रकर्षं प्रापिते वा । उद्धतरागः

मा गमन्मदविमूढ़धियो नः
प्रोज्झ्य रन्तुमिति शङ्कितनाथाः।
योषितो न मदिरां भृशमीषुः
प्रेम पश्यति भयान्यपदेऽपि ॥ ७० ॥
चित्तनिर्वृतिविधायि विविक्तं
मन्मथो मधुमदः शशिभासः।
सङ्गमश्च दयितैः सम नयन्ति
प्रेम कामपि भुवः प्रमदानाम् ॥ ७१ ॥

उद्रिक्तरागः। अत एव कुसुमेषोः कामिनीषु अवसरः प्रवेशः नव इव आबभौ नित्यसन्निहितोऽपि मदनः कामिनीषु मदक्षततात्कालिकचेष्टा-माधुर्य्यादुरागोद्रेके सति अपूर्ववत् उद्दीप्तः अभूदित्यर्थः। संशयानुप्राणितेयमुत्प्रेक्षा ॥ ६९

मा गमन्निति। शङ्कितनाथाः अविश्वस्तपुरुषाः योषितः मदेन विमूढ़धियः स्तब्धबुद्धयो नः अस्मान् प्रोज्झ्य विसृज्य। प्रपूर्वात् उज्झतेः समासे अनञ्पूर्वे क्त्वो ल्यप्। रन्तुं मा गमन् न गच्छन्तु इति मनोषयेति शेषः। गमेर्माङि लुङ्, "न माड्योगे" इति अड़ागमप्रतिषेधः। मदिरां भृशम् अतिमात्रं न ईषुः न इच्छन्ति स्म, किन्तु भर्तृवियोगभयात् ईषदेव पपुरित्यर्थः। तथाहि -प्रेम स्नेहः अपदे अस्थाने अपि भयानि अनिष्टानि पश्यति उत्प्रेक्षते, शङ्कते इति यावत्। शङ्काहेतौ प्रेम्णि कर्तृत्वोपचारः ॥ ७०

चित्तेति। चित्तस्य निर्वृतिविधायि सुखकरं विविक्तं रहः। "विविक्तं रहसि स्मृतम्" इति विश्वः। मन्मथः मधुमदः मद्यमदः शशिभासः चन्द्रिकाः दयितैः सह सङ्गमश्च। "वृद्धो यूना" इति निर्देशात् सहशब्दाप्रयोगेऽपि सहार्थे तृतीया। एतानि प्रमदानां स्त्रीणां प्रेम वियोगासहत्वावस्थासम्भोगं कामपि भुवं काश्चित् दशां नयन्ति स्म। रत्यवस्थामपि अतिक्रम्य शृङ्गारावस्थां क्रीड़ामयीं निन्युरित्यर्थः। "प्रेमाभिलाषो रागश्च स्नेहः प्रेम रतिस्तथा। शृङ्गारस्येति सम्भोगः सप्तावस्थाः प्रकीर्त्तिताः॥" इत्युक्तं रसरत्नाकरे। "प्रेमा दिष्टचा रम्येषु तच्चिन्ताप्यभिलाषकः। रागस्तत्सङ्गबुद्धिः स्यात् स्नेहस्तत्प्रवणक्रिया। तद्वियोगासहं प्रेम रतिस्तत्सहवर्त्तनम्। शृङ्गारस्तत्समं क्रीड़ा सम्भोगः सप्तधा क्रमः॥" इति ॥७१

धार्ष्ट्यलङ्घितयथोचितभूमौ
निर्दयं विलुलितालकमाल्ये ।
मानिनीरतिविधौ कुसुमेषु-
र्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥
शौण्डपानविधुरेषु वधूनां
निघ्नतामुपगतेषु वपुःषु ।
ईहितं रतिरसाहितभावं
वीतलज्ज्यमपि कामिषु रेजे ॥ ७३ ॥
अन्योन्यरक्तमनसामथ विभ्रतीनां
चेतोभुवो हरिसखाप्सरसां निदेशम् ।
वैवोधिकध्वनिविभावितपश्चिमार्द्धा
सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥

क्रीड़ाधर्म्यामाह—धार्ष्ट्येति । धार्ष्ट्येन प्रागल्भ्येन लङ्घिता अतिक्रान्ता यथोचिता योग्या भूमिः मर्य्यादा यस्मिन् तथोक्ते । चुम्बनताड़नमण्डितसत्कारपुरुषायितादौ स्वयम् उच्छृङ्खलवृत्तिरिति भावः । निर्दयं यथा तथा विलुलितानि आकर्षणाकुलितानि अलकमाल्यानि च यस्मिन् तस्मिन् मानिनीरतिविधौ सुरते कुसुमेषुः कामः मत्तमत्तः मत्तप्रकार इव विभ्रमं विजृम्भणम् आप प्राप । मत्तः किं न करोतीति भावः । कारयितरि कर्त्तृत्वोपचारात् उत्प्रेक्षा ॥ ७१ ॥

शौण्डेति । शौण्डपानेन मद्यपानेन विधुरेषु विह्वलेषु । "मैरेयमासवः शौण्डः" इत्यमरः । अत एव वपुःषु अङ्गेषु निघ्नतां प्रियपराधीनतामुपगतेषु सत्सु । "अधीनो निघ्न आयत्तः" इत्यमरः । वधूनां सम्बन्धिनि रतिरसे सुरतरसास्वादे आहितभावं दत्तचित्तं कामिषु विषये ईहितं चुम्बनताड़नादिचेष्टितं वीतलज्जं निर्विषयम्. अस्थानकृतमपीत्यर्थः । रेजे रागिणां स्खलितम् अपि शोभते इति भावः । विरोधालङ्कारः ॥ ७२ ॥

अन्योन्येति । अथ हरिसखाः इन्द्रसचिवाः गन्धर्वाः तेषाम् अप्सरसां च अन्योन्यरक्तमनसां परस्परानुरक्तचित्तानां चेतोभुवः कामस्य निदेशम् आज्ञां विभ्रतीनां स्मरविधेयानां, तासु रममाणास्वेव इत्यर्थः । "षष्ठी

निद्राविनोदितनितान्तरतिक्लमाना-
मायामिमङ्गलनिनादविबोधितानाम् ।
रामासु भाविविरहाकुलितासु यूनां
तत्पूर्वतामिव समादधिरे रतानि ॥ ७५ ॥
कान्ताजनं सुरतखेदनिमीलिताक्षं
संवाहितुं समुपयानिव मन्दमन्दम् ।
हर्म्येषु माल्यमदिरापरिभोगगन्धा-
नाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥

चानादरे" इति षष्ठी । विबोधः प्रबोधनं ग्रोलम् एषां ते वैबोधिकाः वैतालिकाः । "ग्रोलम्" इति ठक् । तेषां ध्वनिभिः मङ्गलरवैः विभावितः अभ्यूहितः ज्ञातः पश्चिमार्द्धः चरमभागो यस्याः सा तथोक्ता सा रात्रिः संकुचिता संक्षिप्ता एवेति उत्प्रेक्षा । सुखिनां भूयानपि कालः लघीयानिव भवतीति भावः । परिवृत्तिं विवृत्तिम् इयाय प्रभातकल्पा अभूदित्यर्थः॥७४

निद्रेति । निद्रया विनोदितः अपनीतः नितान्तम् अत्यर्थं यः रत्याः क्लमः सः येषां तेषाम् आयामिभिः आयामवद्भिः दीर्घैः मङ्गलनिनादैः वैबोधिकध्वनिभिः विबोधितानाम् यूनां रामासु । "सुन्दरी रमणी रामा" इत्यमरः । भाविविरहेण आकुलितासु सतीषु रतानि तान्येव पूर्वाणि प्रथमानि तत्पूर्वाणि तेषां भावः तत्पूर्वता ताम् । भावे तल्प्रत्ययः । समादधिरे प्रापुः इवेत्युत्प्रेक्षा । आद्यसुरतवत् आदरात् प्रवर्त्तन्ते इत्यर्थः । यदुत्तरकालं दुर्लभं तत् अतितृष्णया अनुभूयते इत्यर्थः ॥ ७५ ॥

कान्तेति । सुरतखेदेन निमीलितानि अक्षीणि येन तं कान्ताजनं स्त्रीसमूहं संवाहितुं सेवितुम् इव, खेदापनोदार्थम् अङ्गमर्दनं कर्त्तुमिवेत्यर्थः । "संवाहनं वाहनेऽपि नरादेरङ्गमर्दने" इति विश्वः । "वाह प्रयत्ने" इति धातोः अण्यन्तात् तुमुन् । अन्यथा णिजभावग्रहणे संवाहयितुमिति स्यात् । मन्दमन्दं मन्दप्रकारम् । "प्रकारे गुणवचनस्य" इति द्विर्भावे कर्म्मधारयवद्भावात् सुपो लुक् । समुपयान् संवान् रजनीपरिवृत्तिवायुः निशावसानमरुत् । हर्म्येषु माल्यानि च मदिरा च परिभोगः विमर्दश्च तेषां गन्धान् आविश्चकार बहिः प्रसारयामास इत्यर्थः । अत्र

आमोदवासितचलाधरपल्लवेषु
निद्राकषायितविपाटललोचनेषु ।
व्याघृष्टपत्रतिलकेषु विलासिनीनां
शोभां बबन्ध वदनेषु मदावशेषः ॥ ७७ ॥
गतवति नखलेखालक्ष्यतामङ्गरागे
समददयितपीतातास्रविम्बाधराणाम् ।
विरहविधुरमिष्टा सत्सखीवाङ्गनानां
हृदयमवललम्बे रात्रिसम्भोगलक्ष्मीः ॥ ७८ ॥

इति * * * सुरसुन्दरीसम्भोगवर्णनं नाम
नवमः सर्गः ॥ ९ ॥

संवाहितुमिव इत्युत्प्रेक्षा । मान्द्यगुणमूलत्वात् गुणनिमित्तक्रियाफला उत्प्रेक्षा ॥ ७६ ॥

आमोदेति । आमोदेन मद्यगन्धेन वासिताः सुरभिता चलाः दष्टमुक्तत्वात् स्फुरन्त्यश्च अधरपल्लवाः येषु तेषु, निद्रया कषायितानि अपटुक्तानि विपाटलानि लोचनानि येषु तेषु । "कषायस्तुवरे न स्त्री निर्य्यासे रञ्जकादिके । सुरभावपटौ रक्ते सुन्दरे लवणेऽपि च ॥" इति केशवः । व्याघृष्टानि प्रमृष्टानि पत्राणि तिलकाश्च येषां तेषु, विलासिनीनां वदनेषु मदावशेषः शोभां ववन्ध । मण्डनान्तरापाये मदशेष एव मण्डनं बभूव इत्यर्थः । स्त्रीणां मद एव विभूषणमिति भावः ॥ ७७ ॥

गतवतीति । अङ्गरागे अङ्गविलेपने नखरेखासु लक्ष्यतां दृश्यतां गतवति सति विमर्दात् तन्मात्रावशेषे सतीत्यर्थः । किञ्च बिम्बतुल्याः अधराः बिम्बाधराः । "शाकपार्थिवादित्वात् मध्यमपदलोपी समानाधिकरणसमासः" इति वामनः । समदैः दयितैः पीताः पीडिताः अतएव अतिपीडनात् आताम्राः आसमन्तात् रक्ताः बिम्बाधराः यासां तासाम् अङ्गनानां सम्बन्धि विरहेण आङ्गिकेन वियोगेन विधुरं विह्वलं हृदयं रात्रिसम्भोगलक्ष्मीः नखपदादिशोभा इत्यर्थः । इष्टा आप्ता सत्सखीव